॥ अथ तत्वप्रकाशिकाव्याख्या शर्करा प्रारभ्यते ॥

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

श्रीलक्ष्मीनृसिंहप्रसन्नः

भोः भोः श्रीमदानंदतीर्थमतानुयायिनः भवतां विज्ञप्तिरियं श्रीमल्लवबोधकृतश्रीमद्ब्रह्मसूत्रभाष्यटीकायाः श्रीमज्जयतीर्थश्रीमच्चरणरचितायाव्याख्यानरूपशर्करोपाभिधश्रीनिवासतीर्थविरचितवाक्यार्थमंजरीनामकटिप्पण्याख्योग्रंथः बहुजीर्णग्रंथप्रतिसंकलनेन बहुश्रमेण विद्वज्जनसाहाय्येन संशोध्य मुद्राक्षरैः मुद्रितः खलु तथापि इदानीं देशोपद्रवजन्यमनोव्याकुलतया तत्प्रसक्तानेकदुर्धरप्रसंगैरनवकाशतः गच्छतः स्स्वलनमिव हस्तदोषादिना वा यत्किंचिद्दोषादिकं ग्रंथे उपलब्धंचेत् हंसक्षीरन्यायेन तद्गतदोषानगणय्य गुणग्रहणेन क्षंतुमर्हथ। अपिच प्रतीतदोषाणां लेखनद्वारा सूचने कृते उत्तरत्र द्वितीयावृत्तावपि संशोध्य अंकयामः। किंचेदमप्यभ्यर्थयामः परं अंकनार्हाः अद्यापि कुत्रापि कैरप्यनंकिताः प्राचीनाः अथवा स्वकपोलकल्पिताः सर्वेषामुपयुक्ततया संग्रहयोग्याश्चेत् प्रेषणीयाः तानप्यंकयिष्यामः ग्रंथप्रेषणनिमित्तोपकारस्य प्रत्युपकारमपि कुर्मः।

विद्वज्जनाज्ञाधारकः शिष्यः श्रीनिवासः

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीलक्ष्मीवेंकटेशायनमः ॥ श्रीमदस्मद्गुरुवरयादवार्यकरपूजितगुणपूर्णबादरायणायनमः ॥ श्रीमदानंदतीर्थभगवत्पादाचार्येभ्योनमः ॥ श्रीगुरुभ्योनमः ॥ निरंतरायोस्तु ॥ रामंसर्वगुणैःपूर्णंनिर्दोषंसाधुसेवितं ॥ मुक्तिदंजानकीकांतंप्रणमामिनिरंतरं ॥ १ ॥ ज्ञानभात्दत्तमोहर्ताश्रुतिपंकजबोधकः ॥ व्यासांशुमान्दर्शयतुसन्मार्गंगुणमंडलः ॥ २ ॥ वाग्ज्योत्स्नाध्वस्ततद्वांतंविबुधाब्ध्यर्धिसाधकं ॥ शुद्धाध्वबोधकंसेवेनित्यंमध्वविधुंविदे ॥३॥ मध्वसिद्धांतमामथ्यशुद्धधीमंदराद्रिणा ॥ लब्धान्यायसुधायेनतंजयींद्रमहंभजे ॥ ४ ॥ दुर्वादिमातंगसिंव्हान्सर्वशास्त्रार्थकोविदान् ॥ व्यासराजमुखान्पूर्वव्याख्यातॄन्प्रणमाम्यहं ॥ ५ ॥ दुर्मार्गादुत्धृतोयैश्चसन्मार्गेसंप्रवेशितः ॥ तान्गुरून्सततंसेवेसर्वशास्त्रविशारदान् ॥ ६ ॥ अथैतत्कृपयाब्रह्मसूत्रभाष्यप्रकाशिकां ॥ व्याकरिष्येयथाबोधंवाक्शुध्यैनाभिमानतः ॥ ७ ॥ पूर्वाचार्यकृताःसंतिव्याख्याविद्वन्मनोहराः ॥ मंदबोधायतत्रोक्तसंग्रहोथाप्ययंमम ॥ ८ ॥ इहखलुतापत्रयपरिशुष्यत्सत्कुमुदमोदकरीं श्रीमध्वदुग्धाब्धिसंभूतभाष्येंदूदितकौमुदीं परतत्वप्रकाशिकांकर्तुकामोजयतीर्थमुनिः प्रारिप्सितविघ्नपरिसमाप्त्यादिप्रयोजनकशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकेष्टदेवतास्तुतिनतिरूपंमंगलंकृत्वाशिष्यशिक्षायैग्रंथादावुपनिबध्नाति ॥ शुद्धेति ॥ अस्मद्युत्तमइतिसूत्रेणास्मच्छब्दएवउपपदत्वेनश्रूयमाणेअश्रूयमाणेवातदर्थविवक्षायांउत्तमपुरुषोभवतीत्युक्त्या उत्तमपुरुषस्यास्मच्छब्दाविनाभावादेवात्रवंदइत्युत्तमपुरुषप्रयोगादेवाहमितिकर्तालभ्यते । तथाच । अहंब्रम्हअलंवंदइत्यन्वयः । इदंपद्यंभाष्याद्यपद्यव्याख्यानरूपं । तथाहि । आद्याध्यायार्थतयोक्तंगुणैःसर्वैरुदीर्णमिति । अत्रगुणपदंतार्किकरीत्यादुःखादिपरंवेदांतरीत्यासत्वादिपरंवा । नाद्यः । निरानिष्टोनिरवद्यइतिश्रुत्यादोषवर्जितमितिस्ववचनेनचविरोधात् । नद्वितीयः । केवलोनिर्गुणश्चेतिश्रुतिविरोधात् । किंचगुणैःसर्वैरुदीर्णमितिगुणावि-

Sri Gargeshwari Digital Foundation

शिष्टत्वोक्त्यागुणगुणिनोर्भेदःप्रतीयते । सचगुणक्रियादयोविष्णोःस्वरूपंनान्यदिष्यतइत्यादिविरुद्धः । अपिचेश्वरस्य देहोस्तिवानवा । नाद्यः । मरणादिप्रसंगेनदोषवर्जितत्वायोगात् । नाद्वितीयः । विवृणुतेतनूंस्वामित्यादिश्रुतिविरोधात् । ज्ञानसुखाद्ययोगेनसर्वगुणोदीर्णत्वायोगाच्चेत्यतउक्तं ॥ **शुद्धेति** ॥ अत्रशुद्धत्वंनामाप्राकृतत्वं । आनंदादेःसर्वस्य विशेषणं । उरुत्वंपूर्णत्वंसंविदादेर्बुध्याविविक्तमानंदस्यापिविशेषणं । बहुलत्वंबहुसंख्यावत्वं । औदार्यादेर्बुध्याविविक्तमानंदादेर्विशेषणं । अत्रगुणस्वरूपनिरूपणेनतेषांभगवदभिन्नदेहाभिन्नत्वोक्त्याअविनाशगुणात्मकदेहोक्त्याचोक्तशंकानिरासइतिध्येयं । द्वितीयाध्यायार्थतयोक्तंदोषवर्जितामिति । अत्रदोषपदंयत्किंचिद्दोषपरंचेदितरसाधारण्यं वर्जितत्वस्यप्रागभावप्रध्वंसान्यतरत्वेपश्चात्प्राग्दोषित्वप्रसंगः । दोषैर्वर्जितंपरित्यक्तमितिप्रतीत्यानारायणस्यहेयत्वंचप्रसज्यतइत्यतउक्तं ॥ **चिंतेति** ॥ लेपःकर्मसंबंधः चिंतादयोमुखराः प्रधानाः येषुतथोक्ताः तेचतेअशेषदोषाः अत्यंतदूरीकृताः येनतत्तथोक्तं । तत्रअशेषातिपदाभ्यांदोषाः वर्जिताः येनेतिविग्रहसूचनेनचपूर्वोक्तशंकानिरास इतिध्येयं । तृतीयाध्यायार्थतयोक्तंज्ञेयमिति । अत्रज्ञानसाधनं नतावच्छ्रवणादि । विरोचनादेः श्रवणादिनाविपरीतज्ञानोदयात् । नापिध्यानं । मांडव्यादेर्ध्यानेनानर्थस्यैवश्रुतत्वात् । गमनोपायाभावाच्चतुर्थाध्यायार्थगम्यत्वंचानुपपन्नमित्यतउक्तं ॥ **सद्भिरिति** ॥ श्रुतिःश्रवणं मतिर्मननं नियतध्यानं स्वयोग्योपासनं ज्ञानं साक्षात्कारः सएवयोग उपायः । विरोचनादेरसज्जनत्वात् । मांडव्यादिभिरयोग्यध्यानाचरणान्नतेषांज्ञानोदयः । ज्ञानलक्षणोपायसद्भावाद्गम्यत्वंचोपपन्नमितिभावः । मायिरीत्यागुणविशिष्टमिदंब्रह्मशबलमितिनमंतव्यमित्याशयेनोक्तं । अमलमिति । नविद्यतेमलंसंसाराख्यंयस्मात्तत्तथोक्तं । शबलंतुनसंसारमोचकं । अतएवमुकुंदाभिधं । स्वोक्तार्थेसर्वत्रप्रमाणमाह ।

SGDF Sri Gargeshwari Digital Foundation

वेदांतवेद्यमिति । आनंदोब्रह्म ज्ञानात्मकोबलात्मकोभारूपः सत्यकामः दातुःपरायणं वीर्यमन्नाद्यं ब्रहंतोह्यस्मिन्गुणाः ।
गुणाःश्रुताः सुविरुद्धाश्चदेवे संत्यश्रुत्ताः । यदात्मकोभगवांस्तदात्मिकाव्यक्तिः । नकर्मणावर्धते । अजआत्माविज-
रोविमृत्युः । ब्राह्मणोनिर्वेदमायात् । यमेवैषवृणुते । आत्मावाअरेद्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः ।
यमप्येतिभुवनंसांपराये तरतिशोकमात्मविदित्याद्युपनिषद्भिरुक्तविधयाज्ञेयमित्यर्थः । यद्वावेदानामंतोनिर्णयोयस्मा-
त्तद्वेदांतं ब्रह्ममीमांसाशास्त्रंतेनोक्तविधयाज्ञेयमित्यर्थः । तथाहि । आनंदमयोभ्यासादित्यत्रपूर्णानंदसंविदादिकं ।
अनुकृतेस्तस्यचेत्यत्रद्युतिः । अत्ताचराचरग्रहणादित्यत्रसर्वसंहर्तृत्वोक्त्यावीर्यबले । मुक्तोपसृप्यव्यपदेशादित्यत्रमो
क्षदातृत्वोक्त्यौदार्यं । रूपोपन्यासादित्यत्राप्राकृतदेहवत्वं । अधिकंतुभेदनिर्देशादित्यत्रचिंतासंतापाद्यभावः । नकर्मा
विभागादितिचेन्नानादित्वादित्यत्र कर्मणोऽस्वातंत्र्योक्त्यातल्लेपाभावः । असंभवस्तुसतोनुपपत्तेरित्यत्रोत्पत्यभावः ।
नात्माश्रुतेर्नित्यत्वाच्चताभ्यइत्यत्रमृत्यभावः । असार्वत्रिकीत्यत्रयोग्यता । तृतीयाद्यैवैराग्यं द्वितीयेभक्तिस्तृतीयेश्रुतिम
तिनियतध्यानानि चतुर्थेज्ञानं पुरुषार्थोतःशब्दादितिबादरायणइत्यत्रज्ञानस्यपुरुषार्थोपायत्वंचोक्तमिति । नारायण
पदस्यप्रतिपदंब्रह्मेति । अथवासंक्षेपविस्ताराभ्यां हिप्रवदंतिमनीषिणइतिवचनात्सर्वेषामपिपदानांविशेषणचतुष्टयव्या
ख्यानरूपत्वं । तथाहि । सकृदुच्चरितस्यापिब्रम्हशब्दस्यतंत्रन्यायेनतात्पर्यवशाद्विशेषणसमर्पकत्वंचास्ति । तथाच
गुणैःसर्वैरुदीर्णमित्यस्यसंग्रहोब्रह्मशब्देनक्रियते। दोषवर्जितमित्यस्यामलमिति। ज्ञेयमित्यस्यव्याख्यानंवेदांतवेद्यमिति।
गम्यमित्यस्यमुकुंदाभिधमिति ब्रह्मशब्दार्थःशुद्धेति। अमलशब्दार्थश्चितेति। वेदांतवेद्यमुकुंदाभिधशब्दयोरर्थःसद्भिरिति।
षद्वावक्ष्यमाणरीत्यानारायणशब्दस्यगुणपूर्णत्वनिर्दोषत्वमुक्तगम्यत्वार्थकत्वान्निर्दोषत्वान्नारावेदा वेद्यतयातदाश्रयत्वा

SGDF
Sri Gargeshwari Digital Foundation

नारायणइतिवेदवेद्यत्वार्थकत्वाच्चक्रमेणतत्समानार्थकैर्ब्रह्मामलमुकुंदाभिधवेदांतवेद्यपदैर्नारायणपदव्याख्यानंक्रियते । शिष्टंप्रथमवत् । इत्थंव्याख्यानत्रयेअमलमित्यस्यचिंतासंतापेत्यादिनागतार्थतेतिशंकागर्भस्रावेणपरास्तेतिध्येयं ॥ १ ॥ इदानींगुरूंश्चेतिविवृण्वन्व्याचिख्यासितभाष्यमूलसूत्रप्रामाण्यंचसूचयन् तत्कर्तृवेदव्यासंप्रार्थयते ॥ **यान्नेति** ॥ निर्जरैः प्रार्थनाख्यमंदरपर्वतमथितात् यतोविघ्नेंदिरादीनामुदयादिः सोयमित्यन्वयः । भूत्यैज्ञानैश्वर्याय । पुराणादेः पृथगभिधानाद्विद्याशब्दोवेदमात्रपरोज्ञेयः ॥ **ब्रह्मसूत्रेति** ॥ ब्रह्मेतितंत्रं। तथाचब्रह्मणोविष्णोः संबंधियत्ब्रह्मवेदजातंतस्यसूत्राणितद्विचारकरणीभूतन्यायनिबंधनात्मकवाक्यानीत्यर्थः । यद्वाब्रह्मणः श्रुतिजातस्यसूत्रंतन्निर्णायकन्यायनिबंधनात्मकशास्त्रमित्यर्थः। तंत्रंपंचरात्रं। अत्रविद्यायाःलक्ष्म्यभिमन्यमानत्वाल्लक्ष्मीत्वेनभारतस्यधर्माद्यशेषपुरुषार्थदातृत्वात्पारिजातत्वेन ब्रह्मसूत्रस्यस्वश्रवणरूपसेवनवतां अजरामरणहेतुत्वादमृतत्वेन पुराणानांविष्ण्वादितत्वप्रकाशकत्वान्मणित्वेनशुकाचार्यस्यसज्जनाल्हादकरत्वादिंदुत्वेनोत्प्रेक्षायुक्ता । वेदविद्यायाः अभिव्यक्तिमात्रसत्वेपिव्यासजन्यत्वाभावात् रमायाअपिअब्धिजन्यत्वाभावादुदैदित्युक्तिः । क्षीराब्धिसाम्योपपादनेनलब्धैश्वर्यदानसंभावनायोक्तं सतांभूतिदइति । ननु कर्मणायमभिप्रैतिससंप्रदान मितिसंप्रदान संज्ञायांचतुर्थीसंप्रदानइति चतुर्थीविधानाद्विप्रायगांददातीत्यादाविवसद्भ्यइतिचतुर्थ्याभाव्यं । अतः कथंसतामितिषष्ठीतिचेत् उच्यते कर्मणेतिसूत्रेअर्चोत्यादिटीत्यादाविवलघुसंज्ञायाः कार्यत्वेपिसंप्रदानमितिगुरुसंज्ञाकरणमन्वर्थत्वज्ञापनार्थं तेनबहुमानपूर्वकस्वस्वत्वपरित्यागेनपरस्वत्वापादनरूपंदानं यत्रतत्रैवसंप्रदानत्वंनान्यत्ररजकस्यवस्त्रंददातीत्यादाविति वृत्त्यादावुक्त्या अत्रतादृशदानाभावेनसंप्रदानसंज्ञायाः अभावेपिसंबंधसामान्येषष्ठ्युपपत्तिरितिज्ञेयं ॥ **सतामिति** ॥ अत्रव्यासइतिनिर्देशेनतस्यशास्त्रप्रभवत्वोक्त्यागुरुत्वोपपादनेनगुरूं

SGDF
Sri Gargeshwari Digital Foundation

श्रेत्येतद्विवृतं। यतउदैद्विर्द्वेदिरेत्यादिनाविर्द्वेदिराधिष्ठानत्वोक्त्याविवक्षितार्थतत्वज्ञानलाभात् वक्त्रानुकूल्यं निर्जरैरित्या
दिनातत्वज्ञानयोग्यतालाभात्। श्रोत्रानुकूल्यं यान्नेत्यनेनश्रोतृप्रयोजनोद्देश्यरूपप्रसंगानुकूल्यंचदर्शयतावक्तृश्रोतृप्रस-
क्तीनांयदाप्तिरनुकूलतेत्यनुव्याख्यानोक्ताप्तिमूलतासूत्राणांसूचिता ब्रह्मसूत्रपदेनोक्तव्याख्यानानुसारेण श्रुतिमूलत्वंसू
त्रशब्देनयुक्तिमूलत्वंचसूचितं। तथाचआप्तवाक्यतयातेनश्रुतिमूलतयातथा। युक्तिमूलतयाचैवप्रामाण्यंत्रिविधंमहत्।
दृश्यते ब्रह्मसूत्राणामित्युक्त्याप्रमाणभूतब्रह्मसूत्रार्थभाष्यव्याख्यानंयुक्तमितिद्रष्टव्यं। ननुस्तोश्चुनाश्चुरितियान्नेतिनकार
स्यचवर्गात्यत्रकारादेशेयाच्चेतिभवेत् कथंयान्नेति अतएवकाशिकायांयजेर्यङ्ः याचेर्याच्चेत्युक्तमितिचेत् यान्नामोघा
वरमधिगुणैनाधमेलब्धकामेत्यादिबहुप्रयोगनिर्वाहायचुत्वाभावस्यापिक्वचिद्वक्तव्यत्वात् ॥२॥ भाष्यस्यव्याख्येयत्वप्रयो
जकसफलत्वगंभीरत्वादिदर्शयन्तत्कर्तारमानंदतीर्थंप्रणमति ॥ स्वांतेति ॥ येषांमुखकमलात् भाष्यंआविर्भूतंतान्पू
र्णबोधपूज्यस्वरूपान्प्रपद्यइत्यन्वयः। भाष्यस्यश्रुतिस्मृतिप्रचुरत्वेनोत्पन्नमित्यनुक्त्वा आविर्भूतमित्युक्तं। अतएवो
त्तरत्रापिनिःसृतमितिवक्ष्यंति। अमंदबोधत्वोपपादनायभाष्यकृत्त्वोक्तिः मानसाज्ञानाख्यतमश्छेदनविषयेपराजित
महासूर्यरश्मिसमूहमित्यनेनाध्यात्मिकादितापत्रयनिवारणविषयेपराजितचंद्रप्रभमित्यनेनचसफलत्वोक्तिः गांभीर्येत्या
दिनागंभीरत्वोक्तिरितिविवेकः वैकर्त्तनांशुव्रजचंद्रचंद्रिकयोः क्रमेणबाह्यांधकारबाह्यतापवारकत्वेपिस्वांतध्वांततापत्रय
निवारणयोरशक्यत्वाद्भाष्येणजितत्वं। तथोपरागादौन्हासादिदोषयुक्तत्वान्निर्दोषभाष्येणजितत्वं। अनेनैतादृश
भाष्यविशिष्टाचार्यमुखस्यसूर्यचंद्रबिंबाधिक्यंध्वनितं। लक्षादियोजनपरिमितसमुद्रस्यापरिमितभाष्येणजितत्वं अत्रा-
प्यमितत्वमर्थतएव भाष्यंचात्यर्थविस्तरमित्युक्तेः। नतुशब्दतः ग्रंथस्यपरिमितत्वात्। ननुनिपूर्वकात्कृतीच्छेदनइत्य

SGDF
Sri Gargeshwari Digital Foundation

स्माद्धातोः ल्युटप्रत्ययेनुमागमेअनादेशेचनिकृंतनमितिभवति तत्रनुमागमः केनइदितोनुम्धातोरित्यनेनेदितएवनुमागमविधानात् कृतीत्यस्यचानिदित्त्वादितिचेत्सत्यं । नखनिकृंतनेत्यादिप्रयोगसमर्थनायधातोरितियोगविभागेनानिदितोपिनुमागमस्यव्याख्येयत्वात् अतएवेदितोनुम्ततोधातोरितिमहाभाष्येभिहितं ॥ ३ ॥ अथपरमगुरूणांसन्न्यायरत्नावलीकाराणांकृपालेशंप्रार्थयते ॥ **श्रीमध्वेति** ॥ येपद्मनाभतीर्थाः एषांकृपालेशः मयिनित्यंस्यादितिसंबंधः तेषामेवकृपाराहित्येतत्प्रार्थनमयुक्तं । अतउक्तं कृपालवइति । कारुणिकाइत्यर्थः । द्वेषादिदोषवत्वेकृपालुत्वमेवासिद्धमित्यतउक्तं । अमलाइति कस्मिन्विषयेकृपाप्रार्थनमित्यतउक्तं । श्रीमध्वेति । श्रीमदानंदतीर्थसेवाप्राप्तनिर्दोषाविद्ययामृतसमुद्राइत्यर्थः । अनेनविद्याविषयेकृपाप्रार्थनमितिसूचितं यद्वातीर्थपदप्रयोगलब्धप्रसिद्धतीर्थसाम्यनिरासायविशेषणत्रयं । ननुकृपालवइतिकथंस्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाभ्यआलुजितिसूत्रेणकृपेरालुच्प्रत्ययस्याविहितत्वादितिचेत्सत्यं तथापिव्याकरणांतरात्कृपेरालुच्प्रत्ययोबोध्यः । यद्वानायमालुच्प्रत्ययः किंतुकलशवाचकोयमालुशब्दः । कर्कर्यालुर्गलंतिकेत्यभिधानात् । तथाचकृपापूर्णकलशाइत्यर्थः । इदंचप्रकारद्वयंनष्टधर्मज्ञानलोककृपालुभिरितिगीताभाष्यव्याख्यानावसरेप्रमेयदीपिकायांव्यक्तं । अथवाउदाहृतसूत्रेआलुच्प्रत्ययमविधायलुशूप्रत्ययाविधानेपितस्याशित्वेनतिङ्शित्सार्वधातुकमितिसार्वधातुकसंज्ञायांकर्तरिशबिति शपिसतिपुगंतलघूपदस्य चेतिगुणेअयादेशेचअतोदीर्घइति दीर्घेसतिण्यंतानांस्पृहीत्यादीनांस्पृहयालुरित्यादिरूपसिद्धावप्यालुच्करणंकृपालुरित्यादिरूपसिद्ध्यर्थमितिमंजर्यांतृतीयाध्यायस्यतृतीयपादे अभिहितत्वादत्रापिकृपेरालुच् प्रत्ययेकृतेसंज्ञापूर्वकोविधिरनित्यइतिपुगंतस्य लघूपदस्यचेतिगुणाभावेचकृपालुरितिसाधुः । अतएवकौमुद्यांहरेकृपालोनः पाहीत्युक्तं ॥ ४ ॥ स्वगुरून्नमति ।

SGDF
Sri Gargeshwari Digital Foundation

॥ **श्रीमदिति** ॥ श्रीमद्रमारमणाख्यसद्गिरिचरणाख्यप्रत्यंतपर्वतसंबंधवान् तदाश्रितइतियावत् । पादाःप्रत्यंतपर्वता इत्युक्तेः । सचासौव्याख्यानध्वनिनाविनाशिताखिलदुर्वादिमदश्चतं । दुर्वादिगजविपाटनसमर्थसंकल्पमित्यर्थः ॥ ५ ॥ इदानींशिष्यमनः समाधानायचिकीर्षितंप्रतिजानीते । **अथेति** । तत्कृपया तेषांनमस्कृतानांमुकुंदादीनांकृपया आनंदतीर्थभगवद्वचसां विशिष्टव्याख्यानकर्मणिसुराद्यधिकारिणोत्रेतितत्वनिर्णयटीकांतेस्वेनैवोक्तत्वात्कथं व्याकुर्वे इतिप्रतिज्ञेत्यतउक्तं ॥ **यथामतीति** ॥ विशिष्टव्याख्यानकरणेदेवानामधिकारेपियथामतिव्याख्यानकरणे अस्माकमप्यधिकारोस्तीतिभावः ॥ ६ ॥ व्याकुर्वेइत्यात्मनेपदप्रयोगेणलब्धमात्मगामिव्याख्यानप्रयोजनमाह ॥ **गंगेति** ॥ भागीरथीसंबंधेनरथवीथिकाजलैर्नैर्मल्यंयथालभ्यते तथामदीयायाःवाचोविशुद्धिसिध्यर्थंआनंदतीर्थीयवाक्यानिमदीययावाचाव्याख्यानव्याख्येयभावेनसंबध्यंतइत्यर्थः । वाचोविशुद्धीत्युक्तत्वेनमदीययावाचेत्यर्थस्यसिद्धत्वान्नोक्तं । ननुऋक्पूरब्धूः पथामानक्षइत्यनेनसमासांतादप्शब्दात् अकारस्यविहितत्वेनविमलापैः सरोवरेरित्यादिवत् रथ्यापैरितिव्वक्तव्येकथंरथ्याद्भिरितिवचनमितिचेत्सत्यं । समासांतोविधिरनित्यइत्येतत्साधु एतत्सूचनायैवसूत्रेपथामितिउक्तं । अन्यथापंथानामित्यवक्ष्यत् । अतएवमहाभाष्येशुच्यंपानितटाकानीतिवक्तव्येशुच्यंपितटाकानीत्युक्तं ॥ ७ ॥ नन्वाचार्यैर्भाष्यंनारंभणीयंप्रयोजनाभावात् । नचसूत्रव्याख्यानंप्रयोजनं । अन्यैर्व्याख्यातत्वात् अस्तुवाआरंभणीयत्वं। तथाप्याद्यपद्यंव्यर्थं नचमंगलनिबंधनार्थंतदितिवाच्यं फलाभावेनतस्यैवाकर्तव्यत्वात्। अस्तुवाकर्तव्यत्वं नतस्यनिबंधनंतथापिसूत्रार्थउच्यतइत्यंशोव्यर्थइत्याशंकाः पराकुर्वन्नाद्यपद्यमवतारयति ॥ **अथेति** ॥ अथाविघ्नेत्यारभ्याचार्यवर्यइत्यंतेनआद्यशंकायाः प्रारिप्सितेत्यारभ्यसमाप्त्याद्यर्थमित्यंतेन द्वितीयायाः ग्रंथारंभेत्यादिनातृतीयायाश्चनिरासइतिध्येयं ।

Sri Gargeshwari Digital Foundation

ननुमंगलानंतरारंभप्रश्नकात्स्न्र्येष्वथोअथेतिस्मरणादत्राथशब्दः किंमंगलार्थः उतानंतर्यार्थः अथप्रारंभार्थः यदिवाप्रश्नाद्यर्थः। नाद्यः। मंगलस्यकृतत्वात्। नद्वितीयः। कस्याप्यर्थस्यभाष्येपूर्वमप्रकृतत्वात्भाष्यकृन्नमनस्यटीकाकृद्व्याख्याप्रतिज्ञानंतर्यायोगाच्च। नतृतीयः। व्याकुर्वेइत्यनेनव्याख्याप्रारभ्यतइतिलाभात्। नचतुर्थः। उतराद्यनुपलंभात्। अतोव्यर्थइतिचेत्। अत्रब्रूमः। आचार्यवर्यः ब्रह्मसूत्राणियथावद्व्याचिख्यासुर्नमस्कारंग्रथयतिग्रंथारंभंचप्रतिजानीतेत्युक्तेइयंशंकोन्मिषति। ननुसूत्रव्याख्यानार्थंप्रवृत्तेनाचार्येणतदेवकार्यंकिमनेनासंगतेननमस्कारादिग्रथनेनेत्यतउक्तं। अथव्याचिख्यासुरिति। देवतानमनग्रथनादिकरणानंतरंव्याचिख्यासुरित्यर्थः। तथाचबुभुक्षुः स्नानंकरोतीत्यादौस्नानस्यभोजनइव देवतानमनग्रथनादेर्व्याख्यानोपयोगलाभान्नासंगतिरितिभावः। अथवाबुद्धिस्थबुद्धचार्वाकतार्किककाणादकापिलाख्यपंचमतप्रवृत्यनंतरमित्यर्थः। अन्यथाव्याख्यातानीत्यनेनसंबंधः। पंचमतप्रवृत्यनंतरमेवान्यैरन्यथाख्यातत्वात्। यद्वासामान्यतः पूर्वंसमग्रग्रंथ व्याख्याप्रारंभेपिप्रतिग्रंथव्याख्याप्रारंभार्थोऽथशब्दः। **अविद्यापटलपिहितनयनैरिति**। अविद्यया अयोग्यतालक्षणयासूत्रतात्पर्यार्थापरिज्ञानरूपयाचनेत्रबंधाद्याच्छादितनयनाइववर्तमानैरित्यर्थः। अन्यथाव्याख्यानबीजायथार्थ ज्ञानोपपादनायैतत्। **अन्यैरिति**। भारतीविजयश्चैवसच्चिदानंदएवच। ब्रह्मघोषःशतानंदउद्धर्तश्चैवपंचमः। विजयोरुद्रभट्टश्च वामनाख्यस्तथाष्टमः। सयादवप्रकाशश्च नवमस्तत्रकीर्तितः॥ रामानुजस्तथाभर्तृप्रपंचोद्रविडस्तथा। ब्रह्मदत्तोभास्करश्चविशाखोवृत्तिकारकः। तथाविजयभट्टश्चविष्णुक्रांतस्तथैवच। वादींद्रस्तुततःपश्चात् तथामाधवदासकः। तथापश्चात्संकरश्चेत्येकविंशतिवादिभिः। प्रणीतानिनिराचक्रेदुर्भाष्याणिमहामतिरित्येकविंशतिसंख्याकैरित्यर्थः। यथाव्याख्यानसामर्थ्योपपादनायभगवानित्युक्तं। समग्रज्ञानवानित्यर्थः॥ **कैवल्यादीति**।

SGDF Sri Gargeshwari Digital Foundation

वाचनिकमंगलस्य भगवन्नमस्कारोपबृंहितत्वाद्भाष्यं पठतामितरेषां मोक्षादिफलंनिर्विघ्नपरिसमाप्त्यादिफलंचभवति । एकांतभक्तस्यनिरंतरायस्यचाचार्यस्यतुभगवत्प्रीतिरेवफलमितिभावः । समाप्त्यर्थंचेत्यनंतरंकृतमितिशेषः । यद्वाकैवल्याद्यखिलफलसाधनतासिद्धिरर्थः प्रयोजनंयस्यनमस्कारस्यसतथोक्तः । एवंनिरंतरायेत्याद्यपिनमस्कारविशेषणं । तेनतयोश्चतुर्थ्यंतत्वमभिप्रेत्यग्रथयतीत्यनेनान्वयेग्रथनस्य फलसाधनतासिद्ध्यादिफलकत्वमुक्तंस्यात् । तथाचनमस्काराधिकारादिग्रथनसूचनेशिष्यशिक्षार्थमित्युत्तरग्रंथविरोधः । तत्रग्रथनस्यशिष्यशिक्षाफलकत्वोक्तेरितिशंकापरास्ता । पाणिन्यादिसूत्रप्रतीतिनिरासायाह ॥ **अत्रेति** ॥ अत्रसर्वसूत्राणांब्रम्हरूपैकार्थप्रतिपादकत्वेनैकवाक्यत्वमितिसूचनाय समुदायाविवक्षयैकवचनप्रयोगः । उच्यते मुख्ययावृत्त्याप्रतिपाद्यते । कुतइत्यतआह ॥ **तस्येति** ॥ निरुपपदशब्दस्येत्यर्थः मुख्यस्यानिर्विशेषणशब्दोन्येषांविशेषणादितिवक्ष्यमाणत्वादितिभावः । तथापितथाविधान्यसूत्रस्यग्रहणंकिन्नस्यादित्यतआह ॥ **तेषांचेति** ॥ ब्रह्मसूत्राणामेवेत्यर्थः । अत्रमहावाक्यार्थभेदाभावेपिअवांतरवाक्यार्थभेदात् सर्वसूत्राणांप्रत्येकं अवांतरब्रम्हविद्यात्वमितिसूचनाय बहुवचनप्रयोगः । तादृशत्वात् । सूत्रांतरापेक्षयामुख्यत्वात् । येषांसूत्रत्वमंजसेतिवक्ष्यमाणत्वादितिभावः । नारायणंनत्वेत्येतावतानमस्कारग्रथनात् किंविशेषणचतुष्टयेनेत्यतआह । ॥ **वक्ष्यमाणमिति** ॥ सूत्रस्याध्यायचतुष्टयात्मकस्यवक्ष्यमाणोयोअर्थः गुणपरिपूर्णत्वादिरूपस्तमित्यर्थः । संगम्य संगृह्यप्रस्तावयितुंसंक्षेपतोनिरूपयितुंतस्यप्रपंचेजिज्ञासाजननंप्रयोजनमितिभावः । विशिनष्टि इतरेभ्योव्यावर्तयति । प्रस्तावप्रकारंदर्शयति । तथाहीत्यादिनाउदितत्वादित्यंतेन । प्रसत्त्याप्रसादेन ॥ **सूचितइति** ॥ अतःशब्देन संक्षिप्योक्तइत्यर्थः । तेनपरस्यब्रम्हणोविष्णोः प्रसादादितिवाभवेदितिप्रमाणानुसारेणसाक्षादतःशब्दार्थसंभवेसूचित

Sri Gargeshwari Digital Foundation

मितिकथमुक्तमितिशंकापरास्ता । उन्मिषति उदेति । प्रथमाध्यायेसर्वशब्दसमन्वयस्यैवोक्त्याकथंगुणपूर्णत्वंतदर्थइत्यत आह ॥ **तत्रहीति** ॥ आनंदमयादिसर्वशब्दानांसमन्वयेतत्तच्छब्दप्रवृत्तिनिमित्तप्रचुरानंदत्वादिसर्वगुणगणलाभादिति भावः । अत्रपर्यायानंतशब्दसमन्वयेतेषामेकार्थप्रतिपादकत्वात्सर्वगुणोदीर्णतासिद्धिर्नस्यादतोअपर्यायेत्युक्तं । तथा विधकतिपयशब्दसमन्वयेपितदसिध्याअनंतेत्युक्तं । अपर्यायानंतशब्दानांरूढ्यासमन्वयेगुणालाभान्महायोगवृत्त्येति । अनन्यसाधारणावयवार्थसापेक्षवृत्त्येत्यर्थः॥ **समन्वयेति**॥ उपक्रमादिलिंगप्रमाणकशक्तितात्पर्यलक्षणसंबंधेत्यर्थः। सचे तिहरिपरामर्शकतच्छब्दस्यदोषवानपीत्यनेनसंबंधः। युक्त्यादीत्यादिपदेनसमयश्रुतिन्यायोपेतश्रुतीनांग्रहणं॥ **दोषवानपीति** ॥ प्रथमसूत्रेजीवव्यावृत्ततयाब्रह्मणएवजिज्ञास्यत्वसिद्धयेतस्यगुणपूर्णत्वमुक्तं । गुणपूर्त्यर्थमेवप्रथमाध्यायेश्रुतिस्थशब्दसमन्वयोनिरूपितः । युक्त्यादिविरोधेनश्रुतीनामप्रामाण्येचोक्तसमन्वयासिद्ध्यागुणपूर्णत्वस्याप्यसिद्धिप्रसंगेन विरुद्धधर्माधिकरणत्वाभावेनजीवाभेदेजीववत् दोषवान्स्यादित्यर्थः । यद्वा युक्त्यादिविरोधेनश्रुतीनामप्रामाण्यात् समन्वयेनिरोधितेसर्वकर्तृत्वसार्वज्ञ्यसर्वैश्वर्यादेरसिद्ध्यातत्तदधिकरणपूर्वपक्षप्रापकयुक्त्यादिभिर्जीववज्जनिमृत्यादिदोषवानपिस्यादित्यर्थः । नकेवलंगुणाभाववात् किंतुदोषवानपीत्यपिशब्दः ॥ **तत्रेति** ॥ युक्त्यादीनामाभासत्वेनतद्विरोधाभावेश्रुतिप्रामाण्यात्समन्वयेनगुणपूर्णत्वासिद्धौ विरुद्धधर्माधिकरणत्वेनाभेदाभावेदोषशंकानवकाशइतिभावः । यद्वायुक्त्यादेरप्रामाण्यप्रापकाभावान्नदोषशंकेतिभावः ॥ **तत्रेति** ॥ पादत्रयोक्तवैराग्यभक्त्युपासनादिभिश्चतुर्थपादोक्तभगवज्ज्ञानंभवतीत्युक्तेतस्यज्ञेयत्वमेवोक्तमितिभावः ॥ **तत्रेति** ॥ पादत्रयोक्तकर्मक्षयोत्क्रांतिमार्गाणांभगवत्प्राप्त्यर्थत्वाच्चतुर्थपादोक्त भोगस्यतत्प्राप्तिंविनाऽयोगाद्गम्यत्वमेवोक्तमितिभावः । ननुब्रह्ममीमांसाशास्त्रोक्तधर्माः ब्रह्मणएव-

वक्तव्याः किमर्थंनारायणस्योच्यंतइतिशंकानिरासायब्रह्मणएवनारायणत्वान्नारायणएवैतच्छास्त्रप्रतिपाद्यइतिद्योतनायब्रह्मशब्दसमानार्थकनारायणशब्दनिर्वचनपरत्वेनापिविशेषणचतुष्टयंयोजयति ॥ **अथवेति** ॥ नारायणशब्दनिर्वचनस्योक्तशंकानिरासफलकत्वे एतदपिस्तुत्यर्थमितिसुधाविरोधइतिचेन्न । तस्याःउपलक्षणत्वाभिप्रायेणप्रवृत्तेः । ॥ **सांकेतिकमिति** ॥ प्रवृत्तिनिमित्ताद्यभावेपिइदमनेनशब्देनवाच्यंभवत्विति कस्यचिदिच्छामात्रेणबोधकमित्यर्थः। विशिष्टगुणान्गुणपूर्णत्वाद्यनन्यसाधारणधर्मान्॥ **आचष्टेवक्ति** ॥ प्रतिपादयतीतियावत् ॥ **निर्वक्ति**॥ निरुच्यदर्शयति । तदेवक्रमेणदर्शयति । तथाहीत्यादिना। अभिन्नार्थत्वादिति । दोषारच्छिद्रशब्दानांपर्यायत्वंयतस्ततइत्युक्तेरितिभावः । **विरुद्धार्थेति** । सादृश्यंतदभावश्चतदन्यत्वंतदल्पता । अप्राशस्त्यंविरोधश्चनञर्थाः षट्प्रकीर्तिताइत्युक्तेरितिभावः । अभावार्थत्वात् अन्योन्याभावार्थत्वात् । अतएवाह ॥ **अराश्रयोनभवतीति** ॥ **नरेति** ॥ सज्जनेत्यर्थः ॥ **नरीयतइति** ॥ नक्षीयतइत्यर्थः । नञुपपदात् रीङ्क्षयइत्यस्माद्धातोरुणादयोबहुलमितिबहुलग्रहणादौणादिकेकरणेडप्रत्ययेडित्वात्टेरितिटिलोपेचनरमितिभवति । ततःप्रज्ञादिभ्यश्चेतिस्वार्थिकाण्प्रत्यये ताद्धितेष्वचामादेरित्यादिवृद्धौ यस्येतिचेत्यकारलोपेनारमितिरूपसिद्धिरितिभावः ॥ **अरमणमिति** ॥ रमक्रीडायामित्यस्माद्भावार्थे औणादिकेडप्रत्ययेरंरमणंतन्नभवतीत्यरमणंदुःखमित्यर्थः ॥ **निर्दोषवेदोत्पन्नत्वादिति** ॥ अरविधुरत्वान्नारोवेदः । नारशब्दात्तस्येदमित्यणिकृते यस्येत्यकारलोपेनारशब्दोवेदजन्यज्ञानवाचीतिभावः। ननुनारशब्दात्तद्वृद्धिर्यस्याचामादिस्तद्वृद्धमितिवृद्धसंज्ञायांवृद्धाच्छइतिछप्रत्ययेआयनेयीनीयियः फढखछघा मित्यनेनछस्येयादेशेनारीयामितिस्यात् । कथंनारमितिचेत् । सत्यंवानामधेयस्यवृद्धसंज्ञोतिनामधेयस्याविकल्पेनवृद्धिसंज्ञोक्तेः । संज्ञापूर्वकोविधिरनित्यइतिवै

तत्साधु । ननुविरुद्धार्थकनञ्समासेनअरेति स्थिते नलोपोनञः नञोनस्यलोपःस्यादुत्तरपदइति नलोपेअअरइतिजाते-
तस्मान्नुडचितस्माल्लुप्तनकारान्नञुत्तरपदस्याजादेर्नुडागमः स्यादचिपरइतिनुडागमेअनरेतिस्यात् । एवमभावार्थत्वेपि
अरायणादन्योअनरायणइतिभवेत् । अश्वादन्योअनश्वइतिवत् । नारायणइतिकथं । ननुवृत्तौषष्ठाध्यायेतृतीयपादे
स्त्रैणार्थइत्यत्रस्त्रीपुंसाभ्यांनञस्नञौ वितिविहितस्यनञानलोपाभावायनलोपोनञइतिसूत्रेरात्रेः कृतिविभाषेत्यव्यव-
हितपूर्वसूत्रस्थविभाषापदानुवृतेरुक्तत्वात्।विभाषायाश्चव्यवस्थितविभाषात्वस्यन्यासेऽभिहितत्वादत्रापिनलोपाभावेना-
रायणइतिसाधुरितिचेन्न । नलोपसूत्रेविभाषापदानुवृत्तौविभाषायाः व्यवहितंभाषात्वेननभ्राडित्यादिशब्देष्वपितेन
नलोपाभावसंभवेनतेषुशब्देषुनलोपाभावकथनायप्रवृत्तयोर्नभ्राण्नपान्नासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु
प्रकृत्या । नगोप्राणिष्वन्यतरस्यामित्यनयोः सूत्रयोर्वैय्यर्थ्यप्रसंगात् । प्रपंचनार्थत्वमितित्वगतिकागतिः । तथाविधशब्द
परिगणनार्थमित्यपिस्त्रैणार्थइत्यादेरपिपरिगणनप्रसंगाच्च कथंतर्हिस्त्रैणार्थइतिरूपं तत्रापिनलोपनुडागमं अयादेशेचस्त्रा
यणेतिस्यादितिचेन्न । चरितार्थाचरितार्थयोरचरितार्थस्यग्रहणमितिन्यायेनस्त्रैणार्थइत्यत्रनञ्प्रत्ययेञकारस्यचवृध्यर्थ
त्वेनचरितार्थत्वात् । तदनुबंधिनञ्प्रत्ययस्यापिचरितार्थत्वेननलोपसूत्रेनञ्इत्यनेनप्रत्ययनञोऽग्रहणात् । अचरितार्थ
ञकारयुक्तिनिपातनञएवग्रहणात् । किंचनलोपोनञितिसूत्रेउत्तरपदेपरतः पूर्वस्यनलोपोभवतीत्युक्त्यापूर्वस्यपरत्वंच
गम्यतेप्रत्ययनञःपदत्वाभावादेवनलोपाभावइतिसमाधानद्वयस्यमंजर्यामेवोक्तेः । नारायणइत्यत्रनिषेधार्थकनिपात-
नयोश्चरितार्थत्वात् । स्यादेवनलोपइतितत्राह ॥ **नगनाकादिशब्दवदयंशब्दोज्ञातव्यइति** ॥ उक्तनिर्वचना-
नुसारेणशब्दप्रयोगस्यप्रामाणिकत्वान्नभ्राडित्यादिसूत्रद्वयेअयमपिशब्दःउपसंख्येयइतिभावः । सुधायांतूपसंख्यान

SGDF Sri Gargeshwari Digital Foundation

वैय्याकरणैर्नकृतमित्यरुच्याअमानोनाः प्रतिषेधइतिगणपठितसमासोयमितिसमाधानांतरमुक्तम् । चंद्रिकायांतुवृत्त्यनुसा-
रेणविभाषापदानुवृत्यासमाधानमभिधायतत्रमंजर्युक्तास्वारस्यंमनसिनिधायसुधानुसारेणपक्षांतरमुक्तं । लघ्वक्षरंपूर्व
मित्युक्तेरुत्तरसूत्रस्छस्यापिनगशब्दस्यपूर्वनिर्देशः । नलोपाभावमात्रेनगशब्दोदृष्टांतः । नरीयतेअनेनेत्युक्तडांतत्वं
नगशब्दवदितिसूचनाय प्रथमप्राप्तनभ्राडित्यादिशब्दत्यागेननाकशब्दस्यस्वशब्देनोपादानंचतस्यनुडागमप्रसक्त्यापि
युक्तत्वात्इतरेषांतदभावात्नलोपाभावमात्रेदृष्टांततयाआदिपदेनग्रहणं । सूत्रांतरस्छत्वात्नगशब्दस्यस्वशब्देनग्रहणं।
यद्वादिपदेनैकधेत्यादिग्रहणंतेननसमासोयमितिसुधोक्तसमाधानांतरमप्यत्रोक्तंबोध्यं । नारायणपदस्यपदद्वयसमारूढ
त्वेनसमानपदत्वाभावाद्रषाभ्यांनोणः समानपदइत्यनेनणत्वासंभवात्पूर्वपदात्संज्ञायामगइतिणत्वं । तदर्थश्चपूर्वपदस्छा
न्निमित्तात्उत्तरस्यनकारस्यणकारादेशोभवतिसंज्ञायांनगकारव्यवधानइति । ननुनपुंसकेभावेक्तइत्यतोनपुंसकइत्यनुव
र्तमानेकरणाधिकरणयोश्चेतिल्युटोविहितत्वेनल्युडंतनारायणशब्दस्यनपूंसकत्वंस्यादितिचेन्न वृत्तिकारेणकरणाधिकरण
योरितिसूत्रेनपुंसकइत्यस्यानुवृत्तेरनुक्तत्वात्लिंगानुशासनेइध्मप्रनश्चनगोदोहनइत्याद्युदाहरणात्।महाभाष्येभुवादयोधा
तवइतिसूत्रव्याख्यानावसरेकोसावनुमानोनामेत्युक्तत्वात्स्मृतिःप्रत्यक्षमैतित्ह्यमनुमानश्चतुष्टयमितिश्रौतप्रयोगाच्चेति ।
सुधायांतुल्युटःटित्करणसामर्थ्यादयनशब्दोअधिकरणेत्रिलिंगइतिपुंलिंगत्वंचयुक्तमितिसमाधानांतरमुक्तं । एवंब्रह्म
मीमांसाशास्त्रार्थसंग्राहकविशेषणचतुष्टयस्यनारायणशब्दनिर्वचनपरत्वप्रदर्शनेननारायणस्यैतच्छास्त्रप्रतिपाद्यत्वकथना
न्नम्यत्वप्रयोजकाधिकृतत्वमपितस्योपपादितंभवति । इदानींतस्यैवनम्यत्वद्योतनायनम्यत्वप्रयोजकविशिष्टेष्टाधिकृ
२ तत्वरूपतृतयोपपादकत्वेनापियोजयति ॥ अथवेति ॥ अत्रबहुगुणत्वनिर्दोषत्वाभ्यांविशिष्टत्वंशास्त्रज्ञेयत्वेनाधि-

GDF
Sri Gargeshwari Digital Foundation

कृतत्वंअधीतशास्त्रगम्यत्वेनेष्टत्वंप्रदर्शितं इतरासाधारणधर्मवत्वशास्त्रप्रतिपाद्यत्वापेक्षितफलदातृत्वानामेवक्रमेणविशिष्टा
धिकृतेष्टशब्दार्थत्वादितिध्येयं ॥ **गुरूनपीति** ॥ यथादेवेतथागुरावितिश्रुतेरितिभावः । सामान्यप्रयोगेनिमित्तमाह ।
॥ **गुरोरिति** ॥ नन्वेवमीशावास्यभाष्येयस्माद्ब्रह्मेंद्ररुद्रादिदेवतानांश्रियोपिच । ज्ञानस्फूर्तिःसदातस्मैहरयेगुरवेन-
मइतिनामग्रहणंकथमितिचेत् । उदाहृतवाक्यस्यापरोक्षतोनामग्रहणनिषेधकत्वेनपरोक्षतस्तत्ग्रहणेबाधकाभावात् । अत-
एवाचार्याणांनित्यापरोक्षीकृतगुरुत्वेपिमर्यादारक्षणायतत्रतस्मैनमइतिपरोक्षनिर्देशःकृतः । अत्रतुगुरूंश्चेतिसाधारण
प्रयोगस्यापरोक्षकत्वकथनस्यैवोचितत्वात् । उपलक्षणमेतत् । सुधोक्तरीत्यागुरुत्वोपपादकगुरुगुरुत्वशास्त्रप्रभवत्वादि
हेतुबाहुल्यसूचनायगुरूनितिबहुवचनप्रयोगइतिद्रष्टव्यं । ननुदेवतासमुच्चायकचशब्दसद्भावादपिशब्दोव्यर्थइत्यतआह ।
स्वस्येति । प्रथङ्नमस्कारेणप्रसक्तं गुरुदेवताभेदमपिशब्देनगर्हयामासेत्यर्थः । आक्षिपति ॥ **यद्यपीति** ॥ तथाचन
पृथङ्नतिर्युक्तेतिभावः । परिहरति ॥ **तथापीति** ॥ इतिशब्दः श्लोकव्याख्यानसमाप्तौ । यद्वाअपिपदेनकथमरुचिः
सूचितेत्यतआह ॥ **यद्यपीति** ॥ अनेनापितथापिविशेषानुग्रहार्थंनत्वेतिव्याख्यातंभवति । तयाचभेदज्ञापिकायाःपृथः
ङ्नतेर्विशेषानुग्रहरूपप्रयोजनांतरसूचकापिशब्देनभेदेरुच्यभावः सूचितइतिभावः । नतिरितिप्रकारवाचीति शब्दस्ये
त्यरुचिंसूचयतीत्यनेनान्वयः । उपलक्षणमेतत् । सुधानुसारेणास्योद्भवादिदमित्याद्यनुव्याख्यानोक्तजगज्जन्मादि-
कारणत्वादिविशेषणसमुच्चायकत्वमप्यपिपदेप्रयोजनंद्रष्टव्यं । अधिकार्यादिशून्यत्वान्नेदंशास्त्रमारंभणीयमित्यत-
आह ॥ **अनेनैवेति** ॥ आद्यपद्येनैवेत्यर्थः । अन्यार्थं प्रवृत्तेनापीत्येवार्थः । वस्तुगत्याअधिकार्यादिसत्वमपेक्षितं
नतुतत्सूचनमित्यत आह ॥ **श्रोतृप्रवृत्यंगभूताइति** ॥ सूचनेनज्ञातानामेवप्रवृत्यंगत्वंनाज्ञातानां । ज्ञातार्थंज्ञात

संबंधंश्रोतुंश्रोताप्रवर्ततइत्युक्तेरितिभावः । एवंप्रवृत्यंगत्वेनाधिकारादिसूचनंकर्तव्यमित्युक्तं । इतोपितत्कर्त्तव्यमित्याह ।
॥ **तत्स्मरणस्येति** ॥ स्मरणार्थसूचनमितिभावः । उक्तंप्रथमतात्पर्ये । प्रारभतःप्रारभमाणस्य । महदितिभिन्नंपदं ।
तेनान्महतःसमानाधिकरणेत्याकारेमहाफलमितिस्यादितिनिरस्तं । ननुनिर्विघ्नपरिसमाप्त्यादेर्नमस्कारेणैवसिद्धेर्ग्रथनं
व्यर्थएवमधिकारादिसूचनस्यप्रवृत्यंगतयाकर्तव्यत्वेपिनमहाफलार्थंकर्तव्यत्वंअधिकारादिस्मरणेनमहाफलसिद्धेः नचस्म
रणार्थमेवसूचनमितिवाच्यं । तस्यान्यतोपिसंभवादित्यतआह ॥ **नमस्काराधिकारादीति** ॥ यथाक्रममन्वयः ।
सत्यं नमस्कारेणैवसमाप्त्यादिफलमिति । तथापिग्रथनाभावेशिष्याः आचार्यैर्नमस्कारोनकृतएवेतिमत्वास्वयमपिन
कुर्युः । अतस्तच्छिक्षणार्थंग्रथनं । अधिकारादिस्मरणंअन्यतोपिभवतीत्यपिसत्यं । तथापितत्सूचनावेशिष्याः अधि-
कारादिस्मरणंनावश्यकमितिआचार्यैर्नतत्सूचनंकृतमितिमत्वानतत्स्मरणादिकुर्युः । अतोमहाफलार्थंतत्स्मरणमाव
श्यकमितिशिष्यशिक्षार्थंसूचनंकार्यमेवेतिनतस्यवैय्यर्थमितिभावः । प्रागूर्ध्वंग्रथनस्यसार्थक्येवक्तव्येअधिकारादिप्रसंगे
तत्कथनमेकवाक्येनोभयप्रयोजनकथनसौकर्यार्थमितिध्येयं । अधिकारादिसूचनमेवोपपादयति ॥ **तथाहीति** ॥
सूचितइतियथायोगंसर्वत्रान्वेति । प्रयोजनमिति । यथाक्रममवांतरमुख्यप्रयोजनमित्यर्थः ॥ **यथासंभवमिति** ॥
नारायणस्यविषयस्यप्रतिपाद्यत्वंज्ञानस्यतद्विषयकत्वंगमनस्यज्ञानजन्यत्वंसंबंधइतिभावः । सूत्रार्थउच्यतइतिप्रतिज्ञाय-
द्वापरेत्यादिनासूत्रागतिप्रकारनिरूपणमसंगतमित्यतः तदुपयोगंवक्तुमाक्षिपति ॥ **नन्विति** ॥ व्याख्येयत्वप्रयोजक
शून्यत्वान्नसूत्राणांव्याख्येयत्वमितिवक्तुंव्याख्येयत्वप्रयोजनंतावद्दर्शयति ॥ **यदुपादेयमिति** ॥ अनुपादेयस्यापिपूर्व
पक्षग्रंथस्यव्याख्येयत्वदर्शनादाह । अनन्यार्थतयेति प्राधान्येनेत्यर्थः । पूर्वपक्षग्रंथस्यमहावाक्यार्थबोधोपयोगितया-

SGDF Sri Gargeshwari Digital Foundation

व्याख्येयत्वेपिनप्राधान्येनव्याख्येयत्वं। नचेदंशास्त्रमवांतरंवाक्यंयेनानुपादेयमपिमहावाक्यार्थज्ञानोपयोगितयाव्याख्येयंस्यादितिभावः। तर्ह्युपादेयत्वमप्यस्त्वित्यतस्तत्प्रयोजकशून्यत्वान्नास्तीतिवक्तुमुपादेयत्वप्रयोजकमाह । यच्चेति। इष्टसाधनतावबोधकस्यापिविप्रलंभकवाक्यस्यानुपादेयत्वात्सत्यंतं । प्रमाणभूतस्यापिवाणिज्योपदेशस्य विरक्तेनानुपादेयत्वातदुत्तरभागः। अप्रमाणत्वेष्टसाधनानवबोधकत्वाभ्यांनिश्चितस्यापिदुःशास्त्रस्यख्यात्याद्यर्थमुपादेयत्वदर्शनात् प्राय इत्युक्तं। अत्यंतमित्यर्थः। अतएवब्रह्मसूत्राणामत्युपादेयत्वादितिवक्ष्यति। यदर्थमेतन्निरूपणंतदिदानीमाह। अतइति। कथंनकथमपि। शब्दप्रामाण्यप्रयोजकापौरुषेयत्वाप्तिमूलत्वयोरभावादे तत्कामेनेदंकार्यमित्यप्रतिपादनाच्चेतिभावः। देशेज्ञानाप्रसक्तेराह॥ **सार्वत्रिकपुरुषेति** ॥ **सम्यग्ज्ञानइति** ॥ असम्यग्ज्ञानस्यतन्निर्णयायेत्युक्तनिर्णयानुपपत्तेरितिभावः॥ **किमिदमदोवेति** ॥ विष्णुर्गुणपूर्णइतिज्ञानेइदंप्रमाणमप्रमाणंवामोक्षसाधनंनवेतिकेषांचित्संदेहविषयीभूतेकेषांचिदप्रमाणमेवमोक्षसाधनंनवेतिविपरीतज्ञानविषयीकृतेचेत्यर्थः। आकुलीभावेकिंनिमित्तमित्यतआह॥ **आकुलीभावेति** ॥ तस्याकुलीभावप्रयोजकत्वंद्वापरेखिलमितिवक्ष्यमाणप्रमाणेव्यक्तमितिभावः। भाष्येतंनिर्णयायेति। तच्छब्देनज्ञानपरामर्शः। तस्यप्रमाणत्वमोक्षहेतुत्वादिनानिर्णयस्तन्निर्णयः। अथेत्यस्यावतारानंतरमेवनतुपरोपदेशमपेक्ष्य येनस्वतः सार्वज्ञंनस्यादित्यर्थः । यद्वा अथशब्दोअवतारानंतर्यार्थःसन्व्यासावतारस्यमुख्यतोवेदोद्धारकत्वादिप्रयोजनमाह। भाष्येउत्सन्नमित्यस्यनष्टमितिव्यभजादित्युक्त्येऽदानीमेवव्यासेनवेदाविभागकृतःपुर्वंत्वविभक्तएवेति । चतुर्विंशतिधेत्यादेरेकैकंचतुर्विंशत्यादिभेदेनचेतिप्रतीतिनिरासायाह॥ **वेदमुत्सन्नमित्यादेरिति** ॥ अस्येत्यर्थइतिवक्ष्यमाणेनान्वयः॥ **प्रागेवेति** ॥ व्यासावतारात्पूर्वमेवेत्यर्थः। वेदंमूलवेदादुत्धृतमुपवेदं॥ **एकैकस्मादे**

SGDF Sri Gargeshwari Digital Foundation

कैकोभागइति ॥ ऋक्संज्ञकादुपवेदादृग्वेदाख्योअवांतरवेदइत्यादिप्रकारेणेत्यर्थः ॥ **एकैकमवांतरमिति** ॥ ऋगादिसंज्ञकादुपवेदादुत्धृत्याविभक्तंऋग्वेदाद्यवांतरवेदामित्यर्थः ॥ **चतुर्विंशत्यादीति** ॥ ऋगादौयथाक्रममेतध्येयम् मूलवेदादुत्धृतादृगादिरूपादुपवेदादवांतरवेदः कृतइतिभाष्येअस्पष्टमपिकिमर्थंकल्पितमित्यतस्तत्रऋग्भाष्यसंमतिमाह ॥ **तदुक्तमिति** ॥ अयमर्थः आदावेकएववेदइतिसनारायणेनऋङ्निगदसामाथर्वभेदेनचतुर्धाविभक्तःतएवोपवेदाइत्युच्यंते । अनंतरंव्यासेनचतुर्णामुपवेदानांमध्येएकैकस्मादेकैकोवेदः कृतस्तेषांचऋग्वेदइत्यादिनाम। तएवावांतरवेदाइत्युच्यंते । तेषांचमध्येएकैकस्माच्चतुर्विंशतिधेत्युक्तप्रकारेणशाखाःकृताइति । इदंचात्रऋङ्निगदसामशब्दैर्महावेदादुत्धृताउपवेदाइत्युच्यंतेइत्यादिऋग्भाष्यटीकास्थव्यवहारतोवगम्यते । सूत्रागतिक्रमंवक्तुंप्रवृत्तेनवेदमुत्संन्नंव्यंजयंस्तदर्थनिर्णयायब्रह्मसूत्राणिचकारेत्येववक्तव्येवेदविभागकथनंकिमर्थमित्यतआह ॥ **अवांतरेति** ॥ महावेदादुत्धृतोपवेदानामवांतरवेदत्वेनाविभागकथनंआदिपदेनतेषांचतुर्विंशत्यादिविभागकथनंग्राह्यं । नकेवलंद्वापरग्रहणमितिचशब्दः । अन्यथाविभागोव्यर्थःस्यादितिभावः । अत्रप्रथमभागवतसंमतिमाह ॥ **चक्रइति** ॥ अल्पमेधसः । अल्पज्ञानिनः । यदुपादेयमित्यादिनाकृतचोद्यस्यकथमनेनपरिहारइत्यतआह । अयंभावइत्यादिना व्याख्येयतेत्यंतेन । आप्तिमूलत्वेनसूत्रप्रामाण्योपपादनायोपोद्घातसंगतिमाह । **वाक्यप्रामाण्यमिति** ॥ श्रुत्यादिमूलत्वेन प्रामाण्यस्याग्रेवक्ष्यमाणत्वात्तावच्छब्दः । आप्तिश्चवक्तृनिर्दोषतैवेति । यद्यपिवक्तृश्रोतृप्रसक्तीनांयदाप्तिरनुकुलतेत्यनुव्याख्याने श्रोतृप्रसंगानिर्दोषताप्तिरित्युक्तं । तथापिश्रोतृप्रसंगयोर्दुष्टत्वेवक्तरिविप्रलंभापहासरूपदोषौतयोरदुष्टत्वेतस्यापितदुभयराहित्यमितिश्रोतृप्रसंगदोषयोस्तदुभयव्यापकत्वेनव्यापकीभूतश्रोतृप्रसंगदोषाभावेव्याप्यभूताविप्रलंभाप -

SGDF
Sri Gargeshwari Digital Foundation

हासारव्यवक्तृदोषाभावइतिवक्तृनिर्दोषतैवाप्तिरित्युक्तं । अतएवाग्रेश्रोतृप्रसंगदोषाभावाभ्यांविप्रलंभापहासाख्यवक्तृ दोषाभावमुपपादयिष्यति । यदर्थमुपोद्घातनिरूपणंतादिदानीमाह ॥ **आप्तिमूलत्वादिति** ॥ वक्तृनिर्दोषत्वरूपा-प्तिमूलत्वमुपपादयति । प्रमादेत्यादिनादोषाभावादित्यंतेन । नारायणावतारोव्यासइतिहेतुगर्भविशेषणमेतत् । अने ननारायणोव्यासत्वेनावततारेत्येतदुक्तार्थम् । नारायणावतारत्वस्यप्रमादाद्यसंभवंप्रत्यप्रयोजकत्वंपरिहरति । **भगव-त्वादेवेति** । अन्यथातन्नस्यादितिभावः । अनेनभगवानित्येतदुक्तभावं । कोयंश्रोतृदोषः कथंचतदभावइत्यतआह **ज्ञानायोग्यतायाइति** ॥ ब्रह्मादिश्रोतृष्विति । अनेनब्रम्हरुद्रेंद्रादिभिरित्येतदुक्ताभिप्रायम् । प्रसंगदोषःश्रोतृप्रयोज-नोद्देशाभावः । निर्हरणस्य निवारणस्य । अनेनतन्निर्णयायार्थितइतिपदद्वयमुक्ततात्पर्यं । मूलत्वादित्यनंतरंमुतरां-प्रामाण्यसिद्धिरितियोज्यं । तन्मूलत्वोपादनायश्रुतिनिर्णायकत्वेनेत्युक्तानिर्णायकत्वेनैवमीमांसारूपत्वेनयुक्तिमूलत्व-स्यापिप्राप्तत्वादितिभावः। अनेनतन्निर्णयायेत्येतदुक्ताशयं । अत्रश्रुतियुक्तिमूलत्वंश्रुतियुक्तिभ्यांअर्थमुपलभ्यरचितत्व रूपंसर्वज्ञव्यासप्रणीतेनसंभवतिकिंतुसमानार्थकत्वासाम्येनतत्संवादित्वमेव नचतर्हिश्रुतियुक्तिसंवादित्वादित्येवकिन्नो-क्तमितिवाच्यं । यादृच्छिकसंवादिताप्रतीतिनिरासायैवमुक्तत्वात् । इष्टसाधनावबोधकत्वमाह । इष्टानिष्टेति । तान्नि-र्णायकत्वेनतत्समानार्थकत्वादितिभावः । अनेनार्थेष्टानिष्टेत्याद्युक्तप्रयोजनं । निष्पन्नज्ञानस्यत्रेतादावपिस्थितत्वेनकृ तग्रहणंकिमर्थमतआह ॥ **यथोत्पन्नमिति** ॥ भाष्येकिंचिद्भागचतुष्टयेएकोभागः । **अन्वयमाह** । **अखिलमि-ति** ॥ कालतःद्वापराख्यकालसामर्थ्येन । द्वावेवधर्मज्ञानपादौपरावशिष्टौयास्मिन्युगेसद्वापरइतितत्त्वप्रदीपानुसारेण तन्निर्वचनादितिभावः । ज्ञानस्याज्ञानताप्राप्तिःकथमित्यतआह ॥ **अज्ञानमितीति** ॥ नञोविरुद्धार्थत्वादिद

मप्रमाणमेवेतिविपरीतप्रतीतिविषयतामित्यर्थः । **संदेहः**प्रमाणमप्रमाणंवेत्यादिरूपः । **अनुक्रोशः** कृपा । **नाज्ञाना-दिमिश्रत्वमिति** ॥ विपरीतज्ञानसंदेहागोचरत्वमित्यर्थः ॥ **स्वहतेति** ॥ स्वेनगौतमेनहतायागौःतान्निर्मातारोयेऋषय स्तन्मात्राविषयत्वादित्यर्थः । ब्रम्हादयश्चनतन्निर्मातारइतिभावः । दुर्भिक्षोपद्रुताऋषयोगौतमतपःसमृद्धगौतमाश्रम माप्याचिरकालंतेनसंमानिताःसुखमुषिताःकालेनसुभिक्षंस्वदेशमियासवस्तदनुज्ञांयाचमानाअपिस्नेहवशेनतेनाप्रात्पानु-ज्ञाः शिवशिरस्थभागीरथींसपत्नींनिष्कासयंत्यापार्वत्याचोदितेनगणेशेनोपदिष्टोपायाऋषयःतपोबलेनकांचिद्गांनिर्मा यतदाश्रमस्थव्रीहिभक्षणार्थतत्यजुः गौतमस्तांतृणेनमंदंताडयामास । अथसाममार । ततस्तेत्वयागोहत्याकृताऽतस्त्वं नभोज्यान्नइतिगौतममभिधायजग्मुः । ततोगौतमोबहुकालचीर्णतपस्तुष्टहरशिरसोवतारितजान्हवीजलेनगांपरिषिच्यो ज्जीवयामास । तज्जलंगोदावरीतिलोकेप्रसिद्धं । ततोगौतमःकिमेतदितिविचिंत्यविप्रकृतान्यायंनिश्चित्यतान्ज्ञानही नाभवथेतिशशापेतिशापप्रकारस्तत्वप्रदीपेव्यक्तः । कालाभिभवःद्वापराख्यकालसामर्थ्येनज्ञानाभिभवः । ब्रह्मादि देवव्यतिरिक्तसकललोकानां गौतमहतगोनिर्मातृत्वाभावेपि तद्ज्ञानस्ययथान्यथात्वं एवंब्रह्मादिज्ञानस्यापि किंन्नस्या-दित्यतआह ॥ **लोकस्येति** ॥ तत्ब्रह्मादिबुद्धेःसज्जनानुक्रोशयुक्तत्वं । अन्यत्र गीताभाष्ये । ज्ञानं ज्ञेयं तथाचन ष्टेअदर्शनंगतेधर्मज्ञानेयस्यतस्मिन्लोकेकृपालुभिरित्यर्थः । भाष्ये । महायोगीमहाशक्तिः । उज्जहारउत्थृतृवान् । वेदानितिबहुवचनेनप्रकृतेवेदानांतस्येत्येकवचनेनपरामर्शेकारणमाह ॥ **बहुवचनप्रयोगेपीति** ॥ **नार्थभेदइति** ॥ विष्णोः सर्वोत्तमत्वरूपमहावाक्यार्थस्यैकत्वादितिभावः॥ **आहेति** ॥ सूत्रेषुयेषुसर्वेपीत्यादिनापरिहारंवक्तुमुपोद्घातमा हेत्यर्थः । प्रश्नासंगतिंपरिहरति । **यदांजस्यमिति** । यस्यसूत्रत्वस्यमुख्यत्वमित्यर्थः । सूत्राणांप्रायोबह्वक्षरत्वादतआह ।

SGDF Sri Gangadhar Digital Foundation

॥ यावदक्षरतामिति ॥ अक्षरसमुदायमित्यर्थः । तत्तावदक्षरोपेतत्वं । प्रकृतार्थप्रतिपादकाल्पाक्षरबव्हक्षरयुक्तपर्यायपदानांमध्येअल्पाक्षरपदोपेतत्वंअल्पाक्षरत्वमित्यर्थः । इदंचश्रुत्यनुगमादिप्रयोजनविशेषाभावे । तद्भावेचाधिकाक्षरपदोपेतपदोपादानेपिनदोषः । तेनखंतल्लिगादितिवक्तव्यंनाकाशस्तल्लिंगादितिनिरस्तं । तत्राकाशइतिहोवाचेतिश्रुत्यनुगमायैवाकाशपदग्रहणात् ॥ एवमन्यत्रापिबोध्यं ॥ एवंचेति ॥ एवमपिभवतितथापिभवतीत्यवचनमित्यर्थः । इत्थमेवनान्यथेतिनिर्णायकत्वमितियावत् ॥ विशिष्टार्थतेति ॥ अनन्यप्राप्तार्थतेत्यर्थः ॥ बहुशाखेति ॥ सद्व्याकरणसूत्रादेरपिबहुशाखागतपदस्वरादिनिर्णायकत्वान्नतत्राव्याप्तिः ॥ व्यर्थेति ॥ साम्निऋगक्षराव्यात्पगानभागपरिपूरणायहावूहावित्यादिग्रहणवत्प्रकृतार्थाप्रतिपादकत्वेपिप्रयोजनांतरायाक्षराप्रयोगइतिभावः । अल्पाक्षरत्वंप्रकृतार्थप्रतिपादकादधिकाक्षराप्रयोगः । अस्तोभत्वंतदप्रतिपादकाक्षराप्रयोगइतिमहान्भेदः । ननुकिंतत्सूत्रत्वमितिसूत्रलक्षणस्यपृष्टत्वादनेनसूत्रलक्षणमुच्यतइत्यंगीकार्यं । तत्रकिमेतेषांप्रत्येकलक्षणत्वं । उतामिलितानांनाद्यः अल्पाक्षरत्वविश्वतोमुखत्वातिरिक्तानांचतुर्णामपिपुराणादौसत्वेनातिव्याप्तेः । नांत्यः । अल्पाक्षरत्वेसतिविश्वतोमुखत्वमात्ररस्यातिव्याप्त्यभावेनशेषवैय्यर्थ्यादितिचेत् । सत्यं । अल्पाक्षरत्वेसतिविश्वतोमुखत्वमेवलक्षणं । तत्रापिविश्वतोमुखत्वस्यपंचरात्रादावतिव्याप्तत्वात्सत्यंतं । अल्पाक्षरत्वमात्रं तथाविधवाक्यविशेषेगतमतोविशेष्यभागः । इतरत्स्वरूपकथनामिति । अतःशब्दस्यमुख्यसूत्रत्वपरामर्शकत्वात्तेनहेतुनानिर्विशेषितत्वसाधनंप्रतीयते । तच्चानुपपन्नं । मुख्यसूत्रत्वस्यसंदिग्धत्वात् । निर्विशेषितत्वस्यासिसाधयिषितत्वाच्च । अपिशब्दस्य ब्रह्मसूत्रस्यापीत्यन्वयेअन्येषामपिसूत्राणांनिर्विशेषितत्वप्राप्तिः चशब्दश्चव्यर्थइत्यतआह ॥ यतइति ॥ यथा पर्वतस्यवन्हिमत्वंकुतइतिप्रश्नेव्यापकीभूतवन्हिमत्वएवप्रमाणसित्यधूमवत्वं संभवतीत्यभिप्रायेणाग्निमत्वादेवधूमवत्वामि-

SGDF Sri Gargeshwari Digital Foundation

त्युक्तेधूमवत्त्वस्यवन्हिमत्त्वेहेतुमत्त्वंलभ्यते । तथाप्रकृतेपिमुख्यसूत्रत्वादेवनिर्विशेषितसूत्रत्वंनान्यथेत्युक्तेनिर्विशेषितसूत्रस्यमुख्यसूत्रत्वेहेतुत्वलाभइतिभावः । अतएवहेतोरन्यथासिद्धिपरिहारायावधारणार्थकचशब्दोतएवेतियोजितः । अपिशब्दस्तुनिर्विशेषितसूत्रत्वहेतोरासिद्धिपरिहारायप्रमाणप्रसिद्धिद्योतकः । अतएवोक्तंपुराणादाविति । निर्विशेषितशब्दाद्वैब्रम्हेतिहरिरुच्यते । यथासूत्रेतिशब्देनब्रह्मसूत्रंनिगद्यतइत्यादावित्यर्थः । निर्विशेषितसूत्रत्वंनिरुपपदसूत्रपदवाच्यत्वं । विशेषव्याप्तिग्रहणेयथाव्यासत्वमितिदृष्टांतासंगतेः सामान्यव्याप्तिंदर्शयन्नाह ॥ **यद्यत्रेति** ॥ यत्रसजातीयेव्यतिरेकव्याप्त्युपयोगमनुपदमेववक्ष्यति । निर्विशेषितव्यासत्वमिति । व्यासत्वमित्येवोक्तत्वादितिभावः ॥ **तन्मुख्यमिति** ॥ अनेनैकस्येत्येतन्मुख्यस्येतिव्याख्यातं । द्रौणिरश्वत्थामा ॥ **अमुख्याइति** ॥ तत्रैकस्येत्युक्तत्वात् अत्रामुख्यत्वमर्थाल्लब्धमितिभावः ॥ **विशेषणाव्यासाइति** ॥ द्रौणिव्यासेत्यादिसोपपदव्यासशब्दवाच्याइत्यर्थः। हिशब्दोहेत्वर्थः । अपराणीत्यस्यान्यत्वममुख्यत्वंचार्थइत्यभिप्रेत्याह ॥ **अन्यसूत्राणामिति** ॥ व्याप्तिहीनमिदमितिनमंतव्यमित्याह ॥ **एतदुपपादनायैवेति** ॥ निर्विशेषितसूत्रत्वहेतोरप्रयोजकत्वव्यभिचारशंकयोर्मुख्यस्यनिर्विशेषेणेत्यनुपपदमेवनिराकरिष्यमाणत्वेनप्रयोजनांतराभावादेतदर्थमेवप्राग्व्यातिरेकव्याप्तिप्रदर्शनपूर्वकं दृष्टांताभिधानमितिभावः । अनुमानद्वयेअप्रयोजकत्वंशंकते ॥ **निर्विशेषणेति** ॥ व्यासद्रौणिव्यासादिदृष्टांतबलादंगीक्रियतइत्यतआह ॥ **दृष्टांतइति** ॥ यथाश्रुतेचोद्यानिरासादाह ॥ **मुख्यस्यैवेति** ॥ अत्रमुख्यस्यनिर्विशेषेणशब्दवाचत्वेइतिवेदाविदः प्राहुरिति वेदस्यवृत्थव्यवहारस्यचप्रमाणीकृतत्वेन विपक्षेप्रामाणिकपरित्यागाख्यानिष्टप्रसंगसूचनेनोक्तशंकापरिहारइतिध्येयं । नन्वत्रदृष्टांतदार्ष्टांतिकयोःकथंनिर्विशेषणशब्दवाच्यत्वं । ब्रम्हसूत्रमितिवेदव्यासइतिचतयोः

SGDF
Sri Gargeshwari Digital Foundation

सोपपदशब्दवाच्यत्वादितिचेत् । उच्यते अत्रनिर्विशेषणशब्दवाच्यत्वमित्यनेनजनकनामपूर्वकनिर्देशाभावोभिमतः । सच तयोरस्तिउक्तव्याख्यानानुसारेणब्रह्मशब्दस्यविचार्यपरत्वात्व्यासीयसूत्राणीतिकुत्राप्यभावात् । पाराशर्यव्यासइत्यभावाच्च । अन्यत्रतुजैमिनीयसूत्रंद्रौणिव्यासइत्यादिकर्तृनामपूर्वकनिर्देशइति । प्राक्कथितस्योपयोगंवदन्नेवतात्पर्यमाह । **यत्सूत्रधर्मेति** ॥ अनेनसर्वइत्येतत्सर्वशाखाविषयइतिव्याख्यातं ॥ **कथमेषामिति** ॥ द्वित्रिशाखाभिन्नशाखानिर्णायकत्वस्यैववक्तव्यत्वादितिभावः । अन्यथा अन्येषांद्वित्रिशाखानिर्णायकत्वाभावेसर्वस्यशब्दजातस्येत्यन्वयप्रदर्शनपूर्वकंप्रतीकग्रहणं । अत्रशब्दजातस्येतिषष्ठीकर्तरीत्याह ॥ **शब्दसमूहैः क्रियमाणइति** ॥ यद्वासंबंधमात्रेषष्ठी संबंधश्चजन्यजनकइतिभावः । तन्निर्णयस्य सूत्रांतरैःक्रियमाणनिर्णयस्य ॥ **व्याख्यानरूपत्वादिति** ॥ समाकर्षादितिसूत्रेणब्रह्मवाचकज्योतिरादिशब्दानांअवांतरमुख्यवृत्याकर्मादिष्वाकर्षणाज्योतिष्टोमादिकर्मणांतत्क्रमाणांतत्फलानांचप्रतिपादकताज्ञेयेतिसूचितकर्मकांडविस्तारस्यजैमिनिनासाविस्तरंप्रतिपादितत्वात्कर्ममीमांसासूत्राणांब्रह्मसूत्र -- व्याख्यानरूपत्वं । इयदामननादितिसूत्रेणनामादिप्राणपर्यंतंकृतदेवविचारस्यसाविस्तरंदेवमीमांसासूत्रेषुप्रतिपादनादेवमीमांसासूत्राणामपिब्रह्मसूत्रव्याख्यानरूपत्वं । ज्योतिरुपक्रमात्तुतथाह्यधीयतएकइतिसूत्रेणसमन्वितस्वरवर्णपदादिनिर्णायकत्वात् व्याकरणसूत्राणांब्रह्मसूत्रव्याख्यानरूपत्वं । व्याख्यानव्याख्येययोःसमानविषयकत्वंप्रसिद्धमितिभावः । तर्हिसूत्रांतरवैयर्थ्यमित्यतआह ॥ **श्रुतिमूलकेति** ॥ उपसंहारइति । तेनचकारब्रह्मसूत्राणीत्यनेननपौनरुक्त्यमितिभावः । येषुसूत्रेषुयत्प्रमाणइतियच्छब्दयोरन्वयाप्रतीतेराह । सूत्रेष्वित्यादेरितिभाष्ये पक्षिषुजरितर्यादिषु उक्तरीत्याब्रह्मादिज्ञानातिरोधानाभावात्कथंज्ञानंसंस्थाप्येतितिरोहितप्राप्तिरुच्यतइत्यतआह । ब्रह्मरुद्रादीति । अत्र

दृढीकरणंब्रह्मणएवरुद्रादेःकिंचिदप्राप्तलाभइत्याहुः । वस्तुतस्तुब्रह्मणोप्यप्राप्तलाभोअस्त्येव । ब्रह्मादीनामप्यप्राप्तज्ञानमुत्पद्यतइतिईशावास्यभाष्यटीकोक्तेः । अप्राप्तलाभइत्येतत्ब्रह्मातिरिक्तविषयमितिनमंतव्यं । अत्रगीतातात्पर्यमुदाहरति ॥ **जानंतइति** ॥ पृछंतिसाधवोलोकेतेनपृछासिपार्थिवोतिवाक्यशेषः । नन्वेवंज्ञानंपुनःप्रापुर्देवाश्चऋषयस्तथेतिमहाभारततात्पर्यनिर्णयेपुनः शब्दबलाद्देवानां तिरोहितप्राप्तेराचार्यैरेवोक्तत्वावगमात्तदनुसारेणज्ञानंसंस्थाप्येत्यत्रापितिरोहितज्ञानमुत्पाद्येत्यर्थः किंनस्यादित्यतआह ॥ **एवंज्ञानमिति** ॥ अयंपूर्वस्थितस्येत्यादिनोक्तः ॥ **यत आहुरिति** ॥ उपास्यैवतुपश्यंतिनान्यथातुकथंचन । ऋषीन्राज्ञस्तथारभ्यप्रतिभाभ्यधिकाक्रमात् । यावद्ब्रह्माब्रह्मणस्तुप्रायोनाप्रतिभासितमितिगीतातात्पर्येआचार्याःयत्आहुरतोविरिंचेतरेषामेवतिरोहितलाभइत्यर्थः । नन्वत्रैवप्रायइत्युक्तत्वात् कदाचिद्ब्रह्मणोपिज्ञानतिरोभावोज्ञायते । एवंपुराधारणयात्मयोनिर्नष्टांस्मृतिंप्रत्यवरुह्यतुष्यन्निनितिद्वितीयेअपाश्रितः कंजमुलोकतंत्रंनात्मानमत्थाविददादि देवइत्यादितृतीयेचस्पष्टं तिरोहितज्ञानलाभः प्रतीयतेअतः । कथंविरिंचेतरेषामित्युक्तिरितिचेत् । उच्यते । नब्रह्मणःकदाचिदपिज्ञानतिरोधानाख्याज्ञानं । तस्यमध्यंदिनेसूर्यक्षोभवत्क्षोभमात्रकं नैवाज्ञानंयथासूर्येतमोनास्तिकथंचनेतिएकादशतात्पर्योक्तेः । किंतुविष्णुप्रीत्यर्थंस्वात्मनोज्ञानंकदाचित्प्रदर्शयति । अज्ञानंचचतुर्वारंद्विवारंभयमेवच । शोकोपितावन्नान्यत्रकदाचिब्रह्मणोभवेत् । तत्रापिभगवत्प्रीत्याउन्नत्यैवास्यतद्भवेदितिषष्ठतात्पर्योक्तेः । पुनःश्रवणादिकंचविष्णुप्रीत्यर्थमेवविष्णोःप्रीत्यर्थमेवास्यश्रोतव्यंप्रायशोभवेदितिगीतात्पर्यवाक्यशेषात्कादाचित्कप्रदर्शनाभिप्रायं । प्रायइति । ननुविरिंचेतरेषामपिकथंतिरोहितलाभः । उक्तरीत्यातेषांज्ञानतिरोधानाभावादितिचेत्सत्यं । गौतुमशापकालसामर्थ्याभ्यांतज्ज्ञानाभिभवाभावेपिब्रह्मवरोपो-

द्बलितकल्यावेशेनतत्तिरोधानंपुनस्तत्प्राप्तिश्चास्त्येव । कलिस्त्वयंब्रह्मवरादिदानींनिबाधतेस्मान्सकालाःप्रजाश्च । अज्ञानमिथ्यामतिरूपतोसौप्रविश्यसज्ज्ञानविरुत्थरूपः । अथोगिरीशादिमनोनुशायीकलिर्ममाराशुसुवाङ्मयैःशरैः । निकृंतशीर्षोभगवन्मुखेरितैःसुराश्चसज्ज्ञानसुधारसंपपुरितिभारततात्पर्योक्तेः । प्राक्शापकालाभ्यामेवाभिभवाभावउक्तस्तदनुसारेणपूर्वव्याख्यानामितिनकोपिदोषइति ॥ **तत्रेति** ॥ सूत्रेष्वित्यर्थः । सूत्राणामत्युपादेयत्वेनव्याख्येयत्वेसित्येसतीतिवा । आदिशब्देनविषयादिपरिग्रहः । अत्रप्रथमाधिकरणे ॥ **शास्त्रसंगतिरिति** ॥ तद्विजिज्ञासस्वतद्ब्रह्मेत्यादि ब्रह्मविचारविधायकवाक्यार्थनिर्णायकन्यायव्युत्पादकत्वात् ब्रह्मविचारपरशास्त्रेअंतर्भावलणसंगतिरित्यर्थः । यथोक्तंसुधायांसंगतिर्द्विविधा । अंतर्भावलक्षणाआनंतर्यलक्षणाचेति । आद्यापिशास्त्राध्यायपादोतर्भावभेदेनत्रिविधा द्वितीयाप्याक्षेपकीआतिदेशकीऔपोद्घातकीआपवादकीत्याद्यनेकविधेति । अत्रयद्यप्यन्यथेत्युत्तरवाक्योक्तरीत्याजिज्ञासायाःकर्तव्यत्वाभावेजिज्ञासाकरणी भूतन्यायग्रथनात्मकशास्त्रस्यानारंभणीयत्वप्रसंगात्तदर्थप्रवृत्तस्याधिकरणस्यशास्त्रेणोपोद्घातकीसंगतिरप्यस्ति । तथापिसात्रनविविक्षिता । तथात्वेतस्यावक्ष्यमाणरीत्याऽध्यायपादाभ्यामपिसत्वेनशास्त्रसंगतिरस्ति अध्यायपादसंगतिर्नास्तीतिवक्तुमयोगात् । अतएवन्यायविवरणटीकायां तद्विजिज्ञासस्वेतिवाक्यार्थविचारपरत्वाद्वेदार्थमीमांसाशास्त्रांतर्गतमापिभवतीत्यंतर्भावसंगतिरेवोक्ता । सुधायामपिअतएवास्यनशास्त्रबहिर्भावइत्युक्तं । किमर्थं जिज्ञासायाकर्तव्यत्वमत्रसमर्थनीयमित्यतआह ॥ **अन्यथेति** ॥ जिज्ञासायाअकर्तव्यत्वेजिज्ञासाकरणीभूतन्यायग्रथनात्मकशास्त्रस्यानारंभणीयत्वप्रसंगादित्यर्थः । ननुशास्त्रेध्यायेतथापादेश्रुत्याधिकरणेनच । संगतिः पंचधाप्रोक्तासर्वाधिकरणेष्वपिइत्याद्युक्तेः कथंशास्त्रसंगतिरेवप्रदर्श्यतइत्यतआह ।

SGDF
Sri Gargeshwari Digital Foundation

॥ अध्यायपादसंगतिस्त्विति ॥ पंचाधिकरण्याः अध्यायपादप्रतिपाद्यसमन्वयताद्विशेषाप्रतिपादकत्वेनतदुभयांत
र्भावासंभवादितिभावः । चतुर्थसूत्रेसमन्वयादितिसाक्षात्समन्वयोभिहितः । तमेवसमन्वयंप्रकटयतीत्यानंदमयनयभा-
ष्येअध्यायशेषस्यसमन्वयप्रपंचकत्वमुक्तं सुधायांचसमन्वयसूत्रेणाध्यायशेषस्यप्रपंच्यप्रपंचकभावसंगतिरित्युक्तं तथेक्ष
तिनयेतदभावंकुतोन्वयइत्यनुव्याख्यानोक्तरीत्यासमन्वयसाधारणहेतुवाच्यत्वसमर्थनंक्रियतेअतः समन्वयेक्षतिनययो-
रपिअध्यायसंगतत्वेनकथमानंदमयाधिकरणमारभ्यैवेत्युक्तमितिचेत् । उच्यते । आनंदमयनयमारभ्यसंगतिद्वयं ततोर्वाक्
समन्वयेक्षतिनययोः पादमात्रेणसंगत्यभावः । अन्येषुत्रिषुचाध्यायेनापिसंगत्योरभावः पंचाधिकरणीसाधारणः । एत-
त्सूचनार्थमेवाध्यायपादसंगतीति द्विवचनेप्रयोक्तव्येसंगतिरितिसमुदायैकवचनंप्रयुक्तं पंचाधिकरण्याः अध्यायपादानंत
र्भावेतदादौनिवेशःकथमित्यतआह ॥ ततइति ॥ आद्यसूत्रेजिज्ञास्यतयोक्तब्रह्मणोद्वितीयेलक्षणमभिधायतृतीयेतस्याति-
व्याप्तिनिरासायशास्त्रंप्रमाणीकृत्यचतुर्थेशास्त्रस्यान्यपरत्वनिरासायसर्वशब्दसमन्वयमभिधायसंशब्दवाच्यत्वे पंचमेसमर्थि
तेतदनंतरमेवसमन्वयेआकांक्षोदयात्पंचाधिकरण्याउपोद्घातरूपत्वेनसमन्वयाध्यायस्यतदादिनामपादस्यचादौनिवेशो-
युक्तइत्यर्थः॥ नाधिकरणश्रुतिसंगतीति ॥ पूर्वनयेनोत्तरनयस्यसंगतिरधिकरणसंगतिः । पूर्वनयस्थविषयवाक्येनोत्त
रनयस्थविषयवाक्यस्यसंगतिः श्रुतिसंगतिः । तदुभयमुक्तरीत्यानास्तीत्यर्थः । विषयोविशयश्चैवपूर्वपक्षस्तथोत्तरः । प्रयोज-
नंचपंचैतेप्राचोधिकरणं विदुरित्युक्तेरधिकरणशरीरभूतविषयादिपंचकंक्रमेणदर्शयति ॥ प्रारिप्सितेत्यादिना ॥ शास्त्र
स्यैवानारब्धत्वात्कुत्रप्रवर्तनीयमित्यतउक्तं॥ प्रारिप्सिततयाचित्तसंगतेति॥ विषयःविचारविषयीभूतःसंशयधर्मी।
॥ उभयविधेति॥ अग्निहोत्रनिषिद्धहिंसयोःकर्तव्यत्वाकर्तव्यत्वाभ्यांसहदृष्टव्यापारत्वाख्यसाधारणधर्मस्यजिज्ञासायां

SGDF
Sri Gargeshwari Digital Foundation

दर्शनंसंशयकारणमित्यर्थः ॥ **अधिकारीति**॥ एतेषांप्रत्येकंहेतुत्वं चंद्रिकातोवगंतव्यं। ननुविषयस्यादौनिराकरणात् तदादित्वेनानिर्देशःकार्यः।नचसूत्रेअथशब्देनादावधिकारिणःसूचितत्वात्तदादित्वेननिर्देशइतिवाच्यं।तर्हितस्यैवादौनिरासप्रसंगात्। अतःशब्दसूचितप्रयोजनस्यद्वितीयतयाब्रह्मशब्दसूचितविषयस्यतृतीयतयानिर्देशप्रसंगश्चेतिचेत्। उच्यते। सौत्रक्रमानुसारेणादावधिकारिनिर्देशेपितन्निरासेविषयप्रयोजननिरासयोः हेतुत्वेनतयोः निर्देशवैपरीत्येननिराकरणं युक्तमिति॥ **नतावदिति**॥ प्रयोजनादिचनिराकरिष्यामीत्याशयेनतावच्छब्दः॥ **असंदिग्धत्वादिति**॥ संदिग्धस्यैव विचार्यत्वादितिभावः । कुतोऽसंदिग्धत्वमितिचेत् । अत्रप्रष्टव्यं । ब्रह्मकिंजीवभिन्नंकिंचिदस्त्युतजीवएव नाद्य इत्याह ॥ **प्रमाणाभावेनेति** ॥ प्रत्यक्षानुमानयोस्तत्रासामर्थ्येनकर्मकांडस्यकर्मपरत्वेनवेदांतस्यजीवपरत्वेननजीवातिरिक्तेब्रह्मणिमानमितिभावः । द्वितीयेत्वाह ॥ **जीवस्येति** ॥ ततःकिमित्यतआह ॥ **नहीति** ॥ संदिग्धे संदेहवान्भवति । निश्चयस्यसंशयविरोधित्वादितिभावः ॥ **अनुभवादिति** ॥ अस्यानुभवस्यात्मस्वरूपत्वेनतत्प्रकाशितस्यस्वप्रकाशितत्वादितिभावः । नायमनुभवःआत्मस्वरूपः किंतुतदतिरिक्तमनोजन्यएव । अतःआत्मनोऽन्यप्रकाशितत्वेननस्वप्रकाशतत्वमितितार्किकमतमपाकरोति ॥ **नचेति** ॥ **तस्यापीति** ॥ अज्ञायमानत्वपक्षेदूषणस्य वक्ष्यमाणत्वेनमानसानुभवस्यकेनचिदनुभवेनज्ञायमानत्वंवाच्यं । एवंतस्यापीत्यनवस्थेत्यर्थः ॥ **कस्यचिदिति** ॥ तथाचतद्ज्ञानायनुभवांतरानन्वेषणान्नानवस्थेतिभावः । तत्स्वप्रकाशत्वंलाघवादितिभावः। ननुयदाऽनुभवंज्ञास्यामीति जिज्ञासातदैवतद्ज्ञानायानुभवांतरान्वेषणं जिज्ञासाचसंदेहदशायामेवतथाचयदाकोटिस्मरणादिविरहेणसंदेहानुदयस्तदातदधीनजिज्ञासायाअप्यभावेननानुभवांतरान्वेषणं अतोनानवस्थेत्याशंक्यनिराकरोति॥ **जिज्ञासायामेवेति**॥

॥ **अनुभवविरोधादिति** ॥ सुखंज्ञास्यामीतिजिज्ञासाभावेपियथासुखमनुभूयतेतथाघटानुभवानंतरमनुभवंज्ञास्यामीतिजिज्ञासाभावेपिघटज्ञानवानहमित्यनुभवसद्भावेनजिज्ञासायामेवानुभवस्यज्ञायमानत्वांगीकारेज्ञानस्य जिज्ञासितग्राह्यत्वानुभवविरोधइत्यर्थः । ननुमानसानुभवोनज्ञायतएवातोनानवस्थेत्यतआह ॥ **नहीति** ॥ केनचित्प्रमाणेनज्ञेयस्यैवसत्यत्वेनसर्वथाऽज्ञेयत्वे असत्वस्यापरिहार्यत्वादितिभावः। नब्रूमोवयमात्मनोमानसानुभववेद्यत्वंयेनानवस्थाकिंतु स्वप्रकाशसंविदाश्रयतयाऽत्माभासतइतिप्राभाकरशंकामपाकरोति ॥ **नचेति** ॥ **सौषुप्तिकानुभवेति** ॥ सुषुप्तौजायमानात्मानुभवेत्यर्थः । इष्टापत्तिपरिहारायोक्तं ॥ **औत्तरिकानुस्मृतिसिद्धेति** ॥ सुषुप्त्युत्तरकालेखल्वेतावंतंकालंसुखमहमस्वाप्समितिस्मृतिर्भवतिसाचानुभवपूर्वकत्वात् सुप्तावात्मानुभवंगमयतीतिभावः । ननूक्तज्ञानस्यात्मादिविषयकत्वेनसाक्षिरूपत्वात्कथंस्मृतित्वंमनोजन्यज्ञानस्यैवस्मृतित्वादितिचेत् सत्यं अतीतकालेअनुभूतार्थविषयकत्वसारूप्येणसाक्षिज्ञानेस्मृतिशब्दव्यवहारोपपत्तिः । आजन्ममरणंस्मृत्वामुक्ताहर्षमवाप्नुयुरितिछांदोग्यभाष्योदाहृतस्मृतौ मुक्तस्वरूपज्ञानेस्मृतिशब्दप्रयोगात् । कुतइत्यतआह ॥ **नहीति** ॥ गृहीतएवप्राणोभवति गृहीतावाक्गृहीतंचक्षुरिति श्रुत्यासर्वेंद्रियोपरमावगमेनातिरिक्तसंविदभावान्नतदाश्रयतयात्मभानमितिभावः। आत्मातिरिक्तेत्युक्तात्मस्वरूपसंविदेवसौषुप्तिकानुभवः समाधेयइतिसूचयति । किंचात्मानसंविदाश्रयतयाभासतेसंविद्रूपत्वात्संविद्वदितिदूषणांतरंप्राभाकरमतेचाह ॥ **संविदात्मकत्वादिति** ॥ नन्वात्मनोविषयत्वंनिराकुर्वतायथाकथंचिदात्मसिद्धिर्वक्तव्या । साचस्वप्रकाशत्वइवमानसानुभववेद्यत्वेस्वप्रकाशसंविदाश्रयतयाभानेवासमाना । अतोत्रतदुभयनिराकरणंव्यर्थमितिचेत् सत्यं । जीवव्यतिरिक्तेश्वराभावात्तस्यचस्वप्रकाशत्वेनानित्यसिद्धत्वादितिन्यायविवरणोक्तस्वप्रकाशत्वसमर्थनार्थमेव

Indian Institute of Advanced Study Digitized by Siddhanta eGangotri Gyaan Kosha

मानसानुभववेद्यत्वादितिमतनिराकरणंकृतं ॥ **नचेति** ॥ प्रयोजनंचेतिसंबंधः ॥ **ज्ञायमानेपीति** ॥ जीवाख्ये ब्रह्मण्यहमितिज्ञायमानेप्यैहिकामुष्मिकफलानुपलंभादित्यर्थः ॥ **विषयेति** ॥ योहियत्प्रयोजनमुद्दिश्ययंविषयंजिज्ञासतेतस्यैवतत्राधिकारित्वादितिभावः । अतएव संबंधिभूतत्रितयाभावादेव । अतःविषयाद्यभावात् । पूर्वपक्षेफलमाह ॥ **नैतदिति** ॥ आद्यइतिशब्दोहेतौ । द्वितीयःपूर्वपक्षसमाप्तौ ॥ **ॐ अथातोब्रह्मजिज्ञासा ॐ** ॥ अत्रोंकारोबुध्याविविक्तेनब्रह्मेत्यनेनान्वीयते । तथाच । अथाध्ययनशमदमादिरूपाधिकारसंपत्यनंतरं । अतः अकारशब्दवाच्यात् प्रसंनात् ब्रह्मतःज्ञानजन्यप्रसादजमोक्षाख्यफलसत्वात् । ओंब्रह्मणोगुणपूर्णस्यविष्णोः जिज्ञासाश्रवणमनननिदध्यासनरूपाकर्तव्येत्यर्थः । ओंब्रह्मशब्दयोरुभयोरपियोगेनगुणपूर्तिवाचित्वेपिएकस्यरूढित्वमाश्रित्यविशेष्यवाचित्वेनान्वयः । आत्मेतितूपगछंतीत्यत्रेवद्रष्टव्यः । तत्रात्मशब्दस्यावृत्तिमंगीकृत्यैकस्यस्वामित्वार्थकत्वमपरस्यविष्णुरूपविशेष्यवाचित्वंचांगीकृत्यान्वयस्यवक्ष्यमाणत्वात् । ब्रह्मशब्दमात्राद्विषयसिद्धावपिब्रह्मणिवेदरूपप्रमाणसूचनायतव्याख्येयोंकारग्रहणं ॥ **अवश्यमिति** ॥ तस्याविघ्नपरिसमाप्त्यादिफलकत्वादितिभावः । नचसूत्रकारस्याविघ्नशून्यत्वात् तत्करणमनर्थकमितिवाच्यं । शिष्यशिक्षार्थत्वात् । अन्यथाभारतादौनकुर्यात् ॥ **तत्परतयेति** ॥ मंगलफलतयेत्यर्थः । नतुतदभिधायकतयेति । अथशब्दस्यश्रुतितोमांगलिकत्वेनमंगलाभिधायकत्वाभावात् । अथशब्दःश्रुत्यामंगलप्रयोजनकइतिसुधाग्रंथाच्च । मंगलस्यवाक्यार्थानन्वयाच्च । तस्याभिधेयमाहेत्युत्तरग्रंथास्वारस्याच्च । अतएवतत्फलतयेति क्वचित्पाठः । ततश्चमंगलार्थइत्यर्थशब्दः प्रयोजनवचनइतिभावः ॥ **योग्यतयेति** ॥ आनंतर्यप्रतिपत्तावन्वयित्वसामर्थ्येनेत्यर्थः । मंगलोक्त्यादेरितिमंगलप्रयोजनकशब्दोत्रमंगलत्वेनविवक्षितः । उक्तिरुच्चारणं । क्वचिन्मंगलाचारादे

SGDF
Sri Gargeshwari Digital Foundation

रितिपाठः । आदिपदेनाधिकारानंतर्यादिप्रतिपादनं ॥ **शब्दांतरेणेति** ॥ तत्प्रयोगेणेत्यर्थः । अत्रेत्यनुवादः । प्रथमप्रयोज्यत्वइतिव्याख्या । तदितिपरामर्शघटनायनियामकंप्रस्तावयति ॥ **नियामकेनेति** ॥ यादृच्छकंईश्वरेछया प्राप्तं । यदृच्छाहितदिछास्यादित्युक्तेः । अनियतमितियावत् । अतोननियामकापेक्षेतिभावः ॥ **यतइति** ॥ निखिलानीत्यस्यैवविवरणंनियत्यैवेतिभावः । अथातोब्रह्मजिज्ञासा । अथातोधर्मजिज्ञासा । अथातोदैवीमीमांसा । अथातो दर्शपूर्णमासावित्यादिसंभावितनिखिलानीतिबोध्यं । तेनपाणिनीय सूत्रादौनव्यभिचारःशंक्यः । किंनियामकमित्येतद्विवरणपरतयोत्तरग्रंथंयोजयति ॥ **नियामकंचेत्यादिना** ॥ **अवश्यवक्तव्यार्थत्वमिति** ॥ अर्थस्यादौवक्तव्ये तत्प्रतिपादकशब्दस्यापिप्रथमप्रयोक्तव्यत्वमितिभावः । स्वरूपतः अर्थतउत्तमत्वमनपेक्ष्य । अर्थतः अर्थाधिक्यमनपेक्ष्य ॥ **आक्षिपतीति** ॥ तथाचनकथमपीतियोज्यमितिभावः । अत्रावश्यवक्तव्यार्थत्वाधिक्ययोस्तदभावयोश्चलोकेशब्दांतरेषुदर्शनादथशब्दादौतत्संदेहेनप्रश्नसंभवात्प्रथमतृतीययोःपृछतीत्युक्तं । स्वरूपाधिक्यस्यशब्दांतरेष्वदर्शनादथशब्दादौतदाक्षेपइतिद्वितीयेआक्षिपतीत्युक्तं । अतएवतत्रशब्दांतरस्येत्यादिनामूलाभिप्रेतोहेतुःप्रदर्शितः । हेत्वर्थ इतिभाष्येहेतुत्वार्थकइत्यर्थः । अतःप्रसादात्ब्रम्हप्रसादादित्यर्थः । कथंलभ्यतइत्यतोऽतःशब्दार्थमाह ॥ **अकारशब्दवाच्याद्विष्णोरिति** ॥ पंचम्यर्थेतसिरितिभावः । पर्यवसितमाह ॥ **तत्प्रसादादिति** ॥ प्रसंनादितियोग्यतया लाभादितिभावः । जिज्ञासादिकार्यमितिशेषोक्तिः । अकारशब्दवाच्यत्वंविष्णोःकुतइत्यतआह ॥ **अइतीति** ॥ ब्रम्हपदोदितश्रुतिसूचनाभावेविष्णोरित्येवब्रूयादितिभावः ॥ **सहीति** ॥ जिज्ञासायाअपिमनोवृत्तिविशेषत्वात्तदर्थं तत्प्रसादादिरावश्यकइतिभावः । प्रथमंनिःसृतत्वमेवप्राथम्येहेतुत्वेनोच्यतेनतुस्वरूपतउत्तमत्वमतआह ॥ **अतःस्वरू-**

SGDF
Sri Gargeshwari Digital Foundation

पोत्तमाविति ॥ ननुओंकाराथशब्दौस्वरूपोत्तमौहरेःप्रथमंनिसृतत्वादित्यनुमानेयः शब्दोहरेः प्रथमंनिः सरतिसउत्तमइति व्याप्तौदृष्टांतोनेत्यतआह ॥ **यत्स्वजाताविति** ॥ मधुकैटभादेश्चतुर्मुखादप्याधिक्यनिरासायस्वजाताविति । इतिन्यायःसामान्यन्यायः । यथादेवेषुचतुर्मुखइतिदृष्टांतसंभवान्नतुविशिष्येतिभावः । शब्दांतरस्यस्वरूपतउत्तमत्वादर्शनात्कथमनयोस्तदितिशंकानिरासायसिसृक्षोरित्यादिभाष्येओंकारस्यस्वरूपोत्तमस्यग्रहणमितिध्येयं । अतःशब्दस्यतृतीयत्वेनोदाहरणेस्वरूपोत्तमत्वंकथमित्यतआह ॥ **अतश्चेति** ॥ अतःशब्दार्थइत्यर्थः ॥ **प्राथमिकइति** ॥ अनेनप्राथमिकावित्यस्यवचनव्यत्यासेनानुषंगइत्युक्तंभवति ॥ **तृतीयतयोदात्तइति** ॥ अनेनतृतीयोदात्तशब्दयोरावृत्तिरित्युक्तंभवति ॥ **इत्यतइति** ॥ अनेनतंत्रन्यायेनातःशब्दस्यहेतुपरत्वंचास्तीत्युक्तंभवति । परस्यब्रम्हणइतिद्वितीयव्याख्यानानुसारेणाह ॥ **तस्यविष्णोरिति** ॥ हेत्वर्थेसमुदीरितइतिप्रथमव्याख्यानानुसारेणाह । ॥ **तस्याजिज्ञासादेरिति** ॥ मनोवृत्तिशब्देनजिज्ञासायाअपिप्रकृतत्वादितिभावः । व्यत्यासश्चपरस्येत्यादिनोक्तस्यसमीपस्थत्वेनतत्परामर्शस्वारस्यसूचनायकृतः ॥ **अनुवादइति** ॥ प्रागुक्तमेवहेत्वर्थकत्वं अधिकविधानायानूद्यते नपुनरत्रविधीयतेतेनहेत्वर्थेसमुदीरितइत्यादिनानपौनरुक्त्यमितिभावः । स्वरूपैक्यानुपपत्तेराह ॥ **सर्ववागर्थेति** ॥ सर्वासांवाचामर्थभूतंयद्गुणपूर्णत्वंतदभिधायकतयेत्यर्थः। अकारोवैसर्ववागित्यैतरेयवाक्यव्याख्यानावसरेतद्भाष्येअन्येपिशब्दाःसर्वेपिह्यकारार्थाभिधायिनः । तस्मादकारएवायंसर्ववागात्मकःश्रुतः । तस्मात्सर्वगुणान्विष्णोरकारोवक्तियत्प्रभोरित्युक्तत्वादर्थैक्याभिप्रायेणैक्यव्यपदेशः। हेतुगर्भंचैतदितिभावः॥ **परब्रह्माभिधायकइति**॥ गुणपूर्णत्वस्यैवपरब्रम्हशब्दार्थत्वादितिभावः । प्राणशब्दस्यवायौप्रसिध्यनुसारेणाह ॥ **प्राणदैवत्याविति** ॥ तस्याविष्णुपरत्वमभ्युपेत्याह

॥ १५ ॥

॥ **भगवद्वाचकाविति** ॥ भाष्येअतसातत्यगमनेष्ठागतिनिवृत्ताविति स्मरणात्। क्रमेणव्याप्तिस्थितिविधायकावित्यर्थः। व्याख्यानद्वयेपिकथंप्राणात्मकावित्यैक्यव्यपदेशइत्यतः क्रमेणोभयत्रप्रयोगौप्रदर्शयति ॥ **अभिमानीति** ॥ विज्ञानतत्वंमहतःसमुत्पन्नंचतुर्मुखादित्यादौमहत्तत्वाभिमानिनश्चतुर्मुखादितिवक्तव्येमहतश्चतुर्मुखादितिप्रयोगोयथातथेत्यर्थः । ॥ **अयंवैलोकइति** ॥ परमैश्वर्यादिसंपन्नमहार्थप्रतिपादकत्वेनमहच्छब्दितेंद्रादिनामास्यामस्तीतिमहानाम्नीसंज्ञकाप्रथमाविदामघवन्नित्यादिकाऋगयंलोकःभूलोकस्थविष्णुवाचकेत्यर्थः । प्रथमायामहानाम्नीतद्वाच्यःपार्थिवोहरिरितिकर्मनिर्णयोक्तेः॥ **उपसंव्हारइति** ॥ अतस्तस्मात्प्राथमिकावित्यादिनानपुनरुक्तिरितिभावः। ब्रह्मजिज्ञासायामधिकारइतिसंबंधः । कःकिंलक्षणकः । मंदमध्येत्यादिनाधिकारिनिरूपणात्कथमधिकारश्चोक्तइत्युक्तमतआह ॥ **अधिकारीति** ॥ भाष्येजातिकृतः मनुष्योत्तमत्वादिधर्मकृतः । नन्वत्रत्रिविधाइत्युक्याकतिविधाइतिप्रश्नपरिहारेपिलक्षणानुक्तेस्तत्प्रश्नोनपरिस्फुटइत्यतआह ॥ **अनेनेति** ॥ मोक्षयोग्येतरावृत्तिमनुष्योत्तमत्वादिविशेषधर्मकथनेनेत्यर्थः ॥ **अस्यचेति** ॥ सच्छूद्रादौचेत्यन्वयः । व्याप्तिर्व्यापनं । यस्यव्यापनंलक्ष्यमात्रेऽस्तितत्तिलक्षणं । योधर्मोलक्षेव्याप्त्यावर्ततेनवर्ततेचान्यत्रसधर्मोलक्षणमित्युक्तेः । अस्यमोक्षयोग्यत्वस्यव्यापनंलक्ष्यइवजिज्ञासानधिकारित्वेनालक्ष्येसच्छूद्रादौचास्ति । अतोनेदंलक्षणं । ननुसच्छूद्रादेरपिविदुरधर्मव्याधजरितर्यादेर्वैदिकब्रह्मविद्याधिकारदृष्ट्यालक्ष्यत्वात्तव्यापनमिष्टमेवेत्यतउक्तं ॥ **प्रायिकत्वादिति** ॥ विदुरादिव्यतिरिक्तेष्वप्यनुत्पन्नज्ञानेषुबाहुल्येनवर्तमानत्वादित्यर्थः । ननुतेषामपिदेहांतरेवैदिकब्रह्मविद्याधिकारोवर्ततएवेतिलक्ष्यत्वात्तव्यापनमपीष्टमित्यतउक्तं ॥ **अरूच्येति** ॥ तेषांदेहांतरेविद्यमानोऽधिकारोनेदानींप्रवृत्त्युपयुक्तः । प्रवृत्त्युपयुक्तएवाधिकारोत्रविचार्यतइत्युच्यतइत्यर्थः।

तर्हिअतिव्याप्तस्यकथंसामान्यलक्षणत्वेनस्वीकारः । तथात्वेशृंगित्वस्यापितथात्वापत्तेरित्यतउक्तं ॥ **प्रायिकत्वा-दिति** ॥ लक्ष्यतावच्छेदकसामानाधिकरण्यस्यबाहुलिकत्वादित्यर्थः । अलक्ष्यतावच्छेदकसामानाधिकरण्यापेक्षयावै दिकब्रह्मविद्याधिकारित्वरूपलक्ष्यतावच्छेदकसामानाधिकरण्यस्यबाहुलिकत्वेनदोषस्याल्पतयास्यसामान्यलक्षणत्वेन-स्वीकारः । शृंगित्वेतुनैवमितिभावः ॥ **अध्ययनलब्धेति** ॥ अवैष्णवस्यवेदेपित्र्यधिकारोनविद्यतइत्युक्तेरिति-भावः । अत्राध्ययनस्यान्यायत्वं । अभक्तैरनधिकारिभिर्भक्तैरधिकारिभिरपिपुस्तकपाठादिनाऽयोग्योपदेशेनवाकृ तत्वंद्रष्टव्यं । विशेषलक्षणस्यसामान्यलक्षणपूर्वकत्वादाह ॥ **तथाचेति** ॥ अत्रमोक्षायोग्यब्राम्हणसच्छूद्रादिव्या वृत्यर्थंक्रमेणविशेषणद्वयं ननुभक्तियुक्तपरेविष्णौतथाध्ययनवानपि । अधमोयमितिज्ञेयएतत्पूर्वशमादिमान् । मध्यःस्याद्ब्र ह्मणोविष्णोर्वशेब्रह्मादिपूर्वकः । विज्ञायभक्तिसंपन्नोविष्ण्वर्थंमोक्षमर्थयन् । नमोक्षार्थंचाविष्णुःस्यादितिज्ञानीसउत्तमइति विशेषप्रमाणेनमध्यमादावध्ययनादेरप्युक्तेः कथंशमादिसंयुक्तत्वमात्रंतल्लक्षणं । किंचतावन्मात्रस्यमध्यमादिलक्षणत्वे-उक्तस्यसामान्यलक्षणत्वानुपपत्तिरधममात्रवृत्तेरित्यतआह ॥ **शमादिसंयुक्तइत्यादाविति** ॥ शमादिसंयुक्तइ-त्यत्रभक्तिपूर्वकाध्ययनसंग्रहः । जातवैराग्यविष्णुपादैकसंश्रयइत्यत्रभक्तिपूर्वकाध्ययनशमादिसंग्रहइत्यर्थः । विशेष प्रमाणमुपलक्षणमितिभावेनाह ॥ **पूर्वत्रचेति** ॥ भक्तिमानित्यादौशमादिसंयुक्तत्वविष्णुपादैकसंश्रयत्वादेरनुकर्षः । शमादिसंयुक्तइत्यत्रविष्णुपादैकसंश्रयत्वादेरनुकर्षइत्यर्थः । एवंसर्वस्यसर्वत्रसंबधसांकर्यं । परस्परमव्यावृत्तिः । अति व्याप्तिरितियावत् ॥ **उत्तरेति** ॥ पूर्वस्मिन्नितिशेषः । उत्तरस्मिन्मध्यमेउत्तमेवोक्तानामध्ययनवत्त्वादिगुणसमुदाया नांत्रयाणांपूर्वस्मिन्नधमेमध्यमेवाअप्राचुर्येणेत्यर्थः । ततश्चप्रचुरतमाध्ययनादिगुणवत्त्वमुत्तमत्वंप्रचुरतराध्ययनादिमत्त्वं

SGDF Sri Gargeshwari Digital Foundation

मध्यमत्वंप्रचुराध्ययनादिमत्वमधमत्वमितिनसांकर्यमितिभावः । अथवाउत्तरंचोक्तंचतयोरप्राचुर्येणेत्यर्थः । संगृह्य
तानामनुत्कृष्टानांचाप्राचुर्यंकंठतोऽभिहितानांचप्राचुर्यमितियावत् । तथाचाधमनिष्ठगुणसमुदायत्रयमध्येशमादिवि-
ष्णुपादैकसंश्रयत्वयोरप्राचुर्यमध्ययनादेः प्राचुर्यंमध्यमनिष्ठगुणसमुदायत्रयमध्येअध्ययनादि विष्णुपादैकसंश्रयत्वयोरप्रा-
चुर्यं शमादेश्चप्राचुर्यं । उत्तमनिष्ठतयोक्तगुणसमुदायत्रयमध्येअध्ययनादि शमाद्योरप्राचुर्यं विष्णुपादैकसंश्रयत्वादेः
प्राचुर्यमितिनसांकर्यमितिभावः । भाष्ये ॥ **सन्यस्तेति** ॥ विष्णवर्पितेत्यर्थः । ब्रह्मादिशब्देनचेतनविवक्षा-
यामाह ॥ **असर्वोतमत्वमिति** ॥ तल्लोकादिजडविवक्षायामाह ॥ **तत्पदादीनामिति** ॥ अत्रभागवततंत्रे
॥ **तृतीयेवक्ष्यतइति** ॥ तृतीयाध्यायेचतुर्थपादेद्वितीयाधिकरणे किंसर्वेषांज्ञानाधिकारः उतकेषांचिदेवेतिसंदेहेफ
लार्थित्वसाम्यात्सर्वेषामस्तीतिपूर्वपक्षेयथानवकोटिदेवानांदेवत्वसाम्येपितन्मध्येशतस्यैवसोमपानाधिकारःतथापुरुषा
र्थित्वसाम्येपिनसर्वेषांज्ञानाधिकारः । किंत्वध्ययनमात्रवतः । यथाशक्त्यखिलवेदाध्ययनवतएवेतिसिद्धांतितं ।
अनेनाध्ययनस्यब्रह्मविद्याधिकारत्वंगम्यते । तत्रैवतृतीयाधिकरणेकिंसर्वेषामेकप्रकारेणज्ञानाधिकारःउततारतम्येनेति
संदेहेतारतम्यकल्पनस्यव्यर्थत्वादविशेषेणैवसर्वेषामधिकारइतिप्राप्ते नाविशेषात् । अविशेषेणनज्ञानाधिकारःतथात
ज्ञानेपिसाम्यापत्तेरितिसिद्धांतितं । अनेनब्रह्मविद्याधिकारत्रैविध्यंगम्यतइतिभावः । द्वंद्वसहिष्णुःसुखदुःखाभ्यांमुच्यत
त्वनीचत्वहीनः ॥ **स्वस्थितमिति** ॥ आत्मनीत्यनंतरंस्थितमितिशेषइतिभावः । पश्येदितितेषामपरोक्षज्ञानसाधनत्व
मुच्यतेनश्रवणादादिरूप जिज्ञासार्थत्वमित्यतउक्तं ॥ **विद्यादिति** ॥ पश्यार्थैश्चानालोचनइत्यत्रपश्यार्थैरित्यत्रज्ञाना-
र्थैरितिव्याख्यानेनज्ञानमात्रेपिप्रयोगादितिभावः । तादर्थ्यं । ज्ञानार्थत्वं ॥ **उपनीतइति** ॥ उपनयनवानध्ययनंसं

SGDF
Sri Gargeshwari Digital Foundation

पादयेदित्यत्रयथोपनयनस्याध्ययनार्थत्वंतथेत्यर्थः ॥ **अंतःप्रकाशाइति** ॥ शरीरांतः स्थितात्मज्ञानवंतइत्यर्थः । तेषांमध्यमत्वंचमध्यमाऋषिगंधर्वाइतिप्रागेवोक्तमितिभावः । निर्विण्णः विरक्तः अकृतशब्दार्थोनित्यपुमर्थइति । कृते नेत्यस्यकर्मादिनेति । तदित्यस्यतस्मादिति ॥ **देवादीनामिति** ॥ सामान्यैर्यैस्तविज्ञेया विशेषाममगोचराइति-पूर्वार्धः । तेषामुत्तमत्वंदेवास्तत्रोत्तमामताइतिप्रागेवोक्तमितिभावः । वृणुते स्वीकरोति । यथाभक्त्याहरिस्तुष्टइतिप्रमाणानुसारेणतेनलभ्यइत्यस्याभिप्रायमाह ॥ **तस्यप्रसन्नइति** ॥ प्रकाशयति । श्रवणादिकंविषयीकरोति । भक्तिवाचकपदाभावादाह ॥ **अत्रेति** ॥ अभक्तस्यस्वीकाराभावादितिभावः । हरिभक्तिमात्रस्यप्रयोजकत्वंदेवतागुरुद्वेषिणस्तत्रसाम्येनभक्तस्यवाब्रह्मविद्याधिकारप्रसंगनिरासायोदात्तश्रुत्यर्थंव्यंजयन्नेवतामवतारयति ॥ **साचेति** ॥ अनेनयस्यदेवेहरौपरासर्वोत्कृष्टादेवेदेवतासमूहेयथायोग्यतानुसारेणगुरौचगुरुसमुदायेतथायोग्यतानुसारेणैवभक्तिर्वर्ततेतस्य महात्मनः पूर्वंकथिताएतेअर्थाःप्रकाशंतइतिश्रुतिर्योजिताभवति । भाष्येव्योमसंहितायांचेत्यस्याधिकारश्चोक्तइतिपूर्वेण संबंधः ॥ **वर्णबाह्याइति** ॥ तेनसन्म्लेंछादीनांसंग्रहइतिभावः ॥ **अधिकारिकथनमिति** ॥ तेनायोग्यानामपिनामज्ञानेनमोक्षइतिनिरस्तमितिभावः । भाष्येब्राम्हणान्बंधून्व्यपदिशति । स्वयंतुनब्राम्हणोयःसःब्रम्हबंधुः तंत्रेतिनश्रुत्यर्थविचारभागेअधिकारइत्युक्तं ॥ **एकदेशइति** ॥ अत्रापिनस्वातंत्रेणेत्युक्तं ॥ **परोक्तइति** ॥ परंप्रत्युक्तइत्यर्थः । तत्रापिविशेषोस्तीत्युक्तं ॥ **नतुग्रंथपुरःसरइति** ॥ अस्यवाक्यस्यायमर्थइति । ग्रंथार्थपूर्वकइत्यर्थः । वेदोक्तेधिकारतेतिसंबंधः । पराधम पराणुद शचीवाक्यमिदं ॥ **उक्तस्यापवादमाहेति** ॥ स्त्रीणांवेदाधिकारोनास्तीतिसामान्येनोक्तस्यसंकोचरूपबाधकमाहेत्यर्थः । भाष्ये यमी यमभार्या । देव्योमुनिस्त्रियश्चैवनरादिकुलजाअपि ।

उत्तमाइतिविज्ञेयाइतिभारततात्पर्यनिर्णयानुसारेणाह ॥ **मुनिस्त्रियोनरादिकुलजाश्चेति** ॥ मनुष्यादिकुलोत्पन्नशच्याद्याइत्यर्थः । संक्षेपविस्ताराभ्यांअधिकारानांतर्यार्थइतिसंक्षेपः । अधिकारोक्तइत्यादिनाविस्तरः । मोक्षस्य पररीत्यैकविंशतिदुःखध्वंसादिरूपत्वेअनपेक्षितत्वमेवस्यादित्यतोमोक्षस्वरूपंनिरूपयन्नाह ॥ **सुखमेवेति** ॥ मनाक् ईषत् भाष्ये अत्यर्थप्रसादमित्यनुवादात् पूर्वत्रापितथाज्ञेयमित्याह । नारायणात्य ति । अत्यंतेत्यर्थः । अत्यर्थप्रसादस्य चेति । अनेनात्यर्थप्रसादश्चेतिसंबंधः सूचितः । अत्यर्थप्रसादस्यज्ञानसाध्यत्वेतदेवसंपाद्यंकिंजिज्ञासयेत्यतोऽपेक्षितंपूरयति ॥ **अपरोक्षज्ञानस्येति** ॥ अतएवाग्रे अपरोक्षज्ञानस्यजिज्ञासासाध्यत्वे आत्मावाअरइतिश्रुत्युदाहरणमितिभावः भाष्यस्थअतःशब्दार्थंसूचयन्नाह ॥ **अत्यर्थेति** ॥ जिज्ञासाश्रवणमननध्यानरूपोपासना । ननुविषयाद्यभावेनाजिज्ञासायाअकर्तव्यत्वात्कथंकर्तव्यत्वोक्तिरित्यतः सूत्रादिसूचितयुक्त्यापूर्वपक्षंप्रतिक्षिपति ॥ **यदुक्तमिति** ॥ प्रयोगेणसूत्रे कुत्रेत्यतआह ॥ **तद्धिजिज्ञासस्वेति** ॥ आद्यतच्छब्दस्ययतोवाइमानीत्यादियच्छब्देनान्वयः । किंनामकंतदित्यतउक्तं ॥ **तद्ब्रह्मेति** ॥ ततःकिमित्यतआह ॥ **ब्रह्मशब्दश्चेति** ॥ **अथेति** ॥ हरिःकस्मान्निमित्तात् ब्रम्हशब्देनोच्यतइति प्रश्नः । हियस्मादस्मिन्हरौगुणाः बृहंतःपूर्णाः तस्मादितिपरिहारः । अप्रामाणिकशंकानिरासायानुभवादित्युक्तं । तथाचविरुद्धधर्माधिकरणत्वान्नाभेदइतिभावः । अध्यासः आरोपः । उपलक्षणमेतत् । जीवनिष्ठाल्पगुणानामपिमिथ्यात्वंबोध्यं । तथाचविरुद्धधर्मत्यागेनचिन्मात्रैक्यंयुक्तमित्याशयः ॥ **परमार्थतइति** ॥ ब्रह्मशब्दार्थगुणानांमिथ्यात्वेब्रह्मत्वस्यपारमार्थिकत्वायोगादितिभावः । ननुबृहवृद्धावित्यस्मान्मनिन्प्रत्ययेनिष्पन्नोब्रह्मशब्दः पूर्णत्वापरपर्यायापरिछिन्नत्वमात्रंप्रतिपादयति । अपरिछिन्नत्वरूपब्रह्मत्वंचदेशादापरिछिन्नत्वेनापिसंभवति ।

अतोनविरुद्धधर्माधिकरणत्वेनभेदइतिशंकते ॥ **देशाद्यपरिच्छिन्नतेति** ॥ उक्तेति । गुणपूर्णत्वंब्रह्मत्वमित्यभिधायकार्थेत्यादिकेत्यर्थः । अभ्युपगमवादेनाह ॥ **देशादीति** ॥ **वक्ष्यमाणत्वादिति** ॥ उत्क्रांतिगत्यागतीनामित्यत्रसोस्माच्छरीरादुत्क्रम्येत्याद्युत्क्रांतिगमनादिलिंगैर्जीवाणुत्वस्यवक्ष्यमाणत्वादित्यर्थः । अतःब्रह्मणोगुणपूर्णत्वात् । आदिशब्देनसंबंधः सचविषयप्रयोजनयोः कार्यकारणभावादिरूपः ननुब्रह्मजिज्ञासायाः ज्ञानप्रसादद्वारामोक्षहेतुत्वेयतोनारायणप्रसादमृतेनमोक्षइतिकुतः प्रागुक्तमित्यतआह ॥ **ब्रह्मपदेति** ॥ उभयोरप्युक्तरीत्यागुणपूर्त्यर्थत्वादितिभावः । अत्रसूत्रे तथाचकर्तव्येतिपदमुत्सूत्रितमितिभावः ॥ **किन्नस्यादिति** ॥ एवमपिवाक्यपर्यवसानादितिभावः । निरंकुशत्वात् । एवमेवनियमेतिनिर्बंधरहित्वात् ॥ **यत्रेति** ॥ यत्रावांतरवाक्येयत्पदं विनार्थांतरेघटनाभावस्तत्रतदेवपदमध्याहार्यं । यत्रावांतरवाक्येयत्पदंविनापिपदांतरेणार्थांतरघटनातत्रतदेवाध्याहार्यमिति नियमोनास्तितथायत्रमहावाक्येयदवांतरवाक्यंविनार्थांतरघटनाभावस्तत्रतदेवाध्याहार्यं यत्रमहावाक्येयदवांतरवाक्यंविनाप्यर्थांतरघटनातत्रतदेवाध्याहार्यमिति नियमोनास्तीतिसतांनीतिर्निर्गलितोर्थः । नकर्तव्येत्यध्याहारेणार्थांतरघटनासंभवतीत्यतआह ॥ **नकर्तव्येत्यादेरिति** ॥ अकरणस्यस्वतःसित्वत्वेनतदर्थमधिकारादिकथनमनर्थकमितिभावः । श्रुताविहअधिकारिवर्गेपरमात्मानमुक्तरीत्याजानन्मुक्तोभवति मोक्षायान्योमार्गोनविद्यतइतिज्ञानस्यैवमोक्षसाधनत्वमुच्यते । नप्रसादस्येत्यतआह ॥ **अत्रेति** ॥ **अनन्यथोपपत्येति** ॥ अनन्यथाप्रसादात्यागेनज्ञानस्यमोक्षहेतुत्वोपपत्येत्यर्थः कुतइत्यतोज्ञानस्यैवमोक्षहेतुत्वेयस्यप्रसादादितिश्रुत्यनुपपत्तेरितिचेद्व्याख्येयं । अर्थात् । अन्यथानुपपत्येत्यर्थः । श्रुतं । श्रुतौसाक्षादुक्तं । एषशब्दार्थः प्रसन्नस्सन्निति । इषुइच्छायामित्यस्माद्अर्श आदिभ्योचिकृतेगुणेचैषशब्दस्यनिष्पत्तेः

SGDF Sri Gargeshwari Digital Foundation

प्रसादस्यापीछाविशेषत्वादितिभावः। एतेनात्रप्रसादवाचकपदाभावात् वरणंचप्रसादउच्यतइतिसुधोक्तरीत्यावृणुतइत्य-
नेनलाभेअर्थलभ्यत्वेनश्रुतंचेत्यनुपपन्नमितिनिरस्तं । एतेनैवयमैवेषतस्यैषइत्यनयोरन्यतरवैय्यर्थ्यमितिनिरस्तं । विवि-
क्षितार्थलाभायाह ॥ **दर्शनार्थमिति** ॥ श्रवणंशब्दजंज्ञानमुपपत्त्यानुचिंतनं । मतिर्निरंतराचिंतानिदध्यासनमु
च्यतइतिप्रमाणानुसारेणश्रवणादिशब्दार्थोबोध्यः । ननुश्रवणादित्रयाणांजिज्ञासारूपत्वेमननस्यैवतथात्वप्रतिपादकवि-
चारेपितत्प्रयोगादित्युत्तरग्रंथविरोधः । जिज्ञासानामयुक्त्यनुसंधानात्मकविचारापरपर्यायंमननमितिसुधाविरोधश्च ।
सुधायामेवश्रवणजंज्ञानंपूर्ववृत्तमितिश्रवणस्यजिज्ञासातः पूर्वभावोक्त्यनुपपत्तिश्च । नचश्रवणमादिर्यस्यमननस्यत-
च्छ्रवणादीत्यतद्गुणसंविज्ञानबहुव्रीहिणाश्रवणादिशब्देनमननमेवोच्यतइतिवाच्यं । तथात्वेतच्चश्रवणमननिदध्यास-
नरूपाजिज्ञासासैवेत्युक्तमितिवक्ष्यमाणतृतीयाध्यायस्थवाक्यविरोधापत्तेरितिचेत् उच्यते । उत्तरग्रंथेअन्यनिषेधाभावे-
ननतद्विरोधः । न्यायनिबंधनात्मकशास्त्रारंभणीयत्वस्यन्यायानुसंधानात्मकमननकर्त्तव्यत्वोक्तिमात्रेणसिद्धेस्तस्यैवजि-
ज्ञासात्वंसुधायामुक्तं । अत्रतुप्रतिवाक्यमयमस्यवाक्यार्थइत्येवंरूपश्रवणजज्ञानाभावेप्रतिवाक्यमस्यवाक्यस्यायमर्थोनवे-
तिसंदेहस्यैवासंभवेनतन्निरासकन्यायव्युत्पादकशास्त्रारंभणीयत्वासिद्धेः श्रवणकर्तव्यत्वस्यध्यानस्याकर्तव्यत्वेतदंगमन-
नस्याप्यकर्तव्यत्वेनशास्त्रारंभणीयत्वासिद्धेः । निदध्यासनकर्तव्यत्वस्यशास्त्रारंभेपरंपरयाहेतुत्वमितितयोरपिजिज्ञासात्वं
भाष्योदाहृतश्रुत्यनुसारेणोक्तमितिनसुधाविरोधः । एकस्यजिज्ञासाशब्दस्यश्रवणाद्यनेकार्थत्वं द्वेवावब्रह्मणोरूपइत्या-
दावेकस्यरूपशब्दस्यस्वरूपप्रतिमापरत्वदर्शनादुपपन्नमिति । ननुधातोःकर्मणःसमानकर्तृकादिछायांवाइषिकर्मणो-
धातोरिषिणैककर्तृकात्सन्प्रत्ययोवास्यादिछायामितीछायामेवसन्प्रत्ययविधानात् अनिछारूपश्रवणादेर्नसन्नंतजिज्ञा-

CODF
Sri Gargeshwari Digital Foundation

साशब्दवाच्यत्वमित्याशंक्यनिराकरोति ॥ नचेति ॥ असन्वाच्यतानसन्नंतजिज्ञासाशब्दवाच्यत्वाभावोनसन्नंत-
जिज्ञासाशब्दवाच्यत्वमस्त्येवेतियावत् ॥ जिज्ञासितमिति ॥ जिज्ञासितंसुसंपन्नमपितेमहदद्भुतमितिप्रथमस्कंधे-
सुसंपन्नंपरिपूर्णंमहदद्भुतं आश्चर्यतमंचब्रह्मेतिजिज्ञासितंविचारितं । खल्वितिनारदेनव्यासंप्रत्युक्तेवाक्येविचारेपिजि
ज्ञासाशब्दप्रयोगादित्यर्थः । उपलक्षणमेतत् । श्रवणंमननंचैवनिदध्यासनमेवच । विष्णोस्तुब्रह्मविद्यायांजिज्ञासे-
तिविदोविदुरितित्रिष्वपिप्रयोगोबोध्यः । व्याकरणंतुसाधुत्वमात्रपरं । यत्रार्थस्यविसंवादःप्रत्यक्षेणोपलभ्यते । स्वर
संस्कारमात्रार्थातत्रव्याकरणंस्मृतमितिस्मृत्युक्तेरितिभावः । ननुज्ञानेच्छांतर्णीतोविचारोलक्ष्यतइतिसुधायांजिज्ञासा
पदस्यविचारलक्षकत्वोक्त्याकथमत्रजिज्ञासापदस्यविचारवाचकत्वोक्तिरितिचेन्न । सुधायांपरमतानुवादात् । अत-
एवोत्तरत्रयदिचजिज्ञासाशब्दोमीमांसाशब्दवत् विचारएवोपसंख्यायतइतिस्वमतमुक्तं । व्यक्तमेतच्चंद्रिकायां ।
नन्वथापिनब्रम्हजिज्ञासाशब्दोज्ञानेच्छापरः । किंतुविचारस्योपलक्षकः सत्यं तथापितत्पूर्वकोविचारोलक्ष्यते ।
अन्यथासंबधाभावादितिप्रमेयदीपिकाविरोधः । अस्यपरमतानुवादत्वायोगात् । तथाहि । ज्ञानेछायाःअनिषि-
द्धत्वेप्रमाणत्वेनखलुगीताभाष्येब्रह्मजिज्ञासाविज्ञायप्रज्ञांद्रष्टव्यइत्यादिवचनान्युदाहृतानि । तत्रजिज्ञासाशब्दस्यवि-
चारलक्ष्यकत्वेनज्ञानेछापरत्वाभावान्नैतत्सूत्रंज्ञानेछाया अनिषिद्धत्वेप्रमाणत्वेनोदाहर्तव्यामिति । नन्वित्यादिनाशं
कते ज्ञानेछापरिहारेणविचारमात्रस्यलक्ष्यत्वेलक्षणाबीजसंबंधाभावात् । ज्ञानेछांतर्णीतविचारस्यलक्ष्यत्वेंऽगीक्रिय-
माणेज्ञानेछापूर्वकमेवविचारस्यलक्ष्यत्वप्राप्त्यातदनिषिद्धत्वेप्रमाणत्वेनैतदुदाहरणंयुक्तमितिपरिहृतं । सत्यमित्यादिना
नचविचारस्यवाच्यत्वेप्रकृतोपयोगः नापिपरमताभिप्रायेणप्रमाणत्वोक्तिर्युक्तेतिचेत् सत्यं अभ्युपगमवादोयमित्यदोषः

Sri Gargeshwari Digital Foundation

वाचकत्वपक्षेपिविचारस्यविधेयत्वेनकाम्यत्वाद्रष्टव्यइत्यादिप्रमाणोदाहरणस्येवसूत्रोदाहरणस्यप्रकृतोपयोगसूचनादिति प्रमेयदीपिकाभावबोधेस्फुटमिति । नन्विच्छायामपिजिज्ञासाशब्दप्रयोगात्सैवात्रजिज्ञासापदवाच्यार्किन्नस्यादित्यतआह ॥ **इच्छायाइति** ॥ प्रयत्नसाध्यस्यैवविधेयत्वेनपुरुषप्रयत्नागोचरेछायाःकर्तव्यत्वविधानायोगादितिभावः । ननुकर्तव्यत्वविधायककर्तव्यपदंसूत्रेनश्रूयते नचाध्याहारःकृतइतिवाच्यं । भवतीत्यध्याहारेणापिवाक्यपर्यवसानेनकर्तव्यपदाध्याहारनिर्बंधाभावात् । अतोत्रेछाग्रहणंसंभवतीत्यतआह ॥ **भवतीत्यादीति** ॥ आदिपदेनप्रशस्तेत्यादिसंग्रहः। प्रवृत्त्युपयुक्तवाक्यस्यैवसार्थकत्वेनघटोस्तीत्यादिवज्जिज्ञासाभवतीत्युक्तेप्रवृत्त्ययोगात्तत्कथनमनर्थकमित्यर्थः । दूषणांतरमाह ॥ **सूत्रंचेति** ॥ तद्विजिज्ञासस्वेतिश्रुतौजिज्ञासाविधानात्तदनुसारेणजिज्ञासाविधायककर्त्तव्यपदमेवाध्याहार्यं । नभवतीत्यादीत्यर्थः अतोत्रेछाग्रहणायोगाच्छ्रवणादेरेवजिज्ञासात्वमितिभावः ॥ **तत्कर्महरितोषंयदिति** ॥ यद्धरितुष्टिकरंतदेवकर्मेत्यर्थः ॥ **यइति** ॥ यइमंपरमंगुह्यंमद्भक्तेष्वभिधास्यतीत्यत्राभिधापदोक्तप्रवचनस्यनचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमइत्युत्तरवाक्यस्थप्रियकृत्तमपदेनप्रसादहेतुत्वलाभादितिभावः । आदिपदेन श्रवणादिग्राह्यं सिद्धेरित्यस्येत्याशंकामित्यनेनान्वयः । ननुप्रसादस्यकर्मादिसाध्यत्ववन्मोक्षस्यापिकर्मसाध्यत्वमपामसोमममृताअभूम कर्मणैवहिसंसिद्धिमास्थिताजनकादयः इत्यादिसिद्धं। तत्रमोक्षस्यकर्मसाध्यत्वमनाशंक्यप्रसादस्यतत्साध्यत्वंकिमर्थमित्याशंक्यपरिहरति ॥ **यद्यपीति** ॥ **अन्यनिषेधादिति** ॥ आद्ये नान्यःपंथाइति द्वितीये तेनैवेत्यन्यनिषेधादित्यर्थः । अतएवप्राक्तेनैवेत्येवकारान्वयोदर्शितः ॥ **ज्ञानसाध्यस्यैवेति** ॥ अतएवप्राक्नचज्ञानंविनात्यर्थप्रसादइत्यर्थग्रहणमितिभावः । ननुमध्यमाज्जनलोकादिरितिश्रवणादिजन्यप्रसादाज्जनलोकादिप्राप्तिकथनमयु

Sri Gargeshwari Digital Foundation

क्तं । योगस्यतपसश्चैवज्ञानस्यगतयोमलाः । महर्जनस्तपःसत्यंभक्तियोगस्यमद्गतिरित्येकादशभागवते । नित्यशोभगवद्रूपस्यापरोक्ष्येणदर्शनं । मुहूर्तमात्रंज्ञानंस्यान्महाज्ञानंततोधिकं । सदैवाखंडितंध्यानं तपइत्युच्यतेबुधैः । अपरोक्षदशायुक्तं नित्यंषण्मात्रकालया । अपरोक्षदशायुक्तं एकमात्रयुजायुतं । योगनाम्नासमुद्दिष्टं ध्यानंनित्यमखंडितं । तच्चतुर्भागयानित्यमपरोक्षदशायुतं । पादयोगाख्यमुद्दिष्टंध्यानंनित्यमखंडितं । ज्ञानेनब्रम्हलोकस्यान्महाज्ञानाद्धरेर्गतिः । पादयोगान्महर्लोकोजनोलोकस्तुयोगतः । तपसस्तुतपोलोकः प्राप्यतेनान्यतःक्वचिदितितत्तात्पर्ये ईयुस्त्रीन्कर्मणालोकान्ज्ञानेनैवतदुत्तरान् । इतिद्वितीयतात्पर्येच । जनोलोकादेरपरोक्षज्ञान मात्रसाध्यत्वस्मरणात् । एतेनजनोलोकस्यादिरितिजनलोकादिशब्देनमहर्लोकएवगृह्यतइतिनिरस्तं । उक्तरीत्यातस्याप्यपरोक्षज्ञानसाध्यत्वावगमादितिचेत् । उच्यते । अपरोक्षज्ञानंद्विविधं । स्वयोग्यबिंबादिदर्शनं ध्यानसामर्थ्यलब्धभगवन्मूर्तिसामान्यदर्शनंचेति। अत्रश्रवणादिभिरित्यादिपदेनसामान्यदर्शनंचग्राह्यं । तथाचसामान्यदर्शनापरोक्षज्ञानसहितश्रवणादिजन्यप्रसादाज्जनलोकादिप्राप्तिरुपपन्ना । नचदर्शनंद्वैविध्यं । सामान्यदर्शनस्यजनलोकादिहेतुत्वंचाप्रामाणिकं । नसामान्यादप्युपलब्धेर्मृत्युवन्नहिलोकापत्तिरितिसूत्रेणसामान्यदर्शनाल्लोकान्मुक्तिर्योग्यात्मदर्शनादितिभाष्येस्फुटत्वात् । एतदनुसारेणज्ञानसंपत्येतिभाष्यंयोग्यज्ञानसंपत्येतिव्याख्येयं। अतोनकोपिविरोधइति ॥ **आत्मेति** ॥ अतोनतद्विरोधइतिभावः। तच्छेषेण प्रमाणशेषेण ॥ **श्रवणाद्यन्वयेति** ॥ श्रवणाद्यन्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकप्रतियोगित्वादित्यर्थः । तदभावात् ज्ञानान्वयव्यतिरेकप्रयोजकान्वयव्यतिरेकप्रतियोगित्वाभावात् पारंपर्येण अंतःकरणश्रुत्यादिद्वारा । यद्यपिश्रवणमननयोरपिनिदध्यासनद्वारैवहेतुत्वंतथापिकर्मानधिकारिणांकर्मणाविनापितंत्रादिश्रवणादिनाअपरोक्षज्ञानोदयाच्छ्रवणादिनाविनाकस्यापिज्ञानोदया-

CGDF Sri Gargeshwari Digital Foundation

भावाद्वैषम्यमितिभावः ॥ **बव्हर्थत्वेनेति** ॥ बृहजातिजीवकमलासनशब्दराशिष्वितिधातुव्याख्यानादितिभावः । विवक्षाविशेषस्य नारायणरूपस्य । ब्रम्हशब्दस्यबव्हर्थत्वात्कथमवधारणमित्यतआह । मुख्यइति शेषइति । यतोनारायणप्रासादेतिनारायणशब्देनप्रकृतस्यविष्णुशब्देनग्रहणेकारणमाह ॥ **सविष्णुरिति** ॥ सपूर्वोक्तोविष्णुरेवआहहिश्रुतिः । तंविष्णुंब्रह्मेत्याचक्षतेज्ञानिनइत्यर्थः द्वितीयसूत्रेतामितिविष्णुपरामर्शःकुतइत्यतउक्तं । निरंतरेति अन्योन्यव्यवधानरहितेत्यर्थः अव्यवहिताद्यसूत्रेविष्णोरुक्त्याद्वितीयेतस्यैवपरामर्शइतिभावः । यद्वानिरंतरेत्यस्यब्रह्मजिज्ञासेतिसूत्राव्यवहितेत्यर्थः । अनयोर्देवमीमांसांतिमसूत्रत्वाद्देवमीमांसाकरणानंतरमेवब्रम्हमीमांसायाआरब्धत्वात् । तदुक्तं स्वयंभगवताविष्णुर्ब्रह्मेत्येतत्पुरोदितं । सविष्णुराहहीत्यंतेदेवशास्त्रस्यतेनहीति । ब्रम्हत्वेन ब्रह्मशब्दस्यमुख्यार्थत्वेन ब्रह्मशब्दइतीतिशब्दस्यश्रुत्युक्तत्वादित्यनेनान्वयः । कवीनामित्यन्वयप्रदर्शनं तत्रकवीनामितिबहुवचनेनबहुज्ञानिप्रयोगावगमाद्विद्वद्रूढित्वंज्ञायतइतिभावः ॥ **विद्वद्रूढेरेवेति** ॥ अविद्वद्रूढेरज्ञानमूलत्वादमुख्यत्वमितिभावः । तच्छब्देन । तदेवेत्यत्रत्येन अवयंतित्यस्यार्थोजानंतीति । एतदर्थमेवतदंशोदाहरणमितिभावः । अवयंतीत्यंतएवभाष्येश्रुतिपाठः । तावन्मात्रस्यव्याख्यानात् । समुद्रांतस्थत्वमात्राक्षेपसमाधानाच्चेतिध्येयं । लिंगात्समुद्रांतस्थत्वरूपात् असाधारणधर्मोलिंगमितिवक्ष्यति । अन्यत्ररुद्रादौ । तप्यमानायसलिलइतिभारतोक्तेरितिभावः । समुद्रेतनारायणइतिवक्ष्यमाणरीत्यातत्रासंभवात्कथंचिदित्युक्तं । निरवकाशश्रुतेदर्थांतरेअवकाशरहिताविष्णुशब्दात् नाममात्रेणवस्तुनिर्देशःश्रुतिरितिवक्ष्यति । नारायणायविद्महेवासुदेवायधीमहि । तन्नोविष्णुःप्रचोदयादितिश्रुतिंचतुर्थीविपरिणामेनव्याचष्टे ॥ **यतइति** ॥ तदितितच्छब्दश्रवणाद्यतइत्याध्याहारः शुभंप्रतीतिच विद्महे जानीमः । धीमहि चिंतयामः चोदयतु

SGDF
Sri Gargeshwari Digital Foundation

प्रेरयतु चुदप्रेरणइतिधातोः ॥ **तन्नोरुद्रइति** ॥ तत्पुरुषायविद्महेमहादेवायधीमहि । तन्नोरुद्रःप्रचोदयादित्यादीत्यर्थः ॥ **इतरवाचकेति** ॥ अनेनेतरेतिशब्दइतरशब्दइतिप्रतीतिनिरासाय ॥ **तेषामपिमुख्यत्वमिति** ॥ अनेनतच्छब्दस्तेषांतदितितंत्रेणोपात्तइत्युक्तंभवति ॥ **विष्णावेवेति** ॥ तदंतर्यामिरूपविशेषेणवा महादेवत्वरुद्रत्वादिगुणविशेषेणवा तत्तच्छ्रुतौविष्णुप्रार्थनाभेदान्नपौनरुक्त्यमितिभावः । अभीत्यस्यार्थोमुख्यतइति । अनृतस्येत्यस्यविष्ण्वतरस्येति । तदेवर्तमितिविष्ण्वर्ततशब्दवाच्यत्वान्नञश्चान्योन्याभावार्थत्वादितिभावः । आङ्गेर्थोमुख्यतइति । परमित्यस्यापरिछिन्नेति ॥ **धारकइति** ॥ दधातेःक्विबितिभावः एकएवेत्यंतएवभाष्येपाठः । इतरांशकृत्याभावात् । क्वचित्पाठेतु तंसंप्रश्नं प्रश्नविषयं अन्यानिभुवनानियंतीत्यर्थः ॥ **अन्येति** ॥ विश्वकर्मेत्यर्थः विश्वकर्माविमनेतिविश्वकर्मश्रुतेरितिभावः । ननुश्रुतिर्लिंगंसमाख्याचवाक्यंप्रकरणंतथा । पूर्वंपूर्वंबलीयइतिश्रुतितोलिंगस्यदुर्बलत्वावगमात्कथंतेननिर्णयइत्यतआह ॥ **उत्सर्गतइति** ॥ स्वभावतइत्यर्थः ॥ **सावकाशेति** ॥ नामानिसर्वाणीत्युक्त्याभगवत्यवकाशोयुक्तइत्यर्थः ॥ **बाधेति** ॥ प्रतीतार्थपरित्यागरूपेत्यर्थः । भाष्ये अधितस्थुरितिसंबंधः । छंदसिपरेपिव्यवहिताश्चेतिस्मरणात् ॥ **अन्यदिति** ॥ पद्ममित्यवचनादितिभावः ॥ **प्रसिद्धीति** ॥ श्रुत्यादिप्रसिद्धीत्यर्थः । एवंलिंगसमर्थनपरतयाव्याख्याय तन्निरवकाशपरत्वेनापिव्याचष्टे ॥ **विश्वकर्मश्रुतिवदिति** ॥ उभयोरेकत्रासंभवादाह ॥ **क्वचिदिति** ॥ जीवेव्यस्ताः सृष्ट्यादयः सर्वेपिजडेसमस्ताःसृष्ट्यादयश्चत्वारइत्यादिरूपेणेत्यर्थः । सूक्तांतरे विश्वकर्मसूक्तेन समाख्यानात् तत्प्रतिपाद्यार्थप्रतिपादनादितियावत् । निर्णीतस्थलेसमानोक्तिःसमाख्येतिवक्ष्यति । **लक्ष्मीरिति** ॥ अस्यांभ्रणीवाक्यत्वात् अंभ्रण्याश्चश्रीभूदुर्गाभ्रणीह्रीश्चमहालक्ष्मीतिकीर्तितेतिबृहद्भाष्योक्त-

रीत्यालक्ष्मीर्मूर्तित्वादितिभावः । भाष्येअप्सुआअंतरित्यर्थः श्रुतिंव्याचष्टे ॥ **दिवेति** ॥ एनेतिपृथवीविशेषणंअस्याइत्यर्थः । सुमेधसं ज्ञानिनं कृणोमि करोमीत्यर्थः तप्यमानाय तपःकुर्वाणाय एकार्थत्वात् क्रूररूपैकार्थप्रतिपादकत्वात् । आपोनाराइतिप्रोक्ताआपोवैनरसूनवः । अयनंतस्यताःपूर्वंतेननारायणःस्मृतइतिव्यासस्मृतिरंतराधिकरणे उदाहरिष्यति । अत्रयंकामयइतिवाक्ये । अपोह्यत्वात् बाध्यत्वात् प्रसिद्धपदसूचितंहेतुमाह ॥ **प्रसिद्धीति** ॥ विरोधाभावोऽसिद्धइत्याह ॥ **अत्रेति** ॥ तथात्वेतस्यरमानीचत्वप्राप्तेरितिभावः ॥ **वक्ष्यमाणेति** ॥ वेदेरामायणेचैवेत्यादिनाआनंदमयनयमारभ्यप्रतिनयंवावक्ष्यमाणेत्यर्थः । अनेनचःसमुच्चयइत्युक्तंभवति ॥ **हरिवंशत्रयेति** ॥ खिलाखिलपारिजातसंज्ञकहरिवंशभागत्रयेत्यर्थः । विरोधइत्यनंतरमत्ररुद्रग्रहणइत्यनुवर्तते । भाष्ये एषइत्यस्यएनमित्यर्थः । मोहस्यमिथ्याज्ञानरूपस्यमोहकत्वाभावादाह ॥ **मुह्यतइति** ॥ नटनंवंचनंवेति विद्यमानाकाराच्छादनेनाविद्यमानाकारप्रदर्शनंनटनं । अविद्यमानकथनंवंचनमित्युभयोः क्रियावचनरूपत्वाद्भेदः । दधीच्यादिभिः ऋषिभिः । क्वापिअविद्यमानंलिंगमूलान्वेषणादिकमतथ्यं । विष्ण्वादौविद्यमानंस्वातंत्र्यादिकंरुद्रादौउच्यमानंवितथ्यं । आत्मानंमामित्यनयोःकर्मणिद्वितीयात्वेप्रकाशवंतमित्यादिस्यान्नतुप्रकाशमित्यादीत्यतआह ॥ **आत्मानंमांचप्रतीति** ॥ अभितःपरितः समयानिकषाहाक्रतेप्रतियोगेष्वपीतिस्मरणात् कर्मप्रवचनीययोगेद्वितीयेतिभावः ॥ **प्रकाशंप्रसिद्धिमिति** ॥ तेनाप्रकाशमप्रसिद्धमित्यपिव्याख्यातं आत्मप्रसिद्धिंमामप्रसिद्धंचकुर्वित्यर्थः ॥ **शिवादिविषयत्वादिति** ॥ अनेनशैवइत्येतच्छिवविषयइतिव्याख्यातं । तेषांव्यासप्रणीतत्वेनमोहार्थंनिर्मितपाशुपतादिविलक्षणत्वमितिभावः । भाष्ये श्वपचादितितार्कितंध्येयं करणैरिति क्रीडासाधनैरित्यर्थः ॥ **स्वविरोधेनेति** ॥ स्वप्रतिपादितावि-

SGDF Sri Gargeshwari Digital Foundation

ष्णूत्तमत्वविरोधेनेत्यर्थः । तत्र रुद्राद्युत्तमत्वे वैपरीत्यंस्वविरोधेनविष्णूत्तमत्वादावप्रामाण्यरूपं ॥ **असाधारण्येनेति** ॥ मुख्यप्रतिपाद्यत्वेनेत्यर्थः । असाधारण्येनरुद्राद्युत्कर्षप्रतिपादनायप्राप्तमविद्यमानमपितद्ब्रूयात् तदुद्देशेनप्रवृत्तेराजस्तु त्यादौतथादर्शनात् प्रासंगिकंतुविष्णूत्तमत्वं विद्यमानमेवब्रूयात् नहितत्तदुद्देशेनप्रवृत्तंयेनाविद्यमानमपितद्ब्रूयादितिभावः तथेत्यःनुवादः । उक्तशब्दार्थःप्रत्युक्तामिति ॥ **उच्यतइति** ॥ आराध्यदेवदेवेशंशंकरंलोकशंकरं । तपसातोषयि त्वातंकैलासगिरिवासिनं । रुग्मिण्यांतनयंलेभेदग्धंकामंपुनर्हरिरित्यादिनोच्यतइत्यर्थः । ब्रम्हशब्दश्चविष्णावेवेत्यादि नोक्तमुपसंहरति ॥ **तस्मादित्यादिना** ॥ अधिकरणार्थमुपसंव्हरति ॥ **तदेवमिति** ॥ अतइतिसिद्धांतेफल-कथनं ॥ १ ॥ **शास्त्रसंगतिरिति** ॥ ब्रम्हमीमांसाशास्त्रप्रतिपाद्यब्रह्मविचारपरत्वात् ब्रम्हमीमांसशास्त्रेंतर्भावसं गतिरित्यर्थः । एवमग्रेपि शास्त्रसंगतिर्व्याख्येया ॥ **श्रुत्यादिसंगतिस्त्विति** ॥ आदिपदेनाधिकरणं एकवचन प्रयोगश्चैकप्रदर्शनेनान्यापिसुज्ञातेतिप्रकारैक्याभिप्रायेण चतुराधिकरण्यांयतोवेत्यादिश्रुतिरेवविचार्यतइति श्रुतिसंगतिः स्फुटा । तुशब्दःशास्त्रसंगतितः आक्षेपकत्वाख्यंविशेषमाह पूर्वमाक्षिप्यतेयत्रतत्रसाक्षेपिकीमतेत्युक्तेः । एवमग्रेपि यत्रपूर्वाक्षेपस्तत्राक्षेपिकीध्येया ॥ **गुणपूर्त्यसित्वेति** ॥ रूढ्याजीवपरत्वेयौगिकार्थगुणपूर्त्यसिध्येत्यर्थः ॥ **उभय-त्रेति** ॥ तदेवब्रह्मेतिविष्णौ । बृहजातिजीवेतिजीवइत्यर्थः ॥ **मुख्यइत्युक्तामिति** ॥ मुख्यामुख्ययोर्मुख्यस्यैवसं प्रत्ययइत्यन्यतरनिश्चयान्नोक्तसंदेहःसंभवतीतिभावः ॥ **स्वकृतेति** ॥ यतोनारायणप्रसादमृतेनमोक्षइत्यादिनेत्यर्थः । नसूत्रकारेणेत्येवशब्दः । सूत्रकारेणैवपरकीयसंभावितसंदेहात्परेणतन्निरासकन्यायस्यव्युत्पादितत्वादितिभावः । इतरकोटिप्रापकंप्रतिषेधति ॥ **यद्यपीत्यादिना** ॥ **योगेनैवेति** ॥ रूढ्यंगीकारेगुणपूर्त्यसित्वेरितिभावः । तर्हिपं

SGDF Sri Gargeshwari Digital Foundation

कजादिशब्दवद्योगरूढिरस्तुतावतापिगुणपूर्तिलाभात्एवंचरूढिमात्रतोयोगरूढेःप्राबल्याद्विष्णुरेवायंब्रह्मेतिचेन्न । अथ कस्मादितिश्रुतिसिद्धयोगेनैवतव्यवहारोपपत्तावसिद्धसमुदायशक्तिरूपरूढिकल्पनस्यव्यर्थत्वात् । पंकजादिशब्देयोग मात्रस्यभेकादावतिप्रसक्त्यारूढिकल्पनं । नचात्रतथा अन्यत्रगुणपूर्तेरनंगीकारात् तदेवाह योगेनैवेत्येवकारेण ॥ रूढेरेवेति ॥ तस्यावयवार्थसापेक्षयोगापेक्षयातन्निरपेक्षतयाशीघ्रोपस्थापकत्वादितिभावः । ननुतदेवब्रह्मेत्यत्ररू-ढिप्राप्तजीवत्यागेनविष्णुग्रहणवदत्रापिस्यादित्याशंक्याह ॥ नचेति ॥ बाधकंविनेति ॥ तत्रसमुद्रस्थत्वंबाधकमि तिभावः । अत्रापिजिज्ञास्यत्वंबाधकमित्यतआह ॥ नचतादृशमिति ॥ समुद्रस्छत्ववदपरिहार्यमित्यर्थः । जिज्ञा स्यत्वंतुवक्ष्यमाणरीत्याजीवेपिसावकाशमितिभावः । ननुब्रम्हशब्दस्यजीवइवजात्यादावपिरूढत्वात्कथंजीवएवेत्यवधा रणमितिशंकापरिहरन्नेवोपसंहरति ॥ तस्मादिति ॥ मुख्यतः अवश्यं तस्यातीवप्रसिद्धेरितिभावः । जीवस्याप्य हमितिप्रसिद्धिरस्तीत्यतःस्वरूपेणसिद्धत्वेपिदेहभिन्नत्वेननसिद्धेरितिभावेनाह ॥ देहात्मविवेकस्येति ॥ अन्य-था भस्मीभूतस्यदेहस्यपुनरागमनंकुतइतिचार्वाकोक्तरीत्यानपुण्यपापकरणाकरणेस्यातामितिभावः । यद्यपिकमलासन स्यापिप्रसिद्धिरस्ति । तथापिनतस्यजिज्ञास्यत्वं प्रयोजनाभावादितिसुधायामेवोक्तं । ननूक्तरीत्याजीवस्य जिज्ञास्यत्वे तस्यचेत्यादिनाकथंतस्याजिज्ञास्यत्वोक्तिरितिचेत् उच्यते जात्यादिवैलक्षण्योपपादनायदेहान्यत्वादिनाजीवस्यजि-ज्ञास्यतोक्ता । सिद्धांत्यभिमतमोक्षफलकगुणपूर्णत्वप्रकारकजिज्ञासानिराक्रियते । अतएवचंद्रिकायांविशिष्टाधिका रिकमोक्षफलकजीवान्यधर्मिकगुणपूर्णत्वप्रकारकपूर्वसूत्रोक्तजिज्ञासासाक्षेपेणैवेत्याद्युक्तं ॥ ॐ जन्माद्यस्ययतः ॐ ॥ अस्यप्रमितस्यचेतनाचेतनात्मकस्यजगतः जन्मादि सृष्टिस्थितिलयनियमनज्ञानाज्ञानबंधमोक्षजातं यतः यस्मात्

SGDF
Sri Gargeshwari Digital Foundation

यथायोग्यंभवति । तज्जन्मादिकारणंब्रह्मेत्यर्थः । पूर्वपक्षप्रतिबंधकयुक्तेरेववक्तव्यत्वात् लक्षणकथनमसंगतमित्यतआह ॥ निर्बाधेति ॥ श्रुत्युक्तमिति ॥ विष्णुलक्षणत्वेनप्रमितंजन्मादिकारणत्वंजिज्ञास्यब्रह्मसंबंधित्वेनाहेत्यर्थः । ॥ अस्येति ॥ इदंत्रितयकर्तृताभिधायिमायावादिव्याख्यानं । आदिपदेनजन्म आदियस्यपालनस्येत्यतद्गुणसंविज्ञानबहुव्रीहिणापालनकर्तृत्वमेवोच्यतइतिरामानुजव्याख्यानसंग्रहः ॥ निरासायेति ॥ जिज्ञासाविधायकयतोवेत्यादिश्रुतावेवचतुष्टयकर्तृत्वोक्तेरितिभावः ॥ सृष्ट्याद्यष्टकमिति ॥ ननुसूत्रेजगन्निष्टजन्माद्युच्यतेभाष्यटीकयोस्तु सृष्टासंहर्तेत्यादिप्रयोगाद्ब्रह्मनिष्ठव्यापारउच्यते अतःकथंव्याख्यानव्याख्येयभावइतिचेत् उच्यते प्रयोजकव्यापारवाचिना सृष्ट्यादिशब्देन प्रयोज्यव्यापारोजन्मादिर्लक्ष्यते लक्षणाप्रयोजनंचब्रह्मणः स्रष्टृत्वमेवनतूपादानत्वमितिसूचनं अतएवयोनःपितेतिश्रुतिंतथैवावतारिष्यतीतिध्येयं। नन्वत्रजीवेरूढिमंगीकृत्यबाधकवशात्तत्परित्यागइतिनवक्तव्यं। किंतु तदेव ब्रह्मपरमंकवीनामितिपूर्वाधिकरणोक्तन्यायेनब्रह्मशब्दस्य विष्णौविद्वद्रूढेरुक्तत्वाद्विद्वदविद्वद्रूढ्योःविद्वद्रूढेरेवबलीयस्त्वाद्विष्णुरेवात्रोक्तंब्रह्मेतिवक्तव्यमित्याशंक्यपरिहरति॥ यद्यपीति॥ अभ्युपगम्येति ॥ अभ्युपगमवादप्रयोजनंतुजीवभेदकगुणपूर्तिलाभः रूढ्यंगीकारेतदलाभादितिभावः। इयमुक्तिःसौत्रीबाधोक्तिः। रामानुजरीत्याऽतद्गुणसंविज्ञानेऽष्टकालाभादाह ॥ तद्गुणसंविज्ञानइति ॥ तस्यगुणस्यअन्यपदार्थप्रत्युपसर्जनीभूतस्यान्यपदार्थेसंविज्ञानंविशेषणत्वेनोपादानंयस्मिन्बहुव्रीहौसतद्गुणसंविज्ञानः यथालंबकर्णमानयेत्यादौ । प्रकृतेचतस्यगुणस्यान्यपदार्थे पालनादिकंप्रत्युपसर्जनीभूतस्यजन्मनोऽन्यपदार्थेपालनादौसंविज्ञानंविशेषणत्वेनोपादानंकार्यं । नतुचित्रगुमानयेत्यादाविवतत्परित्यागइत्यर्थः । ननुकथंजन्मनःस्थित्याद्यपेक्षयाआदित्वं पौर्वापर्येणेतिचेन्न । दर्शपौर्णमासतिथ्योरिवजन्मस्थितिसंहारप्रवाह

स्यानादित्वेनपौर्वापर्यानियमादित्यतआह ॥ लब्धजन्मेति ॥ सत्यमेवंतथापिलब्धजन्मनःस्थित्यादिरितिवन्नस्थितस्य नष्टस्यवाजन्मेत्येकव्यक्त्यपेक्षयाजन्मनःप्राथम्यमितिभावः । अज्ञानंभावरूपं ॥ नोपलभ्यतइति ॥ तद्विजिज्ञासस्वेत्यत्रानुपलंभादितिभावः। प्रयंति प्रयांति त्रिधात्वित्यस्यार्थः प्रकृतिपुरुषकालाधारकइति। यच्छद्रूस्यतदस्यप्रियमित्युत्तरेणान्वयः । चतुर्भिर्नामभिःसाकंवासुदेवादिभिर्हरिः । वसूनरुद्रांस्तथादित्यान्ब्रह्मणोमरुतस्तथा । बृहच्छरीरोभगवान्नंशासतिनित्यशइतिप्रमाणानुसारेणश्रुतिंव्याचष्टे ॥ बृहच्छरीरइति ॥ बृहच्छरीरोविमिमानित्युत्तरत्रोक्तमिदं। व्यतीनित्यस्यार्थोविशेषेणाधिकानिति विशेषेणाधिकत्वेन व्यतयोदेवतास्मृता इतिकर्मनिर्णयोक्तेः वृत्तंभ्रममाणं नेत्यस्यार्थोइवेति ॥ पर्यवर्तयादिति ॥ विपरिवर्तनधातोरितिभावः । एकादशादित्याइति आदित्यानांद्वादशत्वेपिविष्णुव्यतिरिक्तानांनियम्यानांएकादशत्वादियमुक्तिः । पंचाशन्मरुतइति । एकोनपंचाशन्मरुतांमुख्यवायुनासहपंचाशत्वादितिभावः तत्त्वप्रदीपेचेमंप्रकारमभिधाय आदित्यावसवोरुद्रामरुतश्चाश्विनावपि । बृहस्पतिश्चकामश्चमनुर्दक्षोविनायकः । भृगुश्चैवानिरुद्धश्चधर्मोनिर्ऋतिरेवच । कुबेरसहितादेवानवतिःसंप्रकीर्तिताः । अनंतोगरुडोवायुश्चत्वारोब्रह्मणासहेतिप्रमाणानुसारेणप्रकारांतरमप्युक्तं । अत्राश्विनोरेकत्वंबोध्यं ॥ एतान्यपीति ॥ नकेवलंस्थितिनियमनकर्तृत्वेकिंत्वष्टावपीत्यर्थः। तन्वाद्यधानेत्यस्यार्थः स्वमूर्त्यैवापरिछिन्नइति। मात्रयेत्यस्यमितेरिति ॥ अपरिमितत्वादिति ॥ विष्णोरपरिमितत्वोक्तौमहिम्नस्तत्स्वरूपत्वात्तस्यापरिमितत्वमुक्तमित्याशयेनेयमुक्तिः ॥ वर्तमानेति ॥ वर्तमानार्थकलट्प्रयोगादितिभावः । यथाजीवमहिमामुचतुर्मुखमहिम्नः सीमात्वं यथावापरतंत्रमहिमामुरमामहिम्नः सीमात्वमेवं विष्णुमहिम्नोपिविवक्षाविशेषेणसीमात्वंनयुक्तमित्याशयेनोक्तं ॥ परामिति ॥ जातोजनिष्यमाणश्चवर्तमानस्तथैव

SGDF Sri Gargeshwari Digital Foundation

चेतिप्रमाणानुसारेणेदमुपलक्षणमित्याशयेनाह ॥ **जनिष्यमाणइति** ॥ सर्वेचवयंचवयं त्वदादीनि सर्वैनित्यमित्येकशेषत्वंमत्वाह ॥ **नःसर्वेषामिति** ॥ अस्मदादिसर्वेषामित्यर्थः । पौनरुक्त्यवारणायाह ॥ **नदत्तपुत्रवदिति** ॥ पितापालकः ॥ २ ॥ जन्मादिकारणत्वस्य विष्णुलक्षणत्वेनोक्तस्य तेनशास्त्रसंगतिरित्युपपन्नं ॥ **तदैवेति** ॥ अन्यथाअतिव्याप्तत्वेनविष्णुलक्षणत्वासिद्धेरितिभावः । यद्यपिलक्षणस्यविष्णवैकनिष्ठत्वंप्रागुक्तं तथापितद्भाष्यकारेणैवेतिनदोषः । इतिशब्दस्याध्याहृतेनश्रुत्यादिसंगतिरित्यनेनान्वयः । एवमग्रेपि उक्तन्यायः पूर्वोक्तश्रुतिस्मृतिरूपः प्रसिद्धिः वक्ष्यमाणरीत्या ॥ **अनुमानेनेति** ॥ क्षित्यादिकं सकर्तृकं कार्यत्वादित्यनुमानेन कर्तृमात्रसिद्धावपि तस्य नावेदविदितिस्वप्रामाण्यनिषेधकश्रुत्युक्ते विष्ण्वाख्येकर्तरि पर्यवसानायोगेन पाशुपताद्यागमोक्तेशिवादौ पर्यवसानाद्वाशिवोजगत्कर्ता सर्वज्ञत्वात् व्यतिरेकेण कुलालवदित्यनुमानेनवा रुद्रादेःकारणत्वसिद्धिः । नचद्वितीयेऽसिद्धिः पाशुपताद्यागमेनतत्सिद्धेरितिभावः ॥ **श्रुतीति** ॥ यउत्रिधात्वित्यादिश्रुतीत्यर्थः युक्तिविरुद्धार्थे उक्तानुमानविरुद्धे विष्णोरेवकारणत्वरूपे ॥ ॐ ॥ **शास्त्रयोनित्वात्** ॥ ॐ ॥ जगत्कारणस्य वेदवेदानुसारिग्रंथैकप्रमाणकत्वान्नानुमानपाशुपतादिवेद्यत्वमित्यर्थः । अभिधेयत्वादिनाऽन्येषामपिअनुमेयत्वादाह ॥ **कारणत्वेनेतिशेषइति** ॥ आनुमानिकं अनुमाननिश्चेयं ॥ **शास्त्रैकेति** ॥ शास्त्रमात्रज्ञेयत्वादित्यर्थः । कारणंनानुमाननिश्चेयं शास्त्रैकवेद्यत्वादितिप्रयोगे व्याप्तिमुपपादयति ॥ **नहीति** ॥ तस्यचोदनैकवेद्यत्वादितिभावः । प्रकृतोपयोगायात्मशब्दस्यार्थांतरं सर्वकर्तारमिति । कर्तृत्वादात्मशब्दोक्तइत्यादेः सम्यक्परस्मिन्नयनंसंपरायःसंपरायएवसांपरायः । तादर्थेसप्तमीत्युपेत्याह ॥ **मोक्षायेति** ॥ जगत्कर्तेत्यपिप्रकृतोपयोगाय । जगृहेपौरुषंरूपं आदौलोकसिसृक्षयेत्युक्तेरितिभावः । अंगीकारात्स्वतंत्रस्यपू

SGDF
Sri Gargeshwari Digital Foundation

र्णगुणत्वनियमादितिन्यायविवरणे ॥ **श्रुत्यादिसहकारीति** ॥ स्वातंत्र्यानुमानमपिपूर्णोहरिर्यःस्वतंत्रःसदैवेत्यादिश्रुतिसाहाय्यमितिभावः ॥ **प्रतिपक्षादीति** ॥ विमतंसकर्तृकंकार्यत्वादित्युक्ते विमतंविकर्तृकमस्मत्संमतकर्तृरहितत्वादिति प्रतिपक्षसंभवादित्यर्थः । तादृशंश्रुतिसहाय्यरहितं श्रुतिसहाय्यरहितानुमानस्य वन्ह्यादौप्रवृत्तेः कथंनकुत्रचिदिति तत्राह ॥ **अदृष्टइति** ॥ अस्मदाद्यदृष्टइत्यर्थः । तेनप्रमाणांतरं प्रत्यक्षमित्युपपन्नं । अन्यथाकेनाप्यदृष्टविषयकश्रुतिसहितप्रत्यक्षस्याप्रसिद्धत्वेन विशिष्यनिषेधे अनर्थकःस्यादितिध्येयं ॥ **यथेश्वरइति** ॥ इदंतु यःस्वतंत्रः सदैवेतिश्रुतिबाधितं ॥ **यथारामेति** ॥ इदंतु वर्जितः सर्वदोषैरितिश्रुतिविरुद्धं ॥ **अत्रापीति** ॥ तर्कस्यपृथगभिधानादितिभावः ॥ **यशोदायाइति** ॥ तच्च यउत्रिधात्वित्यादिश्रुतिसहाय्यं ॥ **यथाविष्णुरिति** ॥ समव्याप्तत्वेनोभयोरपि परस्परं साध्यसाधनभावसूचनाय पूर्वप्रयोगाव्यत्यासः । भाष्ये तादृशतर्कप्रदर्शनायपूर्वोत्तरेत्याद्युक्तं । ऊहनं परामर्शजन्यज्ञानविशेषः । शुष्कः श्रुत्यसहायः ॥ **जगत्कारणत्वाभावादाविति** ॥ जगन्निष्कारणं वस्तुत्वादात्मवत् । नचेष्टापत्तिः । सकारणत्वस्ययतोवेत्यादिप्रमाणसिद्धत्वेन प्रामाणिकहानापत्तेः । शशोविषाणवान्मृगत्वात् कृष्णमृगवत् । नचेष्टापत्तिः । शशविषाणस्यसर्वथा अप्रमितत्वेनाप्रामाणिककल्पनाप्रसंगादितिभावः । ईक्षणकर्तृत्वमागमसहायस्यापि नास्तीतिकिंविशिष्यनिषेधेनेत्यतआह ॥ **उदीक्षयितुमिति** ॥ तस्मात्स्वपरपक्षयोः साधकबाधकसद्भावात्कथंशास्त्रादीश्वरसिद्धिरित्येतदुपपादनाय पूर्वभागः । ईश्वराद्यतींद्रियमेवनास्ति शास्त्रादिकमपिप्रमाणभूतंनास्तीति अनेनैवनास्तिक्यवाद इत्येतद्विवृतं ॥ **कार्यकारणभावोस्तीति** ॥ अन्यथा अपत्योत्पादनायरेतःसेकादौप्रवृत्त्यनुपपत्तिरितिभावः ॥ **नचासाविति** ॥ तस्यकालादिघटितत्वादितिभावः ॥ **अन्वयव्यतिरेकित्वाख्येति** ॥ शरीरंरेतोजन्यंतदन्वयव्यतिरे

SDF
Sri Gargeshwari Digital Foundation

कप्रयुक्तान्वयव्यतिरेकप्रतियोगित्वादित्यनुमानेनेत्यर्थः । यदधिष्ठिते येनाधिष्ठिते । परिणमते शरीरात्मना । वातादिधातुरित्यादौ नचासौप्रत्यक्षइत्यादियथासंभवमनुवृत्यकार्यकारणभावसाधकानुमानप्रामाण्यजीवेश्वरादृष्टागमप्रामाण्यसिद्धिर्व्याख्येया । कणिका बीजं । अयस्कांतेन सूचीपाषाणेन ॥ **नचाचेतनेचेष्टकत्वमिति** ॥ अतस्तत्रेश्वरोंगीकार्यइतिभावः । एवमेवनचासाविति वाक्यंयोज्यं । पच्यतइति । पचनानंतरमेवतृष्णानिवृत्तिरितिभावः ॥ **नापिजीववत्सर्वशरीरेति** ॥ व्याधिविशेषविशिष्टानां तथादर्शनादितिभावः । भूतेषु पृथिव्यादिषु वचनादित्यस्यनास्तिक्यवादायोगेहेतुत्वायोगादाह ॥ **एतैरिति** ॥ इतश्चवक्ष्यमाणादपिप्रकारात् सांख्यमित्यादिभाष्यमाकांक्षाक्रमेणयोजयति ॥ **पंचरात्रस्येत्यादिना** ॥ अत्रेदंबोध्यं । सांख्यंयोगःपाशुपतं वेदारण्यकमेवच । ज्ञानान्येतानिभिन्नान्युताहोनेतिचोच्यतां । सांख्यंयोगःपाशुपतं वेदारण्यकमेवच । ज्ञानान्येतानिभिन्नानि नात्रकार्याविचारणा । सांख्यस्यवक्ताकपिलः परमर्षिःसउच्यते । प्राचीनगर्भंतमृषिं प्रवदंतीहकेचन । हिरण्यगर्भोयोगस्यवक्ताचैवचतुर्मुखः । उमापतिर्भूतपतिः श्रीकंठोब्रह्मणःसुतः । उक्तवानिदमव्यग्रं ज्ञानंपाशुपतंशिवः । पंचरात्रस्यकृत्स्नस्य वक्तानारायणःस्वयं । ज्ञानेष्वेतेषु राजेंद्र सर्वेष्वेतद्विशिष्यतइत्यत्राद्यश्लोकेन सांख्यादिचत्वारिज्ञानसाधनानि किंपरस्परभिन्नार्थप्रतिपादकान्युतैकार्थप्रतिपादकानि । आद्येकिंसर्वाण्यप्रमाणानि उतैकंप्रमाणं । एकंप्रमाणंचेत्किंतदितिजनमेजयेनप्रश्नःक्रियते वैशंपायनेनतु द्वितीयपद्येनक्रमेणप्रकृतिवायुनिरोधशिवविष्णूनांमोक्षदत्वप्रतिपादकत्वेन भिन्नार्थप्रतिपादकत्वमित्याद्यप्रश्नपरिहारः क्रियते । सार्धश्लोकत्रयेणानाप्तप्रणीतत्वादितरेषामप्रामाण्यं वेदपंचरात्रयोरेकार्थत्वेन पंचरात्रप्रामाण्योक्तौवेदस्यापि प्रामाण्यमुक्तंभवेदित्यभिप्रेत्य पंचरात्रस्याप्तप्रणीतत्वेनप्रामाण्यमितिद्वितीयतृतीयप्रश्नपरिहारःक्रियते । नान्याप्रामाण्य-

मिति । अकथनादितिभावः । वेदस्यपंचरात्रभिन्नार्थत्वंमत्वाशंकते ॥ **तर्हीति** ॥ वेदश्चारण्यकंच तयोःसमाहारोवेदारण्यकं । अरण्येपठनीयोवेदभागः आरण्यकंसामान्यविशेषभावेनपृथगुक्तिरितिध्येयं । वेदार्थत्वेन वेदव्याख्यानरूपत्वेन ॥ **असंगतंस्यादिति** ॥ ऐक्याभिप्रायेहिवेदारण्यकशब्देनपंचरात्रस्यापिप्रसक्तत्वेनएतेषुकिंप्रमाणमिति प्रश्नोत्तरत्वेन तदाधिक्यकथनंसंगतंस्यात् । तदभावेचपंचरात्रस्यप्रागप्रकृतत्वेनतदाधिक्यकथनमसंगतंस्यादित्यर्थः । पृछति ॥ **वेदस्यैवेति** ॥ वेदस्यैवपृष्टत्वादितिभावः । उत्तरमाह ॥ **पंचरात्रेति** ॥ नोच्यतइत्यनुवर्तते वेदप्रामाण्योक्तौतदलाभादितिभावः । तर्हिवेदप्रामाण्यंनोक्तंस्यादित्यतआह ॥ **पंचरात्रप्रामाण्योक्ताविति** ॥ **वाक्यार्थानुपपत्येति** ॥ ज्ञानेष्वेतेष्वितिवाक्यस्ययोर्थःपंचरात्रप्रामाण्यरूपः तस्यान्यथावेदप्रामाण्यंविनानुपपत्येत्यर्थः । तथाहि एतेषुकिंप्रमाणमितिप्रश्नस्यैतेषुपंचरात्रंप्रमाणमित्युत्तरं पंचरात्रस्यैतेष्वन्यतमत्वंविनानोपपद्यते तत्रसांख्याद्यन्यतमत्वंनास्ति तद्विरुद्धार्थप्रतिपादकत्वात् । अतोवेदारण्यात्मकत्वंवाच्यं । नचस्वरूपैक्यंसंभवति । अतोर्थैक्यमंगीकार्यं तत्रवेदस्याप्रामाण्येतत्समानार्थकपंचरात्रस्याप्यप्रामाण्यंस्यात् । नचैवं । अतोवेदस्यापिप्रामाण्यमिति ॥ **धर्मबहुत्वादिति** ॥ तथाचप्रतिपाद्यबहुत्वप्रयुक्तबहुत्वव्यवहारइत्यर्थः ॥ **प्रमाणमिति** ॥ सामर्थ्यलब्धायाःज्ञप्तेःशास्त्रपदार्थपर्यालोचनया प्रमात्वलाभइतिभावः । ननुतपोधनइत्यादौ समस्यमानपदद्वयार्थत्यागेनान्यपदार्थस्यैव तपस्विनः प्राधान्यं राजपुरुषइत्यादौच समस्यमानोत्तरपदार्थस्यपुरुषस्याप्राधान्यं । एवंचान्यपदार्थप्रधानबहुव्रीह्यपेक्षया वृत्तिपदार्थप्रधानतत्पुरुषस्य प्राबल्यात्सएवात्रास्त्वितिशंकते ॥ **समासप्राबल्यादिति** ॥ जन्मादिकारणत्वंकुतइत्यतः शास्त्रयोनित्वेनतत्साध्यतेअतउक्तोपयोगइत्यतआह ॥ **नहीति** ॥ **वैपरीत्यस्यैवेति** ॥ सहस्रवत्वेनैवशतवत्वसाधनंनान्यथा

SGDF Sri Gargeshwari Digital Foundation

व्यभिचारादितिभावः ॥ **अर्थलब्धमिति** ॥ उपादानादिज्ञानवतएवकर्तृत्वादितिभावः । स्फोरयति स्फुटीकरोति ॥ **अर्थलब्धशक्तीति** ॥ शक्त्यभावेकर्तृत्वांतर्गतप्रयत्नानुपपत्तेरितिभावः अभ्युपेत्येदमुक्तं । वस्तुतस्तुसार्वज्ञस्फोरण मेवनयुक्तमित्याह ॥ **अनंतेति** ॥ ननुशास्त्रस्याशेषार्थप्रतिपादकत्वात्तन्निर्माणमशेषार्थज्ञानंविनानसंभवतीतिसार्व ज्ञप्राप्तिरितिचेन्न । तथात्वेसार्वज्ञस्यपूर्ववदर्थलब्धत्वेनस्फोरणायोगात् । नकेवलमुक्तरीत्या शास्त्रकर्तृत्वकथनमनुपयुक्तं किंत्वयुक्तंचेत्याह ॥ **किंचेदमिति** ॥ **कणादेति** ॥ तद्वत्पौरुषेयत्वांगीकारे तन्मतप्रवेशइत्यर्थः । अस्त्वित्यतआह ॥ **श्रुतीति** ॥ अपौरुषेयत्वाभिधायक वाचाविरूपनित्ययेत्यादिश्रुतीत्यर्थः ॥ **सार्वज्ञसाधकत्वाभावेति** ॥ अध्यापकव दर्थाज्ञानेप्युच्चारणसंभवादितिभावः । नन्विदमधिकरणंस्मृत्यनकावशदोषप्रसंगइतिचेन्नान्यस्मृत्यनवकाशदोषप्रसंगादि- त्यनेनपुनरुक्तं । तत्रैवात्रापि सांख्यपाशुपतादिदुरागमानां निरासादितिचेत् । उच्यते । अत्रविष्णोरन्येषांचकारणत्वामिति समुच्चयेनलक्षणस्यातिव्याप्त्या पूर्वपक्षविष्णोरेवेत्यवधारणेनसिद्धांतः । तत्रतुविष्णोःकारणत्वेनेत्यसंभवेनपूर्वपक्षेस्ती तिसिद्धांतः । अतएवात्रटीकायांविष्णोरिवान्यस्याप्यस्तिनवेतिसंदेहः । कारणत्वस्यभगवदेकनिष्ठत्वाभावादितिपूर्वपक्षो पसंहारश्च तत्रतुयुक्तंनवेतिसंदेहः । नविष्णोःकारणत्वंसिध्यतीतिपूर्वपक्षोपसंहारश्च सुधापिअत्रातिव्याप्तिमाशंक्येति । तत्रतुशिवादीनामेवकारणत्वमितिविस्तरस्तुचंद्रिकायांद्रष्टव्यः ॥ ३ ॥ जगत्कारणत्वेन जगत्कारणत्वमित्यनेन- प्रकारेण एवमग्रेपि । तज्जगत्कारणत्वेनशास्त्रयोनित्वं । पूर्वोक्तिः कारणस्यशास्त्रयोनित्वाद्विष्णुरेवकारणमित्युक्तिः प्रतीतिः एकोरुद्रोनद्वितीयोवतस्थे एकोनारायणआसीदित्यादिना अप्रामाण्येन नैवशास्त्रंकुवर्त्मतदित्युक्तरीत्या प्रतीति सध्रीचीनस्येति प्रतीतिसाहित्येन समीचीनस्येत्यर्थः ॥ ॐ ॥ **तत्तुसमन्वयात्** ॥ ॐ ॥ जन्मादिकारणत्वेनशास्त्रगम्यं

SGDF Sri Gargeshwari Digital Foundation

तत्तुविष्ण्वाख्यंब्रह्मैव कुतःसमन्वयात् बलाबलत्वादिनासम्यग्विचारितोपक्रमादिप्रमाणादित्यर्थः। प्रकरणादिरुपक्रमः तदंतउपसंव्हारइत्यत्रस्फुटत्वादभ्यासादेर्लक्षणमाह । एकप्रकारेत्यादिना असकृत् अनेकवारं यथाहोदर्शनीयाहोदर्शनीयेत्यादि । ननुसमिधोयजति इडोयजति तनूनपातंयजति बर्हिर्यजति स्वाहाकारंयजति इतिभिन्नप्रकारयुतेअभ्यासेइदंलक्षणमव्याप्तं । नचतत्रापियजेत्यंशे एकप्रकारोस्तीतिवाच्यं तथात्वेघटोस्तिपटोस्तिइत्यत्रातिव्याप्तेः । तत्राप्यस्तित्वांशे एकप्रकारोक्तिसत्वादितिचेत् सत्यं अभ्यासोद्विविधः तात्पर्यनिश्चायकः कर्मभेदप्रयोजकश्च । तत्राद्यः एकप्रकारासकृदुक्तिरूपः । अपरस्त्वसकृदुक्तिमात्ररूपः । इदानींतात्पर्यनिश्चायकस्यैवलक्ष्यत्वान्नेतरत्रातिव्याप्तिरिति ॥ **प्रमाणांतरेणासिद्धार्थतेति** ॥ प्रमाणांतरेणाग्राह्यतेत्यर्थः । यथेश्वरसार्वज्ञप्रतिपादकंयःसर्वज्ञइत्यादि नन्वेतदनुपपन्नं । ईश्वरसार्वज्ञस्य स्मृतिवाक्येनकार्यत्वाद्यनुमानेनच । प्राप्तत्वेनमानांतराप्राप्तत्वाभावादितिचेन्न प्रमाणलक्षणटीकानुसारेणप्राचुर्येणेतिपूरणात् । तथाचस्वबोधनीयपुरुषगताज्ञानादिविरोधिनास्वानुपजीविमानांतरेणाग्राह्यार्थत्वंपर्यवस्यति । अस्यार्थः स्वंशब्दस्तेनबोधनीयोयःपुरुषस्तद्गतंयदज्ञानादितद्विरोधिना स्वंशब्दस्तदनुपजीविमानांतरेणाग्राह्यार्थत्वमिति अत्रस्वानुपजीविमानांतरेणेत्यनेनोक्तचोद्यनिरासः स्मृतिवाक्यकार्यत्वाद्यनुमानयोःशब्दोपजीवित्वात् । तावन्मात्रस्य लक्षणत्वेअसंभवः सार्वज्ञादिरूपवेदार्थस्यशब्दानुपजीवीश्वरप्रत्यक्षग्राह्यत्वात् । अतःस्वबोधनीयपुरुषगताज्ञानादिविरोधेनेति । ईश्वरस्यवेदबोधनीयत्वाभावात् वेदबोधनीयास्मदादिगताज्ञानादिकं प्रतीश्वरप्रत्यक्षस्य विरोधित्वासंभवाच्चासंभवपरिहारः टीकानुसारेण प्रमाणांतराप्राप्तार्थत्वमित्युक्ते प्रत्यक्षापेक्षया पूर्वप्रवृत्ते अग्निर्हिमस्यभेषजमित्यादिवाक्येतिव्याप्तिः । तत्रापिस्वबोधनीयपुरुषगताज्ञानादिविरोधिना स्वानुपजीविना स्पार्शनप्रत्यक्षेण

SGDF
Sri Gargeshwari Digital Foundation

वह्न्यौष्णस्याप्राप्तत्वात् । अतोमानांतराग्राह्येति । औष्ण्यस्यप्रत्यक्षाप्राप्तत्वेपि तद्ग्रहणयोग्यत्वेन तदग्राह्यत्वाभावान्नाति व्याप्तिरिति । फलवत्वमिति । फलप्रतिपादकत्वमित्यर्थः । यथामृतोवावसोमपोभवतीत्यादिरर्थवादइत्यभियुक्तप्रयोगोवाविधिशेषत्वंवार्थवादइतितल्लक्षणस्य स्फुटत्वात् तद्विशेषानेवाह ॥ **स्तुतिरिति** ॥ वायुर्वैक्षेपिष्ठादेवतेत्यादिस्तुतिः । प्लवाह्येतेअदृढायज्ञरूपाइत्यादिर्निंदा । कर्तृनामनिर्देशपूर्वकमितिहासः । परकृतिः यथाजनकोवैदेहआसांवक्तेत्यादि । सामान्यतः कथाकथनंपुराकल्पः । यथात्रयोद्वीथेकुशलाबभूवुरित्यादि ॥ **युक्तिरिति** ॥ पूर्णत्वापूर्णत्वाभ्यां जीवेशभेदप्रतिपादकं । भिन्नोचित्यःपरमोजीवसंघात्पूर्णःपरोजीवसंघोह्यपूर्णइत्यादि । उपक्रमोपसंहाराविति भाष्ये प्रत्येकविवक्षया द्वाविवसमुदायविवक्षया तदैकरूप्यमपिविवक्षितं । तट्टीकायांतदनुक्तिश्चकंठतोऽनुक्तत्वादितिध्येयं । ननूपक्रमादीनामुपपत्तेःसकाशात्पृथगुक्तिरयुक्ता । इदंवाक्यमेतत्परं अबाधेसत्येतदुपक्रमवत्वादित्यादिरूपेण तेषामपिमहावाक्यतात्पर्ये उपपत्तिरूपत्वादित्यतआह ॥ **उपक्रमादीनामिति** ॥ सन्यासिनां ब्राह्मणत्वेपि ब्राह्मणेअविद्यमानदंडमुंडत्वादिविशेषवत्वाद्यथापृथगुक्तिः तथोपक्रमादीनां तात्पर्यनिर्णये उपपत्तित्वेपि अवांतरवाक्यार्थरूपस्वार्थे आगमरूपत्वं उपपत्तेश्च अयंतात्पर्यविषयउपपन्नत्वादितितात्पर्यनिर्णयइव ईश्वरोभिन्नःपूर्णत्वादित्यादिस्वार्थेप्युपपत्तिरूपत्वं अतोविशेषादुपपत्तेःसकाशादुपक्रमादेः पृथगुक्तिरित्यर्थः । उदाहृतवाक्ये उपक्रमस्य प्राथम्यश्रवणादन्वयउपपत्त्यादिलिंगमितिकथमुक्तमित्यतआह ॥ **उपक्रमादीनामिति** ॥ अत्रानुव्याख्यानसंमतिमाह ॥ **उपक्रमेति** ॥ उत्तरोत्तरप्राबल्यमुपपादयति । उपसंहारस्येत्यादिना ॥ **व्याख्यानरूपत्वेनेति** ॥ तत्सत्यमित्युपक्रमे श्रुतसत्यशब्दव्याख्यानंसदितिप्राणस्तीत्यन्नंयमित्यसावादित्यइत्युपसंहारेणक्रियते । अन्यथा प्रथमप्राप्तोपक्रमेणैवार्थबोधे प्रयोजनांत

राभावेनोपसंहारस्यवैय्यर्थ्यस्यादितिभावः ॥ **उपक्रमाप्रामाण्येति** ॥ निश्चितप्रामाण्यव्याख्यानानुसारेण निश्चेतव्यप्रामाण्यव्याख्येयबाधस्य न्याय्यत्वादितिभावः ॥ **प्राबल्यमिति** ॥ सत्यशब्दादन्यप्राप्तिनिषेधकोदाहृतस्थलएवदृष्टत्वादितिभावः ॥ **बहूक्तेःप्राबल्यादिति** ॥ बहुबाधस्यान्याय्यत्वादितिभावः ॥ **प्राबल्यमिति** ॥ यथा तस्यैषएवशारीरआत्मेतिशारीरशब्दबलाज्जीवप्रापकोपसंहारापेक्षयाऽसद्ब्रह्मेतिवेदचेदस्तिब्रह्मेतिचेद्वेदेतिब्रह्मशब्दाभ्यासस्यप्राबल्यं । अत्रोपक्रमात्प्राबल्यकथनंवस्तुस्थितिप्रदर्शनार्थंनत्वावश्यकं । उपसंहाराधिक्येनैवोपक्रमाधिक्यसिद्धेः । उपसंहाराधिक्यस्यैवोपपादनाच्च । एवमग्रेपि ॥ **मुख्यस्येति** ॥ प्राचुर्येणाप्राप्तस्येत्यर्थः । असकृदावृत्तस्यापिसंभवदनेकार्थस्य स्वारसिकप्राप्तार्थत्यागेनावैय्यर्थ्यायाप्राप्तार्थतायाः आवश्यकत्वादितिभावः ॥ **प्राबल्यमिति** ॥ यथा जीवाद्भवंतिभूतानिजीवेतिष्ठंत्यचंचलाः । जीवेतुलयमिच्छंतीतिजीवशब्दाभ्यासापेक्षया प्रत्यक्षसिद्धयत्किंचिद्भूतकर्तृजीवंविना ब्रह्मग्रहणेनापूर्वतायाः प्राबल्यं ॥ **उद्देश्यत्वादिति** ॥ अपेक्ष्यत्वादित्यर्थः । अप्राप्तेनिष्फले तात्पर्यादर्शनात् प्राप्तेपिसफले तात्पर्यदर्शनादितिभावः ॥ **प्राबल्यमिति** ॥ यथाब्रह्मोत्पत्तिप्रतिपालकत्वेनापूर्वतायुक्तादप्यसतःसदजायतेतिवाक्यात् ब्रह्मानुत्पत्तिप्रतिपादकत्वेन तत्प्रीत्यामोक्षरूपफलवतः सदेवसौम्येतिवाक्यस्यप्राबल्यं ॥ **फलमात्रादिति** ॥ इष्टानिष्टकथनशून्यादित्यर्थः ॥ **प्राबल्यमिति** ॥ यथामृतोवावेतिफलवाक्यात्काम्यकरणे अनिष्टकथनस्य प्लवाह्येतेअदृढायज्ञरूपाइति निंदारूपार्थवादस्यप्राबल्यं ॥ **सर्वमूलत्वेनेति** ॥ उक्तरीत्योपक्रमादेरप्युपपत्तिरूपेण तात्पर्यनिश्चायकत्वादितिभावः ॥ **प्राबल्यमिति** ॥ यथा तस्यतावदेवचिरमित्याद्यर्थवादोपेतादप्यभेदवाक्याद्भिन्नोचित्यइत्यादिसोपपत्तिकभेदश्रुतेः प्राबल्यं । लिंगमित्येकवचनंघटयंश्चतुर्थपादार्थमाह ॥ **एतदिति** ॥

SGDF Foundation

यदर्थमुत्तरोत्तरप्राबल्यनिरूपणं तदाह । विरोधइत्यादिना बाधइत्यंतेन । उपक्रमादिष्वन्योन्यविरोधइत्यर्थः । एतदुदाहरणं पूर्वोक्तमेवध्येयं ॥ **साम्यइति** ॥ उपक्रमादिद्वयस्योपसंहारद्वयस्यवा समस्यविरोधे निरवकाशेन सावकाशंबाध्यमित्यर्थः । यथा प्राणोब्रह्म कंब्रह्म खंब्रह्मेतिप्राणब्रम्हणोरुपक्रमेपिश्रुतिलिंगादिना निरवकाशब्रम्होपक्रमेण प्राणोपक्रमबाधः ॥ **स्वभावेति** ॥ उपक्रमादावुत्तरत्वंस्वभावप्राबल्यनियामकं ॥ **बाधोभवतीति** ॥ यथाऽदितेरादितिस्त्वमिति स्वभावप्रबलोपसंहारादादितिप्रतीतावपि नैवेहकिंचनेतिनिरवकाशोपक्रमेण सावकाशोपसंहारस्यबाधः । एकेननिरवकाशेन अनेकेषां सावकाशानांबाधइति । यथा एकमेवाद्वितीयं तत्वमस्यथसंपत्स्यतइत्यभेदप्रापकाणांक्रमेणोपक्रमोपसंहारफलानां शकुनिसूत्रदृष्टांतोपपादकभेदोपपत्याबाधः । ननुबाधेसत्यर्थांतरपरत्वं सावकाशत्वं दुर्बलत्वमपीदमेवार्थांतरपरत्वाभावोनिरवकाशत्वं प्राबल्यमपीदमेवातोबाध्यत्वेसावकाशत्वंबाधकत्वे निरवकाशत्वंप्रयोजकमित्येववाच्यं । नतूभयोरुभयत्रप्रयोजकत्वमितिशंकते ॥ **नन्विति** ॥ निर्णयः । बाध्यबाधकव्यवस्था । अन्यथाद्वयोरपिनिरवकाशत्वे ॥ **वाक्येति** ॥ उपक्रमाद्यवांतरवाक्येत्यर्थः । वाक्यार्थेद्वैरूप्यायोगादितिभावः । अर्थांतरपरत्वसाम्येपि व्याख्यातृव्यापारसापेक्षत्वनिरपेक्षत्वाभ्यांविशेषइत्याह ॥ **मैवमिति** ॥ **अर्थांतरकल्पनमिति** ॥ बलाल्लक्षणादिनार्थांतरकल्पनंव्याख्यात्राकार्यमित्यर्थः । इदंदुर्बलत्वंनाम यथोपजीव्यत्वादिना प्रबलभेदग्राहिसाक्ष्यादिप्रमाणविरोधेन तत्वमसीत्यादेः सादृश्येलक्षणा । स्वयंव्याख्यातृप्रयासमनपेक्ष्ययथानिरवकाशपरोवरीयस्त्वादिलिंगविरोधेनाकाशश्रुतेरासमंतात्काशतइत्याकाशइतियोगेनविष्णुपरत्वं सावकाशत्वदुर्बलत्वयोर्भेदेतद्विरुद्धनिरवकाशत्वप्राबल्ययोर्भेदःस्फुटएवेतिनोक्तः । ननूपक्रमादीनांसप्तानामेव तात्पर्यलिंगत्वेकथमुत्तरत्रश्रुत्यादिनानिर्णयइत्यतआह ।

SGDF Sri Gargeshwari Digital Foundation

अत्रेति ॥ **उपपत्यादीति** ॥ भाष्ये आदिपदार्थत्वेनेत्यर्थः । तत्स्वरूपं वामनाधिकरणेस्फुटीभविष्यतीतिभावः । तर्ह्युपक्रमादिभिरेवरुद्रादिनिर्णयोस्त्वित्यतआह ॥ **तैश्चेति** ॥ कर्मविधात्री प्रातःसंध्यामुपासीतेत्यादिका । विष्णोःसिद्धत्वेनविधेयत्वाभावादाह ॥ **मांप्रत्येवेति** ॥ मत्प्रीत्यर्थमेवकर्मादिविधत्तइत्यर्थः । इंद्राद्यभिधात्री । इंद्रश्रेष्ठानीत्यादिका । मामभिधत्ते परममुख्यवृत्त्या । विविधरूपत्वेन वासुदेवादिरूपत्वेन । कल्प्यः ज्ञेयः । अप्रियत्वादपोह्यइति मदप्रीतिसाधनत्वादेवसुरापानादिकंनिषिध्यतइत्यर्थः । इत्यस्याः इत्यत्रेतिशब्दंव्याचष्टे ॥ **एवं भूतायाइति** ॥ **इत्यभिप्रायमिति** ॥ अनेनास्याहृदयमित्यनयोर्मध्ये मांविधत्तइत्यादियोज्यमित्युक्तंभवति ॥ **उपलक्षितानंतेति** ॥ अस्मिन्नधिकरणे शास्त्रपदवाच्यानंतवेदादिसदागमानां जन्मादिकारणत्वादिलक्षणतदितरानंदादिगुणप्रतिपादकानां समन्वयस्योक्तत्वादितिभावः ॥ ४ ॥ **वाच्यत्वेति** ॥ उपलक्षणमेतत् । सुधोक्तरीत्या संशब्दार्थसर्वशास्त्रप्रतिपाद्यत्वसमर्थनादित्यपिध्येयं । तेनसकलशास्त्रप्रतिपाद्यत्वसमर्थकगतिसामान्यसूत्रस्यैतदधिकरणांतर्भावउपपन्नः । ननूपक्रमादिलिंगबलाद्रुद्रादिशब्दोपेतशास्त्रस्यापिविष्णुरेवार्थइत्येवोक्तं नतुतस्यमुख्यत्वमित्यत आह ॥ **उपक्रमादीति** ॥ उपलक्षणमेतत् । सुधोक्तरीत्यासंशब्देनविष्णोर्मुख्यार्थत्वस्याप्युक्तत्वात् ॥ **वादीति** ॥ वाच्यत्वावाच्यत्ववादीत्यर्थः । तद्ब्रह्म नहीति वचनवृत्त्यालब्धस्यमुख्यार्थत्वादितिभावः । प्रकृतोपयोगायाह ॥ **तद्विषयश्चेति** ॥ शब्दत्वगाद्यविषयइत्यर्थः । एतदुपपादनायैवगुणराहित्यकथनमितिभावः । प्रोवाचेत्यनेनवचन प्राप्त्या अवचनेनेत्येतद्व्याहतमित्यतआह ॥ **वचनवृत्तिंविनेति** ॥ **उपदिदेशेति** ॥ विष्णुमितिशेषः । यच्छ्रोत्रेणेत्यत्र येनश्रोत्रमित्यनेनव्याहतमित्यतआह ॥ **पुरुषइति** ॥ भाष्ये यतोब्रह्मणःअप्राप्य अविषयीकृत्य मनसासहानिवर्तंत

DGDF
Sri Gargeshwari Digital Foundation

इत्यर्थः । अव्ययं ह्रासरहितं । अनभ्युदितं वचनवृत्यानोक्तं । अभ्युद्यते व्यज्यते । श्रुतं ज्ञातं । यद्वाश्रुतिःस्वयंश्रोत्रशब्दं निर्वक्ति । येनेति । येनकारणेन इदंशब्दजातंश्रोत्रेणश्रुतं तेननिमित्तेन इदंश्रोत्रमुच्यते । शब्दग्राहित्वंश्रोत्रशब्दप्रवृतिनिमित्तमित्यर्थः । गोचराइंद्रियार्थाश्चेतिगोचरशब्दस्यपुल्लिंगत्वात्कथंगोचरमित्युक्तमित्यतआह ॥ **त्रयीति** ॥ स्त्रीशूद्रब्रह्मबंधूनांत्रयीनश्रुतिगोचरेतिप्रथमस्कंधेप्रयोगादितिभावः । त्रयी श्रुतिः श्रुतिगोचरा श्रवणविषयीभूता । उपलक्षणमेतत् । सुधोक्तरीत्याशब्दानां गवां ज्ञानानांचरश्चरणंवृत्तिर्यस्मिन्तच्छब्दगोचरमिति व्यधिकरणबहुव्रीहिर्वा चरश्चरणमस्यास्तीतिमत्वर्थीयाच्प्रत्ययांतत्वंवा श्रुत्यगोचरमित्यस्यसाधुत्वंद्रष्टव्यं । तेनाप्राप्यमनसासहास्पर्शमित्यादि श्रुतौ यदज्ञेयत्वमभिप्रेतंतदपिसंग्रहीतंभवति । अन्यथातदंशोदाहरणंनस्यात् । अतएवभाष्ये अवाच्यत्वादिकमित्यादि शब्दः तदवतारिकाग्रंथे अवाच्यत्वाज्ञेयत्वाभिधायकेतिटीकावचनं अतर्क्यमज्ञेयमित्यादिप्रमाणोदाहरणंचसंगछते । नचज्ञेयत्वसमर्थनमसंगतमितिवाच्यं । ईक्षणीयत्वहेतोरसिद्धिपरिहारार्थत्वात् । अतएवेक्षणीयत्वासिद्धिपरिहारकत्वेनगौणश्चेन्नात्मशब्दादितिसूत्रं नचगौणआत्मादृश्यइत्यादिनाभाष्येणव्याख्यातमितिबोद्धव्यं ॥ ॐ ॥ **ईक्षतेर्नाशब्दं** ॥ ॐ ॥ तद्ब्रह्म अशब्दं अवाच्यंन किंतुवाच्यमेव ईक्षतेः पुरुषमीक्षतेतिकर्मत्वव्यपदेशादित्यर्थः । श्रुतिप्राप्तं आपाततइतिशेषः ॥ **हिरण्यगर्भोपदेशेनेति** ॥ प्रणवेनहरिंध्यायन्ब्रह्मलोकंसमेत्यच । ज्ञानंचतुर्मुखात्प्राप्यमुच्यते नात्रसंशयइतिषट्प्रश्नभाष्योक्तेरितिभावः । पौनरुक्तिपरिहारायविज्ञायेत्येतद्व्याचष्टे ॥ **परोक्षतइति** ॥ ईक्षणीयत्वं ज्ञेयत्वं । ईक्षणस्य ज्ञानस्य ॥ **प्रत्यक्षादिनापीति** ॥ अतोन्यथाप्युपपत्तिरितिभावः । उक्तरीत्या शास्त्रयोनित्वादित्युक्तरीत्या ॥ **प्रत्यक्षाद्यवेद्यत्वेसतीति** ॥ आगमाननुसारिप्रत्यक्षाद्यवेद्यत्वेसतीत्यर्थः । तेनागमानुसारिप्रत्यक्षादि

वेद्यत्वाद्विशेषणासिद्धिरितिनिरस्तं ॥ **ईक्षणीयत्वान्यथानुपपत्येति** ॥ प्रमाविषयत्वान्यथानुपपत्येत्यर्थः । तेन भ्रांतिविषयत्वेनान्यथासिद्धिरितिनिरस्तं । एवमर्थापत्तिपरत्वेनव्याख्याय परिशेषपरत्वेनापिव्याचष्टे ॥ **परिशेषप्रमाणेनवेति** ॥ **प्रमाणेनेति** ॥ भ्रांतेरज्ञानावरकत्वेनप्रमाणेनमोक्षजनकेक्षणासंभवादितिभावः ॥ **अवाच्येवृत्यंतरेति** ॥ अवाच्येपिलक्षणांगीकारेऽनवस्थावक्ष्यतइतिभावः । अनेनावचनेनेतत्प्रकारांतरेणयोजितं ॥ **प्राबल्यमिति** ॥ तेषु त्रिष्वक्षादिकरणेषुमध्ये यदागमस्यप्राबल्यमुक्तं । तज्जात्यैवस्मृतं उत्सर्गेणैवस्मर्तव्यमित्यर्थः ॥ **श्रुतिस्मृतीचाहेति** ॥ श्रुतावाङासाक्षाद्वाच्यत्वोक्तेः स्मृतौकर्मादीनामपिवेद्यत्वादहमेवेत्यवधारणानुपपत्यातदुपपत्तयेऽन्येषांमुख्यतयावेद्यत्वेपि हरेःपरममुख्यवृत्यावेद्यत्वस्यवक्तव्यत्वात्तस्यचवाच्यत्वं विनायोगात्तत्सिद्धिरितिभावः । भाष्ये वेदांतकृत् वेदनिर्णायकब्रह्ममीमांसाकर्ता । यत्प्रति यत्प्रीत्यर्थं अप्रसिद्धिनिमित्तकावाच्यत्वस्यवास्तव्यत्वेव्याहतिरित्यतआह ॥ **अवाच्यत्वादिव्यपदेशइति** ॥ व्यवहारइत्यर्थः । सर्वागमोक्तस्यकथमप्रसिद्धत्वमित्यतआह ॥ **साकल्येनेति** ॥ **अप्रसिद्धैवेति** ॥ पश्यंतोपिनपश्यंतीत्यनयोर्विरोधपरिहारायसाकल्येननपश्यंतीतिवाच्यं । तदेव चाप्रसिद्धत्वमितिभावः ॥ **अन्यथानुपपत्तीति** ॥ वाच्यत्वसाधकप्रमाणान्यथानुपपत्तीत्यर्थः । इयम् अप्रसिद्धत्वादवाच्यत्वादिरूपा ॥ **अप्रसिद्धिप्रसिद्धिभ्यामिति** ॥ तथाचाप्रसिद्धेरतर्क्यमज्ञेयंप्रसिद्धेस्तर्क्यंज्ञेयंचेतिव्याख्येयमितिभावः । अत्रज्ञेयत्वमागमानुकूलप्रत्यक्षेण वचनतर्कयोःपृथगुक्तेरितिध्येयं । तदीयाधिकरणंसंक्षेपतोनुवदति ॥ **जगत्कारणत्वमिति** ॥ **सदेवेति** ॥ सदेवसौम्येदमग्रआसीत् एकमेवाद्वितीयं तदैक्षत बहुस्यांप्रजायेयेति तत्तेजोसृजतेत्यादावित्यर्थः ॥ **प्रधानमितिप्राप्तमिति** ॥ चेतनस्यब्रह्मणोऽपरिणामितया क्रियाकर्तृत्वलक्षणसच्छक्त्य

Digitized by Siddhanta eGangotri Gyaan Kosha Foundation

संभवात्प्रधानस्यतत्संभवादितिभावः ॥ **श्रौतेति** ॥ श्रुत्युक्तेत्यर्थः ॥ **ईक्षणश्रवणादिति** ॥ तस्यजडेऽसंभवा दितिभावः । अशब्दमित्यंशोक्तहेतुमाह ॥ **अशब्दमिति** ॥ प्रधानस्यश्रुत्यप्रतिपाद्यत्वात्तच्छ्रुत्युक्तकारणंनभवतीत्यर्थः । इतरशब्दस्यमायिपरत्वमुपेत्य प्रकारांतरमाह ॥ **नापीति** ॥ **श्रुतत्वादिति** ॥ तत्रलोहितशुक्लकृष्णमिति त्रिगुणा- त्मकत्वरूपतल्लिंगश्रवणादितिभावः । अन्यत्तेजोबन्नात्मकं अत्रोक्तरूपाणां यदग्नेरोहितंरूपं तेजसस्तद्रूपं यच्छुक्लंतदपां यत्कृष्णंतदन्नस्येति तेजःप्रभृतिषुप्रसिद्धत्वादितिभावः ॥ **नाममात्रेति** ॥ तेजोबन्नात्मकस्यैवप्रधानत्वादितिभावः । अतएवाह ॥ **अर्थांतरस्येति** ॥ इत्थंव्याख्यानंस्वव्याहतंचेत्याह ॥ **किंचेति** ॥ **ईक्षतिस्वरूपत्वादिति** ॥ क्रियारूपस्य क्रियाश्रयत्वरूपकर्तृत्वानुपपत्तिरितिभावः । ननुतदैक्षत तत्तेजोसृजतेतिजगत्कारणत्वेनोक्तस्येक्षितृत्वमंगी क्रियते जगत्कारणंचनेक्षारूपंशुद्धं किंतुमायाविशिष्टंशबलमेव अतोनोक्तदोषइत्याशंकते ॥ **जगत्कारणस्येति** ॥ जगत्कारणत्वेनोक्तंशुद्धमेवेतिपरिहरति ॥ **नेति** ॥ आदिसूत्रेजिज्ञास्यत्वेनोक्तस्यैवद्वितीयेजन्मादिकारणत्वेनोक्तत्वा दितिभावः । जिज्ञास्यंतुशुद्धमेवेतिभावः । विशिष्टमेवजिज्ञास्यमस्त्वित्यतआह ॥ **नहीति** ॥ **अप्रयोजकत्वादिति** ॥ प्रयोजनविकलत्वादित्यर्थः । विशिष्टस्यमिथ्यात्वेन तद्ज्ञानस्यभ्रमत्वेनमोक्षाहेतुत्वादितिभावः । ननुनविशिष्टमीक्षितृ येन जिज्ञास्यत्वायोगः । किंतु विशिष्टांतर्गतंविशेष्यभूतंशुद्धमेव । नचतस्येक्षारूपत्वविरोधः । केवलवन्हेः रोगनिवर्तकत्वा योगेप्ययःपिंडसमारूढस्य तथात्ववदीक्षारूपस्यापि शुद्धस्यमायासंबंधेनेक्षितृत्वसंभवादित्याशंक्य किंश्यामेप्याम्रफले सौरातपसंबंधात्पीतरूपमिवशुद्धेपि माययेक्षणंसंभवतीतिविविक्षितं उत विशिष्टगतंविशेष्ये केनचित्संबंधेनोपचर्यत इतिपृच्छति ॥ **किंचेति** ॥ माययेक्षणंचकिमित्यर्थः । एतेनविशिष्टपक्षएवदूषणांतरप्रतिज्ञाने तेनापिविशिष्टस्यदृश्य-

SGDF Sri Gargeshwari Digital Foundation

त्वांगीकारेण दृश्यत्वाद्यपिकिंनस्यादितिदूषणाभिधानमसंगतमितिनिरस्तं ॥ **दृश्यत्वाद्यपीति** ॥ केवलस्यवन्हे रित्यादिन्यायसाम्यात् । तथाचमिथ्यात्वंस्यादितिभावः ॥ ॐ ॥ **गौणश्चेन्नात्मशब्दात्** ॥ ॐ ॥ पुरुषमीक्षत इत्यादावीक्षणकर्मत्वेनोक्तोगौणस्त्रिगुणसंबद्धोजीवएव नविष्णुरितिचेन्न । आत्मानंपश्येदित्यादावीक्षणकर्मणि विष्णु मात्रनिष्ठात्मशब्दश्रवणादित्यर्थः ॥ **गौणेति** ॥ सत्वादिगुणबद्धेत्यर्थः । ईक्षतिश्रुत्युक्तंनिर्गुणमेवास्त्वित्यतआह ॥ **गौणग्रहणइति** ॥ भाष्योदात्तेविज्ञायप्रज्ञामित्यंशे आत्मशब्दाभावात्पूर्वांशमुदाहरति ॥ **अजइति** ॥ ध्रुवः निश्चलः । आनंदादिभ्रमंवारयति ॥ **सत्वादिभिरिति** ॥ **अन्युपादेयइति** ॥ अनेनहेयत्वसहितोपादेयत्वा भाववानित्यर्थउक्तोभवति ॥ **हृदित्वेषइति** ॥ अस्यजीवपरत्वंत्वदिहीतिसूत्रसिद्धमितिभावः । भाष्ये अनात्मनि जीवे ॥ **सोपचारइति** ॥ **परममुख्यत्वापेक्षया नतुगौण्यावृत्या** ॥ **स्वरूपप्रतिमाभिप्रायइति** ॥ आत्मनिस्वरूपाभि प्रायअनात्मनिप्रतिमाभिप्रायइत्यर्थः ॥ **सयइति** ॥ सःप्रसिद्धोयइत्यर्थः । तेननतत्छब्दांतरवैयर्थ्यमितिभावः । जी- वस्यापिनित्यत्वादाह ॥ **देहहानीति** ॥ जडामिश्रः प्राकृतदेहरहितः ॥ **गौणाश्रयणादिति** ॥ अमुख्याश्रयणा- दित्यर्थः । तर्हिकोर्थइत्यतआह ॥ **चेतनेति** ॥ किमत्रनियामकमत्रआह ॥ **तथाचेति** ॥ चेतनाचेतनपरत्वे आत्मा- नात्मशब्दयोश्चेतनाचेतनपरतया सिद्धत्वेनतदबाधनाद्रूपशब्दस्यप्रतिमारूपार्थत्वसंभवेन अनेकार्थत्वस्यअकल्पनाच्च द्वेवा वेतिश्रुतेः ऋजुत्वंसंभवतीत्यर्थः । आत्मशब्दस्यचेतनमात्रपरत्वे यश्चदोषाविवर्जितइत्याद्यनुपपत्तिरित्यतआह ॥ **निर्दो षत्वादेरिति** ॥ जीवात्मन्यपि दुःखादिदोषऔपाधिकएवेतिभावः ॥ ॐ ॥ **तन्निष्ठस्यमोक्षोपदेशात्** ॥ ॐ ॥ तन्निष्ठस्यात्मज्ञानिनः यस्यानुवित्तःप्रतिबुद्धआत्मा तस्यलोकःसउलोकएवेतिमोक्षाभिधानान्नात्मशब्दोक्तोगौणइत्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

असौआत्मा ॥ गुणबद्धेति ॥ एतत्सूचनार्थमेवपूर्वसूत्रेजीवइत्यनुत्क्वागौणइत्युक्तमितिध्येयं । कः कुत्रत्यः विश्वकृच्छब्दार्थोवायुकर्तेति । विशतिदेहिनांहृदयगुहां वातिचश्वासोच्छ्वासादिरूपेणेतियोगाद्विश्वोवायुःसमुद्दिष्टइत्युक्तेः । विश्वोहिरण्यगर्भइत्यादौविश्वशब्दस्यवायौप्रयोगाच्च । अतोनसर्वस्यकर्तेत्यनेनपुनरुक्तिरितिभावः । प्रतिबुद्धशब्दार्थः सर्वज्ञइति । संदोहशब्दार्थोदेहइति तस्यकार्यकारणसंघातत्वात् । गहनशब्दार्थोगुहाशब्दार्थइति । यस्येत्यस्य येनेति अनुवित्तइत्यस्य ज्ञातइति । तेननप्रतिबुध्यइत्यनेनपौनरुक्त्यमितिभावः । उच्चत्वादुकारवाच्योविष्णुस्तल्लोकउलोकइत्याशयेनोक्तंविष्णुलोकइति । भाष्ये अयमितिश्रुतिः । तत्रश्रीब्रह्मादिनियामकत्वेनप्रकृतस्यायमितिपरामर्शः । वदंतितत्तत्वविदस्तत्त्वं यद्ज्ञानमद्वयं । ब्रह्मेतिपरमात्मेतिभागवतवाक्यं । अनसूयातथैवात्रेर्जज्ञेपुत्रानकल्मषान् । दत्तमित्यपिभागवतवाक्यं । अत्रदत्तात्रेयस्य आत्मशब्दितविष्ण्वतारत्वमुक्तं । ब्रह्मणोनावतारोस्ति सन्निधानंतुकेवलमितितात्पर्यात्सोमस्यब्रह्मावेशावतारत्वंज्ञेयं। जज्ञे जनयामास। चेतनस्तुद्विधाप्रोक्तइत्यत्रजीवशब्दोजीवेशयोर्भिदाचैवेत्यादाविवास्वतंत्रचेतनपरः। तेन रमायाअपिसंग्रहः नचजीवाब्रम्हादयइत्यनुपपत्तिः। ममयोनिर्महद्ब्रह्म तस्मिन्गर्भंदधाम्यहमितितस्यामपिब्रह्मशब्दार्थप्रवृत्तेः प्रकृतोपयोगायाह । स्वतंत्रइति ॥ ॐ ॥ हेयत्वावचनाच्च ॥ ॐ ॥ नगौणआत्मशब्दोक्तः । तमेवैकंजानथात्मानमन्यावाचोविमुंचथेतिआत्मशब्दार्थस्यहेयत्वावचनात् । प्रत्युताहेयत्ववचनात् । अन्यस्यहेयत्ववचनाच्चेत्यर्थः ॥ हेयत्वप्रसंगादिति ॥ मुमुक्षुणेतिशेषः । गौणस्यवक्ष्यमाणरीत्याहेयत्वादितिभावः । अस्य तमेवेतिश्रुत्युक्तस्य जानथ विजानथ । अन्याःभगवदितरविषयकाः । ननु सगुणानामपि ब्रह्मादीनामंगावबत्धास्त्वित्यादावहेयत्वंवक्ष्यति सूत्रकारः । सत्यं अत्रप्राधान्येनहेयत्वमुच्यते । तत्रतु परिवारतयोपास्यत्वमिति नविरोधः ॥ मोक्षदातृत्वेनेति ॥

तथाचबाधकवशादात्मन्येवात्मानं अजआत्मा तमेवैकमित्यादौ तत्यागेपीक्षितिश्रुतौबाधकाभावाज्जीवग्रहणंसंभवतीति भावः ॥ ॐ ॥ स्वाप्ययात् ॥ ॐ ॥ आत्मन्येवात्मानंविलापयतीतिश्रुतिप्रतिपाद्यत्वान्निर्गुणमवाच्यं । श्रुत्युक्तंनिर्गुणंकुतइतिचेत् । स्वाप्ययात् स्वस्यस्वस्मिन्लयाभिधानादित्यर्थः । तदवताराख्यं । उद्रिच्यते बहिर्निःसरति । स्वस्य मूलरूपस्य । स्मृत्यनुसारेणतात्पर्यमाह ॥ एकीभूयइति ॥ अनेनभगवद्रूपाणामेकीभावएवलयइत्युक्तंभवति । अवधारणार्थोअन्यत्रालीनएवेति ॥ श्रुत्युक्तत्वादिति ॥ अवाच्ये वृत्यंतरायोगाच्छ्रुत्युक्तत्वंवाच्यत्वंगमयतीतिभावः ॥ पूर्णत्वादिति ॥ अनेनसूत्रोक्तस्वाप्ययउपलक्षकइतिसूचितं ॥ अपूर्णत्वादिति ॥ तथानुभवादित्यर्थः ॥ अन्यस्मिन्निति ॥ यत्प्रयंतीत्यादेरितिभावः ॥ अन्यत्रालीनोपीति ॥ तथाचगौणोद्विविधः । अन्यत्रलीनोऽन्यत्रालीनश्चेति। तत्राद्यउक्तप्रकारेणानुभवसिद्धः । द्वितीयस्त्वेतच्छ्रुत्युक्तइतिभावः । तर्हिनिर्गुणाभावप्रसंगइत्यतआह ॥ निर्गुणइति ॥ एतच्छ्रुत्युक्तादन्यएवकश्चिदस्तीतिभावः । इदमस्यजगतः । तत्रनिर्गुणादन्यस्यलयं विनावस्थाननिषेधादितिभावः ॥ अवस्थानेति ॥ अवस्थानतेत्यर्थः ॥ यत्प्रयंतीति ॥ तदुक्तस्य तद्विजिज्ञासस्वेतिजिज्ञास्यत्वोक्त्यानिर्गुणत्वावगमात्तस्मिन्सगुणानामिमानिभूतानीत्युक्तानांलयोक्तेरितिभावः । इयंस्वाप्ययरूपा तथाचसूत्रे चशब्देनभाव्यमितिभावः । तत्रसूत्रे प्रकृतत्वान्निर्गुणस्येतिवक्तव्ये निर्दोषस्येतिवचनंकिमर्थमतआह ॥ अत्रेति ॥ सूत्रादावित्यर्थः । उक्तमस्त्वित्यन्वयः । तच्चप्रतिपाद्यत्वमितिसंबंधः । तत्राप्युपक्रमादिभिर्विचारेविष्णोरेवतत्सेत्स्यतीत्यतआह ॥ तासामिति ॥ अनंतावैवेदाइतिश्रुतेरितिभावः ॥ ॐ ॥ गतिसामान्यात् ॥ ॐ ॥ नान्यत्रान्यथोच्यते । गतेःसर्वशाखोत्पाद्यज्ञानस्य सामान्यात् समानत्वात् । सर्वेवेदाइत्यादावेकरूपत्वश्रवणादित्यर्थः । तथेतिहासइतिवक्ष्यमाणानुरो-

SGDF Sri Gargeshwari Digital Foundation

धेनाह ॥ **इतिहासश्चेति** ॥ वेदादिजन्यज्ञानानांव्यक्त्यैक्यायोगादाह ॥ **एकविधमेवेति** ॥ गतिसामान्यादिति-
सूत्रस्यांतेनिवेशे पृथगधिकरणभ्रमःस्यादतोमध्येनिवेशः । नचाधिकरणांतरत्वमिष्टं । तस्यापि संशब्दार्थसमर्थनपरत्वे
न पृथक्प्रयोजनशून्यत्वादितिसुधायांव्यक्तं ॥ ॐ ॥ **श्रुतत्वाच्च** ॥ ॐ ॥ **केवलोनिर्गुणश्चेति** सत्त्वादिगुणहीनस्य
श्रुतत्वाच्छ्रुतिप्रतिपाद्यत्वाच्च नाशब्दमित्यर्थः । स्थितिमात्रं । आकाशवत् ॥ **श्रुतत्वाच्चेति** ॥ नन्वेतत्स्वाप्ययादि
त्यनेनपुनरुक्तमितिचेन्न । तत्र स्वाप्ययत्वपूर्णत्वरूपनिर्गुणधर्मप्रतिपादनद्वारा निर्गुणस्य श्रुत्युक्तत्वमभिप्रेतं । अतएव
तत्रश्रुत्युक्तत्वाच्चेत्यध्याहृतसूत्रविन्यासःप्रदर्शितः । अत्रतुसाक्षादेवनिर्गुणस्यश्रुतिप्रतिपाद्यत्वमभिप्रेतं । अतएवात्रनिर्गु-
णपदोपेतश्रुत्युदाहरणमितिध्येयं ॥ **वेदावाच्येति** ॥ वेदगतपदवाच्येत्यर्थः । ननु घटादिपदार्थानामलक्ष्यत्वेनसपक्ष
त्वात्तत्रावर्तमानोहेतुरसाधारणइत्यतआह ॥ **सर्वपदार्थानामिति** ॥ प्रयोगविशेषइतिशेषः । परिहरति ॥ **किंप्र-
योजकांतरमिति** ॥ लक्ष्यत्वइतिशेषः । प्रयोजकत्वप्रकारं । वाच्यत्वस्य केवलान्वयीतिदृष्टांतार्थं । ब्रह्म वाच्यं ल-
क्ष्यत्वादित्यभिप्रेतकेवलान्वयिनिर्वाहार्थंवा तदेवव्यनक्ति ॥ **केवलान्वयिनीति** ॥ **तदिति** ॥ तेन साध्याभावे-
नाविनाभावोव्याप्तोयोऽभावउपाधेःप्रतियोगितासंबंधेनतद्वत्वाभावादित्यर्थः । साध्याभावव्याप्ताभावप्रतियोगिनएव-
उपाधित्वं । साध्याभावाविनाभावीसउपाधिर्यदत्ययइत्युक्तेः । अन्यथोपाध्यभावेनसाध्याभावसाधनायोगइतिभावः ।
व्याप्त्यनिश्चयात् साध्योपाध्योरितिशेषः ॥ **व्याप्तिरेवेति** ॥ यथा धूमस्याग्निसद्भावप्रयोजकत्वे व्याप्तिरेवनियामि
का तथावाच्यत्वस्याप्युक्तलक्ष्यत्वप्रयोजकत्वेव्याप्तिरेवप्रयोजिकेत्यर्थः । असौ व्याप्तिः । धूमादिस्थलेच कार्यकारण
भावनिबंधना नचात्रतथेतिभावः ॥ **किंनिबंधनेति** ॥ तयोःकार्यकारणभावाभावादितिभावः । ननु संयोगिताया-

SGDF
Sri Gargeshwari Digital Foundation

द्रव्यत्वाद्यवच्छेद्यत्वहानिरेवविपक्षेबाधिकातयोर्व्याप्तिनिबंधनेतिचेत् । तर्हीहाप्यनवस्था विपक्षेबाधिकाव्याप्तिनिबंधनमि-त्यभिप्रेत्याह ॥ **अवाच्यस्येत्यादिना** ॥ **किंलक्ष्यमितिप्रश्नस्येति** ॥ सत्यज्ञानादिवाक्येसत्यपदेनकिंलक्ष्यमितिप्र श्नस्येत्यर्थः । ननुनप्रश्नस्यनिरुत्तरत्वं । तद्ज्ञापनायलाक्षणिकसत्यपदस्यैवप्रयोगादित्यतआह ॥ **नचेति** ॥ कुतइत्य तआह ॥ **नहीति** ॥ तर्हि ज्ञानपदप्रयोगोस्त्वित्याशंक्याह ॥ **अथेति** ॥ नचानंतमितिवाच्यं । तेनापिकिंलक्ष्यमिति प्रश्नापर्यवसानेनानवस्थानादितिभावः । ननु नप्रश्नोत्तरपरंपरयाऽनवस्थावक्तुंशक्या । यत्रकोटिस्मरणादिविरहेण संदेहानुदयात्प्रश्नानुदयस्तत्रपरंपराविछेदादितिचेन्न । तात्पर्यानवबोधात् । तथाहि । गंगापदवाच्यप्रवाहसंबंधितयाज्ञात-स्यैवतीरादेर्लक्ष्यतयादृष्टत्वाद्ब्रह्मणोपिलक्ष्यत्वेवाच्यसंबंधित्वेनतद्ज्ञानमावश्यकं । नचतद्ज्ञानंप्रत्यक्षादिना । शास्त्रयो निलादतःशब्देनैवतद्ज्ञानंवाच्यं सोपिशब्दोलक्षकएव । अतस्तत्रापिवाच्यसंबंधितयाब्रह्मज्ञानायपदांतरंप्रयोक्तव्यं । तदपिलक्षकमेवेतिपरंपरापर्यवसानेनानवस्थेत्यत्रतात्पर्यात् । यथोक्तंसुधायां । नहिप्रश्नपरिहारक्रमनिमित्तेयमनवस्था किंतुलक्षणायाःप्रतीतिपूर्वकत्वाच्छब्देनविना प्रत्यायकांतराभावात् । तत्रापिलक्षणाश्रयणेमूलक्षतिरिति । ननुसत्यादि पदेषुब्रह्मपदंवाचकं । अतोत्रपरंपराविछेदान्नानवस्थेतिशंकते ॥ **अथेति** ॥ **किमपराद्धमिति** ॥ अविशेषादिति-भावः । विशेषंशंकते ॥ **लक्ष्यपरेति** ॥ ब्रह्मपदप्रतिपाद्य ब्रह्मस्वरूपलक्षणमुख्यार्थबाधोनास्तीति तस्यवाचकत्वं । सत्यादिपदानांसत्यत्वादिगुणाभिधायकत्वेन गुणानांच निर्गुणेब्रह्मण्यसंभवान्मुख्यार्थबाधोस्तीतितेषांलक्ष्यकत्वमित्य-र्थः । गूढाभिसंधिराह ॥ **लक्षणपदानामपीति** ॥ सत्यादिपदानां सत्यत्वादिविशेषाननर्प्यस्वरूपमात्रपरत्वेपर्याय-त्वप्रसंगाद्ब्रह्मणिविशेषसमर्पकत्वेनैवतेषांप्रवृत्तिरंगीकार्या । अतोमुख्यार्थबाधकाभावाद्वाचकत्वमेवेत्यर्थः । विशेषानर्प-

SGDF
Sri Gargeshwari Digital Foundation

कत्वेपर्यायत्वमित्यभिप्रायोत्रगूढः । अभिप्रायमविद्वान्शंकते ॥ **लक्षणपदानामिति** ॥ तथाचविशेषावलंबनमसिद्ध मितिभावः । आशयमुद्घाटयति ॥ **पर्यायतेति** ॥ स्वरूपलक्षणैकार्थत्वात् । तथाच सहप्रयोगानुपपत्तिरितिभावः । ॥ **प्रयोजनबाहुल्यादिति** ॥ सत्यपदेनासत्यव्यावृत्तिःक्रियते । ज्ञानपदेनाज्ञानव्यावृत्तिरित्यादिप्रयोजनभेदादित्यर्थः ॥ **प्रश्नाननुगुण्याच्चेति** ॥ ब्रह्मविदाप्नोतिपरमिति ब्रह्मज्ञानेनमोक्षेभिहिते किंतद्ब्रह्मेतिप्रश्ने लक्षणकथनस्यैव संगतत्वादितिभावः । तर्हि स्वरूपविषयएवायंप्रश्नोस्त्वित्यतआह ॥ **नहीति** ॥ स्वरूपज्ञानाभावे धर्मिज्ञानाभावादिति भावः । अतःपर्यायतापत्तेः । ननुवाच्यत्वपक्ष्येप्यनवस्था । तथाहि । वाच्यत्वेपि सत्यादिपदस्यवाच्यवाचकसंबंधरूपसंगतिज्ञानसहकृतस्यैवतत्प्रबोधकत्वंवाच्यं । अन्यथातिप्रसंगात् । वाच्यवाचकसंबंधज्ञानंच संबंधिज्ञानंविना नजायते । संबंधिनौ वाच्यवाचकावेव । वाच्यंचब्रह्मैव । नचतदज्ञानं प्रत्यक्षादिनेतिवाचकपदांतरंवाच्यं । तदपि वाच्यवाचकसंबंधज्ञानपूर्वकमेवबोधकमितिपरंपरायाऽपर्यवसानादितिचेन्न । सत्यज्ञानादिपदानांयौगिकत्वेन वाक्यतुल्यत्वात् । वाक्येचवाच्यवाचकसंबंधज्ञानानपेक्षणात् । स्पष्टंचैतदभिमान्याधिकरणसुधायां ॥ ५ ॥ **ब्रह्मस्वरूपनिरूपणइति** ॥ आद्यसूत्रे जिज्ञास्यतयोक्तब्रह्मस्वरूपस्य द्वितीयतृतीयसूत्रोक्तलक्षणप्रमाणाभ्यांस्वेतरसकलवस्तुव्यावृत्ततया निश्चितत्वात्तत्रप्रवृत्तबाधकानां चतुर्थपंचमयोर्निरासान्नाकिमपि निरूप्यमवशिष्टमित्यर्थः । एवकारार्थमाह ॥ **कृत्यांतराभावेपीति** ॥ अभ्युपगम्येदमुदितं । ब्रह्मणोवयवत्वश्रवणान्नजिज्ञास्यत्वमित्यादिबाधकानांतत्रतत्रपरिहारादितिध्येयं । समन्वयशब्दार्थः शास्त्रीयशब्दानामुपक्रमाद्यन्वयात्सम्यङ्निरूपणमिति । अनेनसम्यगन्वयः शक्तितात्पर्यावगमोयेननिरूपणेनभवतीतियोगेनवा हेतुभूतोपक्रमादिलिंगवाचकसमन्वयपदेन लक्षणयावा तत्साध्यंनिरूपणंग्राह्यमित्युक्तंभव

ति । तेनान्वयोपपत्यादिलिंगमितिभाष्यदिशासमन्वयशब्देनोपक्रमादिलिंगग्रहणेऽध्यायशेषेणोपक्रमादिलिंगप्रकटनाभावात्प्रकटयतीत्यस्यानुपपत्तिः । सुधोक्तरीत्या शक्तितात्पर्यलक्षणावगमसंबंधज्ञानेपितथैवेतिनिरस्तं ॥ **प्रतिवाक्यग्रहणेनेति** ॥ उदाहरणत्वेनेतिशेषः । अन्यदेव रुद्राद्येव कारणमितिशेषः ॥ **शंकोत्थानायेति** ॥ सूत्रानुदाहरणे आनंदमयरूपविषयपरिज्ञानाभावेन अस्यविष्णुत्वसमर्थने कापूर्वसंगतिरित्येवंरूपशंकानुदयादितिभावः ॥ **चतुर्थपादइति** ॥ आद्यपादत्रयेस्पष्टास्पष्टलिंगसमन्वयः चतुर्थेतुप्रधानस्य अशब्दत्वनिराकरणमितिपरैरंगीकारादितिभावः ॥ **देवताद्यधिकरणेति** ॥ तदुपर्यपि शुगस्येत्यनयोः क्रमेणदेवशूद्रयोर्वेदविद्याधिकारविचारेणसमन्वयानुक्तेरितिभावः ॥ **एकेति** ॥ समन्वयरूपेत्यर्थः । अस्मिन्पादे अन्यत्रप्रसित्थनामात्मकशब्दसमन्वयनिरूपणेनिमित्तंवक्तुमाह ॥ ॥ **शब्दास्तावदित्यादिना** ॥ नन्वन्यत्रप्रसित्थाइतिकोर्थः । किमन्यत्रैवप्रसित्थाइत्युतान्यत्रापिप्रसित्थाइति । प्रकारांतराभावात् । तत्रनाद्यः । चतुर्थपादेसमन्वेतव्यान्यत्रैवप्रसित्थशब्दसांकर्यात् । नापिद्वितीयः । उभयत्रप्रसित्थशब्दसांकर्यात् । नचलोकतोन्यत्रैवप्रसित्थाः अन्यत्रप्रसित्थाः । श्रुत्यादितोऽन्यत्रैवप्रसित्थाः अन्यत्रैवप्रसित्थाः । अतएवलोकप्रसिध्या अन्यत्रनिरूढानामिंद्रादिशब्दानांश्रुतिलिंगादिबलाद्विष्णौसमन्वयः प्राक्प्रतिपादितः । इदानींश्रुतिलिंगादिभिरेवान्यत्रप्रसित्थानामपिशब्दानांसमन्वयनिरूपणान्नैतत्पादवैय्यर्थ्यं । अनेनैवाभिप्रायेणान्यत्रैवेत्युक्तिरितिचतुर्थपादीयटीकेतिवाच्यं । तथात्वे । अन्यत्रप्रसित्थत्वेनाभिमतसर्वगतत्वादेरादित्यश्रुत्यादिनान्यत्रप्रसित्थेवक्ष्यमाणत्वेन तस्यान्यत्रैवप्रसित्थतापत्तेः । नचप्रबलश्रुत्यादिभिरन्यत्रप्रसित्था अन्यत्रैवप्रसित्थाः । श्रुतिलिंगादिमात्रेणान्यत्रप्रसित्था अन्यत्रप्रसित्थाइतिभेदइतिवाच्यं । अन्यत्रैवप्रसित्थाव्यक्तादिशब्दानामन्यत्रप्रसित्थिसाधकावरत्वादीनामि-

NMDF
SRI Lalgudi Vaidyanathan Digital Foundation

वान्यत्रप्रसिद्धगुहाप्रविष्टत्वादेरन्यत्रप्रसित्थिसाधकद्वित्वादीनामप्येकस्मिन्ब्रह्मण्यसंभवाद्बलवत्त्वेन तस्याप्यन्यत्रैवप्रसित्थतापातात्तस्मान्नान्यत्रप्रसित्थानामन्यत्रैवप्रसित्थेभ्योभेदइतिचेत् । उच्यते । श्रुत्यादितोलोकतोवा अन्यत्रप्रसित्थाः अन्यत्रप्रसित्थाः । बलवल्लिंगश्रुत्यादिभिरन्यत्रप्रसित्थाः अन्यत्रैवप्रसित्थाः यथोक्तं । श्रुत्यादितोलोकतोवापीतरेषुप्रसिद्धता । बलवच्छ्रुतिलिंगाद्यैरन्येष्वेवप्रसित्थतेति । अतएवपूर्वंक्वचिच्छ्रुत्यादिनैवान्यत्रप्रसित्थशब्दसमन्वयोक्तावपिएतत्पादीयश्रुत्यादीनांप्राबल्यादियमुक्तिरितिचतुर्थपादीयटीका । बलवत्त्वंचमुख्यतोभगवत्परत्वेपि अमुख्यतोऽन्यपरत्वं विनानुपपद्यमानत्वं । यथेंद्रियेभ्यःपराह्यर्थाइत्यत्रेंद्रियादिशब्दानांमुख्यतोभगवत्परत्वेपि अमुख्यतइंद्रियाद्यभिमानिदेवतापरत्वं । अन्यथादेवतातारतम्याद्यसित्थेः नचैवंगुहाप्रविष्टत्वादेरन्यत्रप्रसित्थत्वसंपादकद्वित्वस्यान्यपरत्वंविनानुपपद्यमानत्वमस्ति । येनतस्यप्राबल्यंस्यात् । अथवाएषांशब्दानांब्रह्मण्यप्रसित्थिः अन्यवस्तुषुप्रसित्थिश्चेतिद्वयंसमन्वयविरोधितेअन्यत्रप्रसित्थाः । एषांब्रह्मण्यप्रसित्थिरन्यत्रप्रसित्थिर्ब्रह्मपरत्वेऽत्यशक्यतेतित्रयंसमन्वयविरोधितेअन्यत्रैवप्रसित्थाः । यथोक्तं । येषांब्रह्मण्यप्रसित्थिःप्रसित्थिश्चान्यवस्तुषु विरोधिन्यौहितेन्यत्रप्रसित्थाःकथिताइह । एषामुक्तद्वयंब्रह्मपरत्वस्यात्यशक्यता इतितिस्रोविरोधिन्यस्तेन्यत्रैवप्रसित्थकाइति ॥ **तत्रप्रसिद्धाइति** ॥ तत्रैवप्रसित्थाइत्यर्थः । तत्रापीत्यर्थत्वे उभयत्रप्रसित्थिसांकर्यात् । अतएवसुधायां ब्रम्हण्येवप्रसित्थेत्युक्तं ॥ **नामलिंगात्मकतयेति** ॥ साक्षात्धर्म्युपस्थापकानामात्मकाः धर्मद्वाराधर्म्युपस्थापकाः लिंगात्मकाः ॥ **नतत्रेति** ॥ ननु तत्रैवप्रसित्थानामपि जनितोतविष्णोरित्यादाविवान्यपरत्वशंकायांसमन्वयोव्युत्पाद्यतएवेतिचेन्न । तत्रप्रसित्थेत्यनेन अन्यपरत्वशंकाराहित्यस्योक्तत्वात् । नन्वत्रकथंपादक्रमः । किंमहामल्लभंगन्यायेन अथप्रथममल्पसोपानमारोहति अनंतरंस्थूलमनंतरंस्थूलतरं

SGDF Sri Gargeshwari Digital Foundation

ततःस्थूलतममितिसोपानारोहणन्यायेन । नाद्यः । तथात्वे अन्यत्रैवप्रसिद्धानांसमन्वयस्यबहुप्रयत्नसाध्यत्वेन तस्यैव-प्राथम्यप्रसंगात् । नाद्वितीयः । उभयत्रप्रसिद्धस्य अल्पप्रयत्नसाध्यत्वेनतस्यैवप्राथम्यप्रसंगादित्यतआह ॥ तेष्वन्यत्रेति ॥ त्रिविधेष्वित्यर्थः । तथाचमहामल्लभंगन्यायेनान्यत्रैवप्रसिद्धसमन्वयस्यप्रथमंप्राप्तत्वेपि प्रथमंबुध्यनारोहादेवत-त्परित्यागइतिभावः । पादत्रयेमहामल्लभंगन्यायेनक्रमइत्याह । उभयत्रप्रसिद्धानामित्यादिना । पराकरणमात्रस्य अमुख्यत्वेनेतिसंबंधः । अयमर्थः । उभयत्रप्रसित्धानांहिशब्दानां अन्यपरत्वमात्रंनिरसनीयं । नतुभगवत्परत्व मुपपादनीयं स्वतःसित्धत्वात् । अन्यत्रप्रसित्धानांचान्यपरत्वंनिरस्य भगवत्परत्वंचव्युत्पादनीयं तस्यासित्धत्वात् । अन्यत्रप्रसित्धिनिरासपूर्वकं भगवत्प्रसित्धिव्युत्पादनापेक्षया अन्यप्रसित्धिनिरसनमात्रपरत्वममुख्यमितितृतीयेतदुक्तिरिति ॥ अमुख्यत्वेनेति ॥ धर्मधर्मिणोर्धर्मिणएवप्रधानत्वादितिभावः । ततःपरिशेषात् । अन्ये मायावादिनः ॥ उत्तराधिकरणेति ॥ उत्तरपादीयाधिकरणेत्यर्थः । एतदुत्तराधिकरणेएतद्वाक्योदाहरणाभावात् । शास्त्राध्यायपादसंगतिः शास्त्राध्यायपादेष्वंतर्भावः । तेननैकवचनानुपपत्तिःशंक्या । अत्रब्रम्हणीतिशास्त्रे समन्वयेत्यध्याये अन्यत्रप्रसिद्धानामितिपादेंतर्भावः । तत्रापिलोकतइति चतुर्थादन्यत्रेतितृतीयान्नामेतिद्वितीयाद्भेदःसूचितः । एवमग्रेपि । अतइत्यस्यविवरणंसंगतिसद्भावादिति । यद्वा अतःप्रथमाधिकरणादित्यर्थः । अत्र विप्रकीर्णनानाशाखास्थवाक्यविचारपराधिकरणेषु नाव्यवहितपूर्वाधिकरणसंगतिनियमः । किंतु येनकेनचित्पूर्वाधिकरणेनापीत्यतोत्रजिज्ञासाधिकरणतद्विषयवाक्याभ्यामेवाक्षेपिकीसंगतिरुक्ता । प्रत्यधिकरणमव्यवहितपूर्वाधिकरणसंगतिरपिचंद्रिकाभावबोधयोर्व्यक्ता । तत्रैवानुसंधेया । निश्छिद्रतया निरवकाशतया । तस्यपुरुषविधतामन्येतस्यपुरुषविधत्वंकिंविवक्षतमतआह ॥ तस्मादुद्धृतइति ॥

SEDF
Sri Gargeshwari Digital Foundation

प्रादुर्भूतइत्यर्थः । परेषामुपकारेतत्कृतप्रत्युपकारेण यत्सुखमुत्पद्यतेतत्प्रियं । क्षीरपानादिप्रकृष्टविषयजः प्रमोदः । जल पानाद्यप्रकृष्टविषयजन्योमोदः । अत्रेदंबोध्यं । प्रतीयमानेन्नविकारेपुरुषशरीरे अन्नमयनामानिरुद्धोवर्तते । तन्मध्ये प्राणमयनामकःकोशः तत्रप्राणमयनामाप्रद्युम्नः । तन्मध्ये मनोमयनामकःकोशः तत्रमनोमयनामासंकर्षणः । तन्मध्येविज्ञानमयनामकःकोशः तत्रविज्ञानमयनामावासुदेवः । तन्मध्येचानंदमयनामकःकोशः तत्रानंदमयनामानारायणः । तत्रपूर्वपूर्वोक्तानांदेहत्वं । उत्तरोक्तानांदेहित्वं । तत्रानंदमयोदेही विज्ञानमयाख्येदेहेव्याप्यतिष्ठति । एवमन्येपि । तत्रानंदमयाद्विज्ञानमयस्यावतारः ॥ एवमन्येषामपीति ॥ ततश्चायमर्थः । ब्रह्मविदाप्नोतिपरमित्युक्तब्रह्मणः सत्यंज्ञानमनंतमितिलक्षणमुक्तं । तत्रसत्यत्वमन्नमयप्राणमयप्रकरणाभ्यां ज्ञानत्वं मनोमयविज्ञानमयप्रकर्णाभ्यांव्याख्यातं । अनंतत्वं गुणतोऽपरिछिन्नत्वमित्याशयेन तत्प्रतिपादनायानंदमयप्रकरणंप्राप्तं । तस्माद्वाएतस्मादित्यादि तस्मात्सत्यत्वादि लक्षणोपेतादेतस्मात्प्रकृताद्विज्ञानमयात् अन्यः आनंदमयः विज्ञानमयस्यांतरः अंतर्विद्यमानः । अभेदेपिविशेषबलाद्भेदव्यवहारः । तेनानंदमयेनैव विज्ञानमयःपूर्णः ईषदवकाशराहित्येनव्याप्तः । सएषआनंदमयः पुरुषविधः पुरुषाकारएव । वाशब्दः प्रसिद्धौ । अयंविज्ञानमयः तस्यानंदमयस्यपुरुषविधतां पुरुषाकारतां अनु अनुसृत्य पुरुषविधः पुरुषाकारः तस्मात्प्रादुर्भूतइतियावत् । तस्यानंदमयस्यप्रियंशिरः मोदोदक्षिणबाहुः प्रमादोवामबाहुः आनंदोमध्यभागः ब्रह्म पुछाख्यावयवः । पुछं नलांगूलमित्याह ॥ प्रतिष्ठेति ॥ प्रतितिष्ठत्याभ्यामितिप्रतिष्ठापादौ । सुपांसुलुगितिद्विवचनस्याकारइति ॥ ब्रह्मणोन्यइति ॥ अनन्यत्वेत्वे कैकावयवंध्यायेदित्युक्तरीत्यानानुपपत्तिरितिभावः ॥ अयोगादिति ॥ अवयवमात्रस्यफलदानासमर्थत्वादितिभावः । अयुक्ताचेन्मास्तुब्रह्मजिज्ञासेत्यतआह ॥ ब्रह्मजिज्ञासेति ॥ यतोतइति ॥ अनेनेत्यतआहे-

तिभाष्यं । इतियतःशंकाप्राप्तापअतआहेतियतःशब्दाध्याहारेणयोजितंभवति । ब्रह्माणिजीवाःसर्वेपिपरब्रह्माणिमुक्तिगाइतिश्रुतिः । ब्रह्माणि ब्रम्हशब्दवाच्या इत्यर्थः । ममयोनिर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहमितिगीतावचनं । महद्ब्रम्ह चित्प्रकृतिः । महतीब्रह्मणीद्वेतुप्रकृतिश्चमहेश्वरइत्युक्तेः । ममयोनिर्भार्या । योनिर्भार्येतिगीतातात्पर्योक्तेः । तस्मिन्ब्रम्हणि अहंगर्भंदधामीत्यर्थः । पंचभिःपंचभिर्ब्रम्हचतुर्भिर्दशभिस्तथा । एतच्चतुर्विंशतिकंगणंप्राधानिकंविदुरितिभागवतवचनं । पंचभिः महाभूतैः । पंचभिः तन्मात्राभिः । चतुर्भिः महदहंकारमनोबुद्धिभिः । दशभिरिंद्रियैश्चब्रह्म पूरितमेतच्चतुर्विंशतिकंगणंप्रधानकार्यंविदुरित्यर्थः । तदेवंब्रम्हपरमंकवीनामितिहरौप्रयोगः स्फुटइत्यादिशब्देनतद्ग्रहणं । इत्यादिनाक्रमेणजीवादिषुप्रसिद्धब्रम्हशब्दस्य आनंदमयेप्रयोगइत्यर्थः । अधिकृत्य उद्दिश्य ॥ आनंदमयशब्दार्थवादिति ॥ आनंदमयशब्दस्य बव्हानंदत्वंतद्युक्तेत्यर्थः । मयट्शतशब्दयोः बव्हर्थकत्वादितिभावः ॥ हिरण्यगर्भेविद्यमानेनेति ॥ शतानंदःशतधृतिरित्युक्तेरितिभावः ॥ सूर्याधिष्ठातृत्वादिनेति ॥ तेषांसूर्यादुत्तमत्वेन नियामकतयातदंतर्गतत्वादिनेत्यर्थः । आदिशब्देनसाधारणब्रम्हशब्दोविवक्षितः । अनेनैवमन्येषां इत्येतच्चतुर्मुखरुद्रव्यतिरिक्तसूर्याधिष्ठातृमात्रपरं । अन्येषांसर्वजीवानामितिपृथगुक्तेरित्युक्तंभवति । बहुधाविकारित्वाख्यबहुभावः कथंनिर्विकारचित्प्रकृतौसंभवतीत्यतआह ॥ तदभिमानित्वादिति । बहुभावादेवेति ॥ नत्वभिमानित्वेनेत्येवार्थः ॥ तत्तद्देहगतेति ॥ अनेन अन्नमयत्वादेश्चेत्युक्तोहेतुर्देहाभिमानित्वेनजीवेवर्ततइत्युपपादितंभवति ॥ प्रायपठितेति ॥ सहपठितेत्यर्थः ॥ विरोधादिति ॥ अवयवावयविभावस्यभेदव्याप्तत्वादितिभावः ॥ अब्रह्मत्वेनेति ॥ एतेनेदंनिरस्तं । अत्रचतुर्मुखादिष्वेकएवेतिनपूर्वपक्षः । अनेकप्रापकसद्भावे निर्णयायोगात् । नापिसर्वेपीति विरोधान्नतेष्वन्यतमइति अनिर्धारणेसंशयविशेषप्रसंगा

Sri Lakshmi Digital Foundation

दिति । विशिष्टनिर्णयायोगेपि ब्रह्मान्यत्वप्रकारेणान्यएवेतिनिर्णयोपपत्तेः । सूत्रमनुपन्यस्य व्याख्यानेन्यूनतास्यादि-
त्यतउक्तं ॥ उदाहृतेति ॥ तत्रव्याख्यानस्याकृतत्वादुदाहरणंव्यर्थइत्यतउक्तं ॥ संगत्यर्थमिति ॥ श्रुत्यधिकरणसं
गतिप्रदर्शनार्थमित्यर्थः ॥ ॐ ॥ आनंदमयोभ्यासात् ॥ ॐ ॥ आनंदमयइत्युपलक्षणं । अन्नमयादयःपंच ब्रह्मैव अ-
भ्यासात् ब्रह्मशब्दाभ्यासात् । अभ्यासशब्दार्थंचाग्रेविवेचयामः । भाष्ये इत्यादिषुब्रह्मशब्दाभ्यासादित्यन्वयभ्रमं
वारयंस्तदर्थमाह ॥ असन्नेवेत्यादिना ॥ ब्रह्म जीवादन्यंनास्तीतिवेदजानातिचेत्सोधिकारी । असन्दुरुयेवभवति
यदिब्रह्म जीवातिरिक्तमस्तीतिवेद ततएवएनमधिकारिणंसंतंसुखिनंविदुरित्यर्थः। बुध्याविहिंसन्पुष्पैर्वाप्रणवेनसमर्चयेत्।
वासुदेवात्मकमितिव्यासस्मृतिः॥ ॐ॥ विकारशब्दान्नेतिचेन्नप्राचुर्यात् ॥ ॐ ॥ विकारार्थकमयट्शब्दान्नान्नमयंब्रह्मे
तिचेन्न प्राचुर्यात् प्राचुर्यार्थत्वादन्नमयट्शब्दजातस्येत्यर्थः अविकारित्वादतभिमानित्वाच्चेति। निर्विकारोक्षरःशुद्धइत्यादे
र्विकारित्वंस्वतंत्रेहरौपराधीनानियामकत्वरूपमाभिमानित्वंचनसंभवतीत्यर्थः । तत्र गीताभाष्योक्तप्रमाणमाह ॥ तादा
त्म्यार्थइति ॥ ननु सूत्रेप्राचुर्यादित्युक्तेरानंदस्येत्यर्थाल्लभ्यते । तथाच तद्व्याख्यानभाष्ये आनंदप्रचुरत्वादित्येवव-
क्तव्ये कुतः प्रचुरानंदत्वादितिविपरीतोक्तिरित्यतआह ॥ आनंदप्रचुरइति ॥ इत्यादिवदिति ॥ तत्र यथाप्रा-
चुर्यस्य ब्राह्मणविशेषणत्वेन तद्विरोधिईषच्छूद्रप्रसक्तिरेवमत्रप्राचुर्यस्यानंदविशेषणत्वे तद्विरोध्यनानंदस्याप्यल्पस्यप्रस
क्तिरित्यर्थः ॥ इत्येवप्रतीतेरिति ॥ सूत्रे प्राचुर्यस्यविशेष्यतयोक्तावपि स्वयंविशेषणत्वेनतदभिदधता यथाप्रचुर
प्रकाशोरविरित्युक्ते प्रकाशविरोध्यंधकारलेशाप्राप्तिवत्प्रकाशप्रचुरइत्युक्तेपितदप्राप्तिःप्रत्यक्षविरोधात् । तथाप्रचुरानंदइ
त्युक्ते दुःखलेशाप्राप्तिवदानंदप्रचुरइत्युक्तेपि तदप्राप्तिः श्रुत्यादिविरोधादितिसूचितंभवतीत्यर्थः। शंकते ॥ नायमिति ॥

SGDF Sri Gargeshwari Digital Foundation

सहपठितत्वादिति ॥ तथाचप्रायपाठविरोधइतिभावः ॥ अल्पत्वादिति ॥ तस्यलोकसाधारण्यादितिभावः । कुतइतिप्रश्नस्योत्तरमाह ॥ अद्यतेत्तिचेति ॥ स्वयंप्राणिभिर्भुज्यते प्राणिनोभुङ्क्तेच यस्मात्तस्मात्तद्ब्रह्मान्नमित्युच्यत ईत्यर्थः । अभिसंहितं अभिमतं । नाशप्रसंगादितिभावः । शंकते ॥ औषधीभ्यइति ॥ धान्येभ्योन्नंसमुद्भूतं तस्मात्पुरुषदेहःसमुद्भूतइत्यर्थः उक्त्वा आत्मनआकाशइत्यादिना । नन्वथापिप्राणमनःशब्दयोःश्वासवाग्वंतःकरणपरत्वेन तदुभयप्राचुर्योक्तावल्पार्थत्वंस्यादित्यतआह ॥ एवमिति ॥ चेष्टकत्वावबोधनार्थत्वेति ॥ अनचेष्टायां मन्ववबोधनइतिधातुव्याख्यानादितिभावः । विज्ञानप्राचुर्यस्यसार्वज्ञतयाल्पताशंकानुदयाद्वयोरेवोक्तिः ॥ श्रुतिविरोधइति ॥ तस्यछांदोग्यभाष्यादिशा स्वगतभेदानिषेधार्थकत्वादितिभावः । येन्नमित्यादि एतेषांतेन्नमाप्नुवंति तेआयुर्यंतीतिपूर्ववाक्याभ्यांनबिभेति नप्रमाद्यति संतमेनंततोविदुरित्युत्तरैःक्रमेणान्वयोबोध्यः ॥ अन्नमयादीनीति ॥ अन्नमयादिपंचकंनिरूप्यतद्ज्ञातुः फलनिरूपणायोदाहृतेत्यर्थः ॥ अनन्यथासिद्धेति ॥ विष्णुमात्रनिष्ठेत्यर्थः । समभिव्याहारात् सहोच्चारात् । सावकाशस्यमयट्पदस्य । अन्ये रामानुजाः ॥ आनंदमयएवेति ॥ विज्ञानमयोजीवः अन्नमयादित्रयःकोशाइत्येवशब्दार्थः ॥ क्लिष्टत्वादिति ॥ प्रायपाठविरोधादेवेतिभावः ॥ सूत्रविरोधइति ॥ तत्रानंदमयमात्रस्यब्रह्मत्वोक्तिविरोधः अनुजज्ञे ज्ञापयामास । तथैवपंचमयटांप्राचुर्यपरत्वेन । अन्यथा पंचानामब्रह्मत्वे ॥ कथमिति ॥ व्यभिचारादितिभावः । ननु सूत्रकारेणानंदमयस्यब्रह्मत्वेब्रम्हशब्दाभ्यासस्यैवहेतूकृतत्वेनतस्यान्नमयादिष्वभावात्कथंव्यभिचारइतिचेत् । विज्ञानंदेवाःसर्वे ब्रह्मज्येष्ठमुपासते विज्ञानंब्रम्हचेद्वेदेति विज्ञानमयेब्रह्मशब्दाभ्यासद्भावात् । तथा ब्रह्मवल्लीभृगुवल्योः श्रुतान्नमयादेश्चैकत्वेन येन्नंब्रह्मोपासते अन्नंब्रह्मेतिव्यजानादित्यादिश्रवणे-

SGDF
Sri Gargeshwari Digital Foundation

नमिलित्वा प्रतिप्रकरणं द्विर्ब्रह्मशब्दश्रवणस्यचंद्रिकायांप्रदर्शितत्वेन अन्नमयादावपिब्रह्मशब्दाभ्याससद्भावात् । यत्तु सुधायां अन्नमयादिषु असकृदुक्तिमात्ररूपा मुख्याभ्यासप्रदर्शनंतदेकप्रकर्ण्यामेवाभ्यासप्रदर्शनायेत्यदोषः । यद्वासूत्रकृतोपिब्रह्मशब्दएवहेतुत्वेनाभिमतः । तस्यविष्णवेकनिष्ठत्वेनव्यभिचाराभावात् । अभ्यासोक्तिश्चयदाश्रुतितएवविष्णुत्वनिश्चयस्तदाभ्यासरूपतात्पर्यलिंगात्सुतरामित्यभिप्रायइतिनकोपिदोषः । तत्र पंचानामपिब्रह्मत्वे पंचमयटांप्राचुर्यार्थत्वेच बाधकंशंकते ॥ **अन्नमयादीनामपीति** ॥ तर्हि अन्नमयोभ्यासादितिवाच्यं प्रथमातिक्रमेकारणाभावादित्यतआह ॥ **आदिमत्वेपीति** ॥ अल्पाक्षरत्वेपीत्यपिज्ञातव्यं ॥ **संगतत्वेनेति** ॥ जिज्ञास्यब्रह्मणआनंदमयावयवत्वेनोक्तत्वान्नतस्यजिज्ञास्यत्वमितिशंकापराकरणायानंदमयस्य विष्णुत्वसमर्थनस्यपूर्वसंगतत्वेनेत्यर्थः । रामानुजमतवन्मायिमतं कुतोननिराक्रियतइत्यतआह ॥ **यस्त्विति** ॥ पूर्वपक्षीकृतः पूर्वपक्षित्वेनकृतः । निराकृतइतियावत् । आनंदमयस्यब्रह्मत्वंसाधयता पंचानामब्रह्मत्वपक्षनिराकरणादितिभावः । प्रत्याक्षिपत् निराचक्रे । प्रयोगात् विशेषणविशेष्यभावव्यवहारात् । यद्वा भिन्नेविशेषणेप्रचुरशब्दप्रयोगादिति ॥ **विशेषणेति** ॥ विशिष्यते विविच्यते अयंगुणः अयंगुणीत्यादिरूपेणवस्तुयेनसविशेषः वस्तुनःस्वरूपसामर्थ्यं तेनेत्यर्थः । विशेषोनाम काचनवस्तुनःशक्तिरिति तत्त्वनिर्णयटीकोक्तेः ॥ ॐ **तद्धेतुव्यपदेशाच्च** ॐ ॥ आनंदमयोब्रह्मैव तस्यविष्णोस्तत्रपूर्णानंदत्वे तत्रानंदमयप्रकरणे कोह्येवान्यात्कःप्राण्यादिति लोकचेष्टकत्वाख्यहेत्वभिधानादित्यर्थः ॥ **कारणाभावादिति** ॥ सुखोद्रेकान्नृत्यगानादौप्रवृत्तिः सुखार्थंभोजनादौ दुःखोद्रेकाद्रोदनादौ दुःखनिवृत्तयेकंटकोद्धरणादौवेतिकारणचतुष्टयंप्रवृत्तौकारणंदृष्टं । तत्रोत्तरत्रयाणामभावादित्यर्थः । अन्यादित्यस्यार्थश्चेष्टयेदिति । प्राण्यादित्यस्यार्थःप्रवृत्तयेदिति । अनचेष्टायामितिधातोः

सूत्रेतदितितंत्रमित्याशयेनत्रेधार्थमाह ॥ **आनंदमयप्रकरणइति** ॥ **आनंदपूर्णत्वएवेति** ॥ अनेननकेवलमत्रसूत्रे आनंदमयस्यविष्णुत्वंसमर्थ्यते किंतु मयटःप्राचुर्यार्थत्वमेव । आनंदपूर्णत्वाभावे उक्तरीत्यालोकचेष्टकत्वानुपपत्तेरिति सूचयति । स्पष्टंचैतन्महानंदत्वएवास्येत्याद्यनुव्याख्याने । अपरब्रह्मणि प्रकृत्यादौ ॥ ॐ **मांत्रवर्णिकमेवचगीयते** ॐ ॥ मंत्रवर्णःसत्यंज्ञानमनंतंब्रह्मेतिलक्षणवाक्यात्मकोवेदः तेनप्रोक्तंमांत्रवर्णिकं तथाचमंत्रवर्णेसत्यत्वादिलक्षणवत्तयाप्रोक्तंपरंब्रह्मैवान्नमयादिशब्दपंचकेनप्रतिपाद्यते यतोतश्चपंचापिब्रह्मैवेत्यर्थः । अनुसंधाने आलोचने ॥ **एकार्थत्वप्रतीतेरिति** ॥ अस्तेःशत्रंतस्यरूपंसदित्येतज्जीवनवाची । अस्तिदेवदत्तइत्युक्ते जीवतीतिप्रत्ययात् । तथाषद लृविशरणगत्यवसादनेष्वितिस्मरणात् । क्विबंतस्यसदेश्चरूपमेतच्छैथिल्यलक्षणविशीर्णत्वंवक्ति । भावप्रधानंचैतत् तथाचसत् सत्वं जीवनं विशरणंवा भूतानांयापयति प्रापयतीतिसत्यशब्दार्थःसर्वभूतानांजीवनविनाशहेतुत्वं । अन्नशब्दस्योपजीव्यतालक्षणाद्यताविनाशकत्वलक्षणातृत्वार्थेतिसत्यान्नशब्दयोरेकार्थत्वं । सदेर्गत्यर्थेपिपाठात् सत्वंभूतानांगतिंयापयतिप्रापयतीतिगतिप्रदत्वंसत्यशब्दार्थः । प्रपूर्वादनचेष्टायामित्यस्मान्निष्पन्नप्राणशब्दस्यापि सएवार्थइतितयोरेकार्थत्वं। मन्वववबोधनइत्यस्माद्भावे असुन्प्रत्यये मनइति निष्पन्नत्वान्मनोज्ञानशब्दयोरेकार्थत्वं ज्ञानविज्ञानशब्दयोरेकार्थत्वंस्फुटमेव । अनंतत्वंच गुणतोपरिछिन्नत्वं । आनंदमयत्वंतदेकदेशभूतमितितयोरेकार्थत्वमिति सत्यज्ञानानंतपदानामन्नमयादिपदानांचैकार्थत्वप्रतीतेरित्यर्थः ॥ **परब्रह्मेति** ॥ अन्यवेदनेनान्यप्राप्तेरयोगाद्वेदनाप्त्योर्विषयैक्यावश्यंभावेनपरंब्रह्मवित्परंब्रह्माप्नोतीत्यभिमतत्वादितिभावः ॥ **किंतदिति** ॥ किंलक्षणकमित्यर्थः नहिलक्षणेनविनावस्तुसमस्तव्यावृत्तया ज्ञातुंशक्यमित्यर्थः ॥ **कथंतद्वेदनमिति** ॥ नह्यपरिछिन्नपरिमाणस्य तस्यज्ञानमस्माकंयुज्यतइतिभावः ॥ की-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri Foundation

दृशीचतत्प्राप्तिरिति ॥ तस्यसर्वगतत्वेननित्यप्राप्तत्वादितिभावः ॥ योवेदेतिवेदनमिति ॥ अपरिछिन्नपरिमाणस्यापिभक्तानुकंपयाल्पपरिमाणप्रकटनसंभवादित्याशयेनतत्रगुहानिहितत्वोक्तेरितिभावः॥ सोश्नुतइतिप्राप्तिरिति॥ नवत्संयोगमात्रंतत्प्राप्तिःकिंतुतद्व्यक्तिस्थाने सत्यकामत्वादितत्सारूप्याभिव्यक्तिरेवेत्याशयेनतत्रसर्वकामभोगोक्तेरितिभावः ॥ युक्तिसमुच्चयार्थइति ॥ नकेवलमभ्यासादेःकिंतुमांत्रवर्णिकगानाच्चेतिसमुच्चयार्थइत्यर्थः। भाष्ये संदोहो मध्यभागःप्रमाणेन आगमेन। असिद्धत्वात् अभावात् ॥ बाधकोवेति॥प्रकृतेतर्कस्यबाधकत्वेनानाशंकितत्वादितिभावः ॥ इतिभावेनेति ॥ अनेनाप्रमेये अपरिमितशक्तिमतिप्रमा परिमितशक्तिःकुतइतिभाष्यार्थउक्तोभवति। तदभावात्। पुरुषपदेनाप्रकृतत्वात्। द्विरुक्तेनद्विवारमुक्तत्वेननिमित्तेनभेदश्रुतिभेदबोधकशब्दं॥ आकाशादीति ॥ आत्मनआकाशः संभूतः आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यःपृथिवी पृथिव्याओषधयः ओषधीभ्योन्नं अन्नात्पुरुषइत्यत्रोक्तेरित्यर्थः ॥ ॥ सारभूतामिति ॥ आकाशादिशब्दार्थानांभूततदभिमानितद्देहतदर्दीनियामकहरिरूपाणांमध्येश्रेष्ठमित्यर्थः। चिन्मात्रमेवेत्येवशब्दार्थोन्यद्विहायेति। प्रकृतिंपुरुषंचैवविध्यनादीउभावपीतिगीतावाक्यं। द्वयोः जीवपरयोः ॥ दुःखानुभवितृत्वविशेषणेनेति॥ भुङ्क्तेप्रकृतिजान्गुणानितिवाक्यशेषादितिभावः ॥ सारान्नमयेति ॥ अन्नशब्दार्थेषुयत्सारंश्रेष्ठं भूताद्यत्वंतदतृत्वरूपं तत्प्रचुरत्वाविशेषणेनेत्यर्थः। रससारवरश्रेष्ठशब्दाःपर्यायवाचिनइत्युक्तेः। दृष्टांतमात्रंनसाधकमित्यतोत्रएकादशतात्पर्यसंमतिमाह॥ उक्तंचेति॥ बहुपदार्थानामेकेनशब्देनोद्देशेपि तेषांमध्ये एकं तेनैवशब्देनपरामृश्य तस्य किंचिद्विधीयतइत्यर्थः। नन्वाकाशादिपुरुषांतपदैर्ब्रह्मग्रहणे संभूतशब्दोक्तसृष्ट्यनुपपत्तिरित्यतआह ॥ एतच्चेति ॥ उत्तरप्रस्थाने अनुव्याख्याने। तदेवाह ॥ ब्रह्मशब्देति ॥ ब्रह्मशब्दोदितेतस्मिन्नात्मशब्दंप्रयुज्यच। तस्मादा-

SGDF
Sri Gargeshwari Digital Foundation

काशसृष्टिंचप्रोवाचात्रचतुर्विधां । भूतंभूताभिमानीचतद्देहोंतर्नियामकः । हरिश्चाकाशशब्दोक्तइत्यादिनाकाशपुरुषांतश
ब्दवाच्यभगवद्रूपाणामपि प्रादुर्भावोक्तेर्नोक्तशंकावकाशइतिभावः । स्थानांतरे नारायणपन्ने ॥ **प्रार्थितशुद्धीना-
मिति** ॥ अन्नमयादयःकोशाःशुध्यंतामितिजीवेनप्रार्थितपावित्र्यवतामित्यर्थः । अत्र ब्रह्मवल्यां । तत्तत्कोशगतं । अन्न
मयादिसंज्ञकदेहगतं । आदौ अन्नमयप्रकरणे । अंते आनंदमयप्रकरणे ॥ **वैय्यर्थ्याच्चेति** ॥ स्वस्यापरोक्षीकृतब्रह्मत्वे
न शब्दानपेक्षणात्परस्यचापरोक्षशून्यत्वेनतंप्रतितथानिर्देशायोगादितिभावः ॥ **वस्त्रप्रावृतजानुवदिति** ॥ वस्त्रेणा
वृतस्यजानोरप्रत्यक्षत्वेपि प्रत्यक्षीभूतवस्त्रांतर्गतत्वात् यथेदंजान्वितिनिर्देशस्तथेत्यर्थः । अन्नादिशब्दानांप्रसिद्धार्थत्या-
गात्कथंचिदित्युक्तं । अर्थांतरं उपजीव्यत्वरूपं ॥ **लाक्षणिकत्वमिति** ॥ इदंशब्दस्यतदंतर्गतेलक्षणांगीकारादितिभा
वः ॥ **स्पष्टमिति** ॥ आकाशपदेनतल्लाभेपिस्फुटंतद्वाचकशब्दाभावादितिभावः । दुर्बलत्वेन स्वभावात् ॥ **सावका
शत्वादिति** ॥ विरिंचादावपिस्वारस्यसृष्टत्वादिसत्वादितिभावः ॥ ॐ **नेतरोनुपपत्तेः** ॐ ॥ विष्णवितरश्चतु-
र्मुखादिर्नान्नमयादिशब्दवाच्यः । तस्य ब्रह्मविदाप्नोतिपरमित्युक्तमोक्षहेतुज्ञानविषयत्वानुपपत्तेरित्यर्थः । इत्यादावित्या
दिपदेनैतमन्नमयमात्मानमुपसंक्रामतीत्यादिग्रहणं ॥ ॐ **भेदव्यपदेशाच्च** ॐ ॥ तेयेशतं यतोवाचमित्यादिना
परिमितापरिमितानंदत्वादिरूपाविरुद्धधर्मोक्त्या आनंदमयादेर्विरिंचादेर्भेदाभिधानाच्चनानंदमयश्चतुर्मुखादिरित्यर्थः ॥ **ते
येशतमिति** ॥ प्रजापतेः रुद्रस्य तेप्रसिद्धाःयेशतमानंदाःसतावान्ब्रह्मणश्चतुर्मुखस्यैकआनंदः । तथाविधशतानंदव-
त्वंतस्येत्यर्थः ॥ **यतोवाचइति** ॥ ब्रह्मणः आनंदंयोजानाति स कदाचननबिभेति सआनंदः किंप्रकारोज्ञातव्यइ-
त्याकांक्षायां वागाद्यगोचरतयाज्ञातव्यइत्याशयेनोक्तं ॥ **यतइति** ॥ वाचोवाक्यानि मनसासह अप्राप्य अपरिमित

SGDF
Sri Gargeshwari Digital Foundation

त्वात्साकल्येनाविषयीकृत्य आनंदान्निवर्ततइतियोजना ॥ **एवमिति** ॥ तेयेशतंदेवानामानंदाः । सएकइंद्रस्यानंदः । तेयेशतमिंद्रस्यानंदाः । सएकोब्रहस्पतेरानंदइत्यूनानंदत्वोक्तेरितिभावः । तेभ्योदक्षश्चेंद्रनामासहींदुंरापयत्पुरा । तस्माद्ब्रहस्पतिर्नाममहेंद्रत्वात्पुरंदरइतितैतरेयभाष्योक्तेरत्रेंद्रब्रहस्पतिशब्दाभ्यांक्रमेणदक्षशचीपत्योर्ग्रहणं । आत्मनः स्वामिनः अयं आत्म्यः सनेत्यनात्म्यइत्यस्यफलितोर्थः ॥ **स्वामिरहितइति** ॥ आत्मनोजीवस्येमआत्म्याः जीवसंबंधिगुणाः तेनसंतियस्येतिभावेनोक्तंजैवगुणविधुरइति । प्रतिष्ठां पूजांविंदते । पुरुषपदोपलक्षितेष्वपकृष्टजीवेषु आदित्यपदोपलक्षितेषूत्कृष्टजीवेष्वितिविवेकः ॥ **सकलस्वामित्वेनेति** ॥ यदधीनायस्यसत्तातत्तदेवेतिभण्यतइत्युक्तेरितिभावः ॥ **इदमिति** ॥ भगवान्स्वयमितरोपिसन्निदंविश्वमिवोच्यते । पुरुषएवेदमित्यादावित्यर्थः ॥ **वेदगर्भइति** ॥ आद्यः स्थिरचराणांयोवेदगर्भःसहर्षिभिरितिपूर्ववाक्यादितिभावः ॥ **आनंदादीति** ॥ कर्तृत्वात्सगुणंब्रह्मपुरुषंपुरुषर्षभं । ससंगत्यपुनःकालेकालेनेश्वरमूर्तिना । जातेगुणव्यतिकरेयथापूर्वंप्रजायतइत्युत्तरवाक्यादितिभावः ॥ **तदेतदिति** ॥ तदेतत्सत्यं । मंत्रेषुकर्माणिकवयोयान्यपश्यन्नित्यादिनोक्ताखिलकर्माराध्यत्वप्रकारेणेत्यर्थः ॥ **अंतर्यामितयेति** ॥ त्वमित्यस्यत्वदंतर्यामीत्यहमित्यस्यमदंतर्यामीत्यर्थतयेत्यर्थः । असर्वोपिसर्वात्मकत्वेन प्रतीयतइत्यत्रहेत्वाकांक्षायामंतर्यामित्वंहेतुत्वेनाभिप्रेत्यासिद्धमंतर्यामित्वमनंतर्यामित्वेनप्रतीतेरित्याशंकायांतत्परिहारार्थमात्मैवेत्याद्युक्तमितिपूर्वपूर्वत्रोत्तरत्रोक्तानांहेतुत्वादितिभावः ॥ **विशिष्टेति** ॥ विशिष्टमुत्तमंवस्त्वेकमेवेत्यर्थतयेत्यर्थः । इदमेकमेवेत्याद्यपेक्षया । तत्वमसीत्यादौ विशिष्टैक्याप्रतिपादनादितिध्येयं । अत्र विशिष्टैक्यंनप्रतीयतइत्यतआह ॥ **अत्रेति** ॥ विवक्षितार्थप्रतिपादकस्यादिपदेनोपात्तत्वादितिभावः । तर्हि बहूनामित्यत्रेवोदाहर्तव्यं किमनेनेत्यतउक्तं ॥ **पुरुषैक्यंनिराकृत्येति** ॥ मोक्ष

धर्मेहि बहवःपुरुषाब्रह्मभुताहोएकएवतु । कोह्यत्रपुरुषश्रेष्ठस्तंभवान्वक्तुमर्हसीतिजनमेजयेनपृष्टे वैशंपायनेन नैतदिछंतिपुरुषमेकंकुरुकुलोद्भवेतिपुरुषैक्यमतंनिराकृतं । कथंतर्हैकमेवाद्वितीयमित्यादौ पुरुषैक्यव्यपदेशइत्यतउक्तं । बहूनांपुरुषाणांवैयथैकायोनिरुच्यते । तथातंपुरुषंविश्वमाख्यास्यामिगुणाधिकमितिकारणत्वेनाभिमतानां बहूनांसत्वेपि द्यावाभूमीजनयन्देवएकइतिश्रुतौ यथाविशिष्टकारणस्यैकत्वादेकंकारणमित्युच्यते तथैक्यश्रुत्यर्थत्वेन तंविश्वंपूर्णगुणाधिकंपुरुषमाख्यास्यामीत्यर्थः ॥ **तस्याप्रत्यक्षत्वेनेति** ॥ ईश्वरधर्मिकेश्वरप्रतियोगिकस्यचैक्यस्येश्वराप्रत्यक्षत्वेनाप्रत्यक्षत्वादित्यर्थः । अनुमानंतु नस्वातंत्र्येणप्रवर्ततइतिभावः ॥ **श्रुत्यर्थेति** ॥ ऐक्यश्रुतेर्योर्थः स्वामित्वादिरूपः तदपरिज्ञानेनेत्यर्थः ॥ **प्राप्तिविरोधादिति** ॥ प्राप्तृप्राप्ययोर्भेदव्याप्तत्वादितिभावः ॥ **प्रमाणांतरेति** ॥ भेदश्रुतीत्यर्थः । ननु जीवस्य परब्रह्मत्वेपि न तत्प्राप्तिकथनंविरुद्धं । पूर्वमज्ञातब्रह्मत्वोजीवः स्वस्य विद्यमानंब्रह्मत्वंजानातीत्यभिप्रायेण प्राप्तिकथनोपपत्तेः यथा कश्चिद्विस्मृतस्वकंठस्थितमणिः पूर्वमेव विद्यमानकंठमणिज्ञानाल्लब्धकंठमणिरित्युच्यतइत्यतआह । ननुविस्मृतकंठमणिरिति इत्येवोच्यतेनन्वितिसंबंधः । तथाचज्ञानाभिप्राये ब्रह्मजानातीत्येवनिर्देशःस्यान्नप्राप्नोतीतिभावः । ननु परमंसाम्यमुपैतीत्यत्र यथा प्रागपिविद्यमानस्यैवसाम्यस्य प्राप्तिरुच्यते तथा प्रागपिविद्यमानस्य ब्रह्मत्वस्यप्राप्तिरुच्यतामित्यतआह ॥ **परमंसाम्यमुपैतीति** ॥ विमुक्तश्चेति । प्राङ्मुक्तएवमुक्तोभवतीत्यर्थः ॥ **तदन्यथानुपपत्तेयेति** ॥ जीवस्यपरब्रह्मत्वे खलु अबद्धेतस्मिन्बंधस्य मिथ्यात्वात्प्रागपिमुक्तव्यवहारःसंभवतीतिभावः ॥ **बंधस्याज्ञानमूलत्वेनेति** ॥ अनादिबंधस्याज्ञानाधीनत्वंचाद्वैतानांअविद्याधीनजीवब्रह्मविभागवत्तार्किकानांच गुणवत्वाधीनद्रव्यत्ववदनादेरपीश्वराधीनत्वोपपत्तेरितिसुधोक्तरीत्याध्येयं ॥ **दर्शनादिति** ॥ जपाकुसुमसन्निधिव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri Foundation

शात्स्फटिकेप्रतीयमानस्यापिलौहित्यस्य अत्राविद्यमानत्वव्यवहारदर्शनादित्यर्थः ॥ **आहेति** ॥ तत्रबंधस्यान्यथारूप मित्यस्वाभाविकत्वस्मरणादितिभावः ॥ **विमतानीति** ॥ यद्यप्यनेनजीवानांमन्योन्याभेदःसिध्यति । नब्रह्मै- क्यं तथापिविशिष्टरूपस्यैक्यायोगेनशुद्धस्यैक्येवाच्येशुद्धस्यैवब्रह्मत्वाद्ब्रह्मैक्यमपिसिध्यतीतिभावः । भाष्ये । तत्र भेदाक्तौ तदनुमानविरोधः ऐक्यानुमानविरोधइत्यर्थः ॥ ॐ **कामाच्चनानुमानापेक्षा** ॐ ॥ चोवधारणे । अदृष्टेर्थे शुष्कानुमानापेक्षानकार्या कुतः कामात् कामचारित्वादेवेत्यर्थः ॥ **पृथगिति** ॥ केवलेत्यर्थः ॥ **उक्तत्वादिति** ॥ अनेनैतदर्थमेवनचतत्वमसीत्याद्युद्ग्रंथप्रदर्शनमितिसूचितं । आअपेत्युपसर्गद्वयमित्याशये- नाह ॥ **आनेयेति** ॥ ॐ **अस्मिन्नस्यचतद्योगंशास्ति** ॐ ॥ अस्मिन्प्रकरणे अस्यजीवस्य तेन आनंदमयादिरूपेण ब्रह्मणासह योगंसंबंधं मुक्तावपि सोश्नुतइतिश्रुतिः शास्ति शंसति । यतोतऐक्यायोगान्नानंदमया- दिरितरइत्यर्थः । भेदएवेत्यत्रहेतुमाह ॥ **संबंधस्येति** ॥ **सोश्नुतइति** ॥ सब्रह्मवित् स्वयोग्यसर्वकामान् सर्वज्ञेन ब्रह्मणासहैवभुङ्क्तइत्यर्थः । भाष्ये युक्तिसमुच्चयइतिसामान्येनोक्तत्वादाह ॥ **अथवेति** ॥ तत्कथमित्यतएतत्सूत्र व्याख्यानरूपानुव्याख्यानमुदाहरति ॥ **तदुक्तमिति** ॥ यद्यस्मात् अस्य सएवंविदित्युक्तस्य ब्रह्मविदः फलत्वेना न्नमयादिभिर्योगं तत्प्राप्तिस्थानद्वये एतमन्नमयमात्मानमुपसंक्रामतीत्यादौ एवमन्नमयमात्मानमुपसंक्रम्येत्यादौचानु वाकद्वये शंसति कथयति श्रुतिरतएतेन्नमयादयः कोशाइति व्याख्यानमतिसाहसं पूर्वोत्तरापरामर्शमूलमित्यर्थः । आद्यव्याख्यानंतु मुक्तेशभेदसमर्थनाय सोश्नुतइतिश्रुत्युदाहरणंतत्स्वारस्यानुरोधेनेति ॥ ६ ॥ ॥ **नामसमन्वयसि ध्यर्थमिति** ॥ अतएवतत्पादांतर्भावइतिभावः । श्रुतेः स्वभावतःप्राबल्याल्लिंगस्यापिवक्ष्यमाणरीत्यानिरवकाशत्वेनश्रु

SGDF Sri Gargeshwari Digital Foundation

तितःप्राबल्यादन्यतरनिर्णयएवस्यान्नसंदेहइत्यतउक्तं ॥ **प्राबल्याद्यविवेकेनेति** ॥ ईशेईष्टास्वामीयः तंनविजानंती त्यन्वयः । अदृश्यत्वाद्यभिधायिपदंनास्तीत्यतआह ॥ **सहैवेति** ॥ स्वैःसहैवेत्यर्थः ॥ **सूर्यलिंगादिति** ॥ एकचक्ररथंप्रति सप्तनामाऽश्वःसंबध्यतइति सप्ताश्ववत्वैकचक्ररथित्वरूपादित्यर्थः ॥ **वरुणलिंगादिति** ॥ जलनियामकत्वरूपादित्यर्थः ॥ **त्वष्टारमिति** ॥ रूपाणिविविधतयाकुर्वंतंत्वष्टारंनिचिक्युरित्यन्वयः ॥ **ब्रह्मेंद्रमित्यादिरिति** ॥ ब्रह्मेंद्रमग्निंजगतःप्रतिष्ठांदिवआत्मानंसवितारंबृहस्पतिमित्यादीत्यर्थः । अत्रदिवआत्मत्वं वायुलिंगं ॥ योगेनैतेषांविष्णुपरत्वमित्यतआह ॥ **नचेति** ॥ तेषामित्यादि । तथाच योगरूढिभ्यांयोगमात्रस्यबाधइतिभावः । प्रथक् स्वातंत्रेण ॥ ॐ **अंतस्तद्धर्मोपदेशात्** ॥ अंतःप्रविष्टमित्यादौ अंतःप्रविष्टतया श्रुतंब्रह्मैव । तस्यब्रह्मणोधर्माणांसमुद्रस्थत्वब्रह्मांडवीर्यत्वादीनां अंतःश्रुतेरंतःसमुद्रे यस्यांडकोशमित्यादिनाभिधानादित्यर्थः । होतारं हुदानादानयोरिति धातोः । बहुवचनंघटयति ॥ **भूतेति** ॥ नचात्रसमुद्रस्थत्वंनाम क्षीरसमुद्रशायित्वंवा प्रलयसमुद्रशायित्वंवा । नाद्यः । आपोनाराइतिप्रमाणोदाहरणासगंतेः । नद्वितीयः । सहिक्षीरसमुद्रशायीतिप्रतिज्ञासंगतेरित्यतआह ॥ **अत्रेति** ॥ भाष्ये अभिध्याय ध्यात्वा । अहमित्यस्यार्थः अहेयमिति । नञुपपदादोहाक्त्यागइत्यस्मात्कर्मणिडप्रत्ययइतिभावः । रश्मीनिंधयतिदीपयतीतिरश्मीत् । तत्फलितप्रदर्शनंरश्मिप्रेरकमिति ॥ ॐ **भेदव्यपदेशाच्चान्यः** ॥ तच्चशब्दार्थोविष्णुर्नकेवलमंतःश्रुतःकिंत्विंद्रादिभ्योन्यश्च । इंद्रस्यात्मेत्यादिनांतर्यामित्वोक्त्या तेभ्योभेदाभिधानादित्यर्थः । सावकाशत्वात् । परमैश्वर्यादितिवक्ष्यमाणरीत्या ॥ **विद्वद्बूढेरिति** ॥ इंद्रंमित्रंवरुणमग्निमाहुरितिप्रयोगबाहुल्यश्रवणादितिभावः । किमु महायोगसहितायाइत्येवशब्दः । महायोगोद्विविधः । प्रवृत्तिनिमित्तपौष्कल्यवत्त्वं अन्य-

PDF
Sri Gargeshwari Digital Foundation

प्रवृत्तिनियामकत्वंच । तत्राद्यमुक्तं । द्वितीयमाह ॥ **अन्यगतेति** ॥ सर्वहृदयेष्वितिशेषोक्तिः । अत्र श्रुतौ । तथाच-भेदव्यपदेशोसिद्धइतिभावः ॥ **औपचारिकत्वेति** ॥ षष्ठ्यर्थसंबंधस्यभेदव्याप्तत्वेन तदभावे घटस्यस्वरूपमित्यादिवदिंद्रस्येत्यादिषष्ठ्यर्थस्यचोपचारिकत्वप्रसंगादित्यर्थः । इंद्रादिनामसमन्वयसिध्यर्थमितिप्रागुक्तमुपपादयितुंस्मारयति ॥ **अत्रेति** ॥ नन्विंद्रनामसमन्वयकथने तत्प्रकरणपठितसर्वनामसमन्वयःसिध्यतीतिकिमनेनेत्यतआह ॥ **नाम-निर्णयेनेति** ॥ **संगतत्वादिति** ॥ अंतस्थस्यविष्णुत्वेतद्गतत्वेनश्रुतादृश्यत्वस्यान्यनिष्ठत्वेन तद्युक्तानंदमयोपि अन्यइतिपूर्वोक्तरीत्यासंगतत्वादितिभावः । अत्रविशेषोभावबोधेबोध्यः ॥ **अधिदैवेति** ॥ देवाधिकाराख्यग्रंथप्रतिपाद्यदेवेत्यर्थः । यथोक्तं । अधिदैवतं। देवाधिकारगंसर्वमिति ॥ ७ ॥ **अस्यलोकस्येति** ॥ अस्यलोकस्य पृथिव्यभिमानिनोब्रह्मणः कागतिरितिशालावत्येनपृष्टे आदीप्तत्वादाकाशनामकोविष्णुरितिहोवाचप्रवाहणः । कथमेतस्यपृथिव्यभिमानिब्रह्मणोगतित्वमित्यतस्तस्यमाहात्म्यमाह ॥ **सर्वाणीति** ॥ सर्वाणि इमानि प्रमाणप्रसिद्धानिभूतानि ब्रह्मरुद्रादीनि आकाशादेवसमुत्पद्यंते हवाइत्यस्यार्थस्यवैदिकप्रसिद्धिमाह । आकाशंप्रति अस्तं अदर्शनंयांति यत्रैव प्रलयेमुक्तौच लीनाभवंति कुतः हियस्मादाकाशएवैभ्योब्रह्मरुद्रादिभूतेभ्योज्यायान् तदपिकुतः आकाशःपरायणं उत्तमाश्रयः। नैतस्मादप्युत्तमंवस्त्वाशंक्यमित्याशयेनाह ॥ **सइति** ॥ सएषआकाशनामाभगवान् परोवरीयान् सर्वोत्तमः उद्गीथः उच्चैर्देवैर्गीथः सएषोनंतः देशतः कालतः गुणतश्चपरिछेदशून्यत्वादनंतनामकइत्यर्थः ॥ **आकाशस्येति** ॥ तथाचतत्स्वभावभूतप्रवृत्तिनिमित्तस्यापिभगवदधीनत्वमितिभावः । अवकाशे अव्याकृताकाशे ॥ **अनेनैव** ॥ आकाशस्येत्यादिभाष्येणैव कथमित्यतआह ॥ **रूढेरिति** ॥ तस्यापि आनंदमयप्रयुक्ताकाशशब्दस्यापि ॥ ॐ **आकाशस्तल्लिंगात्** ॥ आकाशइतिहोवाचेत्याकाशशब्दवाच्योविष्णुरेव सएषपरोवरीयान्सएषोनंतइत्यादिना आकाशेश्रुतपरोवरीयस्त्वानंतत्वादिविष्णुलिंगादित्यर्थः । परोवरीयव्याख्यानरूपां छांदोग्यभाष्योदाहृतांस्मृतिमुदाहरति ॥ **परस्मादिति** ॥ परशब्दितभारत्युत्तमोब्रह्मा परोइत्युच्यते उशब्दस्योत्तमार्थकत्वात्तदुमारमापरोवरमिति तदुत्तमोहरिःपारोवरीयकइतिछांदोग्यभाष्योदाहृतस्मृत्यर्थः । उच्चत्वेन उत्तमत्वेन ॥ **सएवेति** ॥ निर्वचनत्वात्तकारस्यथकारइतिभावः । योपिसोपिनप्रवक्तीत्यर्थः ॥ **अनंतत्वमुच्यतइति** ॥ गुणतोनंतत्वस्याप्यनंतशब्दार्थत्वादितिभावः ॥ **सर्वोत्तमत्वमिति** ॥ मात्रशब्देनपरिमितसर्वजगद्ग्रहणादितिभावः । स्मर्यतेभविष्यत्पर्वणि ॥ **महायोगेपि** ॥ सर्वभूतगुणैर्युक्तंदेवत्वंज्ञातुमर्हसीत्युक्तेः । पुरुषादाकाशः यावान्वाअयमाकाशः आकाशोवैनामेति वैदिकप्रयोगबाहुल्याच्चेतिभावः ॥ **नभइति** ॥ अदोनभः यस्य हरेःप्रेरणाच्छासंकुर्वतांमार्गंददातीतितृतीयस्कंधवाक्यार्थः ॥ **विष्णावेवेति** ॥ सर्वाणिहवेतिभूतकारणत्वमाकाशस्योच्यते । तच्चाकाशपदेनविष्णोरेवग्रहणेसंभवति । आत्मनआकाशःसंभूतइत्यादिना विष्णोरेवसर्वभूतकारणत्वेनप्रमितत्वात् । भूताकाशस्यतुस्वव्यतिरिक्तभूतकारणत्वेनतद्ग्रहणे सर्वशब्दस्यसंकोचःकार्यइतिभावः । इदमभ्युपेत्योक्तं । उक्तरीत्याभूतशब्दस्यब्रह्मादिपरत्वात् । उशब्देस्यात्तमार्थत्वात् ॥ **आधिभौतिकेति** ॥ महाभूताधिकाराख्यग्रंथप्रतिपाद्यंदेहाद्याद्यप्रकृत्यंतंजडमधिभूतंतद्गतेत्यर्थः । यथोक्तंमहाभूताधिकारगं । तत्कारणंतथाकार्यमधिभूतंतदंतिकादिति ॥ ८ ॥ **अन्यत्राप्येवमिति** ॥ **अत्रादाविति** ॥ व्याख्येयसूत्रमेवादौपठ्यं अन्यथासंगत्याकांक्षानुदयात् । पश्चाद्विषयादिकंवाच्यमितिसूचयितुमित्यर्थः । क्वचित्संगत्यादिपूर्वकतत्पाठस्तुश्रोतृबुद्धिसौकर्यायेतिभावः ॥ ॐ **अतएवप्राणः** ॥ तद्वैत्वंप्राणइत्युक्तप्राणोविष्णुरेव । श्रीश्चतेलक्ष्मीश्चपत्न्याविति निरवकाशश्रीलक्ष्मीपतित्व-

SGDF Foundation

लिंगादेवेत्यर्थः । लिंगनिरवकाशत्वमेवकारार्थः । यत्तच्छब्दयोरावृत्तिमत्वाश्रुत्यर्थमाह ॥ **यस्मादिति** ॥ अभवइत्यतीतार्थकलङ्घटनायकरिष्यमाणइत्येतदुपलक्षणमित्याशयेनाह ॥ **कुर्वाणोऽकार्षीश्चेति** ॥ हेतुहेतुमद्भावं व्यनक्ति ॥ **स्वस्येति** ॥ इंद्रियाभिमानिदेवानांदशत्वादाह ॥ **पायुगुह्यैक्यंनेति** ॥ ऐक्यविवक्षयेत्यर्थः । द्वितीयाध्यायभाष्योदात्तस्मृतिमुदाहरति ॥ **यत्प्राप्तिरिति** ॥ यथाक्रममन्वयः ॥ **सुतरामिति** ॥ स्वभावतएवबाधेनिरवकाशत्वादिनाकिम्वितिभावः । वायुरेवेत्यवधारणानुपपत्तिमाशंक्याह ॥ **प्राणशब्दस्येति** ॥ चेष्टायांवाह्यवायौचमुख्यवायौचगीयते ॥ प्राणशब्दस्त्रिषुह्येषुमुख्येमुख्यःप्रकीर्तितइतिद्वितीयाध्यायभाष्योदाहृतःस्मृतिः ॥ **श्रीलक्ष्मीति** ॥ यद्यपिह्रीश्चतइतितैतरयाः पठंति तथापिशाखांतरमप्यत्रोदाहर्तव्यमित्याशयेनशाखांतरस्थवाक्यमत्रोदाहृतमितिध्येयं । रमारूपविशेषयोःस्थानविशेषाकांक्षायामाह ॥ **वक्ष्यस्थलाश्रिताश्रीरिति** ॥ लक्ष्म्यास्त्वंकगतत्वंप्रसिद्धमितिभावः । ननुकथंमयंनिर्णयः । नचवाच्यंतस्याःश्रियःसजगतोजनकोजनन्यावक्षोधिवासमकरोत्परमंविभूतेः । श्रीःस्वाप्रजाःस्वकरुणेननिरीक्षणेनयत्रस्थितैधयतिसाधिपतींस्त्रिलोकानितिभागवतवचनेननिर्णयइति । नकेवलमेकगायाःश्रियोऽहमितिभगत्पादैःश्रियोंकगतत्वोक्तेः । नापिश्रयतेवक्षस्थलमितिश्रीरितितन्निर्वचनेनतन्निर्णयः । श्रयतेंकमित्यपिसंभवात् वक्षसिलक्षणभूतालक्ष्मीरितितत्वप्रदीपोक्तनिर्वचनानुसारेणवैपरीत्यसंभवाच्च तस्मात्कथंश्रियोवक्षस्थलाश्रितत्वनिर्णयइत्यतआह ॥ **इतिसंप्रदायविदइति** ॥ तथाचसंप्रदायएवात्रनिर्णायकप्रमाणमित्युक्तंभवति । अतएवश्रीवत्सइत्येवभगवल्लिंगस्यनामनलक्ष्मीवत्सइति । व्यामिश्रोक्तिस्तु लक्ष्मीःपद्मालयापद्माकमलाश्रीर्हरिप्रियेतिश्रीलक्ष्मीशब्दयोःपर्यायत्वाद्युक्ता । स्मरणीयमुरोविष्णोरिंदिरावासमित्यादिवत् । यात्वंकश्रिताश्रीःवक्षसिलक्षणभूतालक्ष्मीरितिनिरुक्तिः

SGDF Sri Gurgeshwari Digital Foundation

सारूपविशेषयोरभेदाभिप्रायेणवस्तुस्थितिकथनायनस्थाननियमाभिप्रायेणेत्यर्थः । एतेनैवस्वोक्तार्थेभगवद्वाक्यरूपाग-
ममनभिधायसंप्रदायोक्तौकिंबीजं । नचतयोरभेदएवेतिवाच्यं । आगमोग्रंथनिबंधनंवाक्यं । संप्रदायस्तूपदेशपरंपरामा
त्रमिति भेदइतिप्रमेयदीपिकोक्तेरितिनिरस्तं । उक्तरीत्याभगवद्वाक्यस्यस्वोक्तार्थानिर्णायकत्वशंकानिरासायसंप्रदाय
ग्रहणादिति ॥ **महायोगस्यचेति** ॥ प्राणशब्दप्रवृत्तिनिमित्तजीवनप्रदत्वस्यतत्रैवनिरवधिकत्वादितिभावः ॥ **नप्रा
णेनेति** ॥ कश्चनमर्त्योजीवः प्राणादिनानजीवति किंतुयस्मिन्हरावेतौप्राणापानावुपाश्रितौ तेनेतरेणहरिणासर्वेजीव-
यंतीत्यर्थः ॥ **आध्यात्मिकेति** ॥ आत्माधिकाराख्यग्रंथप्रतिपाद्यमत्यंतात्माभिमानविषयांतःकरणादिदेहपर्यंतमध्या
त्मंतद्गतेत्यर्थः । यथोक्तं । अत्माभिमानाधिकारस्थितमध्यात्ममुच्यते । देहाद्बाह्यंविनातीवबाह्यत्वादिति ॥ ९ ॥
ननुगुहानिहितत्वंमंत्रवर्णेश्रूयते नत्वानंदमयप्रकरणे । अतःकथंतदानंदमयनिष्ठतयोच्यतइत्यतः प्रागुक्तंस्मारयति ॥ **मं
त्रवर्णेति** ॥ पततः चरतः वीदमित्यत्रकंपार्थोत्यंतमिति । दूरइत्यस्यार्थोअतीवेति । आङर्थोव्याप्तिति । दूरआधीत्य-
स्यैकपदत्वेपिदुखंडदर्शनाद्दूरइत्येतत्पृथक्कृतस्यपूर्वत्रान्वयकरणमुपपन्नं । नुशब्दार्थइदानीमिति । प्रकरणमात्रस्यलिंगतो
दौर्बल्येपि श्रुतिसहितस्यप्राबल्यंसंभवतीत्याशयेनाह ॥ **ज्योतिःश्रुतेरिति** ॥ यावता येनप्रकारेण ॥ **ॐ ज्यो
तिश्चरणाभिधानात् ॐ** ॥ ज्योतिर्हृदयइत्युक्तंज्योतिर्ब्रह्मैव । विमेकर्णेत्यादिनाकरणादीनांविरुद्धचरणोक्तेः ।
कर्णादिसर्वेंद्रियदूरत्वलिंगादित्यर्थः । वैय्यधिकरण्यनिरासायकर्णादिविदूरइत्युत्तरभाष्यानुरोधेनाह ॥ **कर्णादिवि-
दूरत्वेति** ॥ अत्र कर्णादिविदूरत्वंनाम इयदितिपरिछेदरहितत्वैभवत्वंबोध्यं । मापयति ज्ञापयति ॥ **महायोगेति** ॥
निरवधिकप्रकाशवत्वात् अग्न्यादिनिष्ठप्रकाशनियामकत्वात् । ज्योतिषांज्योतिः । नारायणपरोज्योतिः । विष्णुरेव-

PDF
Sri Gargeshwari Digital Foundation

ज्योतिरित्यादिवैदिकप्रयोगबाहुल्याच्चेतिभावः ॥ **निरवकाशलिंगेनेति** ॥ अग्निर्वैदेवानामवमइत्यवमतया भीषा स्मादग्निस्तपतीतिसभयतया परिह्वेनंम्रियंतेविद्युद्वृष्टिश्चंद्रमाआदित्योग्निरितिमरणादिमत्तयाचश्रुतस्याग्नेरपरिच्छिन्न-वैभवासंभवादितिभावः ॥ १० ॥ ॐ **छंदोभिधानान्नेतिचेन्नतथाचेतोर्पणनिगदात्तथाहिदर्शनं** ॐ ॥ गायत्रीवेत्युक्तगायत्रीछंदोविशेषएवस्यात् । गायत्रीपदेनछंदसोभिधानात् तस्मान्नतद्ब्रह्मेतिचेन्न । किंतुब्रह्मैवगायत्री कुतः हियस्मात्तथादर्शनं गानत्राणकर्तृत्वलिंगबोधकगायतित्रायतिचेतिश्रुतिरस्ति तस्मादित्यर्थः । विष्ण्वादिप्रसिद्धप दानिविहायाप्रसिद्धगायत्रीपदेनतन्निर्देशेकिंनिमित्तमित्यतउक्तं ॥ **तथेति** ॥ तथागानादिकर्तृत्वगुणविशिष्टतया चेत सि अंतःकरणे अर्पणार्थं ध्यानार्थं उपासनार्थमितियावत् । निगदात् गायत्रीवाइदंसर्वमितिकथनादित्यर्थः ॥ **अथे ति** ॥ अथद्वारपोपास्तिकथनानंतरंपुनर्भगवन्माहात्म्यमुच्यते । यच्छ्वेतद्वीपानंतासनवैकुंठगतमूर्तित्रयंतत् । अतः बुद्धि स्थतयाविवक्षितायादिवःपरः । ज्योतिः तेजोमयं विश्वतः मेरुवैजयंतसत्यलोकाख्यब्रह्मसदनेभ्यः पृष्ठेषु क्रमेणोच्चेषु सर्वतः भूर्भुवःस्वरात्मकसर्वलोकेभ्यः पृष्ठेषु अनुत्तमेषु नविद्यतउत्तमोलोकोयेभ्यस्तेषु स्वयमेवोत्तमेषु अनंतासनश्वेतद्वी पवैकुंठेषु दीप्यते प्रकाशते तत्सर्वलोकेषुदीप्यमानंतेजः इदंवाव इदंखलु इदंकिं यदिदमस्मिन्नंतःपुरुषे पुरुषहृदये ज्यो-तिरस्तितदित्यर्थः ॥ **गायत्रीवेति** ॥ अत्रभगवतःषड्विधरूपेषुगायत्रीनामकंस्त्रीरूपंहयशीर्षकंप्रथमरूपापेक्षयाद्वितीयं रूपमुच्यते । यदिदंकिंच भूवहौबहुपूर्णतायामित्युक्तेः भूतंपूर्णमत्स्यादिसर्वांतस्थितंच तदिदंसर्वंगायत्रीनामाभगवानेव । एवंचभूतशब्दाभिधेयंमत्स्यादिसर्वांतस्थितंद्वितीयंरूपमित्युक्तंभवति । अस्यैवतृतीयंरूपमाह ॥ **वागिति** ॥ गायत्री नामाभगवान्वाग्वैव वाक्संस्थोवचनाद्वाङ्नामास्त्रीरूपोहयशीर्षाख्यएव । नतुत द्भिन्नइत्यर्थः । वाङ्नामकस्य भगव

द्रूपत्वंकुतइत्यतस्तल्लक्षणयोगादित्यतआह ॥ **वाग्वेति** ॥ इदं सर्वंप्राणिजातं वाग्वै वाङ्नामकभगवदधीनमेव वाचा-हिप्रवर्ततेनिवर्ततेचलोकः । सर्वलोकप्रवर्तकत्वंचभगवल्लक्षणंचप्रसिद्धमेवेति ॥ **छंदोविशेषइति** ॥ गायत्रीछंदोपेतमं-त्रविशेषइत्यर्थः ॥ **वाग्विधानाच्चेति** ॥ नह्यशब्दात्मकस्यतत्संभवतीतिभावः । तेजः कांतिः । ब्रह्मवर्चसं अध्ययन लब्धकांतिविशेषः । तदुभयसाधनंगायत्रीत्यर्थः ॥ **योगस्येति** ॥ गायतिवेदान्त्रायतिचाध्यापकान्पापेभ्यइतिनिर्व चनादितिभावः । नित्यस्येति । अनादिनित्यस्येत्यर्थः । अन्यथोत्पत्तावीश्वराधीनत्वापरिहारात् । अतएवन्यायविवर णटीकायां वेदस्यनित्यत्वेनानादित्वादित्युक्तं । वेदस्यनित्यत्वादनादित्वाच्चेतिसुधाग्रंथाच्च । यद्यपि कृतकक्रमविशिष्टस्य वर्णात्मकस्यवेदस्यनानादित्वं । तथापीश्वरबुद्धिघटितस्यतथात्वेनवाकृत्वाचिंतयावातदुक्तिरित्यदोषः । स्वपदानि स्वो-क्तपदानि । सूत्रार्थोवर्ण्यतेयत्रपदैःसूत्रानुकारिभिः । स्वपदानिचवर्ण्यंतेभाष्यंभाष्यविदोविदुरुक्तेरित्युरितिभावः । गा-यत्र्यादीति । गायत्र्यादिशब्दार्थोगानत्राणकर्तृत्वादिः सएवगुणः तत्स्वरूपत्वेनेत्यर्थः । आदिपदेनवाचोग्रहणमिति । वा ग्वैगायत्रीतिश्रुतौ वाक्शब्दार्थगुणवत्तया उपासनार्थं विष्णुर्वागित्युक्तं । तथाचवाक्त्वविधानंनविष्णुत्वपक्षेबाधकमितिभा वः ॥ **एतन्न्यायस्येति** ॥ तत्तच्छब्दसमन्वयकथनं तदर्थगुणस्वरूपत्वेनोपासनार्थमितिन्यायस्येत्यर्थः ॥ **यावैसेति** ॥ चतुर्थरूपमनेनोच्यते । यावैगायत्रीतत्संस्थतन्नामाभगवान् साइयंवावइयंखलुइयंकेत्यपेक्षायामाह ॥ **येयमिति** ॥ पृथु त्वात्पृथिवीनामापृथिवीसंस्थोभगवानित्यर्थः । तथाचात्र यावैसेत्यादिना गायत्र्याः पृथिव्यभेदमुक्त्वा अस्यांहीदंसर्वंप्रति ष्ठितमितिपृथिव्याःसर्वाधारत्वंमुक्तं । तच्चविष्णोरेवगायत्रीपथिव्यादिशब्दार्थत्वेयुक्तंनान्यथेतिभावः॥ **श्रुत्युक्तेति** ॥ गाय तीतिश्रुत्युक्तेत्यर्थः। कर्माणिपुण्यपापानि । क्रिया चेष्टा। स्मृतिविशेषोदाहरणप्रयोजनमाह ॥ **अत्रेति** ॥ ॐ**भूतादिपाद**

SGDF Sri Gargeshwari Digital Foundation

व्यपदेशोपपत्तेश्चैवं ॐ॥ एवंगायत्रीब्रह्मैव। पादोस्यसर्वाभूतानित्रिपादस्यामृतंदिवीतिगायत्रीधर्मतयाव्यपदिष्टजीवामृ
ताख्यरूपत्र्यंशकत्वस्यतस्मिन्नेवोपपत्तेरित्यर्थः॥ सैषेति॥ सैषाषड्विधागायत्रीभूतवाक्पृथिवीशरीरहृदयभेदेनषड्रूपगाय
त्रीचतुष्पदाभूतमुर्तित्रयाख्यांशवतीत्यर्थः। व्यपादिश्य विहित्वा तत्रैवचतुष्पादत्वएव॥ तदेतादिति॥ तदेतद्भगवतःचतुष्पा
दत्वं ऋचामंत्रांतरेणअभिकथमेतदितिशंकामभितदुत्तरत्वेनेतियावत्। आनुकूल्येनोक्तमित्यर्थः। ज्यायान् अधिकमहिमा।
भूतानि जीवाः। पादत्रयं नारायणवासुदेववैकुंठाख्यं। दिवि अनंतासनश्वेतद्वीपवैकुंठेषु। पादत्रयस्येवभूतानामपिस्व-
रूपांशत्वमुच्यतइतिभ्रांतःशंकते॥ नन्विति॥ भिन्नंचेत्यंतग्रहणाय सुवर्णमित्यादीत्यादिशब्दः भाष्यमाकांक्षाक्रमेण
योजयति॥ नायमिति॥ विश्वचतुष्टयसमइति॥ विश्वबलचतुष्टयसामर्थ्यवानित्यर्थः। साकला। उत्तरभा-
ष्यसंगमयितुमाह॥ नकेवलमिति॥ तदभावात् यज्ञश्रुत्यभावात्। अध्याहारेगौरवात्प्रकारांतरमाह॥ पुरुषसूक्तेति॥
पृथक् भूतादिपादत्वापेक्षया॥ ॐ उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात् ॐ॥ गायत्रीज्योतिषोद्युस्थ
लदिवःपरत्वविरुद्धधर्मोपदेशात्तद्द्वयंब्रह्माख्यैकंवस्त्वनुपपन्नमितिचेन्न। विवक्षाभेदेनोभयथोपदेशोपपत्त्याविरोधाभा-
वादित्यर्थः। प्रसंगयोः प्रकरणयोः। विरोधादिति॥ द्युस्थत्वदिवःपरत्वयोरेकत्रविरोधादित्यर्थः। सप्तमीपंच
म्योः तद्घटितवाक्ययोः लोकत्रयविवक्षायांपरतोलक्षयोजनात्। सर्वद्यौरितिविज्ञेयंततस्तेदिविसंस्थिताः। दिवःपरश्च
भगवान्सप्तलोकविवक्षयेति प्रमाणानुसारेणाह॥ भूरिति॥ अंतरिक्षस्यद्युत्वलाभायलक्षयोजनोक्तिः॥ सप्ते
ति॥ भूः भुवः स्वःमहः जनः तपः सत्यमितिसप्तेत्यर्थः। पृथिव्यांद्यौर्महामेरुराकाशेसूर्यमंडलं। दिवींद्रसदनंचैवतत्परेतुदि
वःपरइतिप्रमाणानुसारेणाह॥ इंद्रसदनस्येत्यादि॥ अत्रत्रिलोकविवक्षायामपिमेर्वादिपरत्वंनादिवःपरत्वसिद्धावापे वैकुं

SGDF
Sri Gargeshwari Digital Foundation

ठस्यदिवःपरत्वसिद्धयेसप्तलोकविवक्षोक्तिः । विशेषस्तुचंद्रिकाभावबोधयोर्द्रष्टव्यः । पौनरुक्त्यवारणायसर्वतःपृष्टविश्वतः पृष्टशब्दौव्याचष्टे ॥ एवमिति ॥ पृथिवीस्थेषुसर्वोच्चोलोकोनंतासनात्मकः । अंतरिक्षात्मकेभ्यश्चश्वेतद्वीपस्थितोहरिः। द्यात्मकेभ्यश्चसर्वेभ्योवैकुंठश्चोच्चउच्चतइतिउक्तेरितिभावः । पृथिव्यांब्रह्मणोमेरौजयंतंत्वंतरिक्षगं । तृतीयंसत्यलोकंच-सदनंत्रिविधंस्मृतं । तेभ्योनंतासनाद्यायत्परतो विश्वतःपरइतिप्रमाणानुसारेणाह ॥ तथेति ॥ ११ ॥ तावाएताइति ॥ ताएताःश्रियःशीर्षंशिरः श्रिताः आश्रिताः कास्ताःश्रियइत्यतउक्तं चक्षुरित्यादि ॥ प्राचीनप्राणइति ॥ ननुश्रीपति-त्वादिनातत्रत्यप्राणस्यविष्णुत्वाक्तथमेतदितिचेत् । अत्रत्यलिंगानांवक्ष्यमाणरीत्याबलवत्वेनतद्विरुद्धश्रीपतित्वादीनांमन्य-थायोज्यत्वान्नतैर्विष्णुत्वनिश्चयइतिभावः । पूर्वोक्तन्यायः महायोगविद्वद्रूढिसत्वात्प्राणशब्दोविष्णुवाचकइतिन्यायः । वा य्वादिरेवेत्यादिशब्देनेंद्रजीवयोर्ग्रहणं ॥ नचैतदिति ॥ सर्वोत्तमस्यचक्षुरादिभिःसहपाठायोगादितिभावः ॥ उपपद्य तेचेति ॥ मुख्यप्राणस्येंद्रियस्वामित्वादिंद्रस्यहस्तेंद्रियाधिष्ठितत्वात्जीवस्येंद्रियफलभोक्तृत्वादितिभावः ॥ ॐ प्रा णस्तथानुगमात् ॐ ॥ यथातद्वैत्वंप्राणइत्ययंप्राणोविष्णुः तथैतरेयेश्रुतःप्राणोपिविष्णुरेव । ब्रह्मशब्ददेवोपास्यत्व-देवोपदेशत्वादितच्छ्रुतिलिंगानामस्मिन्प्रकरणेऽनुगमादनुवृत्तेरभ्यासादित्यर्थः । नीतवंतः उपदिदिशुरितियावत् । सएषभग-वानदैत्यनिरसनादसुनामासएषः प्रकृष्टानंदत्वात्प्राणः सतांज्ञानैश्वर्यादिभूतिदातृत्वाद्भूतिः असतामज्ञानाद्यनैश्वर्यदातृ त्वादभूतिः तंभगवंतंदेवाभूतित्वेनोपासनांचक्रिरइत्यर्थः ॥ तावाइति ॥ ऋगादयःसर्वेप्राणेपरमात्मविषयैकैवव्याहृतिर्व्या हरणं । एकमेवनाम निर्दोषगुणपूर्तिवाचित्वादेकप्रकारत्वं ऋचःविशेषेणप्राणपराइतिविजानीयादित्यैतरेयभाष्योक्तादिशा र्थः। टीकाकारास्तु । प्राणएवेत्यत्रप्राणशब्दस्यप्रथमांतत्वमंगीकृत्ययास्ताएताःसर्वाऋचःतासामेकैवव्याहृतिः एकमेवव्या

SGDF
Sri Gargeshwari Digital Foundation

हरणं तच्चप्रतिपाद्यंप्राणएव किंचयेसर्वेवेदाः । तेषामपीश्वरएवप्रतिपाद्यःकिमुऋचां अपिच येसमुद्रादिघोषाः तेषामपीश्वरएवप्रतिपाद्यःकिमुवेदानां । ऋचस्तुविशेषेणप्राणप्रतिपादकाइति । जानीयादितिज्योतिरूपक्रमादित्युत्तरव्याकरिष्यंति ॥ अथदेवरथइति ॥ देवाधीनोदेहाख्यरथउच्यते । तस्यदेवरथस्यवाकृतदभिमानीउमाउद्धिःउद्धारणरज्जुः । श्रोत्रे तदभिमानिचंद्रतद्धार्ये पक्षसीपार्श्वनियुक्ताश्वौ । चक्षुषीतदभिमानिसूर्यतद्धार्ये युक्ते अग्रतोनियुक्ताश्वौ मनःमनोभिमानीरुद्रःसंगृहीता रथयंता प्राणस्तादृशंरथमधितिष्ठतीत्यर्थः । रथप्राणशब्दयोः पुंल्लिगत्वात्तदितिपरामर्शानुपपत्तिरित्यतआह ॥ सचासाविति ॥ आहुः बह्मतर्के । तयोःबहुत्वस्वभावाभ्यांबलवतोर्मध्ये कोयंस्वभावइत्यतउक्तं ॥ उपजीव्येति ॥ सःस्वभावउपजीव्यत्वनिरवकाशत्वादिरूपइत्यर्थः। अनन्यथासिद्धतां निरवकाशत्वं अभ्युपेत्यपूर्वपक्षलिंगस्य निरवकाशत्वं ॥ अंतर्यामीति ॥ वाग्वादीनामिंद्रियैःसहगणितत्वेतदंतर्यामिणोपि तैःसहगणितत्वमितिभावः ॥ प्रकारद्वयेन ॥ एकत्वसावकाशत्वाभ्यां ॥ ॐ नवक्तुरात्मोपदेशादितिचेदध्यात्मसंबंधभूमाह्यस्मिन् ॐ ॥ ब्रहतीसहस्रंवक्तुःविश्वामित्रस्यतंप्रतीतियावत् । प्राणोवा अहमस्मिऋषइतींद्रेणस्वात्मनएवप्राणतयाअभिधानान्नप्राणोब्रह्मेतिचेन्न अस्मिन्निंद्रे अधिकात्मनःपरमात्मनः संबंधभूमा संबंधबाहुल्यंहियस्मादस्ति अतस्तदपेक्षयाप्राणोवाअहमस्मिऋषइत्युक्तिर्नस्वात्मापेक्षयेत्यर्थः ॥ तमिंद्रइति ॥ विश्वामित्रोक्तब्रहतीसहस्रंश्रुत्वातुष्टइंद्रोविश्वामित्रंप्रत्युवाच हेऋषे मेधामग्रहंप्रत्यागाः । आगछ तेप्रियंवरंददामि । त्वांत्वदंतर्यामिणं मयिस्थितःप्राणःप्रकृष्टचेष्टकत्वात्प्राणइति । अहेयत्वादहमिति । असनाभिरसनान्मिनुतेर्ज्ञानाच्चास्मीतिचनामवानित्यर्थः। बृहतीसहस्रंबृहतीछंदोपेतऋक्सहस्रं महाव्रताख्योयज्ञः ॥ नचेति ॥ त्वामेवजानीयामितिपूर्ववाक्यविरोधादितिभावः॥ प्राणस्त्वमिति ॥ प्राणस्त्वयिसर्वभूतेष्वपिवर्ततइत्यर्थः।

आत्मशब्दस्यदेहपरत्वमुपेत्यव्याख्यायजीवपरत्वमुपेत्यप्रकारांतरमाह ॥ अथवेति ॥ ज्ञातपूर्वेंद्रेति ॥ अन्यथात्वामित्यनुवादानुपपत्तिरितिभावः। सामान्यज्ञानेपिविशेषांजिज्ञासयाप्रश्नःसंभवतीत्यतआह ॥ संभवेवेति । असंगतिरिति ॥ तेनस्वस्वरूपादेरपृष्टत्वादितिभावः ॥ ॐ शास्त्रदृष्ट्यातूपदेशोवामदेववत् ॐ ॥ तुरेव । शास्तीतिशास्त्रमंतर्यामीतद्दृष्ट्यातदपेक्षयैवाहमित्युपदेशः । नतादात्म्येन वामदेववत् वामदेवोपदेशवत् । यथावामदेवोप्यंतर्याम्यपेक्षयाअहमनुरभवंसूर्यइत्याह तद्वदित्यर्थः । भाष्ये सम्यङ्निर्दोषमात्मानंवेत्तीतिसंवित् । शास्त्रमंतर्यामी पद्यत्इतिपदं उत्तमं प्राप्तव्योत्तममितिप्रथमभागवतार्थः । साक्षात् विशिष्टयोरेवलक्षणया । विशिष्टांशत्यागेनचिन्मात्रलक्षणयावा ॥ समभिति ॥ अंतर्यामिणिलक्षणांगीकारादितिभावः ॥ ॐ जीवमुख्यप्राणलिंगान्नेतिचेन्नोपासात्रैविध्यादाश्रितत्वादिहतद्योगात् ॐ ॥ शतायुष्ट्वादिजीवलिंगात्प्राणसंवादादिमुख्यप्राणलिंगाच्चनप्राणोविष्णुरितिचेन्न । यस्माज्जीवमुख्यप्राणलिंगोपदेशोंतर्याम्यपेक्षयैवयुक्तइतिपूर्वसूत्रावृत्त्यायोज्यं । किमर्थमंतर्याम्युक्तिरित्यतउक्तं ॥ उपासेति ॥ अंतर्यामित्वेनबहिश्चेतिभेदेन ब्रह्मोपासनायास्त्रैविध्यात् । त्रैविध्यस्यचेहप्रकरणेसएवेत्यादिना आश्रितत्वादुक्तत्वादित्यर्थः । एकयैवोपासनयालं किंत्रैविध्येनेत्यतउक्तं ॥ तद्योगादिति ॥ तस्याधिकारित्रैविध्यस्याधिकारिभेदेन योगाद्युक्तत्वादित्यर्थः । तावंतीत्यादिश्रुतौशतायुष्ट्वस्यप्राणनिष्ठतयानुक्तत्वादाह ॥ एषइमामिति ॥ एषइमंलोकंब्रह्मादिशरीर । पुरुषरूपेणांतर्यामिरूपेण । अभ्यार्चत प्रविवेश । तदेवकार्यलिंगेनदर्शयति । यएषआदित्येस्थितत्वातपतीति । एतच्छब्दार्थवदन्नेवदार्ढ्यायोक्तमेवपुनरेवाह ॥ प्राणइति ॥ तत् शरीरं । कःप्राणइत्यतउक्तं ॥ प्राणोह्येषयएषतपतीति ॥ यस्मादयंप्राणस्तंदेहंशतंवर्षाणि अभ्यार्चतप्रविश्यस्थितः तस्मात्पुरुषायुषः आयूंषिशतंवर्षाणि-

SGDF Sri Gargeshwari Digital Foundation

इतिप्रसिद्धानिभवंतीत्यर्थः । ब्रह्मतीसहस्र वर्णानांसहस्राणियावंतिषट्त्रिंशतिसंख्याकानि तावंतिसहस्राणिशतसंवत्सर-
स्यान्हांभवंतीत्यर्थः ॥ ताइति ॥ ताश्चक्षुरादिश्रियोहंश्रेष्ठोस्म्यहंश्रेष्ठोस्मीत्येवंकलहमकुर्वंतेत्यर्थः ॥ प्राणइति ॥ प्राणो
मुख्यवायुः विराड्देहादुत्क्रांतः प्राणउत्क्रांतेसति तच्छरीरंपतितं प्राणः पुनस्तच्छरीरंप्रविवेश । प्राणेप्राप्तेसतितच्छरीरमु
त्थितमित्यर्थः॥ प्राणोवंशइति ॥ प्राणोमुख्यवायुर्वंशः सर्वाश्रयइतिस्थविरःशाकल्यमुनिराह । तद्यथा तृणादिनिर्मि
तग्रहस्यप्रधानवेणाववांतरवेणवःसम्यक्स्थापिताआश्रिताः एवमस्मिन्प्राणेचक्षुरादींद्रियाणि शरीरंतदभिमान्यात्मा
जीवइत्येतेसर्वेसमाहिताइत्यर्थः ॥ अथेति ॥ प्राणाः इंद्रियाभिमानिदेवाः अहंश्रेयसीश्रेयानित्यर्थेकलहमकुर्वंतेतिछंदो-
गवाक्यार्थः । एतल्लिंगानांनिवरकाशलमैतरेयभाष्योदात्तस्मृत्यादर्शयति ॥ उदासीनाधिति ॥ ननुप्राणंविनान
चब्रम्हातंविनाप्राणएवच अन्योन्योपाश्रयाच्छक्तौस्थातुमन्येकुतस्ततइतिब्रह्मद्वाष्येप्राणंविनाब्रह्मणोऽनवस्थानोक्त्या
कथंप्राणउत्क्रांततस्मिंछरीरंब्रम्हणऔदासीन्येनावस्थानमितिचेदुच्यते । अंशेनसुप्तोब्रह्मातुअंशेननिरगात्पुनः ।
स्वदेहाद्वायुसहितोविष्णुनाचजगत्प्रभुरिति तृतीयस्कंधतात्पर्यानुसारेणांशेन निर्गतत्वेप्यंशेनदेहस्थितस्यानिर्व्यापारू-
पोदासीन्यांगीकारात् ॥ भगवद्विषयतयेति ॥ बाह्यरूपेणोदासीन्योपपत्तेरितिभावः । लिंगं ज्ञापकं मस्तकसमानं
शिरोमध्यभागं ॥ सप्रागंतस्थइति ॥ तंप्रपदाभ्यांप्रापद्यतेत्यादिनाप्रपदाभ्यांप्रविष्टोनारायणइत्यर्थः । एतमित्यस्या
र्थः प्राप्तमिति । इणगतावित्यस्माद्धातोः सुषुम्नयात्हृदयंप्राप्तवासुदेवमात्मानंस्वात्मस्वरूपंततमं अतिशयेनव्याप्तंब्रम्ह पूर्ण
मपश्यदित्यर्थः । तकारस्यव्याप्त्यर्थत्वात् । तमपश्चातिशयार्थत्वात्ततमित्येतत्ततममित्यर्थकमितिभावः ॥ बहिरूपास्त्य
र्थमिति ॥ तस्यबहिष्टमूर्तित्वादितिभावः ॥ नोपासनार्थमिति ॥ उपासनापदाश्रवणादितिभावः । एतद्धस्मवैत-

SGDF
Sri Gargeshwari Digital Foundation

द्विद्वानाहहिरण्यदन्वैदइत्यादिवन्महिदासोपिऋषितयोच्यतांनोपासनार्थमित्यतआह ॥ नहीति ॥ एतदुपनिषदऐतरे यसंज्ञयैवेतरापुत्रस्यमहिदासस्यऋषित्वमित्यानदुक्तिनैष्फल्यादित्यर्थः ॥ विशेषप्रमाणमिति ॥ पूर्वतुकेषांचि दित्येवोक्तत्वात्सामान्यप्रमाणमितिभावः । नन्वत्रोपासनाचतुष्टयमुच्यतेबहिरुपासनंचनोच्यतइत्यतआह ॥ अग्राविति ॥ १२ ॥ ॥ इति श्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यांशंकरायां श्रीनिवासविरचितायां प्रथमाध्यायस्यप्रथमःपादः ॥ १ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्रीगुरुभ्योनमः ॥ शब्दानांलिंगात्मकत्वंनाम तत्स्वरूपत्वंवातद्वाचकत्वंवा । नाद्यः शब्दस्यार्थस्वरूपत्वापत्तेः। नद्वितीयः लिंगवाचिनांसर्वगतत्वमित्यादीनांभगवतिसमन्वयानभिधानादित्यतआह ॥ धर्मविशिष्टेति ॥ सहपठितेति ॥ स्वतःप्रसिध्यभावादियमुक्तिः । अत्रलिंगात्मकेतिपादसंगतिः । शेषंपूर्ववत् ॥ तदेवेति ॥ तदेकदेशभूतमेवेत्यर्थः । एतमेवेत्यवधारणेनविष्णोरन्यस्यैवसर्वभूतगतत्वावगमात् विष्णोर्भूतान्यत्रसत्त्वेपिनपूर्वोक्तनिरुपचरितसर्वगतत्वमितिभावः ॥ एतंह्येवेति ॥ ऋग्वेदिनएतमेवपरमात्मानंमहदुक्थनामकबृहतीसहस्रे यजुर्वेदिनोग्नौ सामवेदिनोमहाव्रताख्यकर्मांगभूतस्तोत्रे मीमांसंते विचारयंति । अस्यां पृथिव्यां । वनस्पतिषु वृक्षेषु । भूतेषु प्राणेषु ब्रह्म पूर्णं आचक्षतेवदंति आम्नायते अभ्यस्यते अभिधीयतइतियावत् ॥ एकप्रकरणत्वादिति ॥ ब्रह्म ततमंएतंह्येवेत्यनयोरेकप्रकरणस्थत्वादित्यर्थः । ब्रह्मततममपश्यदित्युक्तिः प्राणाख्यहरौतेनवाक्येनसर्वगतत्वोक्तिः आदित्यश्रुतिरुपलक्षणं । चक्षुर्मयत्वादि जीवलिंगंचेत्यपिग्राह्यं । तस्यैतस्यासावादित्योरसः सयश्चायमशरीरःप्रज्ञात्मा यश्चासावादित्यएकमेतदितिविद्यात् त

SSDF
Sri Gargeshwari Digital Foundation

स्मात्पुरुषंपुरुषंप्रत्यादित्योभवतीत्यस्यार्थः । तस्यैतस्यसंवत्सरस्यसर्वस्यादित्वात्सर्वस्मिंस्ततत्वात्सर्वजीवनियामकत्वा-
दादित्यनामाप्रद्युम्नोरसःश्रेष्ठः । सयश्चायमशरीरः प्राकृतदेहरहितः । प्रज्ञात्मा ज्ञानात्मकोनिरुद्धः । यश्चासावादित्यग
तःप्रद्युम्नः एतस्थानद्वयगतंभगवद्रूपमेकमितिजानीयात् । तस्मात्पुरुषगतानिरुद्धस्यादित्यगतप्रद्युम्नस्यचैक्यादादित्यः
पुरुषंपुरुषंप्रतिपुरुषमभिमुखोभवतीति ॥ **सूर्यइति** ॥ सूरिभिःप्राप्यत्वात्सूर्योहरिः जगतः जंगमस्य । तस्थुषः
स्थावरस्यात्मांतर्नियामकइत्यर्थः । विशिष्यादित्येऽनुक्तत्वलिंगेनादित्यशब्दस्यादित्यानंतर्गतपरत्वावगमेनतदंतर्गतां-
तर्यामिपरत्वकथनमयुक्तमितिभावः । छंदोमयः वेदप्रचुरः ॥ **अल्पौकस्त्वेति** ॥ अल्पंओकःस्थानंयस्य
तस्यभावअल्पौकस्त्वं तच्चसर्वगतस्यांतर्यामिणोब्रह्माडस्यसर्षपस्थत्वमिवायुक्तमित्यर्थः ॥ **चक्षुर्मयत्वाद्ययोगा-
च्चेति** ॥ नित्यज्ञानवदंतर्यामिणोज्ञानकरणचक्षुरादिप्राचुर्यायोगाच्चेत्यर्थः ॥ ॐ **सर्वत्रप्रसिद्धोपदेशात्**
ॐ ॥ सर्वत्रपृथिव्यादिषूच्यमानंब्रह्मैव । श्रुत्यादौब्रह्मण्येवप्रसिद्धब्रह्मशब्दस्य एतमेवब्रह्मेत्याचक्षतइत्यादि
नातत्रोपदेशादित्यर्थः । नारायणपदोपादानसूचितांश्रुतिमाह ॥ **तथाचेति** ॥ यत्किंचिदल्पंयच्चसर्वंमहत्जग-
त्प्रत्यक्षेणदृश्यतेशब्देनज्ञायतेऽपिनारायणस्तत्सर्वमंतर्बहिश्चाभिव्याप्यस्थितइत्यर्थः । स्वतइत्यनेनश्रीतत्वादौव्यभिचार
परिहारः ॥ ॐ **विवक्षितगुणोपपत्तेश्च** ॐ ॥ विवक्षितानांवक्तुंयोग्यानांवक्ष्यमाणानामुपसंहारेश्रुतानांगुणा-
नामश्रुतत्वादिधर्माणामुपपन्नत्वाच्चसर्वगतंब्रह्मैव नादित्यादिः तेषांतत्रानुपपत्तेरित्यर्थः ॥ **सयोतइति** ॥ योभगवान
तोव्याप्तः अन्यैःसाकल्येनाश्रुतः अगतः अप्राप्तः। अमतः अविचारितः। अनतःस्वतंत्रः। अदृष्टः प्रत्यक्षेण। अविज्ञातः विशे
षज्ञानाविषयः । अनादिष्टः उपदेष्टुमशक्यः।स्वयंचसाकल्येनश्रोतामंताविचारयिताद्रष्टादेष्टोपदेष्टाघोष्टाशब्दकर्ता । वि

शेषेणज्ञाताप्रकर्षेणज्ञाता सनारायणः सर्वेषांभूतानामंतरपुरुषः अंतर्यामी पूर्णश्चेत्यर्थः ज्ञानावांतरविशेषसद्भावान्नात्रपु-
नरुक्तिःशंक्या ॥ **विवक्षिताइति** ॥ अस्येतिशेषः ॥ **वक्तुंयोग्याइति** ॥ इत्यर्थइतिशेषः मुखतःकंठतः श्रोत्रादि
नेतिपूरणीयत्वादितिभावः । अश्रुतत्वादिकंसाकल्येनैवनसर्वात्मनेतिसूचयितुंभाष्येऽनंतइत्युक्तं ॥ **सर्वगतत्वान-
तिरिक्तत्वेनेति** ॥ अतसातत्यगमनेतिधातोः सततोद्यतउच्यतइतिवचनाच्चातत्वंसर्वगतत्वानतिरिक्तमित्यर्थः । अन्यथा
साध्याविशेषप्रसंगइतिभावः। संबंधभाष्येण सूत्रसंगतिप्रदर्शकप्राचीनभाष्येण ॥ ॐ **अनुपपत्तेस्तुनशारीरः** ॐ ॥
शारीरःशरीरसंबंधि आदित्योजी वोनसर्वगतः सर्वगतत्वानुपपत्तेरेवेत्यर्थः। प्रत्येकं एकैकस्य ॥ **तुशब्दइति** ॥ तेनानुपप
त्तेरपरिहार्यत्वंकितत्रयुक्तिगवेषणयेतिसूचितमितिभावः। उपपत्तिमाशंक्यनिराकरोति ॥ **नचेति** ॥ स्वर्गादवाग्गतस्यस्थूल
शरीरसंबंधार्थंव्रीह्यादिशरीरगतस्यापिजीवांतरस्यछेदादिनादुःखाभावात्स्वकर्मनिर्मितशरीरमेवभोगसाधनमंगीकार्यं नच
सर्वशरीराण्येककर्मनिर्मितानि येनतस्यसर्वशरीरजन्यदुःखादिप्रसंगइत्यर्थः । कर्मभेदस्य अस्यैवेदंकर्मनैतस्येतिविवेकस्य
दृष्टांततुपौर्वापर्यसत्वान्नैवमितिभावः ॥ **भवदभ्युपगमादिति** ॥ तस्यतत्वाभिमानित्वादितिभावः॥ **ब्रह्मादीति** ॥
ननुतद्देहस्यापिचतुर्विंशतितत्वात्मकत्वेनास्त्येवतत्रसूर्यप्रवेशः । अन्यथाविराट्देहतत्वाभिमानिनांप्रवेशनिर्गमाभ्यांवायु
श्रेष्ठत्वनिश्चयानुपपत्तिरितिचेन्न अत्रभूतानामंतरपुरुषः सूर्यआत्मेत्यादिनादित्यस्यप्रेरकत्वश्रवणेनब्रह्मादिशरीरप्रेरक-
त्वेनतत्प्रवेशायोगस्योक्तत्वात् बहिस्थपुन्नामकब्रह्मदेहस्यमहत्तत्वमात्रात्मकत्वेनतत्प्रवेशाभावाच्च । तदेतदाह ॥ **सर्वश-
रीरेति** ॥ ॐ **कर्मकर्तृव्यपदेशाच्च** ॐ ॥ एतमस्यामित्यादिनासर्वत्रोच्यमानस्यात्मानमितिकर्मत्वेनशारीरस्य-
शंसतीतिकर्तृत्वेनाभिधानाच्चनशारीरः सर्वगतइत्यर्थः । घटज्ञानेकर्तुरेवदेवदत्तंयज्ञदत्तोजानातीत्यत्रकर्मत्वदर्शनादाह

NMF Digitized by Sri Gargeshwari Mahila Mandal Foundation

॥ **एकस्यांक्रियायामिति** ॥ मामहंजानामीत्येकस्यांक्रियायामेकस्योभयदर्शनादाह ॥ **उत्सर्गतइति** ॥ बाधकै-
कापोद्यत्वमुत्सर्गः । सतिबाधकेनियमस्यसंकोचोप्यस्ति तत्रतुतयोरभेदेनसाक्षिसिद्धत्वमेवबाधकमितिभावः । तर्ह्यत्रापि
बाधकेनैवसंकोचोस्त्वित्यतआह ॥ **अत्रेति** ॥ व्यभिचरितनियमस्यकथंसाधकत्वमितिचेत् यथानहिंस्यात्सर्वाभूतानी-
तिऔत्सर्गिकभूतहिंसानिषेधोऽग्नीषोमीयपशुहिंसाविधिनापोद्यते । भवतिचानपोदितेब्रह्महिंसाद्यकरणीयत्वेप्रमाणंत
थात्रापीतिभावः ॥ **सर्वगततयेति** ॥ एतमस्यामितिवाक्यमात्मानमितिवाक्यंचैकविषयमितितावदविवादं । एतम
स्यामित्युक्तस्यैवैतमात्मानमितिपरामर्शात् । तत्रयद्यात्मानमित्यत्रैकोजीवः कर्मतयास्वीक्रियेततर्ह्येतमस्यामित्यत्रापिसए
वसर्वगततयोच्यमानःस्यात्नसर्वेजीवाः तथाचयत्पूर्वपक्षेसर्वजीवानांवैतत्सर्वगतत्वमितिसर्वगततयासर्वजीवग्रहणंतन्न-
स्यादित्यर्थः ॥ **तथाप्रतीत्यभावेनेति** ॥ कर्मीभूतात्मनोजीवविशेषविषयत्वेनप्रतीत्यभावेनेत्यर्थः । आत्मविशेषणे
नचक्षुर्मयत्वादिनाजीवसामान्यलिंगेनजीवमात्रत्वप्राप्तेरितिभावः । गीतावाक्यमुदाहरति । श्रुत्वेति । एनंअथचैनंनित्य-
जातमित्यनेनप्रकृतंजीवंसामान्येनश्रुत्वापिविशेषतः कश्चिदपिनवेदेत्यर्थः ॥ **साम्यादिति** ॥ तस्यापिसर्वशरीरस्थ
त्वेतद्वतदुःखादिप्रसंगसाम्यादित्यर्थः । बाधकेनविष्णुरूपभिन्नग्रहणे । तथाचापवादकारणाभावोऽसिद्धइतिभावः ।
इत्याशंकांब्रह्मशब्दस्यजीवेपिसंभवादित्याशंकांशिष्टपरिहारोग्रेभविष्यतीतिभावः ॥ ॐ **शब्दविशेषात्** ॥
शब्दस्यब्रह्मशब्दस्यविशेषादेतमेवेतिसावधारणत्वरूपविशेषोपेतत्वान्नतेनेतरग्रहणमित्यर्थः । मुख्यब्रह्मत्वंपूर्णत्वरूपं तमे
वेत्युक्तेऽन्येषामपितद्वाच्यचयत्वात्कथमेतदितिशंकापरिहारायमुख्यतोस्यवाच्यत्वमन्येषाममुख्यतइत्यवश्यंवक्तव्यत्वा-
दितिभावः । श्रुतावुशब्दोवधारणे । ब्रह्मैवेत्याद्येवकारसंबंधः ॥ ॐ **स्मृतेश्च** ॥ विष्णोःसर्वगतत्वप्रतिपा

SGDF Sri Gargeshwari Digital Foundation

दकस्मृतिसत्वाच्चसएवसर्वगतइत्यर्थः । स्मृतौगुडाकेशः अर्जुनः ॥ **भूताशयेति** ॥ भूताख्याश्रयेत्यर्थः ॥ **परोक्तेति** ॥ तस्याःकृष्णार्जुनसंवादरूपत्वादितिभावः ॥ **इतिप्रतिपादितइति** ॥ सक्रतुंकुर्वीतमनोमयःप्राणशरीरोभारूपःसत्यसंकल्पइतिवाक्येमनोमयत्वादिनोपास्योजीवोवाब्रह्मवेतिसंदेहेजीवस्यैवमनः प्राणसंबंधात्तस्यैवान्नमनोमयत्वादिनोपास्यत्वमितिप्राप्ते ब्रह्मैवात्रमनोमयत्वादिनोपास्यंनजीवः सत्यसंकल्पादितल्लिंगादितिप्रतिपादितइत्यर्थः । अप्रामाणिकत्वमुपपादयितुंभेदेऽनुमानमाशंक्यनिराकरोति । जीवेशभेदइत्यादिनाऽलमित्यंतेन । अत्रमिथ्यात्वं असत्वंवानिर्वचनीयत्वंवासत्वाभावोबाध्यत्वंवेतिविकल्पानुक्रमेणदूषयति ॥ **मिथ्येत्यस्येत्यादिना** ॥ **अपसिद्धातादिति** ॥ सदसद्विलक्षणत्वांगीकारादितिभावः ॥ **अप्रसिद्धविशेषणत्वेति** ॥ तस्यमांप्रतिकुत्राप्यप्रसिद्धत्वादितिभावः । ततएव सत्वाभावादेव । चतुर्थमपिविकल्पपूर्वकंदूषयति ॥ **बाध्यत्वसाधनइत्यादिना** ॥ अन्यथाज्ञातस्य अन्यधर्मावच्छिन्नतयाज्ञातस्यस्वधर्मवत्वावच्छिन्नतयाज्ञातत्वमित्यर्थः ॥ **सिद्धसाधनमिति** ॥ मिथ्यात्वेन ज्ञातस्यभेदस्यसत्यत्वेनज्ञातत्वांगीकारादितिभावः ॥ **त्रिकालेति** ॥ नास्तिनासीन्नभविष्यतीतिबोध्यमानाभावप्रतियोगित्वमित्यर्थः । प्रतीतस्येत्यनंतरंत्रिकालेत्याद्यनुवर्तते । तथाचामतःप्रतीत्यभावान्नोक्तदोषइतिभावः ॥ **वाच्यत्वादिति** ॥ धर्माधर्मादेरपीश्वरादिप्रत्यक्षगोचरत्वेन नतत्रव्यभिचारइतिभावः । अत्र यद्यपिप्रतीतस्येतिचेदित्युक्तत्वादसतः प्रतीतिरेवसाधनीया तथाप्यपरोक्षतयाप्रतीतस्येति पुनःपरेणोक्तेपरोक्षप्रतीतेरपिसाधनेगौरवंस्यादित्यपरोक्षप्रतीतिरेवसाधिता । अतएवप्रकृताभिप्रायेणप्रतीतिसिद्धेरित्येवोक्तं । उक्तबाध्यत्वसाधनेऽपसिद्धांतंसूचयित्वादोषांतरमाह ॥ **भेदाभावेनेति** ॥ भेदप्रयोजकविरुद्धधर्मस्फुरणायाविद्यानिवृत्तिरूपेतिमोक्षस्वरूपनिरूपणं । अविद्यास्तमयो

SGDF
Sri Gargeshwari Digital Foundation

मोक्षइत्युक्तेरितिभावः । मिथ्याभूतोभेदःकिंनिवर्तते उतन । आद्यआह ॥ **मोक्षनिवृत्तीति** ॥ भेदनिवृत्तिर्हिभेदिनि वृत्तिनियता । भेदिनोःसत्वेभेदस्याप्यनुवृत्तेः । तत्रनात्मानिवर्ततेसत्यत्वात् । अतोमोक्षस्यैवनिवृत्तिर्वक्तव्येत्याशयः । द्वितीयेत्वाह ॥ **मिथ्याभूतेति** ॥ तथात्वं अनिवृत्त्यविरोधिमिथ्यात्वं ॥ **नचेति** ॥ तथाचकुत्रव्यभिचारइतिभावः । बाधकमप्याह ॥ **द्वासुपर्णेति** ॥ नचात्रभेदमात्रंश्रूयतेनतत्सत्यत्वमितिवाक्यं । स्वतःप्रमाणश्रुत्यासत्यस्यैवप्रतिपादनात् । अन्यथातत्प्रतिपादितब्रह्मणोपिमिथ्यात्वंस्यादितिभावः । यद्यपि प्रमाणविरुद्धार्थप्रतिज्ञाप्रतिज्ञाविरोधइतिबाधस्यप्रतिज्ञादोषत्वावगमात्प्रतिज्ञादूषणसमएवेदंवाच्यं । तथापिहेतुदोषत्वमंगीकुर्वतांनैय्यायिकानांरीतिमाश्रित्योक्तिरविरुद्धा । साध्यवैकल्येनदृष्टांतमपिदूषयति ॥ **अन्यतरचंद्रस्यैवेति** ॥ नन्वनारोपितेचंद्रे भेदमात्रारोपेणेमौचंद्राविति द्वित्वमात्रप्रतीत्युपपत्तौ चंद्रांतरारोपोव्यर्थः । नचैवंशुक्तिकायांरजताभेदमात्रारोपेणेदंरजतमितिप्रतीत्युपपत्तौरजतारोपांगीकारोपिव्यर्थःस्यादितिवाच्यं । तत्राधिष्ठानस्यारजतत्वेनरजतोपस्थित्यर्थंरजतारोपांगीकारात् । रजतानुपस्थितौरजताभेदारोपायोगात् । नचैवंप्रकृते अधिष्ठानस्यचंद्रत्वादितिचेन्न । अनारोपितचंद्रे आरोपितभेदस्यैवदृष्टांतत्वे तस्यारोपितत्वेनात्यंतासत्वात्तत्रहेतुवृत्त्यसंभवेनसाधनवैकल्यापातात् । तदेतदाह ॥ **अन्यतरचंद्रस्येवारोपितत्वेनेति** ॥ सत्यत्वेनेति ॥ **सत्यत्वादिति** ॥ अत्रारोपितप्रतियोगिकानारोपितधर्मिकएकएवभेदोविवक्षितोनत्वनारोपितप्रतियोगिकारोपितधर्मिकः । भेदस्यधर्मिस्वरूपत्वेनारोपितधर्मिस्वरूपभेदस्यसत्यत्वायोगात् । यद्वासद्घटांनेत्यबाधितप्रतीतिबलादसत्धर्मिकोपिभेदोस्त्येव । नचोक्तदोषः । असत्वात्मकत्वसंभवात् । नचवैषम्यं । यथा न्यायमते अत्यंताभावादेःप्रतियोगिविरोधित्वेप्यन्योन्याभावस्यप्रतियोगितावच्छेदकविरोधित्वं तथासद्धर्मिकान्योन्याभावस्यधर्मि-

स्वरूपत्वेप्यसद्धर्मिकान्योन्याभावस्य धर्मितावच्छेदकस्वरूपत्वेविरोधाभावादिति । किंचप्रातिभासिकत्वमुपाधिः । सचन पक्षेसाधयितुंशक्यः व्यावहारिकत्वांगीकारविरोधात् । अभेदोमिथ्याऽभेदत्वाद्देहात्माभेदवदित्याभाससमानयोगक्षेमत्वं । नचदृष्टांतस्यसाध्यवैकल्यं तथात्वेन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्माश्चाध्यस्येतिभाष्यस्योन्मत्तप्रलापितत्वप्रसंगादित्येतत्पृदिनिधायाह ॥ **अलमिति** ॥ ॐ **अर्भकौकस्त्वात्तद्व्यपदेशाच्चनेतिचेन्ननिचाय्यत्वादेवंव्योमवच्च** ॐ ॥ **सर्वेषुभूतेष्विति** ॥ सर्वप्राणिहृदयगुहाख्याल्पस्थानस्थत्वव्यपदेशात्तद्व्यपदेशात्तस्यशारीरस्यादित्यश्रुतिचक्षुर्मयत्वादिना व्यपदेशाच्च नसर्वगतंब्रह्मेतिचेन्न । किंब्रह्मणोऽल्पौकस्त्वाद्युक्तिर्व्यर्था अयुक्ताचा । नाद्यइत्याह ॥ **निचाय्यत्वादिति** ॥ अर्भकौकस्त्वेन चक्षुर्मयत्वादिनोपास्यत्वान्नव्यर्थेत्यर्थः । अंत्यआह ॥ **व्योमवदिति** ॥ यथाव्याप्तस्याप्याकाशस्यैकदेशस्थत्वंतथाब्रह्मणोपियुक्तेत्यर्थः । उपास्यत्वात् अधिकारिविशेषैः ॥ **इंद्रियस्वामित्वेनेति** ॥ तथाचसर्वप्राणिषुप्रेरकत्वेनस्थितत्वात्सर्वेंद्रियमयः । मयटोविकारादेरिवस्मार्तत्वात्स्वामित्वमप्यर्थइत्युक्तंभवति । सर्वप्राणिषुसंस्थितइत्यस्यहेतुगर्भत्वमाह ॥ **आदित्यादिगतस्यैवेति** ॥ तथाचयश्चासावादित्यइत्यनेनैवादित्येप्युक्तिर्लब्धेतिभावः ॥ ॐ **संभोगप्राप्तिरितिचेन्नवैशेष्यात्** ॐ ॥ समानोभोगःसंभोगः । ब्रह्मणःसर्वजीवशरीरस्थत्वे तत्समानभोगप्रसंगइतिचेन्न । वैशेष्यात् सामर्थ्यातिशयादित्यर्थः ॥ **अग्निस्तंभनवतइति** ॥ मणिमंत्रादिना अग्निदाहनिरोधशक्तिमतइत्यर्थः । भवत्वेवप्राप्तव्याज्ञानदशायां इदानींशब्दविशेषादितिसूत्रावतारिकाग्रंथोक्तमतिदेशेनदूषयति ॥ **एवमिति** ॥ भाक्तत्वकथनं अमुख्यत्वकथनं । जीवनिष्ठाश्रुतत्वस्यौपचारिकत्वादितिभावः ॥ १ ॥ अत्तुं भक्षणार्थं । अधियत दधार । अदचेतिशेषोक्तिः अभक्षयदित्यर्थः । कुतइतिप्रश्नोत्तर-

Sri Gargeshwari Digital Foundation

माह ॥ **सर्वमिति** ॥ अदितित्वं अदितिशब्दवाच्यत्वं हियस्मादतः सासर्वात्रीत्यर्थः । अन्यथासर्वातृत्वाभावेतत् अदितित्वं अदितेः देवमातुः उक्तन्यायात् अंतर्यामिपरत्वादिरूपात्। अदितित्वं अदितिस्वरूपत्वं त्वाप्रत्ययस्यव्यक्त्यभेदे नजातिपरत्वायोगे आकाशत्वमित्यादाविवस्वरूपपरत्वस्यैववक्तव्यत्वादितिभावः ॥ **बाधइति** ॥ वक्ष्यमाणरीत्यालिंगस्यापिसावकाशत्वादितिभावः। पुंशक्तिः पुरुषशक्तिः॥ **सोहमिति** ॥ सोहं दिशां दिङ्नामकचतुर्दिगवस्थितभगवद्रूपाणांवत्संपुत्रंवायुमेवमुक्तरीत्यावेदेतिरमावाक्यं। आहुःछांदोग्यभाष्ये ॥ **प्रकृतेति** ॥ ससंवत्सरोभवदितिसंवत्सरशब्देनप्रकृतचतुर्मुखपरामर्शादित्यर्थः। तृतीयांततया तृतीयांततेनेतिशब्देन प्रथमतयासइत्यनेन इतियोजनायां ॥ **अस्तिचोद्यावकाशइति** ॥ यद्यपिबृहद्भाष्येसयद्यदेवेत्यत्रसइत्यस्यसंवत्सराख्यचतुर्मुखपरत्वमेवोक्तं। तथापिसमानविभक्तिकत्वंपरामर्शेतंत्रमितिभ्रमेणसइत्यनेनादित्याख्यमृत्योरेवपरामर्शइतिपूर्वपक्षेपुल्लिंगानुपपत्तिचोद्यावकाशोस्तीतिभावः । अतएवेतियोजनायामित्युक्तं॥ ॐ **अत्ताचराचरग्रहणात्** ॐ॥ सर्ववाऽत्तीत्यत्रोक्तोत्ता संहर्ताविष्णुरेव। नादितिः सर्वमितिचेतनाचेतनजातस्यभक्ष्यतयाग्रहणादभिधानादितियावत् ॥ **विसंवादेति** ॥ श्रुतौचराचरेत्यश्रवणादितिभावः। अस्यव्याख्यानस्य व्याहतिंपरिहरति ॥ **अस्वातंत्र्येणेति** ॥ आयुरर्थे आयुष्यार्थं उक्तरीत्येति सृष्टापातेति भाष्योक्तरीत्या सावकाशत्वादितियाप्राणेनसंविशत्यदितिर्देवतामयीतितत्रापिप्रयोगादितिभावः॥ **अदितिशब्दवाच्यत्वमिति** ॥ पाचकत्वमित्यादाविवादनक्रियाकर्तृत्वमेवादितित्वं तद्धितभावश्चशब्दप्रवृत्तिनिमित्तमितिभावः ॥ ॥ ५० ॥

ॐ **प्रकरणाच्च** ॐ ॥ अप्संवत्सरसृष्ट्यादिना वैष्णवत्वेननिश्चितनैवेहकिंचनेत्यादिप्रकरणबलाच्चात्ताविष्णुरेवेत्यर्थः ॥ **नैवेहकिंचनेति** ॥ अग्रे प्रळये । इह अस्वतंत्रवर्गे। किंचनजीवजडरूपंनैवासीत्। अनादिसिद्धजीवादेः सत्वात्कथमे

SGDF
Sri Gargeshwari Digital Foundation

तदित्यतउक्तं ॥ मृत्युनैवेति ॥ पृथङ्नासीदितिभावः । मृत्योरावरकत्वेहेतुः ॥ अशनायेति॥ अश्यतइत्यशंजगत्
तंनयतीतित्यशनाया । अन्यत्रनेतृत्वप्रतीतावपिश्रुतिषुप्रसिद्धेःसएवनेतेत्याह ॥ अशनायाहीति ॥ मृत्युरशनाया-
हीतिश्रुत्यादिप्रसिद्धमित्यर्थः । यस्मान्मृत्युःस्वयमेवासीदन्यन्नैवासीत्तस्मादात्मन्वी आत्मवान् । जगद्रूपशरीरवान् स्या
मितिमनोकुरुत ऐछत् । समृत्युः शरीररूपजगत्सिसृक्षयासृष्ट्यर्थमनोकुरुतेतिशेषः । तदनंतरंसमृत्युरर्चन् आत्मानंपू
जयन् अचरत् चचार । तस्य अर्चतः पूजयतः मृत्योःसकाशात्पूजासाधनभूता आपोजायंतइत्यर्थः ॥ तद्यदिति ॥
तत् तत्राप्सु । यअपांशरःफेनरूपोमंडआसीत् । सशरः मृत्युनास्वरेतसासमहन्यत । संघातत्वंघनीभावमितियावत् ।
प्रापितः यःसंघातःसापृथिवीब्रह्मांडरूपाभवत् । मृत्युनामा जनार्दनःतस्यांपृथिव्यामश्राम्यत् शिश्यइत्यर्थः । सोकाम
यतेतिसमृत्युनामाभगवान् मेममात्माब्रह्माद्वितीयोवाय्वपेक्षयाजायेतेत्यकामयत् ऐछत् । तत् तदनंतरं । अशनायां द्विती
याप्रथमार्थे । सर्वाशननेता मृत्युर्मनसास्वेछयैव वाचंवेदाभिमानिनींश्रियंमिथुनंद्वंद्वभावंसमभवत् । तत्तेन मिथुनीभावेन
यद्रेतआसीत्सतदुपादानकदेहवान्संवत्सरः । सम्यगात्मनोवत्सान्पुत्रान्देवादीन्रमयतीतिसंवत्सरनामाचतुर्मुखोभवदि
त्यर्थः ॥ तंजातमिति ॥ मृत्युःजातंतंसंवत्सरमभि अभिलक्ष्य अत्तुमितियावत् । व्यददात् स्वमुखंव्यददार । ससंव
त्सरोभयात् भाणंभणितिवाचअकरोत् निःसारितवान् । यद्भणितिवचःसैवतदभिमानीसरस्वत्यभवत । अभिमन्यमान-
शब्दोच्चारणकालएवाभिमानिनीदेव्यभवदितियावत् ॥ सइति ॥ समृत्युः कृतनवंकुमारमालोक्य ऐक्षत् विचारमकरोत् ।
किमिति यदीमं जातं संवत्सरं अभिमंस्ये लीनंकरिष्ये तदाकनीयोल्पमन्नंकरिष्ये अतोबव्हन्नंभवत्वित्यालोच्यसमृत्युस्तया
पूर्वोत्पन्नयावाचागायत्र्यातेनात्मना चतुर्मुखेनचेदंसर्वमसृजत् जनयामासेत्यर्थः । स्मृतौसोत्मनः सआत्मनः मंत्रेष्वादे

SGDF
Sri Gargeshwari Digital Foundation

रित्यकारलोपः ॥ २ ॥ एकस्येत्येतद्विवचनानुपपत्तिस्फुरणायोक्तं कर्मफलातृत्वंनप्रतीयतइत्यतआह ॥ पातृत्वश-
ब्दवाच्यमिति ॥ षष्ठ्यर्थोजन्यजनकभावसंबंधइत्याह ॥ सुकृतनिर्मितइति ॥ आऋद्धः अर्द्धः परेभ्योप्यर्द्धः
परार्धइत्याशयेनपरार्धशब्दार्थमाह ॥ अतिपूर्णेति ॥ पंचमहायज्ञेति ॥ देवपितृभूतमनुष्यब्रह्मयज्ञरूपपंचमहायज्ञे
त्यर्थः । यद्वा दर्शपूर्णमासौ चातुर्मास्यानि पशुःसोमइतिपंचमहायज्ञेत्यर्थः ॥ द्युपर्जन्येति ॥ द्युपर्जन्यपृथिवीपुरुषयो
षिद्रूपपंचाग्निविद्येत्यर्थः । नाचिकेताः नाचिकेतनामकेष्टिवंतः । छायातपौ विद्वदविद्वत्सुखदुःखकरौ । अन्यस्यैव द्वयो
र्बुद्धिजीवत्वपक्षे नतस्यसर्वातृत्वं तथाचासंभवइतिभावः । अन्यस्यापि द्वयोर्जीवेश्वरत्वपक्षे गुहांप्रविष्टत्वादिविष्णुलिंगस
हचरितकर्मफलभोगवतः सर्वातृत्वस्यापिसंभावयितुंशक्यत्वादितिभावः ॥ विष्णोरन्यस्यवेति ॥ किंविष्णोरेवोता
न्यस्यापीत्यर्थः ॥ निरवकाशत्वादिति ॥ तद्वाच्यद्वित्वस्यनिर्भेदेहरौ कथमपिघटयितुमशक्यत्वादितिभावः । बहु
रूपत्वाच्चेत्यानंदमयनयोक्तरीत्याद्विवचनश्रुतिःसावकाशेत्यतोनिमित्तांतरमाह ॥ कर्मेति ॥ हरिःकर्मफलाभोक्ता तद्बंध
विधुरत्वाद्घटवदितियुक्तिविरोधमभिधायश्रुतिविरोधंचाह ॥ अनश्नन्निति ॥ जीवादन्योहरिः पिप्पलंकर्मफलं अन
श्नन्नेवाभिचाकशीतीत्यर्थः ॥ छत्रिन्यायेनेति ॥ छत्र्यछत्रिसमुदाये यथा छत्रिणोगच्छंतीत्यौपचारिकप्रयोगः एवंभो
क्रभोक्तृसमुदायेप्यौपचारिकपिबंताविति प्रयोगइत्यर्थः । विरोधईश्वरस्यभोगानंगीकारे कोहेतुरितिप्रश्नस्योत्तरमाह
॥ एकस्येति ॥ न्याय्यत्वात् । अस्यगोरितिवक्ष्यमाणरीत्या ॥ भोक्तृजीवद्वयेति ॥ तच्छरीरजन्यकर्मफलभोक्तृ-
जीवद्वयेत्यर्थः । तेन पिशाचावेशवर्तिकनस्यादितिनिरस्तं । ननु जीवस्यैवमुख्यतःपातृत्वमीश्वरस्यतूपचारतस्तदंगीकारे
युगपद्वृत्तिद्वयप्रसंगइत्यतआह ॥ द्वयोरपीति ॥ द्वित्वावछेदेनोभयत्राप्युपचारइत्यर्थः । अतएवपूर्वंतादृशएवछत्रिन्या

यउदाहृतः ॥ ॐ गुहांप्रविष्टावात्मानौहितद्दर्शनात् ॐ ॥ कर्मफलभोक्तागवात्मानावेव । आत्मांतरात्माख्य
भगवद्रूपविशेषावेव नजीवेश्वरौ । कुतः हियस्माद्गुहांप्रविष्टौ गुहांप्रविष्टत्वंच योवेदनिहितंगुहायामित्यादिनातत्रैवप्रसि-
द्धमित्यपिहिशब्दार्थः । रूपद्वयस्यगुहास्थत्वंकुतइत्यतउक्तं तद्दर्शनात् तस्यात्मनोगुहास्थत्वस्यधर्मासमंतेत्यादिश्रुत्युक्ते
रित्यर्थः । वीत्युपसर्गार्थोविशेषेणगुहास्थानइति आवृत्तिमत्वाह ॥ त्रिवृतमिति ॥ आत्मा देहस्थः । अंतरात्मा
जीवस्थः । कर्मफलभोगस्येंद्रियसाध्यत्वात्हृदयप्रविष्टस्यकथंतदित्यतआह ॥ तथाचेति ॥ अर्थबाहुल्याद्बहुवचनं ।
अधिष्ठाय तत्रस्थित्वा उपसेवते भुङ्क्ते ॥ पूर्णानंदत्वादिति ॥ पूर्णानंदत्वेनदुःखावकाशाभावात् । प्राप्तव्यसुखापे
क्षाभावाच्चेतिभावः । शुभाशुभशब्दौसुखदुःखपरौ । अंतरंगज्ञापकंचाह ॥ तथाहीति ॥ योभगवानग्रे अग्र्यःसर्वतः
श्रेष्ठः तस्येत् तस्यैव पिप्पलं कर्मफलं स्वादुशुभमाहुः । यस्तुजीवःपितरंजगज्जनकंभगवंतं उत् उत्कृष्टत्वेननवेद ।
अतएव नशत्नरकाद्यनर्थरूपनाशंप्राप्नुवानोपुरुषार्थनाशवान्वा तस्यपिप्पलंनतुस्वाद्वाहुरित्यर्थः । इत्यादिनेत्याद्यनुवादः।
विष्णोरेवेत्यादिव्याख्या ॥ ॐ विशेषणाच्च ॐ ॥ एकवचनसेतुत्वब्रह्मत्वादिना पिबतोर्विशेषितत्वाच्चतावात्मानावे
व नजीवेशावित्यर्थः । स्मारयति स्मृत्यादर्शयति । अतइत्यनंतरमपेक्षितंपूरयति ॥ तस्मिन्ब्रह्मशब्दःप्रयुज्यतइति॥
॥ यतइति ॥ अनेनयतःशब्दावृत्तिर्दर्शिता । अत्र काटके ॥ समन्वयासंगतत्वादिति ॥ समन्वयाभिधायकैतद
ध्यायासंगतत्वादित्यर्थः ॥ छायातपत्वविशेषणादिति ॥ तयोःक्रमेणविद्याविद्यावद्वाचकत्वेनतादृशयोश्चजीवेशा-
न्यत्वायोगादितिभावः । विनिगमनाविरहादुक्तमेवास्त्वित्यतआह ॥ नहीति ॥ अनुशासनाभावात् अस्मत्पक्षेतु छा
येवविदुषांप्रभुः आतपःपापिनामितिविनिगमकमस्त्येवेतिभावः । नकेवलमेतदसंगतं किंतु व्यर्थंचेत्याह ॥ किंचेति ॥

SGDF Sri Gaudiya Dharma Foundation

समन्वयसिद्धिरित्यनंतरंलब्धेतिलिंगव्यत्ययेनानुवर्तते । एवं एवंसति । मयेश्वरेलिंगस्यौपचारिकत्वांगीकारेणजीवमात्रेसमन्वयसिद्धावपितन्मतेकथमित्यतआह ॥ **तेनापीति** ॥ शंकते ॥ **नात्रेति** ॥ तथाचजीवेसमन्वयईश्वरएवसिध्यतीतिभावः । अराः दोषाः तद्वंतःअरवः स्वरूपसतःकारणत्वायोगादाह ॥ **तथैवज्ञातेनैवेति** ॥ ३ ॥ **अर्थादिति** ॥ अक्ष्यादित्ययोरेकविधत्वादितिवक्ष्यमाणरीत्येतिभावः ॥ **यएषइति** ॥ यएषोक्षिण्यंतः पुरुषोदिव्यदृष्ट्यादृश्यते एष आत्मावामनाख्यः परमात्मेतिहोवाच एतद्भगवद्रूपममृतं स्वतएवमरणरहितं । अभयं स्वतएवभयरहितं एतद्ब्रह्मगुणपूर्णमित्यर्थः ॥ **अग्निश्रुतिरिति** ॥ अथहाग्नयःसमुदिरइत्यादावितिशेषः ॥ **यएषआदित्येपुरुषइति** ॥ आदित्ये सूर्ये यएषपुरुषःपूर्णषड्गुणोभगवान्दिव्यदृष्ट्यादृश्यतेसोहमहेयत्वादहंनामागार्हपत्याग्निस्थोस्मि । आदित्यस्थस्यमदंतर्यामिणश्चनविदुरधर्मादिवदभेदः किंतुनकोपिविशेषइत्यतआह ॥ **सएवेति** ॥ गार्हपत्याग्निनोपकोसलंप्रत्युपदिश्यते ॥ **आदित्यइति** ॥ आदित्यः आदित्यमंडलाभिमानी । चक्षुर्भूत्वा रूपांतरेणचक्षुर्देवताभूत्वाक्षिणीगोलकेप्राविशदित्यैतरेयभाष्यश्रुतावादित्यमंडलस्ययद्देवताकत्वंचक्षुर्गोलकस्यापितद्देवताकत्वरूपैकविधत्वोक्तेरित्यर्थः । तथाचभाष्ये एकपदमेकचेतनाधिष्ठितत्वरूपैकविधत्वपरं । अक्ष्यादित्यपदेतुजडपरइतिभावः । समूदिरे ऊचुः । औपचारिकं आदित्यस्थविष्ण्वाश्रयत्वेन ॥ **श्रुतीति** ॥ आनंदमयस्यादित्यस्थत्वप्रतिपादकसमाख्याश्रुतीत्यर्थः ॥ **बलवत्वादिति** ॥ स्थानांतरस्थसमाख्यापेक्षयाएकस्थानस्थाभ्यासस्यशीघ्रोपस्थितिकरत्वादितिभावः ॥ **अपूर्वतयेति** ॥ लोकप्रसिद्धाग्नित्यागेनात्यलौकिकब्रह्मग्रहणेऽपूर्वतेत्यर्थः ॥ **बाधइति** ॥ एकत्रानेकवारोक्तिरूपतया ज्ञातज्ञापकाभ्यासादपिप्रमाणांतराप्रापकत्वरूपापूर्वतायाः प्राबल्यादितिभावः ॥ **सयएतमिति** ॥ योधिकारी एतत् अग्न्यंतर्यामिरूपमेवंविद्वान्जान

SGDF
Sri Gargeshwari Digital Foundation

न्नुपास्ते । सपापकृत्यां अपहते विनाशयति लोकी भगवल्लोकीभवति सर्वमायुर्मोक्षमाप्नोतीत्यर्थः ॥ **प्राबल्या-दिति** ॥ अपूर्वतापेक्षयोद्देश्यत्वेनाधिकफलापेक्षया करणाकरणयोरिष्टानिष्टकथनरूपार्थवादस्यापूर्वतायाःप्राबल्य-स्यसुतरांसिद्धेरितिभावः । यद्यपि अपहतेपापकृत्यामितिफलं तथापिस्तुतिरूपार्थवादित्वमप्यस्तीतिवा । वस्तुतः फलवत्वंफलंफलोक्तिस्त्वर्थवादइतिवाभिप्रेत्यैवमुक्तिरितिध्येयं । भाष्ये पलाशे पत्रे ॥ **तदन्यथानुपपत्त्यैवेति** ॥ मोक्षंविनासर्वपापाश्लेषासंभवादितिभावः । ननुनेतरानुपपत्तेरित्यादौविष्णुज्ञानान्मोक्षइत्युक्तं । समोक्षस्तद्यथापुष्कर पलाशइतिवाक्येन यएषोंतरक्षिणीत्युक्ताक्षिस्थज्ञानात्प्रतीयतइतिऋजुसंगत्यैतदधिकरणारंभसंभवे यएषआदित्येपुरुषः यएषोंतरक्षिणीपुरुषइत्यनयोर्वाक्ययोरादित्यश्चक्षुर्भूत्वेतिश्रुत्यैकार्थत्वमुपपाद्य यएषआदित्यइतिवाक्यस्ययश्चासावादि-त्यइतिवाक्येनसंगत्या तदर्थार्थकयएषोंतरक्षिणीतिवाक्यस्यापि तेनसंगतिरितिवक्रसंगत्याधिकरणारंभेकिंनिमित्त-मित्यतआह ॥ **अत्रादित्येति** ॥ यद्यप्युक्तरीत्याऋजुसंगत्यधिकरणारंभेपि । पूर्वपक्षेग्नेरेवाक्षिस्थत्वे आदित्यस्थत्व स्यहेतुत्वेनोपपादने सिद्धांतेतस्यविष्णुनिष्ठत्वस्यसमर्थनीयत्वात्तस्यापिसमन्वयसिद्धिस्तथापिपूर्वपक्षहेतोःसिद्धांतिना सावकाशत्वोक्त्याप्यविरोधकत्वस्यवक्तुंशक्यत्वेनसमन्वयएववक्तव्यइतीनियामकाभावात्तदर्थमेतादितिभावः । ननुभा ष्ये प्रथमादिपदं अथहैनमन्वाहार्यपचनोनुशशास यएषचंद्रमसिपुरुषोदृश्यतेसोहमस्मि अथहैनमाहवनीयोनुशशास यएषाविद्युतिपुरुषोदृश्यतेसोहमस्मीत्यनयोर्वाक्ययोःसंग्राहकं । द्वितीयादिपदंचचंद्रविद्युतोःसंग्राहकं । बहुवचनंचान्वा हार्यपचनाहवनीययोर्वाक्यसंग्राहकमितिप्रतीयते । इदंचानुपपन्नं चंद्रविद्युतोरक्ष्णैकविधत्वाभावेनान्वाहार्यपचनाह वनीययोस्तदुभयस्थत्वस्याक्षिस्थत्वसाधकत्वाभावेनप्रकृतानुपयोगात् अतोयएषआदित्येपुरुषइत्यग्नेरादित्यस्थत्वमुच्य

तइत्येववक्तव्यंशिष्टंतव्यर्थमित्यतआह ॥ **अग्नीनामितिबहुचनमादिपदद्वयंचेति** ॥ अग्नेराक्षिस्थत्वसाधकत्वे-नाथहाग्नयः समूदिरइत्येतत्प्रकरणगताग्निगार्हपत्यान्वाहार्यपचनाहवनीयादिरूपबव्हाग्निश्रुतीनांसूचनार्थमेवबहुवचनप्रयो गोनतूक्ताभिप्रायेणेतिभावः ॥ ॐ **अंतरउपपत्तेः** ॐ ॥ अंतरः चक्षुरंतःस्थित्वारममाणोविष्णुरेव । एतदमृतम भयमेतद्ब्रम्हेत्युक्तामृतत्वाभयत्वब्रह्मशब्दानांतत्रैवोपपत्तेरित्यर्थः । अभयं भयरहितं । तितीर्षतांसंसारतरणेछावतां । पारंसेतुरिवाधारं ॥ **पर्येनमिति** ॥ एनं परमात्मानं परिप्रति एतेनेतियावत् । विद्युदादयोम्रीयंतइत्यर्थः ॥ **भीषेति** ॥ अस्मादस्यहरेः भीषा भयेनाग्न्यादयः स्वस्वव्यापारंकुर्वंतीत्यर्थः ॥ **तदनुयायिनोरिति** ॥ श्रुतिबलेनलब्धार्थ एवतयोर्वाक्यतात्पर्यज्ञापकत्वादितिभावः ॥ ॐ **स्थानादिव्यपदेशाच्च** ॐ ॥ स्थानं अक्ष्यादिपदात्तदधिष्ठाता शक्त्युपलक्षकमेतत् । तथाचासंगत्वाख्यस्थानशक्तेः संयद्वामत्वाद्यधिष्ठानशक्तेः व्यपदेशाच्चक्षुरंतस्थोविष्णुरेवेत्यर्थः । सर्पिर्घृतं ॥ **एतंसंयद्वामइति** ॥ एतंचक्षुरंतस्थंभगवंतं संयद्वामः प्रकृष्टसौंदर्यइत्याचक्षतेविद्वांसः । कुतः हियस्मादेतं सर्वाणिवामानिसौंदर्याणि अभिसंयंतिप्रविशंतीत्यर्थः ॥ **एषइति** ॥ एषएवचक्षुरंतस्थोभगवान्वामनिः सौंदर्यनेतेत्यु च्यते सूरिभिःकुतःहियस्मादेषएवसर्वाणिवामानिरमादिगतसौंदर्याणिप्रापयतीत्यर्थः ॥ **एषइति** ॥ एषचक्षुरंतस्थो-भगवान्भामनिः प्रकाशमानइत्युच्यते । कुतःहियस्मादेषएवसर्वेषुलोकेषुभातिदीप्यतइत्यर्थः । ननु आत्मशक्तेर्विष्णु-निष्टत्वेनतल्लिंगत्वेपि स्थानशक्तेश्चक्षुर्निष्टत्वेनविष्णुलिंगत्वासंभवात्कथंभाष्यएतच्छब्देनोभयंपरामृश्य विष्णुलिंगत्वो क्तिरित्यतआह ॥ **एतदिति** ॥ **स्वसंबंधेनेति** ॥ अस्यतात्पर्यमाह ॥ **यस्यप्रभावादिति** ॥ श्रुतावसपत्नोवि रोधरहितः ॥ **समस्तमिति** ॥ इदंचतच्चक्षुश्चेदंचक्षुस्तस्मिन्नित्येकंपदं । तेनास्मिन्नित्युपपन्नमितिभावः ॥ ॐ **सुख**

वाशष्टाभिधानादेवच ॐ ॥ विशिष्टंपूर्णंचतत्सुखंचसुखविशिष्टं । कडाराःकर्मधारयाइतिपरनिपातः । कंब्रह्मखं ब्रह्मेत्युपक्रमेपूर्णसुखाभिधानाच्चक्षुरंतस्थोब्रह्मैवेत्यर्थः । उक्तब्रम्हशब्देन । कंसुखं खंज्ञानं सौत्रैवकारार्थमाह ॥ **किमुते ति** ॥ प्रकृतोपयोगमाह ॥ **श्रौतमपीति** ॥ निरपवादेऽमुख्यग्रहणायोगादितिभावः । आपेक्षिकं सावधिकं । स्मृ तौ विप्लुट् अल्पं । शंकते । नैवमिति ॥ **उपकोसलेति** ॥ हेसौम्योपकोसल ते तुभ्यं एषाऽस्मद्विद्यांतर्यामिविद्या । आत्मविद्यासर्वगतात्मविद्याचोपदिष्टेत्यर्थः । नन्वग्निभिरात्मविद्यात्वेनोक्तविद्यायाआदित्यस्थविद्यात्वादक्षिस्थविद्या याः कथमग्निविषयत्वमित्यतआह ॥ **अक्षिस्थविद्यायाश्चेति** ॥ उक्तरीत्याक्ष्यादित्ययोरेकविधत्वादितिभावः ॥ **ह्वयाम्यग्निमित्यादाविवेति** ॥ यथा व्हयाम्यग्निंप्रथमंस्वस्तयेत्यत्राग्नेरुपक्रमेपि सवितारमूतये हिरण्ययेनसवि-तारथेनेत्यादिसवितृश्रुतिलिंगादिना तत्प्रकरणंसूर्यपरं अतएवोक्तमनुक्रमणिकायां । व्हयाम्येकादशसावित्रमिति । तथा त्रापिब्रह्मणउपक्रमेप्यस्मद्विद्येत्यग्नेरुक्तत्वादग्निप्रकरणमेवेतिभावः ॥ **तथासतीति** ॥ अंतर्यामिणएवात्मत्वादितिभा-वः ॥ ॐ **श्रुतोपनिषत्कगत्यभिधानाच्च** ॐ ॥ श्रुतोपनिषदां अधीतैतद्विद्यानांपुंसां केन वायुना कस्य ब्रह्मणोग तेः प्राप्तेःसएनान्ब्रह्मगमयतीत्यभिधानाच्चचक्षुरंतरोविष्णुरेवेत्यर्थः ॥ **अथेति** ॥ अथेत्यर्थांतरे । यदुच यद्यप्यस्मिन् ज्ञानिनिमृते शव्यं शवसंबंधिकर्म कुर्वंत्येवतदीयाः यदुचनैवकुर्वंति तथापि तेज्ञानिनः सर्वथा स्वज्ञानप्रसन्नभगवत्साम थ्यात्हृदयाग्रप्रज्वलनप्रकाशितद्वारेण ब्रह्मनाड्यादेहादुत्क्रांताअर्चिषमर्चिर्नामकमूर्ध्वलोकंसंविशंत्येवप्राप्नुवंत्येव तत्र-कंचनकालंस्थित्वाततोर्चिषअर्चिलोकादातिवाहिकारव्यवायुलोकद्वारा अहरहरभिमानिदेवतालोकंप्राप्नुवंति । अन्हः अहर्लोकादापूर्यमाणपक्षंशुक्लपक्षाभिमानिदेवतालोकं आपूर्यमाणपक्षादुद्गच्छन्यान्षण्मासानुदङ्गेत्यादित्यस्तान्मासानुत्त-

SGDF Sri Gargeshwari Digital Foundation

रायणाभिमानिदेवतालोकं मासेभ्यस्तेभ्यः संवत्सरं संवत्सराभिमानिदेवतालोकं संवत्सरात्तडिद्वारेण प्रजापतिप्राप्तिद्वारा दित्यमादित्याच्चंद्रमसं चंद्रमसोवैश्वानरेंद्रध्रुवद्वाराविद्युतंविद्युन्नाम्नींभारतींप्राप्नुवंति ततस्तस्याःपुरुषोभर्ता मानवोमनना न्मनुर्भगवांस्तस्यायंप्रियभृत्योमानवोमुख्यवायुस्तंगछति । सवायुरेनान्स्वप्राप्तान्प्रतीकालंबनान्कार्यब्रह्म अप्रतीकालंब नान्परंब्रह्मगमयतीत्यर्थः ॥ **मननिदध्यासनोपलक्षणमिति** ॥ श्रवणमात्रस्यब्रह्मप्राप्तिहेतुत्वासंभवादितिभावः । वायुःकइतिशब्दितइतिसंबंधः ॥ **अथवेति** ॥ तथाचनोपलक्षणमितिभावः ॥ **सामीप्यादिति** ॥ श्रुतैतद्विद्याफला- भिधायकैतद्वाक्यानंतरमेव यदुचैवेत्यादिश्रवणादितिभावः । अन्यथाकगतिकथनस्यैतद्विद्याफलकथनरूपत्वाभावे । यजः याजकाः कृष्णवाक्यमिदं । अस्मच्छब्दोदितोंतस्थआत्माव्याप्तोजनार्दनः । अग्नयोद्विविधंविष्णुमवोचंनुपकोसल मितिप्रमाणानुसारेणाह ॥ **तस्यांतर्यामीत्यादि** ॥ श्रुतेरस्मदित्यस्याः सकाशात् उपपत्तेः एतद्विद्याफलत्वेनकगत्य भिधानरूपायाः । ननु कंब्रह्मखंब्रह्मेत्युक्तविद्यायाः ब्रह्मशब्दोपेतत्वेनब्रह्मविद्यात्वाक्तथमात्मविद्येत्युक्तसर्वगतविद्यात्व मित्यतआह ॥ **तस्यैवेति** ॥ सर्वगतस्यैवेत्यर्थः ॥ **ॐ अनवस्थितेरसंभवाच्चनेतरः ॐ** ॥ चक्षुरंतस्थइतरो- ग्निर्न अनवस्थितेः । जीवस्याग्नेर्जीवांतरप्रेरकत्वे तस्यापिप्रेरकांतरेणभाव्यं । एवंतस्यापीत्यनवस्थानात् अग्नेरपिप्रेर्य जीवत्वसाम्येनप्रेरणासंभवाच्चेत्यर्थः ॥ **तत्तत्प्रेरकत्वेनेति** ॥ यश्चक्षुरंतरोयमयतीतिश्रुत्यंतरसमाख्यानादितिभावः । नेयमनवस्थाबीजांकुरपरंपरानवस्थावन्मंतव्येत्यतआह ॥ **पूर्वपूर्वेति** ॥ अत्राग्नेर्जीवप्रेरकत्वंमूलं तदर्थमेवोत्तरोत्तरानु सरणात् । तथाचप्रयोजकत्वेनकल्पितानांव्युत्क्रमेणपूर्वपूर्वप्रेरकानामसिद्धौप्रयोज्यानामुत्तरोत्तरप्रेरकत्वानामप्यसिद्धि रित्यग्नेरपिप्रेरकत्वासिद्धेरित्यर्थः । अभ्युपेत्य प्रेरकत्वं इदमनवस्थानं ॥ **स्वातंत्र्येति** ॥ तथाचनतत्प्रेरकोपेक्षित

SGDF Sri Gaudiya Math Foundation

इतिभावः ॥ दिव्यदृष्टिगोचरइति ॥ ततश्चश्रुतौयएषोंतरक्षिणिपुरुषोदृश्यतइति दृश्यत्वोक्तिर्युक्तेतिभावः ॥ ४ ॥
॥ काण्वमाध्यंदिनेति ॥ यःपृथिव्यांतिष्ठन्नित्यादिवाक्यस्योभयत्रापिपाठादेवमुक्तं । योभगवान्पृथिव्यांपृथिव्य-
भिमानिदेवतायांतिष्ठन्पृथिव्याअंतरोविविक्तः यमंतर्यामिणंपृथिवीनवेद यस्यपृथिवीशरीरं । तद्वशत्वादेः । नकेवलं
तत्रस्थितिमात्रं किंतुयोअंतरोबाह्यापेक्षांविनारमतइतिवारमयतिवांतरः। पृथिवींयमयति एषभगवांस्ते तव आत्मानिया
मकः । अमृतोनित्यांतर्यामीतिगौतमंप्रतियाज्ञवल्क्यवचनं । तदेवोपपादयति ॥ शरीरशब्दस्यति ॥ इदंपूर्वपक्ष
शरीरमित्यादाविविशेषः ॥ नचेति ॥ पृथिव्यभिन्नायाः पृथिवीस्थत्वायोगादितिभावः ॥ इत्य दिनेति ॥ कारणेषु
स्थितंकार्यंव्याप्तंकार्येषुकारणमितिगीतातात्पर्यस्मृत्येत्यर्थः । तयोर्भिन्नाभिन्नत्वेनभेदस्यापिसत्वादितिभावः । नन्वथापि
पृथिवींयमयेदितीत्युक्तपृथिवीनियामकत्वंकथमित्यतआह ॥ पृथिवीमिति ॥ कार्यस्यकारणाधीनत्वादितिभावः ॥ अ-
तिसुघटत्वादिति ॥ पृथिव्याद्यभिमानित्वेनतच्छरीरत्वतन्नियामकत्वादीनामुपपादकानिरपेक्षत्वादित्यर्थः । कयापि
विधयेत्येतदेवाह ॥ तस्येति ॥ उररीकारेण अंगीकारेण ॥ कथंचिदिति ॥ प्रकृत्यादेःस्वरूपनाशरहितत्वेनेत्यर्थः ॥
॥ ॐ अंतर्याम्यधिदैवादिषुतत्धर्मव्यपदेशात् ॐ ॥ अधिदैवादिपदेन तत्प्रकरणंलक्ष्यते । अंतर्यामीविष्णु-
रेव । अधिदैवाधिभूतादिप्रकरणेषु तस्यांतर्यामिणःसंबंधितयातस्यब्रह्मणोधर्मस्यपृथिव्याद्यविदितत्वादेर्व्यपदेशादि-
त्यर्थः । अधिदैवत्वेन । अभिमानिदेवत्वेन । अन्यथाजडेज्ञानाप्रसक्त्यायंपृथिवीनवेदेत्यादेः अप्रसक्तप्रतिषेधकत्वा
पत्तिरितिभावः ॥ नचेति ॥ धरायाःप्रकृतिस्वस्वरूपज्ञत्वादितिभावः ॥ ॐ नचस्मार्तमतत्धर्माभिलापात् ॐ ॥
स्मार्तं प्रधानंनांतर्यामी । त्रिगुणत्वादितद्धर्मानभिधानादित्यर्थः । पृथिवीशरीरत्वादितद्धर्माभिलापात्कथंअतद्ध-

SGDF
Sri Gargeshwari Digital Foundation

र्मभिलापइत्यतउक्तं ॥ **अनन्यथासित्धेति** ॥ तस्यत्वन्यथासिर्द्धिवक्ष्यतीतिभावः ॥ ॐ **शारीरश्चो भयेपिहिभेदेनैनमधीयते** ॐ ॥ शारीरोजीवश्चनांतर्यामीहियस्मादेनंजीवमुभयेमाध्यंदिनकण्वशाखाःप्रकृतांतर्यामिणःसकाशाद्भेदेनप्रतिपादयंति तस्मादित्यर्थः ॥ आत्मनोंतरइत्येतज्जीवस्यांतर्गतइतिप्रतीतिनिरासायव्याचष्टे ॥ **आत्मनइति** ॥ **उदात्दृतेति** ॥ यआत्मनीत्युदात्दृतेत्यर्थः । भाष्ये शीर्यते विदार्यते ॥ **युज्यतइति** ॥ सतिबाधकेमुख्यार्थत्यागस्यन्यायत्वादितिभावः ॥ ५ ॥ **अथेति** ॥ अथ परविद्यानिरूपणानंतरंपरापरविद्यानिरूप्यतइतिशेषः । ययाविद्यया तत्प्रसित्धमक्षरमक्षरशब्दाभिधेयंब्रह्म अधि अधिकत्वेनगम्यते अवगम्यते सापरविद्येत्यर्थः । प्रसित्धाक्षरव्यावृत्तयेतत्स्वरूपंनिरूपयति ॥ **यत्तदद्रेश्यमित्यादिना** ॥ यत्पूर्वोक्तमक्षरमद्रेश्यमदृश्यं अग्राह्यंकेनापिगृहीतुमशक्यं । अगोत्रं भारद्वाजादिगोत्ररहितं अवर्णं प्राकृतवर्णरहितं ब्राह्मणादिवर्णरहितंवा अचक्षुःश्रोत्रं चक्षुश्रोत्रोपलक्षितप्राकृतज्ञानेंद्रियरहितं अपाणिपादं पाणिपादोपलक्षितप्राकृतकर्मेंद्रियरहितं यद्वाऽचक्षुःश्रोत्रचक्षुःश्रोत्रोपलक्षितसमस्तेंद्रियरहितं अपाणिपादं पाणिपादोपलक्षितप्राकृतदेहरहितं नित्यंस्वरूपतोदेहतश्चाविनाशि विभुंसमर्थंसर्वगतंसर्वत्रव्याप्तं सुसूक्ष्मंजीवादप्यतिशयेनसूक्ष्मं अव्ययंह्रासरहितं । नन्वेवमक्षरस्यादृश्यत्वेधिगम्यतइतिदृश्यत्वोक्तिःकथमित्यतआह ॥ **यद्भूतयोनिमिति** ॥ भूतयोनिंजगत्कारणंयदक्षरंतत्धीराःपंडिताःपरिपश्यंति । स्वयोग्यतानुसारेणजानंति । अनेनाधीराणामदृश्यमित्युक्तंभवति । लोके पितुरन्यस्यैवमारकत्वदर्शनान्नतथेहान्यस्यसंहर्तृत्वंमंतव्यमितिभावेन स्रष्टृत्वंसंहर्तृत्वंचसदृष्टांतमुपपादयति ॥ **यथेति** ॥ सदृष्टांतोयथा ऊर्णनाभिः तंतुवायकःस्वभुक्तमन्नादिकंतंत्वाद्याकारेणसृजते पुनर्गृण्हतेसंहरति तथाक्षरशब्दोक्तोभगवानपिपूर्वकल्पेभुक्तंजगत्सृजतेसंहरतिच किमनुसृत्यसृजतइत्यतोदृष्टां-

SGDF
Sri Gargeshwari Digital Foundation

तेनाह ॥ यथेति ॥ यथापृथिवीशाल्यादिनानाबीजान्यपेक्ष्यतत्तदंकुरान् जनयतितथाचेतनानांविविधकर्माण्यपेक्ष्यतत्सृज
तीत्युक्तंभवति । कुलालवन्नाक्षरस्यक्लेशेनस्रष्टृत्वं इतिसदृष्टांतमाह ॥ यथेति ॥ सतश्चेतनाधिष्ठितात्पुरुषदेहाच्छिरसिवि
द्यमानाकेशाःदेहेविद्यमानानिलोमानिअनायासेनभवंति । तथाक्षरादिहास्वतंत्रवर्गेविश्वमनायासेनभवत्युत्पद्यतइत्य
र्थः । प्रकृत्यादीनामप्यदृश्यत्वंवक्ष्यामीतितावच्छब्दः ॥ दिव्यइति ॥ दिव्योऽलौकिकः । अमूर्तः अपरिच्छिन्नपरि
माणः पुरुषः पूर्णषड्गुणः बाह्याभ्यंतरः बहिरंतश्चनियामकतयास्थितः अजः उत्पत्तिरहितः ॥ अप्राणोह्यमनाइ-
ति ॥ षोडशकलारहितः शुभ्रः शुद्धः अक्षराज्जडप्रकृतेः पराछ्रीतत्वात्परः उत्तमइत्यर्थः ॥ ॐ अदृश्यत्वादिगुणको
धर्मोक्तेः ॐ ॥ अदृश्यत्वं आदियेषां अग्राह्यत्वादीनां तेऽदृश्यत्वादयः अदृश्यत्वादयोगुणायस्यासौ अदृश्यत्वादिगुणः
सएवादृश्यत्वादिगुणकः सचविष्णुरेव ॥ अथपरेति ॥ ऋगादिपरविद्याविषयत्वरूपतत्धर्माभिधानादित्यर्थः । वाक्य-
स्ययत्तदद्रेश्यमित्यादेः ॥ नचेति ॥ तथाचविष्णुग्रहणोपपत्तेरितिभावः । इत्यतइत्यनुवादःतस्मात्परतःअदृश्यत्वादिगुण
काक्षरात्परतःएवमग्रेपि ॥ सामानाधिकरण्येनेति ॥ परतःब्रम्हाद्युत्तमादक्षरादित्यक्षरपरशब्दयोश्चित्प्रकृतिरूपैकार्थ
प्रतिपादकत्वेनेत्यर्थः ॥ सब्रह्मेति ॥ सब्रह्मविद्यामथर्वायज्येष्ठपुत्रायप्राहेत्यत्रेत्यर्थः ॥ कर्तारमिति ॥ कर्तारमीशंपुरुषं
ब्रम्हयोनिमित्यत्रेत्यर्थः । श्रुत्यादौपरविद्याविषयत्वपरशब्दाभावात्कथंतदुदाहरणमित्यतस्तदुपपादयति ॥ तमेवे
त्यादिना ॥ भाष्येंगानिशीक्षादीनिषट् उपांगानि आयुर्वेदादीनिपंच शिष्टाःकलाविद्याः प्रत्यंगानीतितत्वप्रदीपानुसा
रेणध्येयं ॥ अन्येति ॥ कर्मादीत्यर्थः । तदुक्तमाथर्वणभाष्ये एतदर्थश्चब्रह्ममीमांसाशास्त्रव्युत्पादितन्यायानुपकृतवेदा
दयोविष्णोरवाचकाः तदुपकृताः तद्वाचकाभवंतीतिसुधानुसारेणध्येयं । अर्थादिति ॥ परविद्याविषयत्वस्याविष्णोर-

SGDF
Sri Gargeshwari Digital Foundation

न्यत्रनिरवकाशत्वान्यथानुपपत्येर्थः ॥ ॐ **विशेषणभेदव्यपदेशाभ्यांचनेतरौ** ॐ ॥ इतरौचेतनप्रकृतिचतुर्मु
खौ नादृश्यत्वादिगुणकौ यःसर्वज्ञइतिसर्वज्ञत्वरूपविशेषणव्यपदेशात् । अदृश्यत्वादिगुणकभेदव्यपदेशाच्चेत्यर्थः । चीयते
संबध्यतेतपोकुरुतेतियावत् ॥ **अज्ञानप्रतीताविति** ॥ तपआलोचनइतिधातुः आलोचनंचाज्ञस्यैवेतिभावः ॥ **ज्ञा
नमयमिति** ॥ यस्यब्रह्मणस्तपोज्ञानमयंज्ञानस्वरूपमेव । नत्वालोचनात्मकं कुतः अज्ञोह्यालोचति नचायंतथा यतःस
र्वज्ञइतिहेतुतयेत्यर्थः । सामान्यविशेषवस्तुगतसामान्यविशेषाकारविषयतया सर्वैर्ज्ञेयाधर्माः सामान्यधर्माः । सर्वाज्ञेयाः
विशेषधर्माः क्रमेणतदुभयविषयकत्वेनसामान्याविशेषज्ञानत्वयोरवांतराविशेषइतिनपुनरुक्तिरितिभावः । स्फुटमेतन्मनो
विज्ञानशब्दयोरपुनरुक्तिप्रतिपादकानंदमयसुधायां ॥ **विदलाभइति** ॥ तथाचसर्वंविंदतेलभतइतिवासर्ववेदयतेउत्पा
दयतीतिवा सर्ववित्सत्यकामः सर्वोत्पादकोवेत्यर्थउक्तोभवति ॥ **सूत्रखंडस्य** ॥ विशेषणव्यपदेशादित्यंशस्य । प्रकृ
ताक्षरंअदृश्यत्वादिगुणकं ॥ **सूत्रशेषमिति** ॥ भेदव्यपदेशाच्चेतरइत्यंशं ॥ **अन्यमीशामिति** ॥ अन्योमार्गइत्यु
क्तेप्रसिद्धमार्गादन्यत्वप्रतीतिवादितिभावः ॥ ॐ **रूपोपन्यासाच्च** ॐ ॥ **रुग्मवर्णमिति** ॥ रुग्मरूपाभिधानाच्चाद
श्यत्वादिगुणकोविष्णुरेवेत्यर्थः ॥ पश्यतीति पश्यइत्याशयेनोक्तंद्रष्टेति तदाविद्वान्पुण्यपापेविधूयनिरंजनः परमंसा
म्यमुपैतीतिशेषार्थोक्त्याकांक्षांपूरयति ॥ **तदेति** ॥ पुण्यनाशस्यापुरुषार्थत्वादाह ॥ **अनिष्टपुण्यमिति** ॥ अपरोक्ष
ज्ञानात्पूर्वभाविपुण्यंद्विविधं काम्यमकाम्यंच तत्राकाम्यमपरोक्षज्ञानायभवति । काम्यंचाद्विविधं । इष्टमनिष्टंच । तत्रेष्टमप्रा
रब्धमपिननश्यति । इष्टनाशस्यापुरुषार्थत्वात् अनिष्टंतुनश्यतीति चतुर्थएवोत्तरत्रस्पष्टं पुण्यपापेविधूयेत्यनेनपौनरुक्त्य
वारणायनिरंजनशब्दार्थमाह ॥ **निर्लेपइति** ॥ ज्ञानोत्तरकालीनानिष्टपुण्यपापलेपरहितइत्यर्थः ॥ **पूर्णेति** ॥ योग्य

SGDF
Sri Gargeshwari Digital Foundation

तानुसारेणेदं । एतेभ्यःविश्वादिभ्यः । अभ्यचीकल्पत् दत्तवान् विशेषेणविश्वादिगतरूपापेक्षया भाष्ये ॥ अतएतादि
ति॥ अतःदेवादिरूपाणांशुद्धत्वाभावादेतच्छुद्धशुक्लादि एतद्रूपं एतस्यहरेरूपमित्यर्थः ॥६॥ अन्यत्रप्रसिद्धेति ॥ नचसू
त्रभाष्ययोरस्याग्नाविष्णोःसाधारण्योक्त्योभयत्रप्रसिद्धत्वमितिवाच्यं । वैश्वानरशब्दीयान्यत्रप्रसिद्धिसर्वगतत्वाख्यवि
ष्णुलिंगयोरुभयोरपिनिरवकाशत्वेनतुल्यबलत्वाभिप्रायेणैवतत्रसाधारण्योक्त्योभयत्रप्रसिध्यभिप्रायेणतदनभिधानादि
तिभावः॥ वैश्वानरनाम्नइति ॥ नचविश्वजीवांतरत्वाद्यैर्लिंगैरित्यणुभाष्येऽस्यलिंगत्वोक्त्याकथंनामत्वमितिवाच्यं
तस्यसिद्धांतेवैश्वानरशब्दस्ययौगिकत्वप्रदर्शनार्थावयवार्थकथनएवतात्पर्येणलिंगत्वकथनेतात्पर्याभावात् अन्यथावैश्वा
नरत्वाद्यैरितिब्रूयादितिभावः । पादसंगत्यर्थमाह ॥ पाचकत्वाद्यनेकलिंगसमन्वयसिध्यर्थइति ॥ यद्यपिपाच
कत्वंकर्मेतिवक्ष्यति तथापिलिंगत्वमप्यस्तीतिइयमुक्तिः ॥ अभिविमानपदेनेति ॥ नचप्रादेशत्वमात्रोक्तिविरोधः
व्योमवच्चेतिवक्ष्यमाणत्वात् । तेजोभूतंभूताग्निः । प्रसिद्धितः लौकिकवैदिकप्रसिद्धितः । तदेवक्रमेणोपपादयति ॥ श्रुते-
रित्यादिना ॥ वैदिकेति ॥ वेदप्रसिद्धोयोयंविद्याभेदव्यवहारः इत्यंवैश्वानरविद्यानेयमित्यादिरूपस्तस्माद्विरोधा
दित्यर्थः । देवताद्वंद्वेचेत्याङ्गादेशेऽग्नावैष्णवंचरुमित्यादिवदग्नाविष्णोरित्युपपन्नं ॥ ॐ वैश्वानरःसाधारणशब्द-
विशेषात् ॐ ॥ वैश्वानरमुपास्तेत्युक्तवैश्वानरोविष्णुरेव । अग्निर्विष्णुसाधारणवैश्वानरशब्दस्यात्मशब्देन
विशेषणादित्यर्थः । वैश्वानरशब्दस्यविष्णुपरत्वसंभवादित्यन्वयः । कुतइत्यतउक्तं ॥ आत्मशब्दसामानाधि
करण्येनेति ॥ आत्मानंवैश्वानरमितिसामानाधिकरण्येनेत्यर्थः । तस्याप्यन्यपरत्वंकिंनस्यादित्यतउक्तं ॥ अ-
न्यत्रानवकाशेति ॥ कतइत्यतउक्तं ॥ आत्मशब्दइति ॥ ॐ स्मर्यमाणमनुमानंस्यादिति ॥ ॐ ॥

SGDF
Sri Gargeshwari Digital Foundation

इत्यहंवैश्वानरोभूत्वेत्येवंस्मर्यमाणंगीतास्मृत्युक्तंविष्णोरेववैश्वानरत्वमेतच्छ्रुत्युक्तवैश्वानरस्य विष्णुत्वस्यानुमानमनुमापकं । समाख्यारूपेणसाधकंस्यादित्यर्थः ॥ **समाख्यानादितीति** ॥ निर्णीतस्थळेसमानोक्तिरूप समाख्यायाइदंवाक्य-मेतत्परंएतत्समाख्यावत्वादित्यनुमानरूपेणवाक्यतात्पर्यनिर्णायकत्वादितिभावः ॥ **इतिस्मर्यमाणेति** ॥ स्मृतेर्बुद्धि-स्थत्वादितिभावः ॥ **ॐ शब्दादिभ्योंतःप्रतिष्ठानान्नेतिचेन्नतथादृष्ट्युपदेशादसंभवात्पुरु षविधमपिचै-नमधीयते ॐ** ॥ अग्न्यादिशब्दात्आदिपदोक्तहोमाधिकरणत्वाद्यग्निलिंगेभ्यः अंतःप्रतिष्ठानात्अंतः प्रविश्यपचन रूपाग्निव्यापाराच्च वैश्वानरोग्निरेव नविष्णुरितिचेन्न तेषांहरौसावकाशत्वात् । कथं अग्न्यादिनामलिंगकर्मवत्वेनरू पेण दृष्ट्युपदेशात् विष्णोरूपासनोपदेशात् असंभवात् कोनआत्माकिंब्रह्मेत्युपक्रमोक्तब्रम्हशब्दस्याग्नावसंभवाच्च नासौवै श्वानरः । अपिचमूर्धैवसुतेजाइत्यादिनाछंदोगाः एनंवैश्वानरंपुरुषविधंशीर्ष्णोद्यौःसमवर्ततेति पुरुषमूक्तोक्तगुणवंतमधी यतेप्रतिपादयंति अतस्तत्समाख्याबलादपिविष्णुरेववैश्वानरोनाग्निरित्यर्थः । समानाधिकृतत्वंसामानाधिकरण्यं ऋचिऋ ग्वेदे वैश्वानरेश्रूयतइतिसंबंधः ॥ **गार्हपत्याद्यंगत्वमिति** ॥ वैश्वानरस्यगार्हपत्याग्निर्हृदयं अन्वाहार्यपचनाग्निर्मनः आहवनीयाग्निरास्यमितितदर्थादितिभावः ॥ **अग्निकर्मचेति** ॥ अस्यलिंगत्वेपिब्राह्मणपरिव्राजकन्यायेनपृथगुक्तिः ॥ **अयमग्निरिति** ॥ योयंप्रसिद्धोंतःपुरुषेपुरुषस्यांतर्वर्तते अयमग्निर्जाठराग्निस्छोभगवान्वैश्वानरःविश्वगुणत्वाद्वैश्वः आसम्यङ्नरीयतेनक्षीयतइत्यानरःवैश्वश्चासावानरश्चेतिवैश्वानरः तस्यव्यापारमाह ॥येनेति॥यदिदंप्रसिद्धंपुरुषैरद्यते इदमन्नंयेनपच्यतइत्यर्थः ननुछांदोग्यवैश्वानराविचारपरेऽस्मिन्नधिकरणेबृहदारण्यकादिवाक्योदाहरणंकथमित्यतआह ॥ **अत्रेति** ॥ अत्रसूत्राणांविश्वतोमुखत्वादितिभावः ॥ **समाख्यारूपेणेति** ॥ तत्प्रयोजनंचविष्णुपक्षवदग्निपक्षेस-

SGDF Sri Gargeshwari Digital Foundation

माख्यास्तीतिभावः ॥ **मूर्धानंदिवइति** ॥ मूर्धानंदिवोऽरतिंपृथिव्यावैश्वानरमृतआजातमग्निं । कविंसम्राजमातिथिंज
नानामासन्नापात्रंजनयंतदेवाइतिमंत्रस्येत्यर्थः । दिवइत्यादिषष्ठ्यर्थोजन्यजनकभावइत्याशयेनाह ॥ **दिवःकारण-**
भूतेत्यादि ॥ **जनानोसम्यग्ज्ञानायेति** ॥ जनानामित्येतदृतआजातमित्यत्रापिसंबध्यतइत्युक्तंभवति ॥ सम्य
ङ्नित्याङोर्थः अरतिशब्दस्यपादामिति ऋतइतिसप्तम्यंतस्यज्ञानायेति थशब्दस्यान्नमिति असन्नित्यस्यमुखमितिचव्या
ख्यानिक्रमेणसमर्थयति ॥ **गतिसाधनत्वादित्यादिना** ॥ लोकेगमनेनारतिदर्शनाद्रतिविरुद्धगतिसाधनत्वात्पादो
अरतिशब्दार्थइत्यर्थः । यद्वाकरणसाधनादृगतावित्येतस्मादतिप्रत्ययेगुणेचसतिनिष्पन्नोरतिशब्दःपादवाचकइत्यर्थः
॥ **तादर्थ्यमिति** ॥ चर्मणिद्वीपिनंहंतिदंतयोर्हंतिकुंजरमित्यादाविवेतिभावः इतिवाक्यार्थइतिवाक्यादवगंतव्यइति
संबंधः तथाहि तस्माद्वैश्वानरज्ञानस्यसर्वपापक्षयहेतुत्वादेवएवंवित् उक्तरीत्यावैश्वानरज्ञानी यद्यपिचांडालायस्मरणा
योग्यायापिस्वोच्छिष्टंदद्यान्नतत्तस्यपापहेतुः किंतुतद्दत्तमुच्छिष्टमस्यचंडालस्यांतर्यामिणिवैश्वानरेआत्मन्येवहुतंस्यादिति
हिछांदोग्यवाक्यार्थः तदनुसारेणवैश्वानरेतत्हुतंभवतीत्यस्यापि यदिवैश्वानरज्ञानी यस्मैकस्मैचिदन्नंदद्यात्तर्हितत्तदंतर्ग
तवैश्वानरएवहुतंभवतीतिव्याख्यानंकार्यमिति ॥ छंदोगवाक्यस्थभक्तशब्दार्थमाह ॥ **अन्नमिति** ॥ ततश्चतत्तदाभोजन-
वेलायांयद्भक्तमन्नंप्रथममास्यंप्रत्यागछेत्तद्धोमीयंहोमद्रव्यमितितद्वाक्यार्थः । योषितंस्त्रियं वैदिकाः वेदानुकूलग्रंथाःवचना
त् तैतरीयभाष्यं । वाक्यांतरस्ययोषितमित्यादेः योर्थइतिअंगारसदृशीनारीघृतकुंभसमःपुमानित्यादिप्रमाणांतरसिद्धा
ग्निसादृश्यरूपार्थेत्यर्थः प्रकृतंश्रुत्यर्थैक्यायस्वहृदयइत्युक्तिः । श्रुतौगुणाःज्ञानादयः धर्माःसर्वज्ञत्वादयः अरमित्यस्यालमि
त्यर्थः रलयोरेकार्थत्वात् । अतएवतत्प्रदीपेरमित्यस्यसम्यगित्यर्थइत्याभिहितं आरभ्यउपक्रम्य अधीतत्वेनपठितत्वेन

SGDF
Sri Gargeshwari Digital Foundation

शीर्ष्णः शिरसःसकाशात् समवर्तत अजायत प्राणात्श्वासात् तद्विधंतत्प्रकारं ॥ **मूर्धैवेति** ॥ सुतेजाःशोभनकांतिमान् द्युलोकःमूर्धास्वसमाननामवद्भगवच्छिरसोजातः विश्वरूपः सर्वरूपातिदर्शनाद्विश्वरूपाख्यः सूर्यश्चक्षुःस्वसमाननामोपेतभगवच्चक्षुषोजातः पृथक्विलक्षणोमार्गोयस्यासौवायुःप्राणः स्वसमाननामोपेतप्राणाज्जातः पृथ्वीपादौस्वसमाननामोपेतभगवत्पादजातेत्यर्थः । ननुसमाख्यासमुच्चयोपक्षीणचशब्दस्यकथंप्रसिद्धिसूचकत्वमित्यतआह ॥ **अपिपदेनेति** ॥ **उभयेति** ॥ प्रकरणसमाख्यारूपोभयेत्यर्थः ॥ **परोविलक्षणइति** ॥ तेननपरमइत्यनेनपुनरुक्तिरितिभावः ॥ **आदिपदेनेति** ॥ सकलवेदतंत्रपुराणादिष्वित्यत्रत्यादिपदेनेत्यर्थः तदभेदः द्युभ्वाद्यभेदः ॥ ॐ **अतएवनदेवताभूतंच** ॐ ॥ आत्मशब्दादिहेतोरेवाग्निदेवतातेजोभूतंचवैश्वानरोनभवतीत्यर्थः ननुवैश्वानरशब्दसमन्वयस्यैवप्रकृतत्वादग्न्यादिशब्दग्रहणमनर्थकमित्यतआह ॥ **अत्राग्न्यादिग्रहणमिति** ॥ अग्निशब्दादित्यशब्दयोर्ग्रहणमित्यर्थः ॥ ॐ **साक्षादप्यविरोधंजैमिनिः** ॐ ॥ साक्षात् अन्यवाचकत्यागेन ब्रह्मणोवैश्वानरादिशब्दवाच्यत्वेप्यन्यत्रव्यवहाराविरोधंजैमिनिराहेत्यर्थः । नाग्न्यादिवाचकाःपरममुख्यवृत्या ॥ किंज्ञानिप्रसिद्धिविरोधउताज्ञानिनां आद्य आह ॥ **अनन्ययोगेनेति** ॥ अन्यवाचकत्वंविनेत्यर्थः । द्वितीयेत्वाह ॥ **तदन्यत्वेत्विति** ॥ **नतद्विरोधइति** ॥ ज्ञानिप्रसित्धेरौपचारिकत्वादज्ञानप्रसिद्धेरज्ञानमूलत्वेनतद्विरोधस्याकिंचित्करत्वादितिभावः । भाष्येअवच्छिन्नानिपरिछिन्नानि ऊरीकृत्यअंगीकृत्यग्रहादिवत् यथामहागृहात्परिछिन्नान्यवांतरगृहाणिमहानसादिशब्दैर्व्यवह्रीयंतेतथेत्यर्थः । प्रसित्याकाशोक्तेःप्रकृतासंगतत्वादाह ॥ **ज्ञानेति** ॥ आकाशवद्ज्ञानस्यापरिछिन्नत्वादेवमुक्तिः ॥ **अनादित्वादिति** ॥ वैदिकत्वादेवेतिभावः ॥ ॐ **अभिव्यक्तेरित्याश्मरथ्यः** ॐ ॥ अग्न्यादिसूक्तादिभिः ब्रह्मोपास्तावग्न्यादिष्वे

SGDF Sri Gargeshwari Digital Foundation

वतस्याभिव्यक्तेरग्न्यादिसूक्तादिनियमःसंभवतीत्याशमरथ्योमन्यतइत्यर्थः । अव्यक्तस्यकथंव्यक्तिरित्यतउक्तं ॥ स्वेच्छयेति ॥ इच्छारूपप्रसादेनेत्यर्थः ॥ ॐ अनुस्मृतेर्बादरिः ॐ ॥ तत्तत्सूक्ताद्युपासकैरग्न्यादिष्वेवब्रह्मणोनुस्मृतेध्यातत्वात्तत्तत्सूक्तादिव्यवस्थोतबादरिर्मन्यतइत्यर्थः ॥ प्रतिपत्तव्येति ॥ ध्यातव्येत्यर्थः ॥ ॐ संपत्तेरितिजैमिनिस्तथाहिदर्शयति ॐ ॥ अग्न्यादिसूक्ताद्युपासकानामग्न्यादिप्राप्तेर्निमित्तात्तत्तत्सूक्तादिनियमइतिजैमिनिर्मन्यते । तदुपास्तौतत्प्राप्तिः कुतइत्यतउक्तं ॥ तथाहिदर्शयतीति ॥ हियस्मात्तंययायथेतिश्रुतिर्जैमिनेर्मतंयथातथादर्शयतीत्यर्थः ॥ मंदाशंकेति ॥ संपत्तेरितिशब्दार्थंजानतांउक्तशंकानुदयादितिभावः । उपासतइतिबहुवचनात्प्राप्नुवंतीतिबहुवचनोक्तिः । ननुयथासाक्षादप्यविरोधंजैमिनिरितिसूत्रेलौकिकव्यवहारस्यौपचारिकत्वमंगीकृत्यअग्न्यादिशब्दानांभगवद्वाचकत्वंसमर्थितं । तथासूक्तादिव्यवहारस्याप्युपचरितत्वमंगीकृत्यसूक्तानांविष्णुपरत्वंव्यवस्थाप्यतां किमनेनैतैःसूत्रैःसूक्तादिव्यवहारस्यमुख्यार्थत्वसमर्थनेनेत्यतआह ॥ अत्रव्यवहारस्येति ॥ सूक्तादिविषयमित्यर्थः । प्रागुक्तैवानुपपत्तिः नापिव्यवहारार्थत्वेनान्यथोपपत्तिरनादित्वादितिप्रागुपपत्तिरुक्तैवनपुनर्वक्तव्येत्यर्थः । अंतरंगानुपपत्तिंचाह ॥ श्रुतेति ॥ तत्रद्वितीयविद्यापरिज्ञानेनब्रह्मप्राप्तेरुक्त्याब्रह्मणएवतद्विद्याविषयत्वंनाग्नेरितिवदतान्यज्ञानेनान्यप्राप्तेरनभ्युपगमादित्यर्थः ॥ ॐ आमनंतिचैनमस्मिन् ॐ ॥ एनंविष्णुंअस्मिन्नग्नौयोग्नौतिष्ठन्नित्यादिश्रुतयआमनंतिप्रतिपादयंतीत्यर्थः । व्यावृत्तिसमुच्चायकः एतदाशंकानिरासकसमुचितस्यैवोक्तहेतोः स्वार्थसाधकत्वादितिभावः ॥ ७ ॥

इतिश्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यांशर्करायांश्रीनिवासविरचितायांप्रथमाध्यायस्यद्वितीयःपादः ॥ ॥ श्रीकृष्णार्पणमस्तु हरयेनमः श्रीरामकृष्णः ॥ ॥ ॥ ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीहनुमतेनमः ॥ **श्रुत्यादिप्रसिद्धेति** ॥ अनेनोभयश्रुतिलिंगादिभिस्तुल्यप्रसिद्धिमत्त्वमुभयत्रप्रसिद्धिमत्त्वमितिसूचितं । एतेनान्यत्रप्रसिद्धपृथिवीशरीरत्वसाहित्यादंतर्यामित्वस्यान्यत्रप्रसिद्धत्ववदन्यत्रप्रसिद्धजायमानत्वादिसाहित्यानुभ्वाद्यायतनत्वमप्यन्यत्रप्रसिद्धंस्यादितिनिरस्तं समाख्याश्रुत्यादितौल्याभावस्यान्यत्रप्रसिद्धलक्षणांतर्गतत्वेन तत्तौल्यवतोस्यान्यत्रप्रसिद्धत्वाभावात् । उभयत्रप्रसिद्धत्वेनैवविष्णुवाचित्वमपिसिद्धमेवेत्यतउक्तं ॥ **विष्ण्वैकवाचित्वमिति** ॥ श्रुत्यादिभिरन्यत्रप्रसिद्धत्वेविष्ण्वैकवाचित्वप्रतिपादनमशक्यमित्यतउक्तं ॥ **प्रबलहेतुभिरिति** ॥ अत्रास्तिशास्त्रादिसंगतिरित्यन्वयः ॥ **रुद्रइति** ॥ रोगद्रावकत्वेनरुद्रनामाभगवान्सर्वलोकाधारोवावप्रसिद्धइत्यर्थः ॥ **वायुनेति** ॥ हेगौतमस्यूत्तमत्रसर्वजगदितिसूत्रंतेनज्ञानादिमत्वाद्वायुशब्दितेनभगवतायंभूलोकः परोंतरिक्षादिलोकः सर्वाणिभूतानिचसंदृब्धानिसंगतानिधृतानीत्यर्थः ॥ **आकाशइति** ॥ अतीतानागतवर्तमानंयदाचक्षतेविद्वांसस्तत्सर्वमाकाशेभगवदाश्रिताकाशाख्यप्रकृतौ ओतप्रोतंसूत्रेपटवत्अत्यंतमाश्रितइत्यर्थः । लोकाःसप्तलोकाः लोकिनस्तदभिमानिनः अलोकाःवैकुंठादयः अलोकिनस्तद्गतामुक्ताः । उक्तं अथपराययेत्यनेन । मोक्षायभगवद्दानंकुतइत्यतउक्तं ॥ **अमृतस्येति** ॥ एषभगवानमृतस्यमुक्तवर्गस्यसेतुरिवसेतुराश्रयइत्यर्थः । अत्रद्युभ्वाद्यायतनस्यमोक्षसाधनविद्याविषयत्वात्त्यापरविद्याविषयत्वमुच्यते । मोक्षसाधनविद्यायाएवपरविद्यात्वादितिभावः । इत्यादिना समाख्यावाक्येन ॥ **प्राणानांग्रंथिरिति** ॥ मेत्यस्यावृत्तिः । हेविष्णोरुद्रशब्दवाच्य त्वंप्राणानामिंद्रियाणांग्रंथिः ग्रंथ्यतेअस्मिन्निति ग्रंथिराश्रयोसि त्वमंतकःसंहर्तासन्मामांमाविश नप्रविशेत्यर्थः ॥ **प्राणेश्वरइति** ॥ प्राणानामिंद्रियाणामीश्वरः कृत्यात्मकेचर्मात्मकेदेहेनियामकतयावसतेतिष्ठतीतिकृत्तिवासाः । नाकंसुखंपिबतीतिपिनाकीमुक्ताःतेतस्यसंतीतिपिनाकीमुक्ताश्रयइत्यर्थः ॥ **रुद्रलिंगादिति** ॥ संहर्तृत्वगजचर्मांबरवत्त्वपिनाकचापवत्त्वादीनांतत्रैवप्रसिद्धत्वादितिभावः । किंचरुद्रस्यसर्वाधारत्वप्रतिपादकपाशुपताद्यागमेनापितस्यसर्वाधारत्वंसिध्यति । नचतस्याप्रामाण्यं । विमतंवाक्यंप्रमाणंरुद्रवाक्यत्वात्दृष्टफलविधायकरुद्रवाक्यवदितितस्यप्रामाण्यानुमानादित्याह ॥ **दृष्टफलेति** ॥ प्रत्यक्षसंवादिफलाभिधायकेत्यर्थः । विमतंप्रमाणंकापिलवाक्यत्वात्दृष्टफलाभिधायककापिलवाक्यवदित्यनुमितप्रामाण्यापेतकापिलागमेनापिप्रधानस्यसर्वाश्रयत्वसिद्धिरित्याह ॥ **पूर्ववदिति** ॥ **अराइवेति** ॥ रथनाभौचक्रे अराःदलानीवयत्रशरीरेनाड्यःसंहताःसंबद्धाः तत्रशरीरेसएषः सर्वजीवनियामकत्वेनसर्वजीवहृदयस्थितोविष्णुःस्वयमेकएवस्वेच्छयैवबहुधाजायमानोविश्वतैजसादिरूपेणबहुधाभवन्शरीरांतश्चक्षुरादिस्थानेषुसंचरतीत्यर्थः ॥ **जीवत्वादेवेति** ॥ जीवप्राणधारणइतिधातोरितिभावः ॥ **प्रसिद्धेरिति** ॥ प्राणान्प्रथक्प्रथगेवसन्निधत्तइत्यादाविति शेषः ॥ **तथेति** ॥ जीवेशाभेदेनयथेशलिंगंजीवेसंभवतितथेत्यर्थः । कारणं उपादानं व्यावहारिकमात्रस्यब्रह्मोपादानकत्वंवदतोऽद्वैतिनोमतेजीवस्यापिव्यावहारिकत्वान्नानुपपत्तिः ॥ ॐ **द्युभ्वाद्यायतनंस्वशब्दात्** ॥ ॐ ॥ यस्मिन्द्यौरित्यादिद्युभ्वंतरिक्षाद्याश्रयत्वेनोक्तंब्रह्मैव नरुद्रादिः कुतः जानथआत्मानमितिस्वशब्दपर्यायात्मशब्दसद्भावादित्यर्थः । विषयवाक्येस्वेतिशब्दाभावात्भाष्येआत्मशब्दादित्युक्तमित्याशयेनाह ॥ **स्वशब्दपर्यायेति** ॥ उभयोरपिसाक्षाद्विष्णुस्वरूपवाचकत्वादतएवचतुर्मुखस्यात्मभूःस्वयंभूरितिनामेतिभावः । सूत्रेआत्मशब्दादित्युक्तौतस्यापिविष्णुपरत्वंपृथग्वक्तव्यंतच्छब्दादित्युक्तौचशब्दविशेषप्रतीतिर्नस्यादतस्तदुभयलाभायस्वशब्दादित्युक्तं एवमुक्तौहिउक्तिवक्रत्वाद्वैय्यर्थ्यायस्वस्यावर्णोरेवशब्दः स्वशब्दइत्यपिविग्रहस्यविवक्षणीयत्वादसाधारण्यंज्ञापितंस्यादेतदेवाभिप्रेत्योक्तं

SGDF Foundation

तत्वप्रदीपे विष्णोःस्वरूपस्यैवसाक्षाद्वाचकोह्यात्मशब्दइति ॥ ॐ **मुक्तोपसृप्यव्यपदेशात्** ॐ ॥ भावप्रधानोयं । अमृतस्यैषसेतुरितिमुक्तैःप्राप्यांतरशून्यत्वेसतिप्राप्यत्वव्यपदेशादात्मशब्दोनामुख्यार्थइत्यर्थः । मुक्तानांबहुत्वादाह ॥ **जाताविति** ॥ भाष्येविश्वात्मानंविश्वस्वामिनंद्वितीयांतानांतद्विश्वमुपजीवंतीतिपूर्वेणान्वयः । प्रकृतोपयोगादाह ॥ **पराणामिति** ॥ **अन्यस्यापीति** ॥ उदाहृतवाक्येष्वन्यानिषेधादितिभावः ॥ **बहुनेति** ॥ तत्रश्वेतद्वीपस्थभगवत्प्राप्तिंविनाप्रकारांतरनिषेधात्तस्यैवमुक्तप्राप्यत्वसिद्धिरितिभावः । ननुसर्वेषांश्वेतद्वीपगमनमयुक्तं । केचिदत्रैवमुच्यंते नोक्रामंतिकदाचन । केचित्स्वर्गेमहर्लोकेजनेतपसिचापरे । केचित्सत्येमहाज्ञानाः गच्छंतिक्षीरसागरमित्यत्र महाज्ञानिनामेवक्षीरसागरगतश्वेतद्वीपगमनोक्तेः योग्यत्वंचापेक्षितमितिगीताभाष्येश्वेतद्वीपगमनेपियोग्यत्वोक्त्यासर्वेषांतदभावादितिचेन्न । उदाहृतप्रमाणभाष्ययोःश्वेतद्वीपनिवासेमहाज्ञानयोग्यतायाः प्रयोजकत्वोक्त्यासर्वेषांतद्गमनमात्रांगीकारेपिविरोधाभावात् । स्फुटंचैतत्प्रमेयदीपिकायां वक्ष्यतिचात्रचतुर्थाध्यायेसकृच्छेतद्वीपगमनांगीकराद्योग्यत्वंचात्रापेक्षितमिति । एतत्तत्रनिवासायेतिगमयितव्यमिति ॥ ॐ **नानुमानमतच्छब्दात्** ॐ ॥ अनुमानसिद्धप्राणाण्यकागमकल्पितरुद्रप्रधानाख्यंनात्रसर्वाधारतयोच्यते भस्मधरत्वत्रिगुणत्वादितदुभयसंबंधिशब्दाभावादित्यर्थः ॥ **विप्रतिपन्नेति** ॥ रुद्रादेः सर्वाश्रयत्वाद्यभिधायीत्यर्थः ॥ **प्रतिपक्षेति** ॥ नन्वत्रफलविसंवादिवाक्यत्वंहेतुरुतरुद्रादिवाक्यत्वं । नाद्यःअन्यतरासिद्धेः द्वितीयेप्रकरणसमत्वेनप्रतिपक्षायोगः । साध्यविपरीतसाधकहेत्वंतरस्यैवप्रतिपक्षत्वादितिचेन्न । प्रतिपक्षशब्देनप्रतिरोधिमात्रग्रहणेनप्रकरणसमस्यैवात्रोक्तेः ॥ **अतिप्रसंगेति** ॥ दृष्टफलाभिधायिप्रतारकवाक्यदृष्टांतेनप्रतारकवाक्यत्वेनहेतुनाविप्रतिपन्नप्रतारकवाक्यप्रामाण्यसाधनप्रसंगरूपेत्यर्थः अभाषितं । भाष्ये अनुक्तं । अन्य

SGDF Sri Gargeshwari Digital Foundation

त्रविष्णुतत्त्वनिर्णये। प्रकृतिपदेन अन्यत्रोक्तेन ननुरुद्रादिशब्दस्योभयत्ररूढिसाम्येपिनिरवकाशविष्णुलिंगबलान्निश्चयोप-
पत्तिरित्यतआह॥ नहिश्रुत्यंतरेति॥भाष्ये ईशनान्नियमनात्महत्वतःउत्तमत्वात्सागरादित्यनंतरंपिनाकइत्युच्यतइ-
तिशेषः। शंरोधनाद्दैत्यानांमुखनिरोधात् । वस्ते वसति विरेचनात्। प्रलयेस्वोदरप्रविष्टजगतःसृष्टौबहिर्निसरणात् बृंहणात्
पूर्णत्वात् गतिः वाच्यतयाश्रयइत्यर्थः ॥ ॐ प्राणभृच्च ॐ ॥ आत्मशब्दमुक्तप्राप्यत्वादित्तच्छब्देभ्यःजीवमुख्यप्राणौ
चनसर्वाश्रयावित्यर्थः॥ ॐ भेदव्यपदेशात् ॐ ॥ अन्यमीशमितीहैवजीवब्रह्मभेदव्यपदेशात् नतयोरैक्यमित्यर्थः
॥ ॐ प्रकरणात् ॐ ॥ परंविद्याविषयवस्तुनएवात्रारभ्याधीतत्वेनास्यब्रह्मप्रकरणत्वादत्रत्येशोब्रह्मैवेत्यर्थः
॥ ॐ स्थित्यदनाभ्यांच ॐ ॥ स्थितिःकर्मफलोपजीवनंविनावस्थानं अदनंतदुपजीवनंताभ्यांजीवब्रह्मणोर्नैक्य-
मित्यर्थः।कर्मफलभोगानंगीकारेगुहाधिकरणविरोधइत्यतआह॥नत्विति॥ क्रमोल्लंघनमिति॥ तत्रादनस्यैवप्रथममु-
क्तेरितिभावः ॥ सत्योमिथ्यावेति ॥ व्यावहारिकत्वस्यव्यवहारनिर्वाहकत्वस्यव्यवहारनिर्वाहकत्वव्यवहारकाले-
प्रतीयमानत्वसाधारण्यादितिभावः ॥ व्यावहारिकत्वंतदिति ॥ व्यावहारिकावेदनलक्षणप्रामाण्यमित्यर्थः । नतु-
प्रामाण्येव्यावहारिकत्वंविवक्षितं तथात्वेतत्रावेदनलक्षणप्रामाण्यस्यापिव्यावहारिकत्वेनाविशेषप्रसंगादितिध्येयं वाचो-
युक्तेः वाक्प्रयोगस्य ॥ नदोषइति ॥ मिथ्याप्रतिपादकत्वमेवाप्रामाण्येप्रयोजकमितिभावः वैय्यर्थ्यादनुवादस्य
॥ निषेधोस्तीति ॥ भेदाभेदयोरन्यनिषेधरूपत्वादितिभावः अयंद्वासुपर्णेत्यनेनक्रियमाणः ॥ अस्तीति ॥ आनं-
दमयनयरीत्येतिभावः अनुमानं भेदोमिथ्याभेदत्वादित्यादि भेदस्यमिथ्यात्वंकिंप्रमाणबलादंगीक्रियते उततत्सत्यत्वे-
प्रमाणाभावात् ॥ आद्यंनिराकरोति नहीत्यादिना द्वितीयंनिराकरोति ॥ नचतत्सत्यत्वमिति ॥ स्वरूपेति ॥

GSDF
Sri Gargeshwari Digital Foundation

भेदस्वरूपेत्यर्थः ॥ **तस्यवैय्यर्थ्यादिति** ॥ विषयसत्यत्वसिद्धेःप्रमाणफलत्वादितिभावः । ननुमायामात्रमिदंद्वैतमित्यादिश्रुतेर्भेदमिथ्यात्वप्रतिपादकत्वात्कथंतदभावइतिचेन्न । मायेतिभगवत्प्रज्ञासैवमानत्राणकर्त्रीयस्यमायामात्रमित्यन्यत्राचार्यैस्तस्याःसम्यग्व्याख्यातत्वात् । तदेतदाह ॥ **अलमिति** ॥ १ ॥ **श्रुत्येति** ॥ समाख्यारूपश्रुत्येत्यर्थः । भूमन्भूयःशब्दयोःपर्यायत्वादितिभावः । स्थानांतरश्रुतसमाख्यायाः अत्रैवश्रुतोपक्रमतोदुर्बलत्वेपिप्राबल्याद्यविवेकेनसाधारणप्रयोजकत्वमुपपन्नं ॥ **योवैभूमेति** ॥ अनेनभूमाख्यनारायणस्यलक्षणमुच्यते योवैभूमापूर्णोनारायणाख्यस्तत्सुखं अनन्याधीनसुखरूपं । अस्यातिव्याप्तिंपरिहरति॥ **नाल्पइति** ॥ भूमप्रसादंविनानाल्पेमुक्तजातेसुखमस्ति । ततः किमित्यतआह ॥ **भूमैवेति** ॥ तस्माद्भूमैवानन्याधीनसुखरूपमित्यर्थः ॥ **नामवागादीति** ॥ वाग्वावनाम्नोभूयसी मनोवाववाचोभूयः संकल्पोवामनसोभूयान् चित्तंवावसंकल्पाद्भूयः ध्यानंवावाचित्ताद्भूयः विज्ञानंवावध्यानाद्भूयःबलंवाव विज्ञानाद्भूयः अन्नंवावबलाद्भूयः आपोवावान्नाद्भूयस्यः तेजोवावद्भ्योभूयः आकाशोवावतेजसोभूयान्स्मरोवावाकाशाद्भूयान् आशावावस्मराद्भूयसीत्येवंनामादिशब्दितोषास्वाहापर्जन्यमित्राग्निवरुणसोमप्रवाहानिरुद्धतैजसप्राणेंद्रोमारुद्रसरस्वतीनांतारतम्यमुत्क्रेत्यर्थः । अत्राशावसानमुत्क्राप्राणस्योत्तमत्वंचाभिधायेत्यनेनप्राणस्यभूमत्वेआशाशब्दितसरस्वत्युत्तमत्वरूपामुक्तिरुक्तेतिद्रष्टव्यं ॥ **तदुत्तममनुत्क्रेति** ॥ अस्तिभगवआशायाभूयइत्याशावावभूयोस्तीतितन्मेभगवान् ब्रवीत्वितिप्रश्नवत्प्राणोवावआशायाभूयानितिप्रत्युक्तिवच्चात्रप्राणादूर्ध्वमस्तिप्राणाद्भूय इतितन्मेभगवान्ब्रवीत्वितिप्रश्नस्यभूमावावप्राणाद्भूयानितिप्रत्युत्तरस्याप्यभावेनभूम्नः प्राणादनन्यत्वनिश्चयइतिभावः । आम्नातत्वात् पठितत्वात् ॥ **उत्क्रांतप्राणानिति** ॥ प्राणवत्पित्रादीन्प्रतियदिकश्चित्त्वंकारादिनाभृशंवदेत्तस्यपितृहंतृत्वादिनानिंद्यवचनयो

ग्यत्वमुत्क्राप्राणोत्क्रमणानंतरंतन्नेत्यनेनोच्यते । उत्क्रांतःप्राणोयेभ्यस्तेउत्क्रांतप्राणाःपित्रादयःतान्प्रति यदिसमासंसंकोचेनव्यतिषंविस्तरेणवाशूलेनदहेत् हत्वाभस्मीकुर्यात्तदाएनांपितृहासीत्यादिनैवब्रूयुरित्यर्थः ॥ **ॐ भूमासंप्रसादादध्युपदेशात् ॐ** ॥ योवैभूमेत्युक्तभूमाविष्णुरेव संप्रसादात् सम्यक्प्रसीदत्यनेनेतिसंप्रसादः पूर्णसुखंतदाभिधानात् । अध्युपदेशात् अधि नामादिसर्वोत्तमत्वेनव्यपदेशाच्चेत्यर्थः ॥ **विश्वशंभुवमित्यादि** ॥ ततश्चायंश्रुत्यर्थः अनंतमूर्धानंदेवंप्रकाशरूपंविश्वाक्षंअनंताक्षंविश्वशंभुवं । विश्वंचतत्शंचविश्वशंतद्भवत्यस्मिन्निति विश्वशंभुवंपूर्णसुखाश्रयं । विश्वं ज्ञानादिपूर्णः । नारायणंमुक्तसंघाश्रयं देवंस्वेच्छयाविहरंतं अक्षरंचतुर्विधनाशरहितं । परंपदं अत्यंतप्राप्यं । विश्वतः सर्वतः परमां परमश्चासौअश्वपरमा तं उत्तमं अकारशब्दवाच्यं नित्यं तद्विश्वमुपजीवतीत्यन्वयइति । यद्यपि परममित्येवद्राविडपाठः । तथापिपरमामित्यांध्रपाठोभाष्येउदाहृतः ॥ **विरोधादेवेति** ॥ उभयोरपिस्वेतरसर्वोत्तमत्वे अन्योन्यापेक्षयोत्तमत्वप्राप्त्याव्याघातादित्यर्थः । तर्हिभूमाकिंविष्णोरन्यइतितत्राह ॥ **अनंतरमिति** ॥ प्राणानंतरमित्यर्थः । न्यायविवरणानुसारेणपक्षांतरमाह ॥ **अस्तुवेति** ॥ नचतदुत्तममनुत्क्राभूम्नःआम्नानात्तस्यैवभूमत्वमितिवाच्यं । अनुक्तेरेवाभावादित्यतआह ॥ **एषतुवाअतिवदतीति** ॥ यःसत्येनातिवदतीत्यादिपदोक्तं । योधिकारीसनिर्दोषश्चासौनियामकश्चेतिसत्योविष्णुस्तेनअतिवदतितमतिशयेनातिवदतीतियावत् सएषःतुप्राणातिवाद्यपेक्षयाविशेषेणातिवदति अत्युत्तमवस्तुवादीत्यर्थः । इत्यादिनाज्ञापकेनप्रश्नादीत्यादिपदेनसत्यंवावप्राणाद्भूयइतिप्रतिवचनग्रहः । प्रश्नाध्याहाराभावेएवंविजानन्नातिवादीभवतीत्याद्युक्तप्राणज्ञानिनः सकाशादेषतुवाअतिवदतीत्यादिनासत्याख्यभूमज्ञानिनस्तुशब्देनविशेषोक्त्ययोगादितिभावः ॥ **इत्यादिवदिति** ॥ तत्रैकस्याकाशशब्दस्यभूततदंतर्यामिपर-

PDF Foundation

त्ववदत्राप्युभयपरत्वमविरुद्धमित्यर्थः ॥ ॐ धर्मोपपत्तेश्च ॐ ॥ सएवाधस्तादित्याद्युक्तसर्वगतत्वादिधर्माणांवि-
ष्णावेवोपपत्तेश्चसएवभूमेत्यर्थः ॥ सएवेति ॥ सभूमैवाधोभागादिस्थितः सर्वगतत्वंसर्वसत्ताप्रदानायेत्युक्तं ॥ सए-
वेदंसर्वमिति ॥ सएवस्वतंत्रःइदंसर्वंतदधीनमित्यर्थः । यद्वाइदंसर्वमित्यत्रलिंगव्यत्यासेनायंसर्वइत्यंगीकृत्यसभूमा-
सर्वत्रसन्निहितत्वादयंपूर्णत्वात्सर्वइत्युच्यतइत्यर्थः यत्रेत्यनेनभूम्नोऽसदृशत्वमुच्यतेयत्रयस्याधीनंविनान्यंनपश्यति अ-
धिकारीसर्वमेवतदधीनंपश्यतिशृणोतिविजानातिवासभूमेत्यर्थः । जानन्नपिनारदोविशेषार्थज्ञानायस्थापनायचभूमाश्र-
यंपृच्छति ॥ सइति ॥ हेभगवःभगवन्सभूमाकस्मिन्प्रतिष्ठितः आश्रितः सनत्कुमारउत्तरमाह ॥ स्वेमहिम्नीति ॥
स्वेस्वकीये महिम्निसामर्थ्ये प्रतिष्ठित इत्यर्थः ॥ २ ॥ वाजसनेयके बृहदारण्यके ॥ तद्वाएतादिति ॥
हेगर्गीतियाज्ञवल्क्यस्यस्वभार्याप्रतिसंबोधनं । तदक्षरशब्दवाच्यंब्रह्म अदृष्टंअन्यैः साकल्येनद्रष्टुंनभवतिस्वयंतुद्रष्टृ एव-
मग्रेपियोज्यं । अन्येषामपिद्रष्टुत्वादिसद्भावात्किमनेनेत्यतआह ॥ नान्यदिति ॥ अतोक्षरादन्यत्स्वातंत्र्येणद्रष्टृनास्ति ।
एवमग्रेपि आकाशः प्रकृतिः नन्वक्षरशब्दस्य जडप्रकृतावपिसिद्धेः कुतोनतस्याः संदेहविषयत्वमित्यतआह ॥ द्रष्टृ-
त्वादीति ॥ प्रथमाप्रतीतेरिति ॥ सदेवसौम्येतिविषयवाक्येतदैक्षतेत्यश्रवणादितिभावः । मध्यममित्यक्षरत्रया-
पेक्षयोक्तिः । प्रशासने आज्ञायां विधृतौ विशेषेण धृतौ इत्यादेरित्यादिपदोक्तांस्मृतिमाह ॥ तथाचेति ॥ अक्षरम-
विनाशि । सूक्ष्मत्वादनिर्देश्यमदृश्यं अप्रसिद्धत्वादव्यक्तं सर्वत्रगंदेशतोव्याप्तं गुणबाहुल्यादचिंत्यं कूटेअव्याकृताकाशे
अभिमानित्वेनस्थितंकूटस्थं अचलं कदापिस्वपदादभ्रष्टं ध्रुवंनिर्विकारमित्यर्थः । इदंचचित्प्रकृतिपरमितितात्पर्येव्यक्तं ॥ ६२ ॥
असीदितिगीताभाष्योक्तस्मृतिः तमोभूतं तमोरूपं तमआसीत्तमसागूळ्हमग्रइतिश्रुतेः अप्रज्ञातंशब्देन अलक्षणं लौकिक-

CC-0. DF
Sri Gargeshwari Digital Foundation

चिन्हरहितं अतर्क्यं अनुमानागम्यं अनिर्देश्यंप्रत्यक्षेण प्रसुप्तमिवतदानींजगद्व्यापाराभावात् । अभिषूयमाणं अभिषवयुक्तं । ननुसोमपदोक्तचंद्रस्यकथंयज्ञेषुअभिषवणमित्यतआह ॥ लताभिमानित्वेनेति ॥ यथासोमोवैराजेत्यादौहूयमानभक्ष्यमाणसोमलताभिमानित्वेनचंद्रमसिहूयमानत्वभक्ष्यमाणत्वव्यपदेशस्तथात्रापिसोममभिषुणोतीतिवाक्यविहिताभिषवणयुक्तसोमलताभिमानित्वेन चंद्रेभिषूयमाणत्वव्यपदेशइत्यर्थः ॥ ॐ अक्षरमंबरांतधृतेः ॐ ॥ अक्षरंगार्गीत्युक्तपक्षरंब्रह्मैवअंबरांतधृतेः अंबरमाकाशशब्दितंश्रीतत्वं अंतंयस्यसर्वस्यजगतस्तदंबरांतंतस्यधृतेर्धारणादित्यर्थः । दिवःस्वर्गाद्वैकुंठाद्वाऊर्ध्वंउपरियदस्तिमहर्लोकादिकंब्रह्मांडखर्परबहिरावरणादिकंवा पृथिव्याः भूलोकात्पृथिवीसंबंधलोकाद्वाअर्वाक्अधोयदस्तितळादिकमंडोदकंवा अंतराऊर्ध्वार्वाक्शब्दवाच्ययोः पूर्वोक्त्योर्मध्येवर्तमानंयत्इमेप्रसिद्धेद्यावापृथिवीस्वर्गादिभूरादिकेभर्तासन्भ्रियमाणोबिभर्ति एकोदेवोबहुधानिविष्टःयदाभारंतंद्रयतेसभर्तुंपरास्यभारंपुनरस्तमेतीतिश्रुतिंव्याचष्टे ॥ एकोदेवइति ॥ भर्त्तेत्यस्यार्थोभर्तृत्वेनेति । श्रुतौपरास्य निरस्य ॥ प्राणस्येति ॥ तस्यचविष्णुत्वंप्रागेवसमर्थितमितिभावः । अधिअवर्धत अधिनिषेदुः । अवस्थिताबभूवुः ॥ ॐ साचप्रशासनात् ॐ ॥ साचधृतिःप्रशासनादक्षरस्याज्ञामात्रादुच्यते । अतश्चाक्षरंब्रह्मैवेत्यर्थः । आर्षशब्दार्थोअतिसमृद्धेति । तदावरणोतिफलितोक्तिः । भुवनस्यरेतइत्येतदावृत्याह ॥ भुवनस्यरेतिप्रदस्येति ॥ चतुर्भिरितिश्रुतिर्जन्मनयेव्याख्याता भाष्येहृदयंश्रयतइतिहृल्लयः प्रकृतोपयोगायाह ॥ धृतिहेतुरिति ॥ ॐ अन्यभावव्यावृत्तेश्च ॐ ॥ अन्येषांवस्तूनांभावानांस्थौल्यादीनांव्यावृत्तेश्चाक्षरंब्रह्मैवेत्यर्थः ॥ एतद्वैतादिति ॥ एतत्आकाशाश्रयत्वेनवक्ष्यमाणमक्षरशब्दवाच्यंब्रह्मेतितदेतल्लक्षणकं ब्राम्हणाःब्रह्मज्ञानिनःअभिवदंतिवै किंतल्लक्षणमित्यतआह ॥ अस्थूलमित्यादि ॥ प्राकृतस्थौ-

SGDF
Sri Gargeshwari Digital Foundation

ल्यादिरहितमित्यर्थः । अलोहितं लोहितोपलक्षितरूपमात्रशून्यं अछायंतेजोरूपत्वात् । अज्ञानरहितं असंगं निर्लेपं । अतेजस्कं वर्चोरहितं अप्राणं चक्षुश्रोत्रवाङ्मनोतिरिक्तज्ञानकर्मेंद्रियशून्यं । अमुखं तदुपलक्षितशरीररहितं । अमात्रं परिमितिशून्यं । नविद्यतेअंतरंयस्यतदनंतरं नविद्यतेबाह्यंयस्यतदबाह्यं इदमेवसर्वांतरं । बाह्यंचेतियावत् तर्ह्यप्राकृततमोवाय्वादिरस्तिकिंनेत्याह ॥ **तमोवाय्वादीनामिति** ॥ संगतानामित्यर्थः । उपलक्षणमेतत् सुधानुसारेणछायायाअपिसर्वात्मनानिवृत्तिर्द्रष्टव्या । एकवाक्यपठितशब्देष्वित्थंवैषम्याश्रयणमदृष्टचरमित्यतोत्रबृहद्भाष्योदाहृतस्मृतिमुदाहरति ॥ **अदुःखमसुखमिति** ॥ यथात्रासुखमित्यनेनबाह्यसुखनिषेधेपि अदुःखमित्यनेनदुःखमात्रनिषेधः तथात्रापीत्यर्थः । ननुपरमात्मनः सर्वथावायुरहितत्वेप्राणाद्वायुरजायतेतिऋचिप्राणः पृथक्वर्त्मेतिछंदोगेश्वसितंमातरिश्वेतिभागवतेचमुख्यप्राणस्यभगवत्श्वासजन्यत्वाभिधानंश्वासैजदलकत्रातमित्यादि द्वादशभागवतवाक्यंचकथंसंगच्छतइतिचेदुच्यते । नात्रश्वासरूपवायुनिषेधः क्रियते किंतुदेहारंभकस्यैव । आकाशसहपाठात् । नह्याकाशस्यदेहारंभकत्वेननिषेध्यत्वंविनाप्रकारांतरमस्ति श्वासश्चतत्स्वरूपभूतोस्त्येव । अतएवछांदोग्यभाष्ये । वाय्वादिप्राणशक्यंनयत्तत्कर्ताहरिर्यतः प्राणस्तेनप्रथग्वर्त्मेतिभगवत्प्राणस्यवाय्वादिप्राणाशक्यकार्यकर्तृत्वेनप्रथग्वर्त्मत्वमुक्तं । यद्वात्यागनिरोधाभ्यांसुखदुःखापादकास्पदादिश्वासतुल्योभयविधश्वासनिरोधोत्रक्रियते । एतदभिप्रायेणैवब्रह्मभाष्यबोधेप्राकृताप्राकृतोभयश्वासानिषेधेनैतच्छ्रुतिव्याख्यानंकृतं । ननुमध्यमाक्षरस्यापिअप्राकृतविग्रहवत्वेनप्राकृतस्थौल्यादिराहित्यसंभवात्कथमनेनविष्णुत्वनिश्चयइत्यतआह ॥ **मध्यमाक्षरस्येति** ॥ सापेक्षनिरपेक्षयोर्मध्येनिरपेक्षस्यैवग्राह्यत्वादितिभावः । अनेनप्राकृतस्थौल्यादिनिषेधेन॥**विष्णावेवमुख्यतेति** ॥ चतुर्विधनाशशून्यत्वेनाक्षरस्यप्रवृत्तिनिमित्तस्यतत्रैवपौष्कल्यादितिभावः ॥ ३ ॥

॥ **स्थानेति** ॥ अनेकप्रमेयप्रतिपादकमेकार्थेतात्पर्ययुक्तंस्थानं ॥ **कारणत्वसाम्येनेति** ॥ अत्रसदेवसौम्येदमग्रआसीदित्यत्रअग्रआसीदित्यनेनप्रतीतंमहदादिसकलकार्यप्रतिपूर्ववृत्तित्वरूपंकारणत्वमुभयत्रप्रसिद्धिद्योतकत्वेनततएवचसंदेहबीजत्वेनविवक्षितं । नतुतत्तेजोसृजतेत्यादिनोक्तं । तस्यप्रधानासंभावितेक्षणादिनासहप्रतीतस्यसाधारण्यहेतुत्वाद्यनुपपत्तेः । पूर्वाधिकरणेउत्तराधिकरणेत्वीक्षणस्यप्रथमाप्रतीतेरस्त्यवकाशइत्युक्तेश्च टीकायांतत्तेजोसृजतेतिउक्तिस्तुभाष्योक्तस्रष्टृत्वापेक्षत्वसमर्थनार्थं अतएवपूर्वंसदेवसौम्येतिवाक्यमुदाहृतं । तदैक्षतबहुस्यांप्रजायेयेतितत्तेजोसृजतेतिअस्यायमर्थः । तत्सदाख्यंब्रह्मऐक्षतविचारमकरोत् किमितिअहंबहुस्यांजगन्नियामकतयाबहुरूपंस्यामितितदर्थंप्रजायेयसृज्यंप्रजनयामीतितदित्थंविचिंत्य ॥ तेजः तेजोनामकरमासहितंतदभिमन्यमानंतेजोभूतंअसृजतेतितेजःप्रभृतीनामग्रेत्रिवृत्करणोक्यातेजःशब्दादेःअभिमन्यमानभूतपरत्वस्यापिसत्वेनोपादानस्यापिप्रतिपाद्यत्वाद्विकारिकारणमेवोक्तं । एकंस्वावयवगुणकर्मादिभेदरहितं अद्वितीयं समाभ्यधिकरहितं ॥ **सन्मूलाइति** ॥ हेसौम्यइमाःसर्वाःप्रजाःसत्परंब्रह्ममूलकर्तृयासांताःसन्मूलाः । नकेवलमेतावत् । किंतुसत्अयनंआश्रयोयासांताः सदायतनाश्च नकेवलंसांसारिकाः किंतुसत्प्रतिष्ठाःसत्प्रतिष्ठाप्रतिष्ठापकंयासांमुक्तप्रजानांताःसत्प्रतिष्ठाइत्यर्थः ॥ **सतेति** ॥ हेसौम्ययदाजीवः स्वपितिसुप्तोभवतितदासतापरमात्मनासंपन्नः संगतोभवतीत्यर्थः ॥ **ब्रह्मलक्षणश्रवणादिति** ॥ एतद्वाक्यस्यप्रधानपरत्वेब्रह्मलक्षणानामतिव्याप्तिप्रसंगेनसिद्धांतिनोनिष्टंस्यादितितत्समन्वयोवक्तव्यएवेतिभावः ॥ ॐ **ईक्षतिकर्मव्यपदेशात्सः** ॥ सदेवेत्यादौश्रुतसच्छब्दवाच्यंसःविष्णुरेवेक्षतिरूपंचतत्कर्मचतस्यव्यपदेशात्तदैक्षतेतीक्षणाख्यव्यापारोक्तेरित्यर्थः ॥ **एतेनेति** ॥ विष्णुव्यतिरिक्तचेतनस्य मुख्यतोद्रष्टृत्वाभावप्रतिपादकश्रुत्युदाहरणेनेत्यर्थः ॥ **सोमोवैरा-**

PDF Sri Durgesh Digital Foundation

जेति ॥ यथासोमोवैराजागंधर्वेष्वासीत्तंदेवाश्चऋषयश्चाभ्यध्यायंनित्यादौसोमलताभिमानिचेतनविवक्षयागंधर्वेष्वासीदितिव्यपदेशस्तथात्रापिप्रधानाभिमानिचेतनविवक्षयेक्षत्यादिव्यपदेशइत्यर्थः । गौणत्वव्यपदेशप्रयोजकमीक्षितृगतकारणत्वरूपगुणयोगंप्रधानेदर्शयति ॥ सत्वादिति ॥ सत्वगुणात्मकप्रधानादित्यर्थः ॥ स्वरूपबहुत्वेनेति ॥ स्वस्ययानिरूपाणितेषांबहुत्वेनेत्यर्थः । प्रकृतोपयोगायाह ॥ अविकुर्वाणइति ॥ ४ ॥ तस्यांतइति ॥ तत्रतच्छब्देनपद्मकोशप्रतीकाशंहृदयमितिप्रकृतंहृत्पद्मंपरामृश्यते । तथाचतस्यहृत्पद्मस्यांतेअंतःसूक्ष्मंअल्पंसुषिरंआकाशंवर्ततेतस्मिंश्चाकाशेभगवांस्तत्रचसर्वंजगत्प्रकर्षेणवर्ततइत्यर्थः ॥ अथयदिदमिति ॥ अथेत्यारंभे अस्मिन्ब्रह्मपुरेपुरुषदेहव्यापिपरब्रह्मशरीरेइदंबुद्धिसन्निहितंदहरंअल्पंपुंडरीकंपद्मरूपंवेश्मगृहंयदस्तिअस्मिन्नंतः पद्ममध्येदहराकाशः भूताकाशोस्तिततःकिमित्यतआह ॥ तस्मिन्निति ॥ तस्मिन्नाकाशेयदंतर्वर्ततेतदन्वेष्टव्यंमार्गणीयं । नघटादिवदस्यान्वेषणमप्रत्यक्षत्वादित्यतस्तदेवविवृणोति ॥ तद्वावेति ॥ वावेत्यवधारणे तदेवविजिज्ञासितव्यमितिगुरुणोक्तेसतीतिशेषः । तंगुरुंप्रतिशिष्याःपृच्छेयुः यदिदमित्याद्यनुवादः यद्विजिज्ञासितव्यंतदत्रहृत्पद्मगताकाशेकिंविद्यतेब्रम्हचनसंभवतितस्यव्याप्तत्वेनदहराकाशगतत्वायोगादितिभावः। इतिब्रूयुरितिसंबंधः तदासगुरुर्ब्रूयात् । किमिति । अंतःशरीरांतर्हृदयेहृद्ययतइतिहृदयशब्दवाच्येहृत्पद्मगतेभूताकाशेआकाशः आकाशाख्यपरमात्मावर्तते । एषोंतस्थःयावानयंबहिर्विद्यमानः आकाशाख्यःपरमात्मातावान्वैगुणतःपरिमाणतश्चतावानेव अनेनतद्दत्पद्मगतंब्रम्हाण्वपिव्याप्तंलोकदृष्ट्याविरुद्धयुगपदणुत्वमहत्वादीनांतस्मिन्समावेशस्य प्रमितत्वादित्युक्तंभवति । अन्यपरित्यागेनतस्यैवजिज्ञास्यत्वप्रयोजकंतत्सामर्थ्यमाह ॥ ॥ ६४ ॥ ॥ उभेत्यादिना ॥ अस्मिन्नंतरेवोभेमुक्तापुक्तेद्यावापृथिव्यौसमाहिते समाश्रिते उभयविधाग्निवायुसूर्यचंद्रविद्युन्न-

SGDF Sri Gargeshwari Digital Foundation

क्षत्राणिचसमाहितानीत्यर्थः । किमाकाशेविद्यतइतिप्रश्नेआकाशगतस्यैववक्तव्यत्वेनयावान्नित्यादेरसंगताकाशपक्षेप्य न्व-
यानुपपत्तिरित्यतआह ॥ आकाशपक्षेत्विति ॥ हृत्पद्माकाशस्यद्यावापृथिव्याद्याश्रितत्वयोग्यत्वद्योतनायदहरोस्मि-
न्नंतरआकाशइतिप्रागुक्ताकाशमेवयावान्वेत्यादिनाबाह्याकाशतुल्यतयाविशिष्यत्यर्थः परिहारेकथ्यतइतिएतच्चतद्वाक्य-
व्याख्यावसरेएवव्यक्तं उत्तरत्रउत्तरखंडेपरंज्योतिरितियोधिकारीसंप्रसादः सम्यग्विष्णुप्रसादवान् एषःअस्माच्चरमशरी-
रात्समुत्थायनिर्गतः परंज्योतिः अतिप्रकाशमान् परमात्मानंउपसंपद्यस्वेनरूपेणाभिनिष्पद्यतेस्वस्वरूपाविर्भावंप्राप्नोतिहृत्प-
द्मस्थात्मनिरूपणावसरेकिंज्योतिःप्रसंगेनेत्यतमुक्तमेषइति यंप्राप्यस्वस्वरूपमाप्नोतिसएषप्रागुक्तपरमात्मेतिहोवाचेत्यर्थः ।
अत्रयःनिष्पद्यतेएषआत्मेत्यन्वयः पूर्वपक्षिणोभिमतः । नचेति किंतदत्रविद्यतइतिप्रश्नस्यजीवेविद्यतइतिपरिहारंविना-
यावान्वायमाकाशइत्यादेरसंगतत्वादितिभावः ॥ ॐ दहरउत्तरेभ्यः ॐ ॥ दहरेदहरंपुंडरिकाद्युक्तदहरपद्मेस्थितं
ब्रह्मैवउत्तरेभ्यःयआत्मापहतपाप्मेत्याद्युत्तरवाक्योक्तापहतपाप्मत्वादितद्धर्मेभ्यइत्यर्थः । अपहतपाप्मादूरनिरस्तपापः
अविजिघित्सःबुभुक्षापीडारहितः अतिशयेनप्राप्नोतीतिभ्रांतिंवारयितुंअतिक्रम्येति । कथंचित् अभिमानिद्वारा अने-
ननित्यतीर्णेत्यादिना ॥ ॐ गतिशब्दाभ्यांतथाहिदृष्टंलिंगंच ॐ ॥ गतिःसुप्तप्राप्तिः अहरहर्गछंत्येतंब्रह्मलोक-
मितिसुप्तगम्यत्वलिंगब्रह्मशब्दाभ्यांचत्दृत्पद्मस्थंब्रह्मैव। किंचयथागतिशब्दौत्दृत्पद्मस्थगौतथालिंगंअरण्याख्यसुधासमुद्रा-
श्रयलोकवत्वरूपलिंगंचअरश्चवैण्यश्चअर्णवौब्रह्मलोकइतितन्निष्ठतयादृष्टंयतोतोपित्दृत्पद्मस्थंब्रह्मैवेत्यर्थः॥अहरहइति ॥
इमाःसर्वाःप्रजाःएतंब्रह्मलोकंविष्णुलोकंत्दृत्पद्मंत्रत्यंब्रह्मेतियावत् अथवालोकंसर्वाधारत्वेनप्रकाशवत्वेनलोकशब्दाभि
धेयंब्रम्हविष्णुंअहरहःप्रतिदिनंप्राप्नुवंत्यःसत्यःएतंजानंतीत्यर्थः । त्दृत्पद्मस्थेब्रम्हशब्दंप्रकारद्वयेनघटयति ॥ त्दृत्पद्मस्थे-

SGDF
Sri Gargeshwari Digital Foundation

त्यादिना ॥ अरश्चवैण्यश्चअर्णवौब्रह्मलोकेतृतीयस्यामितोदिवीत्यस्यायमर्थः । इतोमेर्वपेक्षयातृतीयायांदिविविद्यमानेब्रह्मलोकेश्वेतद्वीपेअरश्चण्यश्चेत्येतन्नामानौलक्ष्म्यात्मकौहवैप्रसिद्धार्णवौसमुद्रौसमुद्रोपमेसरसीतिष्ठतइति।प्रसंगात् प्रकरणात् इदंभाष्योदात्तदतात्पूर्ववाक्येद्रष्टव्यं यद्वावराहादिपुराणांतरेचतुर्दशाध्यायादौपूर्वत्रक्षीराब्धिमुत्क्रातन्मध्येममलोकस्तुपरितोवलयाकृतिरित्युक्त्वाअरण्याख्यसुधांबोधिरित्याद्युक्तेरितिभावः ॥ **नोच्यतइति** ॥ हृत्पद्मस्थस्याद्यखंडेतादृशलोकवत्वस्यपंचमखंडेअभिहितत्वेनव्यवधानादितिभावः । एवंहृत्पद्मस्थस्यब्रह्मत्वेहेत्वंतरोक्त्यर्थंसौत्रंलिंगपदमित्येवंपरंपरया अरश्चेतिभाष्यंव्याख्यायाधुनाब्रह्मलोकशब्दस्यप्रसिध्यनुसारेणसत्यलोकपरत्वशंकानिरासार्थंतदित्येवंपरतयाव्याचष्टे ॥ ॥ **अथवेति** ॥ **अरश्चेतीति** ॥ अरश्चेत्यादिना । अत्रएतंब्रह्मलोकमित्यत्र ॥ ॐ **धृतेश्चमहिम्नोस्यास्मिन्नुपलब्धेः** ॐ ॥ धृतेर्धारणाद्यआत्मासेतुर्विधृतिरितिसर्वाधारत्वलिंगश्रवणाच्चहृत्पद्मस्थंब्रह्मैव एतल्लिंगस्यहृत्पद्मस्थत्वंकुतइतिचेन्न ॥ अस्यहृत्पद्मस्थस्यमहिम्नोअपहतपाप्मत्वादेः सर्वेपाप्मानोतोनिवर्ततइत्यस्मिन्वाक्येउपलब्धरित्यर्थः ॥ ॥ **अथेति** ॥ यआत्माहृत्पद्मस्थत्वेनोक्तः सएषांलोकानामसंभेदायसंमेलनायाविदारणायवाधारणसमर्थाश्रयइत्यर्थः ॥ **इतिवक्तव्यइति** ॥ तथैवछंदोगपाठादितिभावः । **शाखांतराणां** । बृहदारण्यकादीनांसमानजातीयानांश्रुत्यतराणांसंग्रहोपलक्षणार्थमिति । तत्वप्रदीपोक्तेःसंप्रदायविदइत्युक्तं ॥ **धारणसमर्थाश्रयइति** ॥ तेननपुनरुक्तिरितिभावः । अयंसर्वाधारतयोक्तः । यश्चैषःप्रसिद्धःसर्वेश्वरः । सर्वेश्वरत्वंनसादि किंतुयश्चैषभूतएवाधिपतिर्नास्याधिपत्यमादिमदिति भूताधिपतिः यश्चैषभूतएवपालःपालकः ॥ **बहुवाक्यानीति** ॥ एतस्यवाक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौ एतस्यवाक्षरस्यप्रशासनेगार्गिद्यावापृथिव्यावित्यादिबहुवाक्यानीत्यर्थः । आत्मेश्वरमितिचेतनस्यपृथगभिधाना-

दाह ॥ **विश्वमचेतनमिति** ॥ ॐ **प्रसिद्धेश्च** ॐ ॥ दहरंविपापमित्यादितैतरीयेविष्णोर्हृत्पद्मस्थत्वप्रसित्यैश्चतत्समाख्यानात्दहरेब्रह्मैवेत्यर्थः ॥ **दहरमिति** ॥ यत्पुंडरीकंअष्टदलकमलमस्तिकीदृशंदहरंअल्पंविपापंशुद्धंशरीरदोषैरपरामृष्टत्वात्परमात्मनोवेश्मभूतंगृहभूतंसर्वदातत्रोपलभ्यमानत्वात् । पुरमध्येशरीरमध्येसंस्थितं राज्ञःपुरमध्येप्रासादइवतत्रापिहृत्पुंडरीकेदहरंगगनमस्ति । तस्मिन्गगनेयदंतर्विशोकः शोकरहितंब्रह्मास्तितदुपासितव्यमित्यर्थः । अनेनतैतरीयवाक्योदाहरणेन दिव्येद्योतमानेव्योम्निहृदयाकाशे संप्रतिष्ठितःसम्यग्व्यवस्थितः अंतर्देहस्य अनयोरात्मपुरुषपदोपेतत्वेनस्पष्टत्वात्स्वयमुदात्तवान् । साम्येनोक्तत्वात् कथंब्रह्मेतिनिर्धारणमित्यतआह ॥ **ब्रह्मपुरपदेनेति** ॥ नवधेनास्यहन्यतइत्यस्यार्थोनष्टेपिदेहेननश्यतीति । एवंन्यायविवरणोक्तयोजनांप्रदर्श्यछांदोग्यभाष्योक्तयोजनांप्रदर्शयति ॥ **अथवेति** ॥ प्रयोगात् एतत्सत्यंब्रह्मपुरमित्यत्र ॥ **तच्छब्देनेति** ॥ सचासौशब्दश्चतच्छब्दः । ब्रह्मपुरशब्देनेत्यर्थः । प्रकृतत्वात् । ब्रह्मपुरेदहरंपुंडरीकमित्यत्र । अस्यएतत्सत्यमित्युक्तस्य । तत्रशरीरग्रहणेप्यत्रबाधकवशात्परित्यागइतिभावः । तदभावात् व्याप्ताकाशस्यदहरस्थत्वाभावात् ॥ **अयोगाच्चेति** ॥ ईश्वरवदचिंत्यशक्त्यभावेनव्याप्ताकाशस्यदहराकाशेअवस्थानायोगाच्चेत्यर्थः । पृथिव्यभिमानिदेवानांविष्णुशेषत्वेनोपास्यत्वान्मुख्यतइत्युक्तं ॥ ॥ ॐ **इतरपरामर्शात्सइतिचेन्नासंभवात्** ॐ ॥ परंज्योतिरुपसंपद्येतिप्रकृतस्येतरस्यजीवस्येषआत्मेतिपरामर्शात्सजीवएवदहरस्थइतिचेन्न । तस्यस्वतोऽपहतपाप्मत्वासंभवादित्यर्थः ॥ **भाविभावेनेति** ॥ यूपंतक्षतीत्यादिवद्भविष्यदभिप्रायेणेत्यर्थः ॥ ॐ **उत्तराच्चेदाविर्भूतस्वरूपस्तु** ॐ ॥ उत्तराज्जीवस्यसत्यकामत्वप्रतिपादकसतत्रपर्येतीत्युत्तरवाक्यात्सएवदहरस्थइतिचेन्न । आविर्भूतस्वरूपस्तुमुक्तएवतत्रोच्यतेयतइत्यर्थः ॥ **सतत्रेति** ॥ सःप्राप्तनि-

Sri Dargahmath Digital Foundation

जानंदाविर्भावोजीवः । तत्रभगवल्लोकेतदनुग्रहेणैवजक्षन्स्वाभिलषितंभक्षयन्हसन्वासहमुक्तैः क्रीडन्खेलनंकुर्वन्अत्यंतंरममाणःपरितोगच्छतीत्यर्थः । सतत्रपर्येतीत्यादिनाजीवस्यसत्यकामत्वसिद्धावपि अपहतपाप्मत्वादेःकथंजीव—निष्ठत्वमित्यतउक्तं ॥ **ततएवेति** ॥ सत्यकामत्वादेवेत्यर्थः । काम्यालाभएवशोकादिरितिभावः ॥ **गुणप्रदातृनयेति** ॥ अन्यथातत्प्राप्तिकथनेवेय्यर्थ्यमितिभावः ॥ ॐ **अन्यार्थश्चपरामर्शः** ॐ ॥ एषआत्मेतिपरामर्शः अन्यार्थश्च । परमात्मविषयएवनजीवविषयइत्यर्थः ॥ ॐ **अल्पश्रुतेरितिचेत्तदुक्तं** ॐ ॥ दहरंपुंडरीकमित्यादिनाल्पस्थानस्यश्रवणाद्दहरेजीवएवनब्रह्मेतिचेन्न। तत्अल्पस्थानस्थत्वमुक्तंनिचाय्यत्वादिनासमाहितंयतइत्यर्थः । तर्हिततएवैतत्परिहारादिदंव्यर्थमित्यतोअभ्यधिकाशंकांदर्शयति ॥ **नव्योमवदिति** ॥ **यावानित्युक्तेश्चेति** ॥ अंशस्यापिसर्वगतत्वोक्तेश्चेत्यर्थः सर्वज्यायस्त्वेनेति । सर्वापेक्षयापरिमाणतःश्रेष्ठत्वेनेत्यर्थः यस्मिन्विरुद्धगतयोप्यनिशंपतंति ब्रम्हादयोविविधशक्तयआनुपूर्व्येतिभागवतवाक्यस्यायमर्थः । यस्मिन्विद्यादयोविविधशक्तयोपतंतिवर्तंतनकेवलमेतावत्किंतुविरुद्धगतयोपिअन्यत्रविभिन्नाश्रयाअप्यणुमहत्वादयोवर्तंते किंकालभेदेनेत्यतआह ॥ **अनिशमिति** ॥ कुतःआनुपूर्व्याअणोरणीयानितिश्रुत्येत्यर्थः। आनुपूर्वीश्रुतिश्चैवत्रयीचाम्नायउच्यतइत्यभिधानात् । तथाचयुक्तिअविषयेविरोधोअकिंचित्करइतिभावः ॥ ५ ॥ **आनुकूल्येनगृह्यमाणत्वेति** ॥ आनुकूल्येन अनुकूलत्वेनअत्यंतमिष्टत्वेनगृह्यमाणंकथमनुभवामीत्यनेनप्रकारेणज्ञानार्थंसुखंतस्यभावस्तत्वं सुखादन्यस्यअत्यंतमिष्टत्वाभावात् । अतएवभाष्येअनिर्देश्यसुखमित्युक्तं । अतएवचंद्रिकाकारैःकेचित्वेतद्भाष्यानुसारात्न्यायाविवरणोक्तमानुकूल्येनगृह्यमाणत्वंसुखमेवेत्याहुरिति स्वोत्प्रेक्षितपक्षोदर्शितः प्रसिद्धंचानुकूलवेद्यंसुखमिति ॥ **उभयत्रसुखशब्दवृत्येति** ॥ योवैभूमात-

SGDF Sri Gargeshwari Digital Foundation

त्सुखमित्यादौभगवतिसुखशब्दवृत्तिर्ज्ञेया ॥ तदेतदिति ॥ तत् रूपंरूपंप्रतिरूपोबभूवेत्यत्रप्रकृतं एतत् एकंरूपंबहुधायःकरोती त्यत्रचप्रकृतंभगवद्रूपंअनिर्देश्यं साकल्येनादृश्यंपरमंसुखमितिमन्यंतेज्ञानिनः । नुइदानींअहंतत्सुखंकथं केनप्रकारेणविजानी यांतत्सुखंमत्प्रयत्नेनतथाभातिनवेत्यर्थः । नात्रानुकूल्येनगृह्यमाणपदंश्रूयतेत्यतआह ॥आनुकूल्येनेति ॥ कथंनुपुत्रंपश्येयंस आगच्छतिनवेत्यत्रयथापुत्रज्ञानार्थंतदागमनप्रार्थनाधीःतथाकथंनुतद्विजानीयामित्यादिवाक्येज्ञानार्थमाविर्भावरूपभानप्रार्थ नाधीरित्याभिप्रेत्यैवमुक्तमितिध्येयं ॥ एकोवशीति ॥ यः एकः स्वगतभेदवर्जितःसर्वमस्यवशेवर्ततइतिवशी सर्वभूतानामंत र्नियामकः एकंस्वात्मरूपंनियम्यानांबहुत्वात्तद्गतत्वेनबहुधाकरोतीतितमात्मनिदेहेजीवेवातिष्ठतीतिआत्मस्थंभगवंतंयेधी राः पंडिताअनुपश्यंतितेषामेवशाश्वतंनित्यमभिव्यक्तंसुखंनेतरेषामित्यर्थः ॥ नपुंसकसुखशब्देनेति ॥ नपुंसक लिंगशब्देनसुखशब्देनचेत्यर्थः ॥ ॐ अनुकृतेस्तस्यच ॐ ॥ आनुकूल्येनगृह्यमाणंब्रह्मैवकुतःअनुकृतेः अनुभान त् तमेवभांतमनुभातिसर्वमितिसूर्यादीनांतदधीनभानश्रवणादितियावत् । किंचतस्यवाक्यप्रतीकग्रहणमेतत् । तस्यभा सासर्वमिदंविभातीतिसर्वस्यतत्प्रकाश्यत्वोक्तेरित्यर्थः ॥ परमंसुखमिति ॥ तेषांसुखमितिवाक्यगतसुखश्रुतिव्यावर्त येपरमशब्दः ॥ चेतनश्चेतनानामिति ॥ चेतनानांचेतनत्वप्रदःपरमचेतनइतिवार्थः । पूर्वोक्तयोजनायांसत्यामेव योजनांतरमाह ॥ यादिति ॥ गृह्णंति ज्ञानार्थंप्रार्थयंते । प्रतीतयोजनात्यागात्कथंचिदित्युक्तं ॥ तमेवभांतमिति ॥ सर्वसूर्यादितेजोजातंभांतंप्रकाशमानंतंभगवंतंअनुसृत्यभातिप्रकाशते । सर्वमिदंजगत्तस्यपरमात्मनोभासाप्रकाशेनाविभ तिप्रकाश्यतइत्यर्थः । सर्वशब्दस्यतेजःपरत्वेनव्याख्यातत्वादनुशब्दसमभिव्याहृतस्यभातीत्यस्यभासतइत्यर्थत्वात्सः

१२ भातीत्यस्यनचतद्भासेत्यत्रानुवृत्त्यसंभवात्तच्छेषंपूरयति ॥ जगद्भातीतिशेषइति ॥ तदुक्तंचतुर्थतात्पर्ये ।

GDF
Sri Gargeshwari Digital Foundation

अहंतत्तेजोरश्मीत्यादिभाष्यमुक्तलिंद्वयगस्यविष्णुनिष्ठत्वप्रतिपादकत्वेनव्याचष्टे। रश्मीत्यादिना ॥ ॐ अपिस्मर्यते ॐ ॥ लिंगद्वयंस्मर्यतेपिस्मृतौप्रतिपाद्यतेपीत्यर्थः । तत्रतद्भगवद्रूपे सूर्योभातिभासयते चंद्रतारकमितिद्वैकवद्भावः । यदा प्रौढप्रकाशाःसूर्यादयोनभांतितदाअल्पप्रकाशोयमग्निः कुतोभातिनकुतोपीत्यर्थः । व्याख्यानांतरेस्मृतेःसमुच्चयासंभवादाह ॥ युक्तीति ॥ किंचेत्यादिनोक्तयुक्तीत्यर्थः नतत्रसूर्योभातीतितमेवभांतमित्यत्रतमितिपुल्लिंगांतशब्देनपरमात्मैवोच्यत इति तदेकार्थत्वलाभायनतत्रसूर्योभातीतिवाक्यस्थतत्रेत्यनेनपरमात्मोच्यतइत्यर्थः ॥ किंतुभातिनभातिचेति ॥ ॥प्रकृतस्येति॥ तत्रोक्तदुर्विज्ञेयत्वस्यनतत्रसूर्योभातीत्यादिनाप्रत्यभिज्ञायमानत्वादितिभावः ॥ यस्यैवमिति ॥ तथा चनलिंगानुपपत्तिरितिभावः । दूरोक्तंब्रह्म ॥ अतिदूरोक्तिग्रहणइति॥ तदेतदित्यस्मिन्वाक्येज्ञानिसुखापेक्षयाद् रोक्तपरमात्मग्रहणेविभ्यतस्तवततोप्युत्तरत्रविद्यमानेनतत्रेत्यस्मिन्वाक्येचेतनश्चेतनानामितिवाक्योक्तपरमात्मग्रहणेकथंनभी तिरित्यर्थः । नतत्रेत्यत्रविष्णुमात्रनिष्ठसूर्याद्यप्रकाश्यप्रकाशत्वलिंगबलादरोक्तपरमात्मपरामर्शइतियदितर्हितदेतदितिवाक्ये पिविष्णुमात्रनिष्ठत्वेनसाधिताऽनिर्देश्यत्वलिंगबलात्परमात्मनएवपरामर्शइतिभावेनाह॥अनिर्देश्यत्वायोगाच्चेति॥६॥ ॥ अंगुष्ठमात्रइति ॥ तद्दयवकाशापेक्षयांगुष्ठपरिमाणः । भूतभव्यस्य अतीतानागतस्य ईशानःप्रेरकः पुरुषः आत्मनिदेहमध्येहृद्गुहायांतिष्ठतीत्यर्थः ॥ ऊर्ध्वमिति ॥ योहरिःप्राणवायुंमुख्यप्राणस्वरूपंऊर्ध्वभागंप्राप यति अपानंमुख्यवायुरूपंप्रत्यक्अधः अस्यतिक्षिपतितंहृदयमध्येआसीनंसंतंवामनंसौंदर्यनेतृत्वेनतच्छब्दवाच्यंभगवंतंसर्वे देवाःउपासतइत्यर्थः । नन्वत्रउपास्यत्वमेवोच्यतेनजिज्ञास्यत्वमित्यतआह ॥ जिज्ञासोपासनयोरिति ॥ श्रवणा- दीति ॥ नन्विदमयुक्तंयुक्तिभिरनुचिंतनरूपमननस्यविचाररूपत्वे औपदेशिकवाक्यार्थग्रहणरूपश्रवणस्याखंडस्मृतिरूप

निदध्यासनस्यचविचाररूपत्वाभावात् । नचश्रवणमादिर्यस्यमननस्यतच्छ्रवणादीत्यतद्गुणसंविज्ञानबहुव्रीहिणामनन स्यैवविचाररूपत्वमुक्तमितिवाच्यं । तथासतिश्रवणादित्रितयस्यापिविचारापरपर्यायोपासनत्वप्रतिपादकवाक्योदाहरणा संगतिः । तच्चश्रवणमनननिदध्यासनरूपाजिज्ञासैवेत्युक्तमितिवक्ष्यमाणविरोधाच्चेतिचेन्न । अत्रविचारपदेनाजहत्स्वार्थ लक्षणयौपदेशिकवाक्यार्थग्रहणमखंडस्मृतिश्चगृह्यते । शक्यसंबंधश्चतज्जनकत्वात्स्मृतेश्चतज्जन्यत्वाज्जन्यजनकभावः तथाचश्रवणमनननिदध्यासनापरपर्यायौपदेशिकवाक्यार्थग्रहणमखंडस्मृतिरूपाजिज्ञासेतिलभ्यतइतिनकोपिदोषः । यदा हुरनुव्याख्याने । अत्रशास्त्राभ्यासशब्देनोपदिष्टशास्त्रार्थज्ञानरूपश्रवणंयुक्तिभिस्तदनुचिंतनरूपमननंचोच्यते । ध्यानम- खंडस्मृतिः । धारणाखंडस्मृतिः । यथाहुः खंडस्मृतिर्धारणाः स्यादखंडाध्यानमुच्यतइति । आदिपदेनप्राणायामादि ॥ प्रसिद्धावपीति ॥ ईश्वरःसर्वईशानइत्यादावित्यर्थः । श्रुतावन्वयाप्रतीतेर्यत्तच्छब्दाध्याहरेणतंदर्शयति ॥ उन्न- यतीति ॥ व्यवस्थापकत्वेनेति ॥ नियोजकत्वेत्यर्थः ॥ यथेति ॥ यथालोकेसम्राट्सार्वभौमोधिकृतान्नियोगि नःविनियुङ्क्तेव्यवस्थापयति । कथंत्वमेतान्पाटलीपुत्रादीनग्रामानधितिष्ठस्वतदाधिपत्येतिष्ठस्व । त्वमेतान्कौशांबिप्रभृतीन् ग्रामानधितिष्ठस्वेति । एवमेवैषमुख्यप्राणःइतरानभिन्नानात्मजातत्वाद्गुपचारेणात्मविभागान्प्राणान्वायून्पृथग्पृथगेवत्ह दयगुहास्थानेषुसन्निधत्तेसंस्थापयति । स्वयंचतत्रतत्प्रवर्तकतयाप्राणादिरूपोवातिष्ठतइत्यर्थः ॥ अथेममिति ॥ अथे तरदेवनांश्रमप्राप्त्यनंतरंप्रजापतिर्योयंमध्यमप्राणस्तमिममेवनाम्नोद्ब्रह्मणोवायुसमशक्तित्वात्तन्नापेत्यर्थः । प्राणशब्दवाच्ये षुविष्णोरुत्तमत्वादन्येषामधमत्वाद्वायोर्मध्यमत्वान्मध्यमइत्युक्तं । अभ्युपगमात्सिद्धांतिभिः ॥ अबाधादिति ॥ अत्रवि ष्णोर्जिज्ञास्यत्वनिषेधेपिअन्यत्रानिराकरणादितिभावः । नदेवामोक्षार्थंवायूपासांकुर्वंतियेनतस्यमोक्षदातृत्वंस्यात्किंत्वैश्वर्या

SGDF Sri Gangadharan Foundation

दिप्रयोजनांतरायेत्यतआह ॥ नहीति ॥ कुविदंगनमसायेवृधासःपुरादेवाअनवद्यासआसन् । तेवायवेमनवेवा
धितायावासयन्नुषसंसूर्येणेतिमंत्रंव्याचष्टे ॥ अंगेत्यादिना ॥ कुविदित्यस्यप्रतिपदंकचिदिति रहस्यस्थानइतितात्पर्यक
थनं बाधितायेत्यस्यसंसारइत्यादि उषसमित्यस्यबुद्धिमिति ॥ ॐ शब्दादेवप्रमितः ॐ ॥ ईशानोविष्णुरेवप्रमितः
मध्येवामनमितिवामनशब्दादित्यर्थः ॥ महायोगरूढीति ॥ एषउएववामनिरेषएवहिभामनिरेषहिसर्वाणिवामानिनयती
तिवामनिवामनशब्दयोरेकार्थत्वेनमहायोगस्यसवामनःसभामनः उपेंद्रोवामनःप्रांशुरितिरूढेश्चसत्वादितिभावः । अनेनश्रु
तेःप्राबल्यनिरूपणेन । निर्देशःवस्तुप्रतिपादकशब्दः । यथावामनमित्यादि अत्रकेवलयौगिकशब्दव्यावृत्त्यर्थंमात्रपदं । तेनयो
गरूढानांवामनादिशब्दानांनश्रुतित्वहानिरितिध्येयं ॥ असाधारणधर्मइति ॥ यथामध्यमत्वादि ॥ निराकांक्षपदानी
ति ॥ पर्यवसिताकांक्षापदानीत्यर्थः । यथासर्वाणिहवाइमानिभूतानिआकाशादेवसमुत्पद्यंतइति ॥ एकप्रमेयेति ॥
यथाअग्निरूपैकार्थप्रतिपादकंमूर्धानंदिवइत्यादि । अत्रस्थानेतिव्याप्तिवारणायैकप्रमेयप्रतिपादकेति । वाक्येतिव्याप्तिवा
रणायानेकेति । अनेकाक्षरपदादावतिव्याप्तिवारणायवाक्येत्युक्तं ॥ अनेकप्रमेयेति ॥ यथाविष्णौतात्पर्योपेताने
कार्थप्रतिपादकषट्प्रश्नोपनिषदादि । अत्रप्रकरणव्यावृत्त्यर्थमनेकप्रमेयप्रतिपादकमिति । विरुद्धार्थयोःशास्त्रयोर्मिलितयोः
स्थानत्वव्यावृत्त्यर्थंएकार्थतात्पर्ययुक्तमित्युक्तं ॥ समानोक्तिरिति ॥ निर्णीतस्थलइत्युपस्कर्तव्यं । तेनविप्रतिपन्नप्रकर
णादिगतसमानोक्तेःसमाख्यात्वव्यवछेदः । यथासवाएषइत्यादिनोक्तान्नमयादिपंचकस्यान्नमयप्राणमयमनोमयविज्ञानम
यानंदमयामेशुध्यंतामित्यत्रोक्तिः । इदानींप्राबल्यादिनिरूपयति । तत्रेत्यादिना ॥ साक्षादर्थधीजनकत्वादिति ॥
व्याप्त्यादिप्रतिपादनद्वारमंतरेणागमतयाऽविप्रतिपन्नार्थधीजनकत्वादित्यर्थः । यथावामनश्रुतिश्रवणमात्रेणेशानस्यविष्णुत्व

PDF Sri Gargeshwari Digital Foundation

प्रतिपत्तिः ॥अनुमापकतयेति॥ व्याप्त्यादिप्रतिपत्तिद्वारेत्यर्थः। यथामध्यमपदस्यमध्यमत्वरूपव्याप्यप्रतिपादनद्वारेशान
स्यवायुत्वनिश्चायकत्वं ॥ तदानंतर्यं ॥ ततोदौर्बल्यं यथात्रवामनश्रुतितोमध्यमत्वादिलिंगानांदौर्बल्यं ॥ अनेकार्थक
थनद्वारेति ॥ यथासर्वाणिहवेत्यस्यभूताद्यनेकार्थप्रतिपादनद्वाराभूतकारणत्वरूपव्याप्यप्रतिपादकत्वेनाकाशपदोक्तस्य
ताकाशानुमापकत्वं ॥ ततोपिदौर्बल्यमिति ॥ यथापरोवरीयस्त्वानंतत्वादिलिंगापेक्षयासर्वाणिहवेतिवाक्यस्यदौ
र्बल्यं । बह्वर्थपरत्वेनेति ॥ यथामूर्धानंदिवइत्यस्यदेवमुखत्वयज्ञनाभित्वाद्यग्निज्ञापकबह्वर्थप्रतिपादकत्वेनज्योतिर्दृष्टयआ
हितेतिज्योतिःशब्दस्याग्नित्वानुमापकत्वं ॥ तदवमतेति ॥ यथोदात्तप्रकरणस्यकर्णादिविदूरत्वलिंगप्रतिपादकविमेक
र्णाइतिवाक्याद्दौर्बल्यं ॥ अतिबह्वर्थकथनेनाभिप्रायइति ॥ यथाषट्प्रश्नोपनिषद्रूपस्थानस्यबह्वर्थानेकप्रकर्णार्थपूर्वक
विष्णुपरस्थानगतैषःप्राणइतिवाक्यस्यतत्परत्वेनतद्वाक्यस्थप्राणशब्दस्यापिविष्णुपरत्वानुमापकत्वं ॥ ततोपिदौर्बल्य
मिति ॥ यथास्यैवस्थानस्यभगवन्कुतएषप्राणोजायतइतिखंडरूपान्मुख्यप्राणधर्मप्रतिपादकत्वेनमुख्यप्राणप्रकरणाद्दौ
र्बल्यं॥ सादृश्यमात्रेणेति । यथान्नमयप्राणमयइतिकोशसमाख्यायास्तत्सदृशत्वादिदंतदर्थकसादृश्यमित्येवंरूपसादृश्य
मात्रेणैतमन्नमयमात्मानमुपसंक्रामतीत्याद्यन्नमयादिशब्दोक्तस्यकोशत्वानुमापकत्वं ॥ ततोपिदौर्बल्यमिति ॥ यथा
ब्रह्मविदाप्नोतिपरंभृगुर्वैवारुणिरितिविष्णुधर्मप्रतिपादकतयाविष्णुस्थानादुदात्तसमाख्यायाद्दौर्बल्यं । नन्वेवंलिंगादेःश्रु
त्यादेःसकाशाद्दौर्बल्येकथमाकाशस्तल्लिंगादित्यादौलिंगादिनाश्रुत्यादेर्बाधइत्यतआह॥ अत्रापीति॥पूर्ववदिति॥ समन्व
याधिकरणोक्तोपक्रमादिवत्यर्थः । इत्यादीत्यादिपदेननिरवकाशादेकस्माद्बहुत्वेनप्रबलस्यसावकाशस्यदौर्बल्यमित्यस्यग्रह
णं । निरवकाशत्वादिरहितश्रुत्यादावेव जातिकृतप्राबल्यादिकंप्रदर्शितमितिभावः। समवाये संमेलने । ननुश्रुतिलिंगोतिवा

PDF
Sri Gargeshwari Digital Foundation

क्यानुसारेणसमाख्यायाःवाक्यप्रकरणाभ्यांप्राबल्यंकिंनाश्रितमित्यतआह ॥ **नचेति** ॥ उदात्तवाक्यानुक्तंस्थानंकिमर्थमुच्यतइतिशंकापरिहारसूचयन्नेवस्वोक्तक्रमसाधकजैमिनिसूत्रानुव्याख्यानेक्रमेणोदाहरति ॥श्रुतिरित्यादिना॥ विरुद्धानांश्रुत्यादीनांसमवायेसतिपरदौर्बल्यं । परेषामुत्तरोक्तानांदौर्बल्यं । कुतःतेषांतत्रश्रुतेःसाक्षादित्यादिनोक्तरीत्याविलंबेनार्थसाधकत्वादितिजैमिनिसूत्रार्थःननुश्रुत्यादेःकिंश्रुत्यादित्वेनसाक्षादेवार्थनिश्चायकत्वमुतोपक्रमादिनिश्चायकत्वेनपरंपरयावानाद्यःक्वचित्परंपरयापिहेतुत्वात् ।नाद्वितीयःक्वाचेत्साक्षादपिहेतुत्वादिति अतोत्रनियमोनविविक्षितइत्याशयेनाह॥श्रुतिलिंगवाक्यानामित्यादिनाइत्यादिवादित्यंतेन ॥ यथात्मानंवैश्वानरमित्यत्रविप्रतिपन्नवैश्वानरगतात्मश्रुतेर्विष्णुत्वनिश्चायकत्वं । यथाचाकाशःपरायणंसएषपरोवरीयानित्यत्रविप्रतिपन्नाकाशगतपरोवरीयस्त्वलिंगस्यविष्णुत्वनिश्चायकत्वं । यथाचविमेकर्णापतयतोविचक्षुर्वीदंज्योतिरितिविप्रतिपन्नज्योतिर्निष्ठोदाहृतवाक्यस्यविष्णुत्वनिश्चायकत्वं ॥ उपक्रमोपसंहारयोःश्रुतत्वइति ॥यथाकोनआत्मेत्युपक्रमेश्रुतात्मश्रुतेरुपक्रमस्यविष्णुपरत्वनिश्चायकतयावैश्वानरमुपास्तइत्युक्तवैश्वानरस्यविष्णुत्वनिश्चायकत्वं । यथाचपंचम्यामाहुतावापइत्युपसंहारेश्रुताप्श्रुतेरुपसंहारस्यभूतपरत्वनिश्चायकतयाश्रद्धांजुह्वतीत्यत्रश्रद्धाशब्दस्यभूतपरत्वनिश्चायकत्वं । यथाचयएषतपतीत्युपक्रमेश्रुतसूर्यस्थत्वलिंगस्योपक्रमस्यविष्णुपरत्वनिश्चायकतयाअत्मावाइदमेकएवेत्युक्तात्मनोविष्णुत्वनिश्चायकत्वं ।यथाचसयोतोश्रुतइत्युपसंहारेश्रुताश्रुतत्वलिंगस्योपसंहारस्यविष्णुपरत्वनिश्चायकतयायएषोंतरक्षिणिपुरुषइत्युक्तचक्षुरंतस्थस्यविष्णुत्वनिश्चायकत्वं । यथाचकंब्रह्मखंब्रह्मेत्युपक्रमेश्रुतवाक्यस्योपक्रमस्यविष्णुपरत्वनिश्चायकत्वेनांतरक्षिणीत्युक्तस्यविष्णुत्वनिश्चायकत्वं । यथाचतावाएताःसर्वाऋचइत्युपसंहारेश्रुतवाक्यस्योपसंहारस्यविष्णुपरत्वनिश्चायकतयाचक्षुर्मनोवाक्प्राणइत्युक्तप्राणस्यविष्णुत्वनिश्चायकत्वं ॥ **अन्यत्रेति** ॥

विप्रतिपन्नार्थप्रतिपादक वाक्योपक्रमोपसंहारेभ्योन्यत्रेत्यर्थः । यथाब्रह्मेमंपुरुषमितिप्रकरणेश्रुतब्रह्मश्रुतेःप्रकरणस्यवैष्णवत्वनिश्चायकतयामनोवाक्प्राणइत्युक्तप्राणस्यविष्णुत्वनिश्चायकत्वं । यथाचापहतपाप्मेतिप्रकरणेश्रुतापहतपाप्मत्वलिंगस्यप्रकरणस्यवैष्णवत्वनिश्चायकतया दहरोस्मिन्नंतरआकाशइत्युक्ताकाशस्यविष्णुत्वनिश्चायकत्वं यथाचश्रीश्चतेलक्ष्मीश्चपत्न्यावितिप्रकरणेश्रुतस्यास्यवाक्यस्यप्रकरणस्यवैष्णवत्वनिश्चायकतयातद्वैत्वंप्राणइत्युक्तप्राणस्यविष्णुत्वनिश्चायकत्वमितियद्यपिश्रुत्यादिनाअर्थनिश्चयदशायामुपक्रमोपसंहारेश्रुतश्रुतत्यादेरपिप्रकरणनिश्चायकत्वंतथापितत्रसाक्षादन्यत्रपरंपरयेतिभेदः। प्रसंगात्पूर्वमनुक्तत्वेनावश्यकत्वाच्चाह ॥ उपक्रमोपसंहारावपीति ॥ उपक्रमोपसंहारावपिउपक्रमोपसंहाराभ्यामन्यत्रश्रुतश्रुत्यादिनार्थनिश्चयेसतितस्मिन्नेवार्थेतात्पर्यज्ञापकावित्यर्थः । यथासर्वंवाअत्तीतितददितेरित्युक्तात्तुःसर्वात्तृत्वलिंगेनविष्णुत्वनिश्चयेसतिनैवेहकिंचनाग्रआसीदित्युपक्रमस्यअत्तुर्विष्णुत्वनिश्चायकत्वंयथाचसर्वेषुभूतेष्वेतमेवब्रह्मेत्याचक्षतइत्युक्तसर्वगतस्यब्रह्मश्रुत्याविष्णुत्वनिश्चयेसतिसयोतोश्रुतइत्युपसंहारस्यसर्वतगस्याविष्णुत्वनिश्चायकत्वं॥अन्यथाप्रकरणेति॥यथाद्वेविद्येवेदितव्यइतिविष्णूपक्रमस्यान्यमीशामेत्यस्यविष्णुप्रकरणत्वनिश्चायकत्वं ।यथाचतद्विष्णोःपरमंपदमितिविष्णूपसंहारस्यअनाद्यनंतंमहतःपरंध्रुवमित्यादेर्विष्णुप्रकरणत्वनिश्चायकत्वं ॥ **समाख्यापीति**॥यथाचक्षोःसूर्योअजायतेतिपुरुषसुक्तोक्तिसमाख्यानात्साक्षाद्विप्रतिपन्नवैश्वानरनिष्ठा चक्षुर्विश्वरूपइत्याद्युक्तिर्वैश्वानरस्यविष्णुत्वनिश्चायका ॥ **अन्यथेति** ॥ यथापरोदिवापरएनापृथिव्यैतावतीमहिनासंबभूवेत्यंभ्रणीसूक्तोक्तिसमानाअजस्यनाभावितिविप्रतिपन्नार्थेसाक्षाद्श्रुतापरोदिवापरएनापृथिव्यापरोदेवेभिरित्युक्तिः । ननुपरोवरीयानुद्वीथोनंतइत्यादिलिंगस्यश्रीश्चतेलक्ष्मीश्चपत्न्यावितिवाक्यस्यचाविप्रतिपन्नार्थव्याप्यप्रतिपादकत्वाविशेषात्कथंलिंगवाक्यभावइत्यतआह ॥ लिंगवाक्ययोरि

SGDF Sri Gargeshwari Digital Foundation

ति ॥ अनेकार्थप्रतिपादनमंतराव्याप्यप्रतिपादकत्वलिंगस्यसाक्षात्वं । तद्वारातत्प्रतिपादकत्वंवाक्यस्यसाक्षात्वं । यथाचलक्षणवाक्येव्याप्यार्थकपदंलिंगं । तदर्थकाणिलिंगानि निराकांक्षपदानिवाक्यमितिविवक्षितमितिभावः । तदेवोदाहरणमुखेनक्रमेणदर्शयति ॥ गोत्रभिदमिति ॥ पर्वतभेत्तारमित्यर्थः । इंद्रलिंगमिदं ॥ प्रवक्षणाइति ॥ वज्री पर्वतानांप्रवक्षणाः पक्षान् अभिनत् बिभेदेत्यर्थः । इदमिंद्रपरवाक्यं ॥ विष्णाववकाशत्वादिति ॥ प्राणनियामकत्वस्यांतर्यामिनयन्यायेनसर्वनियामकेहरौयुक्तत्वात् । मध्यमइतिमध्यमशब्दस्योर्ध्वप्रत्यक्शब्दसहोक्तस्यमध्यदेशवाचित्वेनमध्यमोक्त्यभावेनमध्यदेशावस्थानस्यविष्णावपिसंभवात् । सर्वदेवोपास्यत्वस्यापिसर्वजिज्ञासापरपर्यायस्यहरौदहरनयेसिद्धत्वादितिभावः । श्रुत्यंतरेण सम्राडित्यादिना । प्राणशब्दोपेतयोःसम्राडथेतिश्रुत्योर्विष्णुपरत्वेपिवायुशब्दोपेतकुविदंगेतिश्रुतेर्नविष्णुपरत्वसिद्धिरित्यतआह ॥ वायुत्वमिति ॥ प्राणपदेनेतिशेषः । प्रत्यापादि प्रतिपादितं ॥ ॐ तद्दयपेक्षयातुमनुष्याधिकारित्वात् ॐ ॥ तद्दयस्थाकाशापेक्षयैवब्रह्मांगुष्टपरिमितमुच्यते नतुस्वतः । पश्वादीनामंगुष्टाभावात्कथंतद्धृदयगतस्यांगुष्टपरिमितत्वमित्यतआह ॥ मनुष्याधिकारित्वादिति ॥ पश्वादीनामंगुष्टाभावेपिअंगुष्टमात्रइतिविद्यायांमनुष्याधिकारत्वादंगुष्टमात्रइतियुक्तमित्यर्थ । पूर्वमूर्तिविशेषस्यव्यक्त्यात्मनोंगुष्टमात्रत्वमभ्युपेत्यांगुष्टमात्रवंमुख्यइत्युक्तं । इदानीमंगुष्टमात्रोक्तिरौपचारिकीत्याह ॥ भिन्नेष्वपीति ॥ सायंगोष्टेसर्वएकीभवंतीत्यादावित्यर्थः । नचैवंश्रुतेरुपचारितार्थवर्णनंवेदवाक्यस्यवाचनिकार्थविनानैवान्योयुज्यतइतिकर्मनिर्णयवाक्यविरोधइतिवाच्यं । स्वातंत्र्येचविशिष्टत्वेस्थानमत्यैक्ययोरपिसादृश्येचैक्यवाक्सम्यक्सावकाशायथेष्टतइत्यनुव्याख्यानेभगवत्पादैरेवश्रुतेर्गौणार्थत्वोक्तेः कर्मनिर्णयवाक्यंतुतट्टीकायामेवसम्यग्व्याख्यातमितिभावः । कथनवैय्यर्थ्यादिति । अंगुष्टव्यक्तिविशेषनिर्धारणंविनाय

Sri Gargeshwari Digital Foundation

त्किंचिदंगुष्ठमात्रत्वेनोपासनायाः असंभवात्कथनंव्यर्थमित्यर्थः ॥ असंभवाच्चेति ॥ पिपीलिकात्हृदयस्थेंगुष्ठमात्रत्वसामान्यस्यैवासंभवादित्यर्थः । पूर्वसौत्रस्तुशब्दोत्हृद्यवकाशापेक्षयेतिभाष्यानुसारादेवार्थोव्याख्यातः । इदानीमंगुष्ठाभावेपीतिभाष्यानुसारादप्यर्थतयापिव्याचष्टे ॥ तुशब्दइति ॥ ७ ॥ आधिकारेति ॥ योग्यतेत्यर्थः ॥ प्रासंगिकत्वादिति ॥ मनुष्याधिकारत्वादित्यनेनदेवाद्यधिकारादेःस्मारितत्वादितिभावः ॥ नाध्यायसंगतिरिति ॥ मुख्यतोव्युत्पाद्याधिकारेनसाक्षाद्ध्यायसंगतिर्गवेषणीयेत्यर्थः । प्रासंगिकसंगतेस्त्वत्रापिसत्वात्फलितेदेवतोपास्यत्वलिंगसमन्वयेसाक्षात्संगतेरपिसत्वाच्च ॥ अतएवसंक्षेपेदेवैर्वेदैर्ज्ञेयइत्युक्तं । टीकायामपिनतदुपास्यत्वलिंगविष्णोरितिपूर्वपक्षोपसंहारः । तदुपास्यत्वंहरेरित्यधिकरणोपसंहाराच्च । प्राक्प्रायःशब्देनव्यावर्तनंतुमुख्यतःसाक्षात्संगत्यभावेनेतिध्येयं । ननुस्मृतस्योपेक्षानर्हत्वंप्रसंगः नस्मृतत्वमात्रं तत्कथमस्योपेक्षानर्हत्वमित्यतस्तत्प्रदर्शनपरभाष्यमवतार्यव्याचष्टे ॥ श्रुत्यादिसंगतीति ॥ ॥ असाम्यादिति ॥ श्रुतेरपौरुषेयत्वेनप्राबल्यादितिभावः । अर्थीतिप्रयोजनार्थी ततोसाधनकरणसमर्थः । साधनेतिकर्तव्यताज्ञान्यधिकारीभवतीतिन्यायार्थः ॥ कर्मादिविरोधेति ॥ तथात्वेप्रागूर्ध्वदेवताभावेनतदुद्देशेनकृतकर्मणोवैय्यर्थ्याख्यविरोधेनेत्यर्थः । अमराणामित्युक्त्यातेषांमुक्त्यंगीकारेमरणवर्जितत्वप्रसिद्धिविरोधंसूचयति । संदेहबीजंनिषेधकोट्युपस्थापकं ॥ ॐ तदुपर्यपिबादरायणःसंभवात् ॐ ॥ तेषांप्रकृतानांमनुष्याणामुपरिविद्याकर्मभ्यांदेवत्वप्राप्त्यनंतरमपिदेवानामितियावत् अधिकारोस्ति । कुतः विशिष्टबुध्यादिसंभवादितिबादरायणआहेत्यर्थः । विघटनप्रकारंव्यंजयन्नाह ॥ मनुष्येति ॥ विशिष्टबुध्यादीति वाक्यार्थज्ञानोपयोगिशक्तिगृहादीत्यर्थः ॥ योग्येति ॥ देवत्वयोग्यानांमनुष्येषुसाधनसंपत्यर्थमवतारादित्यर्थः । स्वोक्तिमात्रेणेतरसूत्रेष्विवस्वमतस्यज्ञातुंशक्यत्वाद्बादरायणग्रह

SGDF
Sri Gargeshwari Digital Foundation

गमनर्थकमित्यतआह ॥ विप्रतिपत्तीति ॥ मध्वादिष्वसंभवादितिवक्ष्यमाणत्वादितिभावः ॥ विशिष्टबुध्यादि-
राहित्येति ॥ तथाचानुमानस्यसोपाधिकत्वमितिभावः । उपाधेःसाक्षाद्दोषत्वाभावादाह ॥ तथाचेति ॥ तथाचदेवाः
वेदाधिकारिणःनिषेधरहितत्वेसतिविशिष्टबुध्यादिमत्वाद्योग्यत्रैवर्णिकवदितिप्रतिपक्षानुमानंभाष्यसूचितमितिभावः ॥ व्या-
प्तिविधुरइति ॥ तिर्यक्षुसाध्याव्यापकइत्यर्थः ॥ व्यभिचारपरिहारइति ॥ अधिकाराभावरूपसाध्यवतिसच्छूद्रे
विशेषणाभावप्रत्युक्तस्यनिषेधराहित्येसतिविशिष्टबुध्यादिराहित्यरूपोपाधेरपिसत्वात्साध्याव्यापकत्वपरिहारइत्यर्थः । उ-
तराधिकरणन्यायेनसच्छूद्रस्याधिकारनिषेधादितिभावः ॥ वेदविद्याधिकारितयेतिशेषइति ॥ खांडवदहनस्थानां
जरितारिसरिसृकस्तंबमित्रद्रोणाख्यानांचतुर्णांपक्षिणांसमात्रकाणांकृत्स्नवनंपरितोदहतावह्निनास्वदाहप्रसक्तौभ्रात्रभिः प्रा
र्थितोजरितारिः अयमग्नेजरितेत्यादिमंत्रैःस्तुत्वाप्रीतेनाग्निनातान्मोचयामासेति । एवमुक्तोभ्रातृभिस्तुजरितारिर्विभावसुंतु
ष्टाव प्रांजलिर्भूत्वायत्तच्छृणुनराधिपेत्यादिनाभारतेप्रसिद्धत्वादितिभावः । अनेनेति ॥ अमनुष्याणांजरितर्यादीनांवेदा
धिकारप्रदर्शनेनेत्यर्थः ॥ स्वप्रयुक्तेति ॥ प्रतिपक्षानुमानेत्यर्थः । अपोढःनिराकृतःसाध्याव्यापकत्वादितिभावः
॥ ॐ विरोधःकर्मणीतिचेन्नानेकप्रतिपत्तेर्दर्शनात् ॐ ॥ देवपदस्यसादित्वांगीकारेकर्मणीकर्मविषयेविरोधःउक्तरी
त्याव्यर्थतालक्षणःस्यादितिचेन्न । अनेकेषांयोग्यमनुष्याणांप्रतिपत्तेःपूर्वंदेवतापदप्राप्तेःयज्ञेनेतिश्रुत्युक्तत्वादित्यर्थः ॥ उद्दे
श्येति ॥ यदुद्देश्यहविस्त्यागःतदभावेनेत्यर्थः । यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन्नितिप्रथमार्धेनसह तेहनाक
मितिश्रुतिंदेवतापदस्यसादित्वपरतयाव्याचष्टे ॥ देवाःदेवत्वयोग्याइति ॥ पदप्राप्त्यनंतरमेवदेवसंज्ञेतिभावः । प्रथमा
निधर्माणीत्यस्यार्थोमुख्यलोकधारकाइति कंसुखंतदन्यदकंतन्नभवतीतिनाकंइतिनञ्द्वयार्थमाह ॥ पूर्णसुखेति ॥ साध्याः

देवाश्चेत्यर्थः ॥ ॐ शब्दइतिचेन्नातःप्रभवात्प्रत्यक्षानुमानाभ्यां ॐ ॥ देवतापदस्यसादिविनाशित्वेशब्दोनि
त्यवेदेअप्रामाण्याख्यविरोधःस्यात्पश्चाद्देवाभावेनवाच्यहीनस्यप्रामाण्यायोगादितिचेन्न । अतःधातायतेतिशब्दान्महतां
प्रत्यक्षात् अन्येषामुपरितनकालोदेवान्कालत्वादित्यनुमानाच्चप्रभवाद्देवानांप्रभवनियमावगमादित्यर्थः । तथाचदेवाभाव
कालेवाच्यहीनत्वमेवेतिभावः ॥ तदेवेति ॥ निरभिधेयत्वादिदोषशून्यवाक्यस्यैवावगमत्वादितिभावः ॥ वाचेति ॥
हेविरूप तस्मैभगवते नित्ययावाचाशोभनास्तुतिंप्रेरयेत्यर्थः ॥ उपचारेति ॥ नित्यवद्बहुकालवृत्तित्वादितिभावः
॥ प्रामाण्याभावेति ॥ अनित्यत्वेपुरुषजन्यत्वेनविप्रलंभादिदोषमूलत्वसंभवादितिभावः । तार्किकःप्रत्यवतिष्ठते
॥ आप्तिमूलत्वेनेति॥विविक्षितार्थतत्वज्ञानाविप्रलिप्साकर्णपाटवविविक्षितार्थरूपाप्तिमूलत्वेनेत्यर्थः । तथाचनदोषशंके
तिभावः ॥ सार्वज्ञादाविति ॥ विविक्षितार्थतत्वज्ञानादौवित्यर्थः । वेदस्यसर्वार्थप्रतिपादकत्वात्सार्वज्ञोक्तिः । विवाद
पदंधर्मादि अतींद्रियापरोक्षिणः सार्वज्ञंकैमुत्यसिद्धमितिभावः । आभासतुल्यत्वमाह ॥ प्रमेयत्वेनेति ॥ विवादपदंअ
स्मदादिप्रत्यक्षंप्रमेयत्वाद्घटवदितिविप्रतिपन्नास्मदादिप्रत्यक्षत्वसाधनापातादित्यर्थः । हेतोरानिर्वचनादसिद्धिश्चेत्यतआह
॥ किंचेत्यादिना ॥ नतेनसार्वज्ञसिद्धिरित्यंतेन ॥ केवलान्वयीति ॥ व्यावर्तकधर्मस्यैवजातित्वादितिभावः ॥ अस्व
तंत्रत्वादिति ॥ द्रव्यादिसापेक्षप्रतीतित्वादितिभावः ॥ गुणादावपिवृत्तेरिति ॥ गुणकर्मणोश्चद्रव्यमात्रवृत्ति
त्वादितिभावः ॥ अनित्येपीति ॥ विशेषस्ययावन्नित्यद्रव्यमात्रवृत्तित्वादितिभावः । अप्रतियोगिसापेक्षत्वादितिछेदः
ततःप्रमेयभावात् ॥ भावभवित्रोरिति ॥ धर्मधर्मिणोरित्यर्थः ॥ उक्तानतिवृत्तेरिति ॥ अतिरिक्तत्वेकचिदं
तर्भावस्यावश्यकत्वेनतस्यचनतावद्द्रव्यमित्यादिनोक्तदोषमतिक्रम्यावृत्तेरित्यर्थः॥ एवमिति ॥ यदिप्रमेयस्यभावःप्रमेयत्वं

SGDF
Sri Gargeshwari Digital Foundation

नततोति रिक्तं तर्हिपरस्यभावःपरत्वं अपरस्यभावःअपरत्वं गुरोर्भावःगुरुत्वं द्रवतोर्भावःद्रवत्वं पृथग्वृत्तेर्भावःपृथक्त्वंनततो त्तिरिक्तमितिअंगीकारापातेनतेषांगुणानांतिलोदकांजलिदानप्रसंगादित्यर्थः ॥ प्रमेति ॥ प्रमाविषयत्वरूपप्रमेयत्वेत्रया णांभासमानत्वादितिभावः ॥अन्येनेति ॥ तथाचायुतासिद्धत्वाभावान्नसमवायः । प्रमायागुणत्वादेवनसंयोगइत्यर्थः ॥उक्तदोषेति॥ नतावद्द्रव्यमित्याद्युक्तदोषाणां लंघनेअतिक्रमणे अजंघालुत्वाज्जंघाशून्यत्वादित्यर्थः । जंघालोतिजवस्तुल्य इत्यमरोक्तेः । अन्यसमये तार्किकसिद्धांते ॥ धर्मांतरेपीति ॥ ज्ञेयत्वाभिधेयत्वादावपीत्यर्थः । तथाचतस्यापिनोक्तसा ध्येहेतुत्वंसंभवतीतिभावः । विप्रतिपन्नं भूभूधरादिकं । सार्वज्ञसिद्धिरिति उपादानगोचरापरोक्षज्ञानवतएवकर्तृत्वादि तिभावः॥शरीरजन्यत्वेति॥ईशस्यतन्मतेअशरीरत्वादितिभावः॥सत्प्रतिपक्षत्वाच्चेति॥ नन्वत्रोपाधेःसत्प्रतिपक्षोन्ना यकत्वेनैवदूषकत्वमुतप्रकरांतरेणापि नाद्यः चशब्दानुपपत्तेः ॥ उपाधावित्यादि ॥ पृथग्विशेषणकृत्यकथनानुपपत्ते श्च । नांत्यः सएवोपाधिदोषोपीति प्रमाणलक्षणविरोधात् । तत्रप्रतिज्ञायाःसमबलप्रमाणविरोधरूपप्रतिपक्षातिरिक्तोपाधि दोषस्यैवकारेणव्यावर्तनात् । उपपादितंचैतन्यायकल्पलतायामितिचेत् उच्यते पक्षादिप्रविभागात्पूर्वंव्याप्तिग्रहकाले प्रतीतस्योपाधेर्व्यभिचारोन्नायकत्वं । अनंतरंचप्रतिपक्षोन्नायकत्वमेव । व्याप्तेःपूर्वंगृहीतत्वेनव्यभिचारोन्नायकत्वासंभ वात् । उदात्तवाक्यंचअनंतरोपस्थितोपाधिविविक्षयैव अन्यथासाध्यसाधनवैलोम्यमव्याप्तिः साधनस्यचेत्यनुव्याख्या नेऽव्याप्तिचशब्दाभ्यांव्यभिचारसत्प्रतिपक्षयोरुक्त्यातद्विरोधापत्तेः । स्पष्टंचैतत्पत्यत्यादौतर्कतांडवेच । तथाचात्रव्यभिचार सत्प्रतिपक्षाख्यदूषणद्वयाभिप्रायेणप्रवृत्तेर्नकोपिदोषइति ॥ पक्षव्यावृत्त्यर्थत्वादिति ॥ अन्यथाजन्यत्वमात्रस्यपक्षेसत्वे नसाधनव्यापकत्वंस्यात् । विशेषणदानेचेश्वरस्यशरीराभावाद्भवतितद्व्यावृत्तिरितिभावः ॥ पक्षेतरस्यापीति ॥ तत्रापीतरस्य

SGDF Sri Gargeshwari Digital Foundation

मात्रस्यपर्वतेसत्त्वेनसाधनव्यापकत्वपरिहारायपक्षव्यावृत्त्यर्थंपर्वतेतिविशेषणोपादानादितिभावः । पर्वतेतरत्वस्यव्याप्तिर
स्ति नवा आद्यंनिरस्यति ॥ कानोहानिःपर्वतेतरत्वादीनामपिव्याप्तिरस्तिचेदिति ॥ यद्वावह्निरहितंपर्वतंपक्षीकृ
त्यवह्निःसाध्यतेपक्षेसाध्यव्याप्त्यभंगाद्भवत्येवपर्वतेतरत्वमुपाधिः । अतएवबाधोन्नीतपक्षेतरस्यपर्वतेतरत्वादेरुपाधित्वंसं
मतमितिभावः । द्वितीयंनिराह ॥ अनुमानोपजीव्येनबाधादव्याप्तिरिति ॥ अनुमानस्योपजीव्येनयद्यग्निर्नस्यात्त-
र्हिधूमोपिनस्यादितितर्केणपक्षेवन्हिनिश्चयेतत्रैवसाध्यव्यापकत्वभंगेनपर्वतेतरत्वस्योपाधिलक्षणराहित्येनैवदुष्टत्वं । नतुपक्ष
व्यावर्तकविशेषणवत्वादित्यर्थः । हेतौव्यभिचारवारकविशेषणमेवोपादेयं नत्वसिद्धिवारकमितिमतेप्रतिपक्षेविशेषणंव्यर्थ
मेवेत्यतआह ॥ नचेति ॥ व्यभिचारवारकविशेषणस्यव्याप्तिग्रहोपयोगित्वान्नवैय्यर्थ्यमित्यतआह ॥ व्याप्तिवदि-
ति ॥ तदर्थमसिद्धिवारकविशेषणमपिसप्रयोजनमितिभावः । उपाधेरन्यथासिद्धिमाशंक्यनिराह ॥ सकर्तृकत्वेति ॥
॥ उत्तरत्रेति ॥ समयपादेसंबंधानुपपत्तेश्चेत्यत्रशरीराभावे ईश्वरस्यमृतपुरुषवज्जगताकर्तृत्वेनसंबंधानुपपत्तेरितिशरीर-
स्यापिकर्तृत्वेप्रयोजकत्वसमर्थनेननिराकरिष्यतइत्यर्थः । सर्वकर्तृत्वेउक्तरीत्यासर्वज्ञत्वंप्राप्तमेवेत्यतआह ॥ बहुकर्तृत्वेति ॥
जगत्कर्तुरेकएवतस्योक्तरीत्यासार्वज्ञंस्यादितिभावः ॥ लोकानुकूल्यादिति ॥ लोकेविचित्रप्रासादादिनिर्माणस्या
नेककर्तृकत्वस्यैवदर्शनादितिभावः ॥ अविप्रलंभादीति ॥ प्रमाणाभावादितिभावः । सार्वज्ञस्योक्तरीत्याकथं
चिच्छंकार्हत्वेपि अविप्रलंभादेस्तदभावादतीत्युक्तं । आप्त्यनिश्चयादितिभाष्यमाप्तिमूलकत्वानिश्चयादित्यपिव्याचष्टे
॥ अस्तुवेति ॥ कुतःप्रमाणादनुमानादागमाद्वा वेदःपामरप्रणीतःवेदत्वात्व्यतिरेकेणगगनवदित्याभाससमानयोग
क्षेमत्वमनुमानस्येत्याह ॥ वेदत्वस्येति ॥ वेदत्वस्यपामरप्रणीतकालिदासादिवाक्यरूपात्सपक्षाद्व्यावृत्तत्वेन.स.

SGDF
Sri Gargeshwari Digital Foundation

भारण्यमितिचेत्तर्हिसर्वज्ञप्रणीतभारतादिरूपसपक्षाद्व्यावृत्तत्वेनत्वत्पक्षेप्यसाधारण्यायित्याह ॥ असाधारण्यस्यचेति ॥ ॥ वेदानित्यत्वइति ॥ तथाचवेदप्रामाण्यसिद्धौप्रमाणवाक्यत्वेनाप्तिमूलत्वसिद्धिः । तत्सिद्धौचतत्प्रामाण्यसिद्धिरित्यन्योन्याश्रयइतिभावः ॥ तस्मादिति ॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरेत्यत्रयज्ञशब्दवाच्येश्वरजन्यत्वंश्रूयतइतिभावः ॥ उक्तेति ॥ ईश्वरासार्वज्ञसिद्धिरूपोक्तदोषादित्यर्थः ॥ कारणेति ॥ अग्निरचितत्वरूपमुख्यार्थत्यागइतिशेषः । एतत्संप्रदायप्रवर्तकत्वं ईश्वरस्यतुसार्वज्ञात्कर्तृत्वमेवेतिभावः ॥ चक्रकापातादिति ॥ ईश्वरस्यसर्वज्ञत्वे तस्माद्यज्ञादित्यादिनावेदस्यसर्वज्ञप्रणीतत्वासिद्धिस्तत्सिद्धौचवेदप्रामाण्यसिद्धिस्तत्सिद्धौचवेदेनेश्वरस्यसार्वज्ञसिद्धिरीतिचक्रकापातादित्यर्थः । तादृशं अदृष्टविषयं ॥ अनुमानमिति ॥ देवदत्तशरीरंदेवदत्तविशेषगुणजन्यंकार्यत्वेसतिदेवदत्तभोगहेतुत्वाद्देवदत्तप्रयत्नजन्यमालावदित्यनुमानमित्यर्थः ॥ प्रतिपक्षादीति ॥ देवदत्तशरीरादेःकिंसाक्षाद्देवदत्तविशेषगुणजन्यत्वंसाध्यं उतपरंपरयावा नाद्यः धर्माधर्मयोरप्यारंभकप्रेरणादिनैवोपयोगांगीकारात् । देवदत्तशरीरंन साक्षाद्देवदत्तगुणजन्यंशरीरत्वाद्यज्ञदत्तशरीरवदितिसत्प्रतिपक्षाच्च द्वितीयेजन्मांतरीयप्रयत्नाराधितदेवताद्वारेणोपपत्तेरर्थांतरता देवदत्तविशेषगुणजन्यतयाविनाप्याकाशादेरिवेश्वरेच्छयादेवदत्तस्यभोगहेतुतासंभवतीत्यप्रयोजकताचेत्यादिदुष्टत्वादित्यर्थः ॥ अदृष्टसंभावनेपीति ॥ उक्तरीत्यासामान्यतोदृष्टसिद्धावपिनादृष्टविशेषसिद्धिरित्यर्थः । तदेवव्यनक्ति ॥ नहीति ॥ प्रामाण्यस्य करणप्रामाण्यस्य ॥ स्वतस्त्वेनेति ॥ ज्ञानजनकशक्त्यैवतद्गतयाथार्थ्यजनकत्वेनेत्यर्थः ॥ गुणेति ॥ कर्तृगुणोत्पादकेत्यर्थः । एतदेवोपपादयति ॥ प्रामाण्यंनामेत्यादिना ॥ याथार्थ्यं ज्ञाननिष्ठं ॥ याथार्थ्यमिति ॥ अप्रामाण्यघटरूपयोर्व्यभिचारवारणायविशिष्टग्रहणं विशेषणत्यागेनाप्याह ॥ याथार्थ्यमिति ॥

अप्रामाण्यंनदोषजन्यंज्ञानधर्मत्वात्प्रामाण्यवदित्याभाससाम्यमाशंक्यनिराकरोति ॥ नचेति ॥ दोषाभावेति ॥ तथाचान्वयव्यतिरेकाभ्यामप्रामाण्यदोषयोःकार्यकारणभावग्राहकप्रमाणबाधकमितिभावः । नचैवंगुणाभावेप्रामाण्याभावोपिनियतइतिवाच्यं । यादृच्छिकसंवादिस्थलेव्यभिचारस्यवक्ष्यमाणत्वात् । प्रमा ज्ञानसामग्रीव्यतिरिक्तकारणजन्येत्यत्र प्रमात्वविशिष्टपक्षः तदुपलक्षितंवा तत्राद्यंविकल्प्यदूषयति ॥ प्रमायाइति ॥ अत्रसर्वत्रकारणपदंसामग्रीपरंपूर्वोत्तरग्रंथानुगुण्यात् एवंविधत्वेनातिरिक्तकारणजन्यत्वेन एतदुत्तराभ्यामप्यन्वितं ॥ व्याहतेरिति ॥ सर्वस्यापिस्वसामग्रीमात्रजन्यत्वादितिभावः । द्वितीयंशंकते ॥ प्रमात्वयुक्तज्ञानस्येति ॥ अत्रापिज्ञानसामग्रीव्यतिरिक्तकारणजन्यत्वंकिंतन्मात्रजन्यत्वं उतज्ञानसामग्रीजन्यत्वेसतितदतिरिक्तजन्यत्वं आद्येआह ॥ तादृशज्ञानस्यापीति ॥ द्वितीयंशंकते ॥ ज्ञानकारणेति ॥ घटादौव्यभिचारादिति ॥ कार्यत्ववतिघटादौज्ञानकारणजन्यत्वांशाभावादितिभावः ॥ ज्ञानकारणमात्रेति ॥ घटादावस्यसत्वान्नव्यभिचारइतिभावः । ज्ञानेज्ञानसामान्ये ॥ ज्ञानातिरिक्तेति ॥ ज्ञानसामान्यातिरिक्तेत्यर्थः ॥ तत्साधनेति ॥ ज्ञानकारणमात्रजन्यत्वाभावसाधनेत्यर्थः । तथाचाभाससाम्यमितिभावः । ननुज्ञानसामान्येज्ञानसामग्रीमात्रजन्यत्वाभावः । सिध्यन्नजन्यत्वेनवातिरिक्तसामग्रीजन्यत्वेनवासिध्यति । आद्येज्ञानं अजन्यं कार्यत्वादितिप्रयुक्तंस्यात् तथाचप्रतिज्ञाहेत्वोर्व्याघातः । द्वितीयेज्ञानंज्ञानसामग्र्यतिरिक्तसामग्रीजन्यमितिस्यात् तथाचप्रतिज्ञाहेत्वोर्व्याघातः । ज्ञानजनकेज्ञानसामग्र्यतिरिक्तत्वाभावादित्यतआह ॥ विशिष्टाभावविकल्पेनेति ॥ ज्ञानसामग्रीमात्रजन्यत्वाभावरूपविशिष्टाभावविकल्पेनाभिहितव्याघातस्यसमीकरणात्तुल्यत्वादितिभावः । तथाहि प्रमायामपिनाजन्यत्वेनज्ञानसामग्रीमात्रजन्यत्वाभावपर्यवसानं पूर्ववत्प्रतिज्ञाहेत्वोर्व्याहतेः । नाप्यतिरिक्तसामग्रीजन्य

Sri Gargeshwari Digital Foundation

त्वेनप्रमायाअपिज्ञानत्वेनतत्कारणस्यज्ञानसामग्रीव्यतिरिक्तत्वाभावेनप्रतिज्ञापदयोर्व्याघातादिति ॥ प्रतिज्ञानिरासनेति ॥ प्रमाज्ञानसामग्रीव्यतिरिक्तकारणजन्येतिप्रतिज्ञानिरासेनेत्यर्थः । परतस्त्ववादिनापिगुणत्वजातेरनंगीकारेण गुणशब्देनज्ञानकारणातिरिक्तकारणस्यैवविवक्षणीयत्वेनपूर्वोक्तव्याघातापत्तेरितिभावः । कार्यत्वहेतुदोषस्यघटज्ञानयोर्व्यभिचारस्यात्रहेतावसंभवात्प्रतिज्ञानिरासेनेत्युक्तं ॥ अन्यत्रेति ॥ अनन्यथासिद्धमन्यथासिद्धंवेत्यर्थः ॥ व्यभिचारादिति ॥ तादृशान्वयव्यतिरेकिणस्तंतुरूपस्यपटहेतुत्वादर्शनादितिभावः ॥ उभयेति ॥ दोषनिरासरूपप्रामाण्यरूपोभयेत्यर्थः । एवंदोषस्यगुणनिरासोपक्षीणत्वादिनेत्यर्थः । एतत् प्रमायाः गुणान्वयव्यतिरेकनियमेनतेषामुभयकारणत्वं ॥ व्यभिचारादिति ॥ भ्रांतप्रतारकवाक्येगुणाभावेपिप्रमोत्पत्त्याव्यतिरेकव्यभिचारादित्यर्थः ॥ कारणतयापन्नइति ॥ प्रतिबंधकाभावस्यापिकारणत्वादितिभावः ॥ कारणत्वापत्तेरिति ॥ नचेष्टापत्तिः प्रतिबंधकाभावस्यापिकारणत्वे उत्सर्गापवादयोःक्वाप्यभावप्रसंगात् । औत्सर्गिककार्यापवादकविरहतारूपान्यथासिद्धत्वाच्चेतिभावः ॥ दोषाभावस्यकारणत्वेचेति ॥ नन्विदमयुक्तंपूर्वग्रंथेन तर्हिदोषाभावःकारणमित्यायातमितिचेन्न तथासत्युत्सर्गापवादयोः क्वाप्यभावप्रसंगादितिसुधायाः दोषाभावोपिनकारणंयादृच्छिकसंवादादिषुसत्यापिदोषेप्रमाणज्ञानोदयादितितत्वनिर्णयटीकायाश्चविरोधादितिचेदुच्यते । अभ्युच्चयवादेनात्रकारणत्वोक्तिरित्यदोषः । वस्तुतस्तुअत्रकारणपदंघटंप्रतिकुलालपित्रादिसाधारणतद्व्यतिरेकपयुक्तव्यतिरेकप्रतियोगित्वरूपप्रयोजकत्वमात्रपरं । अतएव अदुष्टमिंद्रियंत्वक्षंतर्कोदुष्टस्तथानुमा आगमोदुष्टवाक्यंचेतिब्रह्मतर्कवाक्येनिर्दोषार्थेंद्रियसन्निकर्षःप्रत्यक्षमित्यादिप्रमाणलक्षणेचदोषाभावघटितलक्षणकथनमपिसंगछते । नचैवंप्रामाण्यस्यज्ञानकारणातिरिक्तकारणसापेक्षत्वेनपरस्त्वंमंतव्यं । दोषाभावस्यप्रयोजक

SGDF Sri Gargeshwari Digital Foundation

त्वेपिकारणत्वाभावेनातिरिक्तकारणानपेक्षितत्वात् दोषाभावस्यापेक्षितत्वेपिप्रमाजननशक्तिःसहजा नतुभ्रमजननेशुक्ति
वदाधेयेत्येतावतैवप्रामाण्यस्वतस्त्वसिद्धेश्च । उक्तंचसुधायां इंद्रियादीनामौत्सर्गिकीशक्तिःप्रामाण्यजननेदोषापवादाद
प्रामाण्यमपिजनयतीति पूर्वग्रंथादीनांचदोषाभावस्यकारणत्वनिषेधपरत्वमित्यविरोधः स्पष्टमेतत्तर्कतांडवइति ॥ अव्या
घातादिति ॥ प्रामाण्यार्थमाप्तोक्तत्वानंगीकारादितिभावः । व्यभिचारात् साध्याव्यापकत्वात् ॥ अजन्यप्रमा
त्वमिति ॥ जन्यप्रमात्वाभावइत्यर्थः । तेनव्यभिचारनिरासः ॥ व्याप्त्यभावादिति ॥ यादृच्छिकसंवादिदुष्ट
वाक्यजन्यप्रमायांगुणजन्यत्वाभावरूपसाध्येसत्यपिजन्यप्रमात्वाभावरूपोपाध्यभावेनसाध्याव्यापकत्वादित्यर्थः ॥ कर्तृ
गुणनिरपेक्षस्यापीति ॥ ज्ञानगतयाथार्थ्यंप्रयोजकत्वेनाभिमतगुणाप्तत्वनिरपेक्षस्यापियथार्थज्ञानकारणत्वरूपप्रामा
ण्यसिद्धेरित्यर्थः । देवतानांभावःसत्तातन्नियमइत्यर्थः ॥ देवताह्वानादिरूपस्येति ॥ एह्यग्निइत्यादिमंत्राणांदेव
ताह्वानार्थत्वात्तदा देवताभावेतद्ह्वानायोगादितिभावः ॥ स्वरूपनित्यत्वाभावेपीति ॥ देवत्वव्यवहारहेतुविशि
ष्टरूपस्यनष्टत्वादितिभावः ॥ अतीतविषयतयैवेति ॥ अन्यथा अकल्पयदितिलङ्नस्यादितिभावः ॥ उपचारेणेति ॥
प्रभवस्यबाहुलिकत्वेनेतिभावः । तदनिश्चयः तादृशप्रत्यक्षानिश्चयः ॥ यथेति ॥ पर्यये ऋतूनांपरिवर्तने संवत्सरांत
रप्राप्ताविति यावत् । ऋतुषुवसंतादिषु नानारूपाणि अन्योन्यविलक्षणानि । तानितान्येववसंतेकोकिलगानादीनि
अन्यदासारसगानादीनिऋतुलिंगानिऋतुज्ञापकानियथादृश्यंतेतथायुगकल्पादिषुनानारूपास्तएवभावाः पदार्थाःदृश्यंतइ
तिभारतवाक्यार्थः । अत्रदृश्यंतइत्यनुवादात्प्रत्यक्षंज्ञायतइतिभावः । व्यभिचारस्त्वद्रीत्या ॥ परंप्रतीति ॥ परेणपू
र्वपक्षिणाप्रलयानभ्युपगमेनव्यावृत्त्याप्रसिद्धेरितिभावः ॥ प्रमाणेति ॥ यत्प्रयंति आकाशंप्रत्यस्तंयंति यमप्येतिभुवनं

SGDF
Sri Gargeshwari Digital Foundation

यस्मिंश्चलयंयांतीत्यादिरूपेत्यर्थः ॥ ॐ अतएवचनित्यत्वं ॐ ॥ अतएवचशब्दस्यनित्यत्वादेवतदन्यथानुपपत्त्यैवे तियावत् देवप्रवाहस्यनित्यत्वमित्यर्थः । उपपत्तिःनित्वत्वस्य यथावस्थितार्थप्रतिपादनरूपप्रामाण्येवाच्यार्थापेक्षायामपि-स्वरूपसत्त्वेतदनपेक्षणादितिभावः ॥ तदभावादेवेति ॥ वेदप्रामाण्यस्यसाधितत्वेनाप्रामाण्याभावादेवेत्यर्थः । वि-षयत्वेनोपपत्तिरितिवर्तते । उक्तत्वात्तस्यदेवताह्वानादीत्यादिना स्वरूपस्य विशिष्टरूपस्य अन्यथा प्रवाहनित्यत्वंविना अन्यार्थत्वं अवांतरप्रलयपरत्वं ॥ बाधकेति ॥ मुख्यप्रलयांगीकारइतिशेषः । बाधकंशंकते ॥ जातिसंकेतेति॥ सर्वप्रलयाभ्युपगमेपुनरादिसृष्टौब्राह्मणादिजातिरनेनपदेनेदंवाच्यमितिसंकेतगृहश्चनस्यात् जनकोपदेशकयोरभावादिति-भावः । ईश्वरोपदेशेनसंकेतग्रहसंभवेपिनतस्माद्ब्राह्मणादिजात्युत्पत्तिः ब्राह्मण्यांब्राह्मणाज्जातोब्राह्मणःपरिकीर्तितइतिनि यमादित्यतआह ॥ ब्राह्मणादेवेति ॥ क्वचित् आदिसृष्टौ ॥ वृश्चिकतंडुलीयकादिवदिति ॥ यथागोमयतंडु लकणादिविजातीयजन्यानामपिवृश्चिकतंडुलीयकत्वादिजातिस्तथैवाब्राह्मणाज्जातस्यापिसर्गादिकालीनस्यब्राह्मणत्वजाति रित्यर्थः। शंकते ॥ देवानामिति ॥ कथंनाप्रामाण्यमिति ॥ अतंनामरूपवतांतन्नामरूपवत्तयाप्रतिपादकत्वादिति भावः । तत्तत्कल्पेतत्तन्नामरूपदेवप्रतिपादकत्वमतोनदोषइत्यतआह ॥ नित्यत्वव्याघातादिति ॥ शब्दतोअर्थत श्चैकप्रकारत्वस्यैवतन्नित्यत्वादितिभावः ॥ ॐ समाननामरूपत्वाच्चावृत्तावप्यविरोधोदर्शनात्स्मृतेश्च ॐ ॥ प्रा-चीनदेवानांमुक्तत्वेनस्वस्वपदेष्ववृत्तावपितदन्येषांतत्समाननामरूपत्वात्तत्प्रतिपादकैकविधस्याप्रामाण्याख्यविरोधोनास्ति-तदेवकुतइतिचेत् यथापूर्वमितिदर्शनाच्छ्रुतेःअनादिनिधनेतिस्मृतेश्चेत्यर्थः॥ तत्स्वरूपेति॥ नामरूपकल्पनानियमत्यागेनदे वकल्पनानियममात्रेत्यर्थः॥ तद्वाचित्वेनेति॥ तथात्वेयथावस्थितार्थप्रतिपादकत्वादितिभावः॥ अपौरुषेयेति॥ पौरुषे

यत्वेतुपुरुषव्यापारेणैवतत्संभवतीतिभावः । स्मृतिव्याख्यानपूर्वकंशंकापरिहारप्रकारंदर्शयति॥ स्वयंभुवेत्यादिना ॥ ऋषीणामित्यस्यप्रकृतोपयोगायाह ॥ ब्रह्मादिविबुधानामिति ॥ ऋषिज्ञानइतिधातुव्याख्यानादितिभावः । नाम धेयानांवेदशब्दानतिरिक्तत्वेननित्यत्वात्कथंतत्करणमित्यतआह ॥ तान्शब्दानीति ॥ संयोजितवान् अयंशब्दोए-तद्वाचकइतिज्ञापितवान् शब्दार्थसंबंधस्यौत्पत्तिकत्वाद्रूपशब्दस्योक्तरीत्यान्वयः ॥ अप्रामाण्येति ॥ तदादेवताभावे नवाच्यहीनत्वादितिभावः । देवताह्वानादिप्रतिपादकस्यातीतविषयत्वानुपपत्तेराह ॥ भगवन्मात्रेति ॥ तस्यसर्व नामरूपादिमत्वादितिभावः ॥ ॐ मध्वादिष्वसंभवादनधिकारंजैमिनिः ॐ ॥ मधुविद्याप्रभृतिषुदेवानामन धिकारंजैमिन्याचार्योमन्यते कुतःयोग्यानांवस्वादिपदानांप्राप्तत्वात् अयोग्यानामकाम्यत्वेनतत्रार्थित्वासंभवादित्यर्थः । मध्वादीत्यादिपदार्थकथनपूर्वकमाह ॥ वेदविद्याइत्यादिना ॥ फलार्थाः फलोद्देश्याः ॥ यथामधुविद्येति ॥ असौवाआदित्योदेवमध्वित्यादिमधुविद्यास्वादित्यस्थआदित्यनामाभगवान्परमानंदत्वात् मधु देवानामुपजीव्यत्वाद्देवम ध्वितिभगवतोमधुत्वमुक्तातदुपासकानांवसुरुद्रादित्यमरुद्गुनामकगणस्थानांपंचानांवस्वादिपदप्राप्तेः फलत्वेनोक्तत्वादिति भावः ॥ यथाग्निष्टोमेति ॥ अग्निष्टोमेनस्वर्गकामोयजेतेत्यत्रस्वर्गफलकत्वश्रवणादितिभावः । कुतइत्यतआह ॥ सयएतदिति ॥योधिकारी एतत्प्रथमंवासुदेवाख्यममृतमेवमुक्तरीत्या वेद जानाति वसूनामेकोभूत्वावसुभोग्यदेशका ला धिपोभूत्वा अग्निनामुखेनप्रधानेनतदुपदेशेनेतियावत् । एतदेववासुदेवाख्यममृतंदृष्ट्वातृप्यति मुक्तिमाप्नोतीत्यर्थः ॥ देवेति ॥ स्वयंदेवोभूत्वादेवान्प्राप्नोति ऊर्जं अक्षयान्नंप्राप्नोतीत्यर्थः ॥ एवंकर्मेति ॥ यद्यप्यग्निष्टोमादौस्वर्गाद्येव फलत्वेनश्रूयतेनवस्वादिपदं तथापि यज्ञेनेतिप्रागुक्तयज्ञादिकर्मणोदेवतापदप्राप्तिहेतुत्वोक्तेःस्वर्गादिशब्दस्योपलक्षणत्वंवा

SGDF Sri Gargeshwari Digital Foundation

वस्वादिपदस्यापिस्वर्गत्वेनस्वर्गपदेनैववातद्ग्रहणोपपत्तेरितिभावः ॥ नचद्वितीयामृतविद्यादिष्विति ॥ तद्यत्प्रथममृतंतद्वसवउपजीवंतीत्युक्तप्रथमामृतवसुविद्यायाः वसुत्वफलकत्वेनतत्रवसूनामनधिकारेप्यथयद्द्वितीयममृतंतद्रुद्राउपजीवंतीत्यादिनोक्तद्वितीयाद्यमृतविद्यासुरुद्रत्वादेः फलत्वेनतत्राधिकारोस्तितिनवाच्यमित्यर्थः ॥ स्वस्वेतरपदेति ॥ स्वपदस्वेतरपदेत्यर्थः सामान्यफलं प्रकाशादि ॥ प्रकाशवानस्मिल्लोकेभवतीत्यादीनामिति ॥ प्रकाशवानस्मिल्लोकेभवतिप्रकाशवतोहिलोकाञ्जयतीत्यादिनोक्तानामेषवैसौम्यचतुष्कलःपादोब्रह्मणः प्रकाशवान्नामेत्यादिविद्याफलानामस्मिल्लोकेप्रकाशवत्वादीनांमधुविद्याफलकभूतवसुत्वादावंतर्भावादित्यर्थः । वसुत्वप्राप्तौतस्यापिप्राप्तत्वादितिभावः ॥ नेहवेति ॥ एवमुक्तरीत्याप्राणस्यसर्वभोक्तृत्वज्ञातारिकिंचनानन्नंनभविष्यतिसर्वमेवास्यान्नंभवतीत्युक्तंसर्वभोक्तृत्वादिरूपेषु तेहप्राणाअहंश्रेयसिव्यूदिरइत्यादिप्राणविद्याफलेषुरुद्रादेरेवयोग्यत्वादित्यर्थः ॥ ॐ ज्योतिषिभावाच्च ॐ॥ ज्योतिषिदेवानांज्ञानेसर्ववस्तूनांविषयतासंबंधेनभावात्तेषांसर्वज्ञत्वादितियावत् । मोक्षार्थविद्यास्वपितत्साध्यज्ञानस्यप्राप्तत्वेनार्थित्वासंभवादनधिकारंमन्यतइत्यन्वयः ॥ देवानांमोक्षार्थित्वेपीति ॥ नचैकांतानांनकस्यचित् अर्थेनारायणोदेवइत्युक्त्याकथंदेवानांमोक्षार्थित्वमितिवाच्यं । तेषांमोक्षार्थित्वस्यभगवत्पूजार्थत्वात् तत्रकेवलमोक्षकामनायाःनिषिद्धत्वात् उक्तंचविष्ण्वर्थंमोक्षमर्थयन्नित्यादि ॥ अनेनप्राचीनपक्षइति ॥ नकेवलंमोक्षेतरफलार्थविद्यास्वधिकारइतिपक्षेपूर्वोक्तोवस्वादीनांमधुविद्याफलेर्थित्वाभावोदोषः । किंतुविद्यासाध्येवसुत्वादिसाधनेज्ञानेचार्थित्वाभावश्चदोषः । वस्वादीनांनित्यसिद्धज्ञानत्वादित्यनेनसूत्रेणोक्तमित्यर्थः । तंमध्वादिष्वधिकारं ॥ ॐ भावंतुबादरायणोस्तिहि ॐ॥ बादरायणस्तुदेवानांमध्वाद्यशेषविद्यास्वधिकारस्यभावंसद्भावंमन्यते कुतः हियस्मान्मोक्षफलेतद्धेतुज्ञानेचातिशयोस्तितस्मा

Sri Gargeshwari Digital Foundation

दित्यर्थः । प्रागुक्ताधिकारिद्वयमप्युपपादयति । विद्योक्तेत्यादिना ॥ ८ ॥ इत्युक्तेहृद्यपेक्षयेत्यत्र ॥ श्रुत्यादीति ॥ श्रवणेत्रपुजतुभ्यामित्यादिवक्ष्यमाणश्रुत्यादीत्यर्थः ॥ नचोक्तेति ॥ शूद्रस्याधिकारेपिउक्तेधिकारेविरोधोनास्तिशूद्रस्यापिमनुष्यत्वात्तथाचोक्तानाक्षेपादफलोयंविचारइतिनवाच्यमित्यर्थः ॥ स्वन्यानेयेति ॥ मनुष्यत्वविशिष्टबुध्यादिमत्वरूपपूर्वोक्तसूत्रकारीयन्यायेन शूद्रस्याप्यधिकारप्राप्तौवक्ष्यमाणश्रुतिस्मृतियुक्तिविरोधप्राप्तेरित्यर्थः । शूद्रस्यानधिकारोक्तौप्राक्तनसामान्योक्तिः शूद्रेतरमनुष्यपरास्यादितिभावः । अदर्शनं शूद्राणांवेदविचारस्य ॥ पौत्रायणस्येति ॥ पुत्रायणस्यगोत्रापत्यंपौत्रायणस्तस्यजानश्रुतिनामकराज्ञइत्यर्थः ॥ संवर्गविद्येति ॥ संवृक्तेसंहरत्यग्न्यादिदेवानिति संवर्गोवायुस्तद्विद्यामित्यर्थः ॥ दर्शनादिति ॥ वायुर्वावसंवर्गोयदावाग्निरुद्वापयतिवायुमेवाप्येतीत्यादिनेतिशेषः । अत्रेदंबोध्यं अत्युच्चप्रासादस्थेबहुदीपप्रभावतिभवनेनिशायांपौत्रायणेशयानेसतितदानीमेवदेवहंसा अंतरिक्षमार्गेणतद्भवनोर्ध्वप्रदेशमाजग्मुः तत्रैकोहंसःपुरोगतःतंप्रतिपश्चात्तनहंसउवाच परमधार्मिकस्यपौत्रायणस्यप्रदीपज्योतिरतिक्रम्यगमनेतत्वांदहेदिति ततस्तंप्रत्यग्रगामीहंसउवाच किमुच्यतेतस्यराज्ञोमाहात्म्यमेतदपेक्षयोत्तमरैक्वमुनेःसद्भावात् अतएवंवक्तुंसएवयोग्यइति ततस्तद्धंसकृतानादरश्रवणेनपरितप्तमनाःपौत्रायणःप्रातस्तल्पादुत्थितएवसारथिमुखेनरैक्वस्थानंनिश्चित्यतत्वबुभुत्सुर्गवादिगुरुदक्षिणांगृहीत्वाशकटाधोभागनिवासिरैक्वसमीपमुपेत्यतंसंबोध्यदक्षिणांनिवेद्यमह्यंविद्यांदेहीत्युवाच ततोरैक्वःममविरक्तस्यनगवादिनाकृत्यं ममशुश्रूषणायब्रह्मचार्येवापेक्षितः सचानेननानीतइतिकोपेनेदंगवादिकंतवैवास्त्वित्युवाच ततोराजातदपेक्षितंपरिचारकंकल्पायित्वारैक्वाद्वायुविद्यामवापेति अनधिकाराज्ञानपरिहारायमुनेरित्युक्तं । गोधनाद्यापयोपदेशोस्त्वित्यतआह ॥ नहीति ॥ युक्त्यालिंगदर्शनेनचेति ॥ युक्तिर्मनुष्यत्वादिरूपा लिंगंपौत्रायणस्यशू

SGDF
Sri Gargeshwari Digital Foundation

द्रेतिसंबोधितस्यवैदिकसंवर्गविद्याविचाररूपं मनुष्याधिकारित्वादित्युक्तइतिभाष्यस्यमनुष्याणामधिकारस्योक्तत्वादिति । स्वकृतव्याख्यानमुपपादयति ॥ उक्तेति ॥ सप्तमीपंचम्यर्थइति ॥ मनुष्यत्वेपीत्यादिव्याख्यानंचोपपादयति । ॥ अधिकारोपयोगितयेति ॥ श्रुतिंव्याचष्टे ॥ अहेति ॥ अयमर्थः तंपौत्रायणंप्रतिपरोलोकाविलक्षणः परम विरक्तइतियावत् । मुनिःप्रत्युवाचकिमिति अह शूद्र शोकेनाद्रवणवन्पौत्रायण हारःमुक्ताहारः इत्वा रथश्चगोभिःसहतवैवास्त्विति ॥ हेत्याश्चर्यइति ॥ ननुहारइत्वेत्यत्रविसर्गलोपे आद्गुणइतिगुणेचहारेत्वेतिभवति नचैतद्युक्तं । वाशरिशर्परेवाविसर्गलोपइति शरिःपरतःसत्येवविसर्गलोपाभिधानेनप्रकृतेशर्परत्वाभावादित्यतआह ॥ हारेत्विति ॥ सेदुराजेत्यादिवदिति ॥ यथासइत्यत्रशर्परत्वाभावेपिछांदसेनविसर्गलोपेनसेदितिगुणस्तथाहारइत्वेत्यत्र हारेत्वेतिगुणइत्यर्थः । हारत्वेत्येकंपदमित्याशयेनाह ॥ हारेत्वानाविति ॥ व्यत्ययेनद्विवचनस्यैकवचनमितिभावः । तर्ह्यस्त्वित्येकवचनस्य कथमन्वयइत्यतआह ॥ तथात्वइति ॥ द्वितीयव्याख्यानेबुध्याविविक्तयोर्द्वयोःप्रत्येकमस्त्वित्यनेनान्वयइत्यर्थः । ॥ॐशुगस्यतदनादरश्रवणात्तदाद्रवणात्सूच्यतेहिॐ॥अत्रत्यतच्छब्दौक्रमाच्छ्रुतिसूत्रस्थहंसशुक्परामर्शकौश्रुतौपौत्रायणस्तयाशुचाद्रवणान्निमित्तादेवमुनिनाशूद्रेत्युक्तोनतुरूढ्याअतोनशूद्रस्याधिकारइदंलिंगमित्यर्थः। शोकेकिंनिमित्तमित्यतउक्तंशुगस्यतदनादरश्रवणादिति कम्बरएनमित्यादिनाहंसकृतानादरश्रवणात्कारणादस्यपौत्रायणस्यशुगित्यर्थः। कथं ज्ञायतेशुगस्यज्ञातेत्यतउक्तं ॥ सूच्यतेहीति॥ हियस्मात्सहसंजिहानएवक्षत्तारमुवाचेतिव्यग्रत्वोक्त्यासूच्यतेतःशुगस्य ज्ञायतइत्यर्थः । शूद्रशब्दप्रवृत्तीति ॥ पौत्रायणइतिशेषः । अनेन संबोधनेन ॥ अरेहंसेति ॥ अयमर्थः ततस्तंपश्चात्तनंप्रतिअग्रगामीहंसउवाच किमिति अरेहंस संतंनिर्दुष्टंसयुग्वानंसशकटंशकटाधोभागेविद्यमानमितियावत् । रैक्वंप्र

तीवकेमनमुद्दिश्यैतद्वचनमात्थवदसीति । अननुरूपमस्मिन्नुक्तं एवंवक्तुंरैक्वएवयोग्यइतिहंसस्यभावः ॥ श्रुत्युक्तेति ॥ श्रुत्युक्तहंसेत्यर्थः । तेननाप्रसक्तदोषपरामर्शइतिभावः । ज्ञायते भवतां परबुद्धेःपरकीयशोकानुभवस्य अनादरश्रवणरूप कारणेननानुमीयतइत्यतआह ॥ कारणस्यचेति ॥ अविनाभावोव्याप्तिः शयनीयात्तल्पात् क्षत्तारंसारथिं ॥ व्यग्रतयेति ॥ यथोक्तं ततःसारथिमाहूयभूपालोविस्मयाश्रयः संदिदेश महात्मासरैक्वआनीयतामिति । तदुक्तंछांदोग्यभाष्ये। शोकात्शोकेनाद्रवणात् अतःशोकमात्रस्यशूद्रशब्दप्रवृत्तिनिमित्तत्वाभावात्कथमेतदितिनशंक्यं । यद्वाशोकेनातातिगछतीति शोकादतसातत्यगमनइतिधातोः हेतुगर्भमेतत् अस्मान्मुनेः धारकत्वात्धर्मोभगवान् ॥ दीर्घस्वरार्थत्वेनेति ॥ संहितायांयत्रदैर्घ्यंपदेयत्रनविद्यते । उक्तार्थस्यमहाधिक्यंश्रुतेस्तत्रविवक्षितमित्यादिवचनात् श्रुतौ शूद्रइत्यत्रयोदीर्घस्वरः ऊकाररूपोवर्णःसशोकाधिक्यज्ञापनार्थइतिसूचयितुंसूत्रे आद्रवणादित्युक्तं । शीघ्रगमनस्यशोकाधिक्यनिमित्तकत्वादित्यर्थः । ननुशुगुपपदात्द्रुद्रवणइतिधातोर्डप्रत्ययेशुग्द्रइतिभवेत्कथंशूद्रइतितत्राह ॥ शुग्द्रएवेति ॥ रुजंद्रावयतेयस्माद्रुद्रस्तस्माज्जनार्दनइतिस्मृत्यारुग्द्रावणकर्तृत्वेनरुग्द्रइतिभवितव्येगकारलोपेरुद्रइतियथातथैवेत्यर्थः ॥ ॐक्षत्रियत्वावगतेश्चोत्तरत्रचैत्ररथेनलिंगात्ॐ ॥ उत्तरत्रअयमश्वतरीरथइत्यत्रचैत्ररथेनचित्ररथसंबधित्वेनलिंगेनपौत्रायणस्य क्षत्रियत्वावगमाच्चशूद्रशब्दोनरूढइत्यर्थः ॥ अयमश्वतरीरथइति ॥ वडवायांरासभादुत्पन्नाश्वतरीताभ्यांयुक्तोरथः अश्वतरीरथःतवदक्षिणात्वेनवर्ततइत्यर्थः इतिचित्ररथसंबधित्वेनेत्यन्वयः । उत्तरत्रेत्यस्यसावधिकत्वाद्वेधावधिंदर्शयति ॥ पौत्रायणस्येति ॥ रैक्वंप्रतिपौत्रायणस्याद्रवणानंतरं रैक्वेमानिषट्शतानिगवामयंनिष्कोयमश्वतरीरथइतिवाक्यस्याहहारेत्वाशूद्रेतिरैक्वेणपौत्रायणंप्रतिशूद्रइतिसंबोधनानंतरं रैक्वेदंसहस्रंगवामयंनिष्कोयमश्वतरीरथइतिवाक्यस्याविद्य-

मानत्वादेवमुक्तमितिज्ञातव्यं । दीयमानःगुरुदक्षिणात्वेन ॥ तदीयत्वस्यैवप्राप्तेरिति ॥ रैक्वयदानान्यथानुपपत्याषट्शतानिगवामित्यादौपौत्रायणस्वामिकगवादिनासहपाठान्यथानुपपत्याचचित्ररथस्यपौत्रायणीयत्वस्यप्राप्तत्वादित्यर्थः ॥ रथित्वमिति ॥ अनेनप्राग्रथित्वमेवक्षत्रियत्वेलिंगत्वेनविवक्षितंचित्रत्वंतुस्वरूपकथनार्थंअतएवरथमात्रस्यवेदाविनाभावउक्तइतिसूचयति परिहरति ॥ क्षत्रियस्येति ॥ नन्वपलायनंचेतिगीतातात्पर्येयुध्येप्राप्तेसतिपलायनमकृत्वाप्रयुध्यविप्रादिपालनंकर्तव्यमितिशूद्रस्यप्राप्तयोत्धृत्वंश्रूयते नचयुत्धोरथेनविनायुक्तः अतस्तदन्यथानुपपत्याशूद्रस्यापिरथोस्तीतिज्ञायते अतस्तत्रव्यभिचारइत्यतआह ॥ अपलायनंचेति ॥ पदातितयापादचारित्वेन । गमयितव्यं संगमयितव्यं योत्धृत्वस्यान्यथोपपत्तेर्नरथित्वाक्षेपकत्वमितिभावः ॥ तल्लिंगेनेति ॥ पौत्रायणकर्तृकवेदविचाराख्यालिंगेनेत्यर्थः ॥ ॐ संस्कारपरामर्शात्तदभावाभिलापाच्चॐ ॥ अध्ययनांगत्वेनतमध्यापयीतित्युपनयनाख्यसंस्कारपरामर्शाच्छूद्रस्यनाग्निर्नयज्ञोनसंस्कारइतिसंस्काराभावाभिधानाच्चनशूद्रस्यवेदविद्याधिकारइत्यर्थः । श्रुतौ वक्ष्यमाणरीत्याब्राह्मणशब्देनयोग्यास्त्रैवर्णिकाग्राह्याइत्याशयेनसाधारणमुदाहरति ॥ वेदइति ॥ सरहस्यः अर्थविशेषसहितः ॥ सामान्येति ॥ व्यक्तिविशेषाविषयकेणेत्यर्थः । नियमेन अव्यभिचारेण विशेषेण व्यक्तिविशेषविषयेण यथा नहिंस्यात्सर्वभूतानीतिसामान्येनोक्तस्याग्नीषोमीयंपशुमालभेतीतिविशेषरूपेणबाधेसंकोचरूपापवादस्तथात्रसंस्काराभावेधिकाराभावइतिसामान्येनोक्तस्य सपत्नीमेपराधमेतिविशेषप्रमाणबाधेनसंकोचरूपापवादइत्यर्थः ॥ अनेनेति ॥ संस्काराभावे अधिकाराभावइत्यस्यबाधकैकापोद्यसामान्यन्यायवचनेनेत्यर्थः॥ बाधकैकापोद्यत्वादिति॥ शय्यादाविवशूद्रादौवेदविद्याधिकारप्रतिपादकविशेषप्रमाणस्योक्तन्यायापवादकस्याभावादितिभावः । प्रदानकर्म विवाहः नन्वे

Sri Gargeshwari Digital Foundation

वंस्त्रीणामप्यध्ययनस्यसंस्कारपूर्वकत्वेनोपपत्तौकिमर्थंसंस्काराभावेनाध्ययनाभावस्य सामान्यन्यायत्वांगीकारइत्यतआह ॥ अत्रापवादोक्तिरिति ॥ निषेधाभावादिति ॥ नाग्निरित्यादौनकर्तव्यइत्यादेरश्रवणादितिभावः । ननुसामान्यतःप्राप्तसंस्कारादेर्नाग्निरित्यादिना अभावोक्तिरेवनिषेधइत्यतआह ॥ निषेधाभावेपीति ॥ स्वरूपकथनमात्रपरत्वेनाप्युपपत्तेर्निषेधेतात्पर्यकथनायोगादितिभावः ॥ ॐ तदभावनिर्धारणेचप्रवृत्तेः ॐ ॥ शूद्रत्वाभावनिश्चये सत्येवसत्यकामोपनयनार्थंगौतमप्रवृत्तेर्ननिषेधाभावइत्यर्थः ॥ नाहमेतद्वेदेति ॥ जाबालःसत्यकामःस्वस्योपनयनार्थंहारिद्रुमतोऽपत्यंगौतममुपेत्यकिंगोत्रोसीतिगौतमेनपृष्टःसत्यकामउवाच किमिति भोमुनेअहंयद्गोत्रोस्मिनाहमेतद्वेदेत्यर्थः । आर्जवंमनोवाक्कायकर्मणामवैपरीत्यं ॥ नैतदिति ॥ एतदार्जवसंयुक्तंवचनमब्राह्मणस्त्रैवर्णिकेतरोसर्वथावक्तुंनार्हति आर्जवस्यब्राह्मणलक्षणत्वादितिगौतमस्यभावः । इदमुक्तंभवति सत्यकामोनशूद्रः ऋजुत्वात् नचैतदसिद्धं सत्यवचनेनतद्ज्ञानात् नचव्याप्त्यभावः । नैतदब्राह्मणोवक्तुंमर्हतीतिव्यतिरेकव्याप्तेःसत्वादितिशूद्रत्वाभावमनुमायप्रवृत्तेरिति ॥ शूद्रत्वाभावेत्यसूत्रयादिति ॥ तदभावनिर्धारणइत्यत्रतच्छब्देनशुगस्येत्यादिपूर्वसूत्रैरुपक्षिप्तशूद्रत्वस्यपरामर्शादितिभावः । उत्तरयति ॥ ब्राह्मणपदेनेति ॥ आर्जवंब्राह्मणेसाक्षाच्छूद्रोनार्जवलक्षणइति श्रुतिसमाख्यानरूपस्मृतौब्राह्मणप्रतियोगित्वेनशूद्रस्योपादानाच्छ्रुतावपिब्राह्मणशब्दोवेदज्ञानयोग्यत्रैवर्णिकपरइत्यर्थः । शंकते ॥ शूद्रइति ॥ अप्रयोजकत्वंप्रारिहरति ॥ अन्यथेति ॥ ॐ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॐ ॥ अर्थपदेनअर्थावधारणमुच्यते । वेदश्रवणाध्ययनार्थावधारणानांश्रवणइत्यादिनाप्रतिषेधान्नाग्निरित्यादिस्मृतेश्चनशूद्रस्याधिकारइत्यर्थः । धर्मो यमः व्याधःएकलव्यः अधिजगौअधीतवान् ॥ अविहितोपनयनानामेवेति ॥ अविहितोपनयनत्वेसत्यनिषि

SGDF
Sri Gargeshwari Digital Foundation

द्धाध्ययनानामुत्तमस्त्रीतिर्यगादीनामेवापवादविषयत्वं । नतुनिषिद्धाध्ययनामपीत्यर्थः ॥ ९ ॥ **भगवाल्लिंगेनेति** ॥ मोक्षसाधनज्ञानविषयत्वरूपेणेत्यर्थः ॥ **उद्यतत्वेति** ॥ उत्धृत्यधृतत्वेनेत्यर्थः ॥ **तत्धीति** ॥ तेनेंद्रोवज्रमुदयछत् । उद्यदायुधदोर्दंडाइत्यादावायुधेप्रसिद्धिंहिशब्देनदर्शयति ॥ **प्राणेस्थितंप्राणान्निसृतमिति** ॥ प्राणइतिसप्तमीमंगीकृत्यतद्बलात्स्थितमित्यध्याहृत्यनिसृतशब्दानुरोधात्प्राणादित्यध्याहृत्यनिमित्तसप्तमीत्वंवाविवक्षयित्वायस्मादित्यर्थत्वेन-यदित्याहृत्ययदिदंकिंचेतिवाक्यंयोजितमितिज्ञातव्यं ॥ **सर्वंजगदिति** ॥ तृतीयव्याख्यानेयदित्यस्याहृत्तिः यच्छब्दबलात्प्राणवाचकतयासइतितच्छब्दलाभइतिद्रष्टव्यं । अत्रकोह्येवान्यादितिभाष्येउदाहरिष्यमाणश्रुत्यनुसारेणाद्यव्याख्यानद्वयं प्राणस्यप्राणं नभस्वतोपिसर्वास्युरितिप्रमाणानुसारेणतृतीयव्याख्यानंद्रष्टव्यं ॥ ॐकंपनात् ॐ ॥ वज्रमुद्यतमित्युक्तवज्रोभगवानेवएजतीतिजगच्चेष्टकत्वरूपकंपनवचनादित्यर्थः ॥ **उद्यमित्वेति** ॥ उत्कृष्टप्रयत्नवत्वेत्यर्थः । तस्यउपूर्वस्ययतेःरूपत्वादितिभावः । शंकते ॥ **लिंगमात्रेणेति** ॥ परिहरति ॥ **लिंगस्येति** ॥ भाष्येचंक्रमणात् पादविक्षेपात् वर्जनाद्दोषवर्जनात्प्रयोगंचाह ॥ **आयुधानामिति** ॥ प्रहरणोत्तमं आयुधोत्तमं ॥ श्रुतिलिंगयोःसावकाशत्वइति ॥ तथाचपूर्वपक्षप्रापकाभावेनमोक्षजनकज्ञानविषयत्वस्य अन्यगतत्वशंकायोगेनसिद्धांतनिर्णायकत्वासंभवान्नतत्यागेनचेष्टकत्वग्रहणंयुक्तमितिभावः ॥ **एतदन्यत्राप्यनुसंधेयमिति** ॥ यत्रपूर्वाधिकरणसिद्धसमन्वयश्रुतिलिंगादेः विष्णुनिष्ठत्वाक्षेपः पूर्वपक्षप्रापकश्रुत्यादेःसिद्धांतेविष्णावकाशाभिधानंचतत्रपूर्वाधिकरण-सिद्धस्यश्रुतिलिंगादेराक्षेपायोगेनविष्णुमात्रनिष्ठत्वानपायात्सिद्धांतनिर्णायकत्वंसंभवतीत्यनुसंधेयमित्यर्थः। यथातएवप्राणइत्यादौप्राणादिशब्दानांविष्णावकाशेमहाभोगइत्युक्तपूर्णानंदत्वादिरिति ॥ १० ॥ ज्योतिःशब्दप्रवृत्तिनिमित्तंप्रकाशत्वंज्ञा

नमपिप्रकाशरूपमितिभावः ॥ **योयमिति** ॥ कतमआत्मेत्यस्येदमुत्तरं। योविज्ञानमयः विज्ञानपूर्णःप्राणेष्विंद्रियेष्वंतःहृद्यंतश्चवर्तमानःज्योतिर्जीवस्यबुध्यादिद्योतनेनप्रवृत्तिहेतुः पुरुषःपूर्णषड्गुणःअयमात्मा तस्यैवमहिमांतरंसइति सआत्मासमानःसन्अविकारात्सदैकप्रकारःसन् उभौलोकौभूलोकद्युलोकौजाग्रत्सुषुप्तीवा जीवमादायानुसंचरतीत्यर्थः । लिंगांतराण्याह ॥ **इमंलोकमित्यादिना** ॥ सहिस्वप्नोभूत्वेतिपूर्ववाक्यंसआत्मास्वप्नोभूत्वास्वापकोभूत्वाजीवस्यस्वप्नमानयन् मृत्योरूपाणिबहुपापैकहेतुत्वान्मृत्युरूपात्मकमिमंलोकंजाग्रदाख्यमतिक्रामतितारयति हिप्रसिद्धं । यद्वासआत्मास्वप्नोभूत्वांतरिक्षलोकांतर्गतोभूत्वामृत्योरूपाणिबहुमृत्युसरूपात्मकंपापहेतुभूतंचैमंलोकंभूलोकमतिक्रामति जीवमंतरिक्षगंकुर्वन् तारयतिसजीवंप्रतिज्योतिष्ट्वेनोक्तःअयंसमानःसन्नित्यादिनोक्तःपुरुषोजायमानोवैतस्यैवव्याख्यानं शरीरमभिसंपद्यमानइति जीवगतशरीराभिसंपत्तिनियामकःसन् पाप्मभिःसंसृज्यते जीवेनपापानिकारयित्वा तत्फलदानायतानि गृण्हाति सआत्माम्रियमाणः नमरणमात्रमत्रविवक्षितंकिंतुउत्क्रमन् ऊर्ध्वंगच्छन्जीवगतोत्क्रमणनियामकःसन्पाप्मनो विजहाति जीवकृतपापफलंनददातीत्यर्थः ॥ **उभयानिति** ॥ उभयानित्यस्यैवविवरणंपाप्मनआनंदांश्चेति । सभगवान्जाग्रदवस्थायांजीवानुभूयमानानिपापफलानिदुःखानिसुप्तावनुभूयमानानंदांश्चपश्यतीत्यर्थः । जीवस्यपूर्वोक्तात्मज्योतिष्ट्वंकदेत्युच्यते ॥ **सयत्रेति** ॥ सआत्मायत्रयदास्वपितिजीवंप्रस्वापयतितदेत्यर्थः । तस्यैवमहिमांतरमुच्यते ॥ **स्वप्नांतइति** ॥ देवःस्वप्नांतेस्वप्नावस्थायामुच्चावचमीयमानः वासनारूपेषूच्चनीचेषुगजपिपीलिकादिषुप्रविशन्स्वस्यबहूनिरूपाणिकुरुतइत्यर्थः ॥ **भयानीति** ॥ सभगवान्जीवस्यभयानिपश्यन्नपिजक्षदिवास्तइतिपूर्वेणान्वयः । ॥ **किंज्योतिरिति** ॥ हेयाज्ञवल्क्य अयंपुरुषःसंसारीकिंज्योतिर्यस्यासौकिंज्योतिरस्यपुरुषस्यप्रवृत्त्यादिव्यापारेस्वय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri Foundation

मसमर्थत्वेनकिंचिज्योतिरपेक्षितं किंतज्योतिरितिजनकेनपृष्टोयाज्ञवल्क्योहेसम्राड्राजन् अयंपुरुषः आदित्यएवज्योतिर्य स्यासावादित्यज्योतिरित्युवाचेत्यर्थः ॥ **तस्यैवेति** ॥ अस्येतीदंशब्दस्यप्रकृतजीवपरामर्शकत्वादितिभावः ॥ **आत्मज्योतिष्ट्वोक्ताविति** ॥ स्वप्रकाशत्वोक्तावित्यर्थः ॥ **तदात्मेति** ॥ ज्योतिष्ट्वेनोक्तात्मेत्यर्थः ॥ **तदाविशिष्येति** ॥ सुषुप्तौविशेषेणेत्यर्थः ॥ **अत्रायंपुरुषइति** ॥ आत्मप्रश्नोपसंहारेणायंपुरुषःस्वयंज्योतिरितिवाक्ये नात्मैवास्यज्योतिरित्युक्तस्यैवार्थस्यप्रत्यभिज्ञानादित्यर्थः । तथाचात्रायंपुरुषइतिवाक्येस्वयंशब्दानुरोधेनस्वप्रकाशत्वो क्त्यातत्समर्थनार्थत्वायात्मैवास्यज्योतिरित्यस्यापिस्वप्रकाशत्वार्थकत्वे आत्मप्रश्नोत्तरस्यज्योतिःशब्दस्यजीवपरत्वमेवेति भावः ॥ **ॐज्योतिर्दर्शनात्ॐ** ॥ हृद्यंतज्योतिरित्युक्तज्योतिर्विष्णुरेव कुतःदर्शनात् ज्योतिश्रुतेर्विष्णुमात्रवाचित्व प्रतिपादकविष्णुरेवज्योतिरितिश्रुतेरित्यर्थः । श्रुतावुत्सृजन्पूर्वदेहंत्यजन् द्रष्टुश्चक्षुषइति स्वातंत्र्यस्नेहयोरंतर्णिजितिसूत्रं स्वातंत्र्यस्नेहयोर्विवक्षितयोःसतोर्णिजंतर्गतोनतुप्रयुज्यतइतिसूत्रार्थः । तथाचयथाद्रष्टुश्चक्षुषोनातिजिह्वेत्यत्रद्रष्टुरित्यस्य दर्शयितुरित्यर्थस्तथेहापिस्वांतंत्र्यस्याविवक्षितत्वात्णिचोंतर्गतत्वेनातिक्रमतीत्यादेरतिक्रामयतीत्याद्यर्थत्वमितिभावः ॥ **वागादिसत्वेनेति** ॥ जागरावस्थायामपिज्ञानकारणानांवागादीनांसत्वेनज्ञानकारणांतरव्यवच्छेदकत्वायोगादित्यर्थः । तदुक्तंब्रह्मभाष्ये ॥ **भावइति** ॥ यद्यपिजाग्रतिसूर्यादेर्भावेसत्वेसुषुप्तावभावेपिस्वयंसाक्षाद्विष्णुरेवजीवानां ज्योतिस्त थापिसूर्याद्यभावेसतितद्विष्णोर्ज्योतिष्ट्वंविशेषतोज्ञेयमित्यर्थः ॥ **अत्रेति** ॥ अत्रसुप्तौभगवान्स्वयंविष्णुरेवजीवस्यज्योतिः जाग्रद्यपितथात्वात् किंविशिष्योच्यतइत्युक्तं ॥ **विशेषतइति** ॥ तदेवकथमित्यतउक्तं ॥ **नैवेति** ॥ यद्यस्मात्सु प्तावन्यज्योतिर्नास्तीत्यर्थः ॥ **इत्युक्तेति** ॥ ब्रह्मभाष्योक्तेत्यर्थः । तथात्रायंपुरुषःस्वयंज्योतिरित्यत्रस्वयंशब्दस्यपरमा

SGDF
Sri Gargeshwari Digital Foundation

मर्थमित्यतउक्तं अस्यजगतःस्थित्यादये उपलक्षणमेतत् स्थित्युत्पत्तिसंहारान्कर्तुमिति । कारणमीश्वरः कार्यविरिंचः मृच्छब्दस्यघटेप्रवृत्तिवद्घटस्यमृद्यप्रयोगादितिभावः ॥ ॐ पत्यादिशब्देभ्यः ॐ ॥ एषनित्योमहिमाब्राह्मणस्येति उक्तब्राह्मणोविष्णुरेव सर्वस्याधिपतिःसर्वस्येशानःसवाएषनेतिनेतितीसर्वाधिपतित्वसर्वप्रेरकत्वश्रुतदृष्टविलक्षणत्वप्रतिपादकशब्दसद्भावादित्यर्थः । सर्ववशीत्यादिश्रुतिर्दहराधिकरणेव्याख्यातेत्यत्रनव्याख्यायते ॥ सइति ॥ सवाएषआत्माब्राह्मणःनेतिश्रुतविलक्षणइतिनेतिदृष्टविलक्षणइतिचोच्यते तदेवोपपादयति ॥ अगृह्यइति ॥ हियस्मान्नगृह्यतेअतोअगृह्यइत्युच्यतइत्यर्थः । एवमग्रेपि शीर्यते विदार्यते सज्जते संबध्यते असितः अव्ययः नरिष्यतिनन श्यति ऋषहिंसायामितिधातोः उतामृतत्वस्येशानइतिवाक्येनैवसर्वाधिपतित्वंनप्रतीयतइत्यतःपुरुषएवेदंसर्वंयभ्दूतंयच्च भव्यामितिपूर्वार्धेनसहव्याचष्टे॥यभ्दूतंभविष्यदित्यादिना॥ ततश्चेयमक्षरयोजना यभ्दूतमतीतंभव्यंभविष्यच्चशब्दाद्वर्तमानंचतदिदंसर्वंपुरुषएवपुरुषाधीनमेवयदधीनायस्यसत्तातत्तदित्येवभण्यतइत्युक्तेः । पुरुषःयद्यस्मादन्नेनेतितृतीयाद्वियीयार्थे अद्यतेविनश्यतइत्यन्नं संसारिजातं अतिरोहति अतिशेते तदधिपतिरितियावत् । तस्मादमृतत्वस्येतिभवितृप्रधानोयंनिर्देशः । अमृतत्वस्यमरणादिभयरहितस्यापिमुक्तवर्गस्यईशानःप्रेरकः । सोमृतस्याभयस्येशोमर्त्यमन्नंयदत्यगादितिभागवतोक्तोरीतिहेतुहेतुमद्भावस्यस्पष्टमप्रतीतेराह ॥ मुक्ताविति ॥ मुक्तावनधीनत्वाज्ञानेनमोक्षप्रदानंकिंनस्यादित्यतउक्तं ॥ बुत्धिमतइति ॥ भविष्यद्बुत्धिमतइत्यर्थः । तदेवकुतइत्यतउक्तं ॥ सर्वज्ञस्येति ॥ योगेनेत्युपलक्षणं तस्मादहमजःस्मृतइतिरूढिरप्यस्तीतिद्रष्टव्यं । ननुब्राह्मणशब्दस्यब्रह्मणावेदेनेत्याद्युक्तरीत्यायौगिकत्वेब्रह्मणइतिभवेद्ब्राह्मणइतितुकथमित्यतआह ॥ स्वरव्यत्यासेति ॥ आधिक्येऽधिकमित्येवहरिणासूत्रमीरितमितिऋग्भाष्यो

SGDF
Sri Gargeshwari Digital Foundation

त्मपरत्वेनपरमात्मज्योतिष्ट्वमेवोच्यतेनजीवस्यस्वप्रकाशत्वमितिनैतदनुरोधेनात्मैवास्यज्योतिरित्यस्यस्वप्रकाशार्थकत्वमिति भावः । एवमन्यार्थतेतिसंबंधः । अतोबाधकाभावस्यपूर्वमनुक्तेरेवमितिपरामर्शायोगइतिनशंक्यं ॥ स्वाम्नपदार्थेति ॥ अथरथान्रथयोगान्पथःसृजतइत्यनेनोक्तइत्यर्थः ॥ असंगतेरिति ॥ ज्योतिषोजीवत्वेतत्रभगवत्प्रतिपादकमंत्रोदाहरणासंगतेरित्यर्थः । तदेतेश्लोकाभवंतीति स्वप्नेनशारीरमभिप्रहत्यासुप्तःसुप्तानभिचाकशीतीत्यस्यायमर्थः । तत् तत्र पूर्वोक्तार्थे एतेवक्ष्यमाणाः श्लोकाःमंत्राःप्रमाणत्वेनभवंति । केतेहिरण्मयःपरमात्मास्वप्नेनसुषुप्त्याशारीरंजीवमभिप्रहत्यसंयोज्यस्वयमसुप्तः सुप्तान्शारीरानभिचाकशीतिपश्यतीति ॥११॥ प्रयोगवशादिति ॥ यदेषआकाशइतिहरावन्यत्र तुप्रसिद्धिरेवेतिभावः ॥ आकाशोवैनामेति ॥ आसमंतात्काशमानत्वादाकाशनामाभगवान्नामरूपात्मकप्रपंचस्य निर्वहितानिर्वोढा आश्रयइत्यर्थः । निपातद्वयेनास्यार्थस्यप्रसिद्धत्वमाह । तेनामरूपे अंतराविना यद्वर्ततेतदमृतंनित्य मुक्तंब्रह्मेत्यर्थः ॥ ॐ आकाशोऽर्थांतरत्वादिव्यपदेशात् ॐ ॥ आकाशोवैनामेत्युक्ताकाशोविष्णुरेवतेयदंतरे त्याकाशस्याविष्णुमात्रनिष्ठनामरूपराहित्याख्यलिंगोपदेशादित्यर्थः ॥ विलक्षणार्थत्वेति ॥ अनेन अंतरःविलक्षणो र्थोर्थांतरंतस्यभावोऽर्थांतरत्वमितिव्याख्यातंभवति । आदिपदोपात्तमाह ॥ तद्ब्रह्मेति ॥ नन्वादिपदेनानामत्वमि तिव्याख्यानेसूत्रभाष्ययोरनामत्वादीतिवाच्यं तेनैवक्रमेणश्रुत्युदाहरणंकार्यं किमर्थंश्रौतक्रमोल्लंघनमित्यतआह ॥ रूपस्येति ॥ नाम्नोवाच्यसापेक्षत्वादप्रधान्यमितिभावः ॥ उक्तविरोधादिति ॥ ईक्षतेर्नाशब्दं रूपोपन्यासाच्चेत्युक्त विरोधः ॥ अनामेतीति ॥ अत्रानामरूपत्वंसाकल्येनशब्दागोचरत्वंप्राकृतरूपराहित्यंचविवक्षितं प्राक्चावाच्यत्वा भावः अप्राकृतरूपत्वंचविवक्षितमितिनतद्विरोधइतिभावः ॥ अलोकेति ॥ लोकतोऽप्रसिद्धत्वेपीत्यर्थः । अन्यथा

SGDF
Sri Gargeshwari Digital Foundation

आकाशपक्षे नन्वाकाशोनीलिमोदीतीतिश्रुतेर्भूताकाशस्यरूपत्वेप्यत्राभिमताव्याकृताकाशस्यतद्राहित्यंयुक्तमित्यतआह । ॥ आकाशस्यापीति ॥ अनामत्वप्रयोजकाप्रसिद्धत्वस्याकाशेअभावेनानामत्वाभावादित्यर्थः ॥ १२ ॥ उक्तं अक्षराधिकरणे ॥ सवाएषइति ॥ सएवपरमात्मैवसंप्रसादेसम्यक्प्रसीदतिजीवोस्यामितिसंप्रसादः सुप्तिस्तस्मिन् रत्वारमणंकृत्वापुण्यंचपापंचदृष्ट्वैवचरति चरित्वाचप्रतिन्यायंप्रतिकालंप्रतियोनिप्रतिजीवंपुनःस्वप्नायैवजीवस्यस्वप्नप्रा प्तयएवाद्रवति दृष्ट्वैवेत्येवकारव्यवच्छेद्यमाह ॥ सइति ॥ सपरमात्मातत्रसुप्तौयत्किंचित्पापंपश्यतितेनपापफलेनदुःखे नानन्वागतः असंस्पृष्टोभवति । कुतइत्यतउक्तं ॥ असंगइति ॥ हियस्मादयंपुरुषः असंगः तत्तत्कृतपापफलसंसर्ग शून्यस्तस्मात्तेनानन्वागतइत्यर्थः ॥ जीवेपीति ॥ देहेंद्रियांतःकरणचैतन्यसंघातरूपेपीत्यर्थः ॥ मुख्यतोसंगत्वादि ति ॥ जीवेत्वेकदेशविवक्षयोक्तमसंगत्वममुख्यमितिभावः । ईश्वरे शुद्धे ॥ विशिष्टेति ॥ देहादिविशिष्टेत्यर्थः । ॥ विशेषणद्वयेति ॥ असंगत्वस्वप्नादिद्रष्टृत्वरूपविशेषणद्वयेत्यर्थः ॥ ॐ सुषुप्त्युत्क्रांत्योर्भेदेन ॐ ॥ नोक्तरी त्याजीवेश्वरयोरभेदोमंतव्यः प्राज्ञेनात्मनासंपरिष्वक्तइतिसुप्तिप्रकरणेप्राज्ञेनात्मनान्वारूढइत्युत्क्रांतिप्रकरणेचजीवेश्वरयोर्भे देनोक्तत्वादित्यर्थः । वक्ष्यति चतुर्थाध्याये ॥ स्वाप्ययेति ॥ तीर्णोहितदासर्वांच्छोकान्हृदयस्यभवतीतिवाक्यस्य स्वर्गस्थविषयत्वशंकापराकरणायेदंसूत्रं स्वाप्ययोमुक्तिः संपतिःसुप्तिःतीर्णोहीतिवाक्यंसुप्तिमुक्तिविषयकमेव नस्वर्गस्थवि षयं कुतःअत्रपिताऽपिताभवत्यनन्वागतंपुण्येनानन्वागतंपापेनेत्यादिनापितृत्वपुण्यपापाद्यसंगत्वादिलिंगश्रवणादस्यवा क्यस्यसुप्तिमुक्तिविषयत्वस्याविष्कृतत्वात्स्फुटंप्रतीयमानत्वात्स्वर्गस्थस्यश्राद्धादिभोक्तुःतदसंभवादितिसूत्रार्थः। मोक्षपर त्वाभावेबाधकंचाह॥ अनन्वागतमिति॥ पुण्याद्यश्लेषस्यमुक्तिमात्रलिंगत्वादितिभावः । नन्वस्त्वेवंसुषुप्तिप्रकरणस्यमो

क्षपरत्वंततःकिमायातंभेदोव्यावहारिकइत्यत्रेत्यतआह ॥ मोक्षेचेति ॥ परिभाषामात्रं संकेतमात्रं नतुपराभिप्रेतम विद्यातत्कार्ययोरन्यतरत्वरूपं तदानीमविद्यायाःनिःशेषनाशादितिभावः । ननुस्वप्नादेर्मिथ्यात्वात्तद्रष्टृत्वे ईश्वरस्यभ्रां तत्वप्राप्त्याकथंतत्रतन्मुख्यमित्यतआह ॥ स्वाप्नदार्थानामिति ॥ ननुस्वप्नादिद्रष्टृत्वस्योक्तरीत्या ईश्वरनिष्ठत्वेना संगतत्वेनसहविरोधाभावेपिसंप्रसादेरत्वाचरित्वादृष्ट्वैवपुण्यंपापंचेत्याद्युक्तलिंगानामनन्वागतस्तेनभवतीत्याद्युक्तेश्वरलिंगैः सहकथंसामानाधिकरण्योपपत्तिरित्यतआह ॥ अत्रप्रतीतेति ॥ शुभाशुभंतुदृष्ट्वैवस्वप्नेजागरितेपिच । असंस्पृष्टः सदादुःखैश्वरतीशःपुनःपुनरितिबृहदारण्यकभाष्यादुक्तोभयलिंगोपपत्तिर्द्रष्टव्येत्यर्थः ॥ १३ ॥ किंबलादभिसंहितत्वं ज्ञायतइत्यतआह ॥ अनन्यापेक्षयेति ॥ एषइति ॥ ब्रह्मणावेदेनाण्यतेगम्यतइतिब्राह्मणशब्दवाच्यस्यविष्णो रेषः पूर्वोक्तमहिमा नित्यः आद्यंतरहितः नित्यत्वमेवाह ॥ नेति ॥ एषमहिमापुण्येनकर्मणानाभिवर्धतेपापेनकर्म णानकनीयानपकृष्टोनोभवतीत्यर्थः ॥ बहुशोऽजशब्दश्रवणादिति ॥ सवाएषमहानजआत्मायोयंविज्ञानमयः सवाएषमहानजआत्मान्नादः सवाएषमहानजआत्माजरोमरइत्यादिवाक्येषुब्राह्मणनिष्ठतयाबहुशोऽजशब्दश्रवणादि- त्यर्थः । ब्राह्मणस्यविरिंचत्वेहेत्वंतरमाह ॥ महत्तत्वाभिमानितयेति ॥ आत्माविरिंचइतिबृहद्भाष्यो क्ताभिधानं । नियमादिति जन्यभावस्यविनाशव्याप्तत्वादितिभावः ॥ सइति ॥ सब्राह्मणःसाधुकर्मफ लेनसुखेनभूयानुच्चोऽसाधुकर्मफलेनदुःखेननीचश्चनोएवभवतीत्यर्थः । एतच्छ्रुतिद्वयंलिंगद्वयंचएकनिष्ठत्वात्एकानिष्ठत्वाव गमात् । विरिंचेश्वरयोरैक्येप्रथमभागवतसंमतिमाह ॥ सत्वमिति ॥ पुरुषःपूर्णषड्गुणोहरिःप्रकृतेःपरोपि अप्रा कृतविग्रहोपिसत्वंरजस्तमइतिप्रकृतेर्येगुणास्तैर्युक्तस्तेषामाश्रयःसन्इहजगतिएकएवहरिर्विरिंचहरेतिसंज्ञानामानिधत्ते कि-

Sri Gargeshwari Digital Foundation

मर्थमित्यतउक्तं अस्यजगतःस्थित्यादये उपलक्षणमेतत् स्थित्युत्पत्तिसंहारान्कर्तुमिति । कारणमीश्वरः कार्यविरिंचः मृच्छब्दस्यघटेप्रवृत्तिवद्घटस्यमृद्यप्रयोगादितिभावः ॥ ॐ पत्यादिशब्देभ्यः ॐ ॥ एषनित्योमहिमाब्राह्मणस्येति उक्तब्राह्मणोविष्णुरेव सर्वस्याधिपतिःसर्वस्येशानःसवाएषनेतिनेतितीसर्वाधिपतित्वसर्वप्रेरकत्वश्रुतदृष्टविलक्षणत्वप्रतिपादकशब्दसद्भावादित्यर्थः । सर्ववशीत्यादिश्रुतिर्दहराधिकरणेव्याख्यातेत्यत्रनव्याख्यायते ॥ सइति ॥ सवाएषआत्माब्राह्मणःनेतिश्रुतविलक्षणइतिनेतिदृष्टविलक्षणइतिचोच्यते तदेवोपपादयति ॥ अगृह्यइति ॥ हियस्मान्नगृह्यतेअतोअगृह्यइत्युच्यतइत्यर्थः । एवमग्रेपि शीर्यते विदार्यते सज्जते संबध्यते असितः अव्ययः नरिष्यतिनश्यति ऋषहिंसायामितिधातोः उतामृतत्वस्येशानइतिवाक्येनैवसर्वाधिपतित्वंनप्रतीयतइत्यतःपुरुषएवेदंसर्वंयभ्दूतंयच्च भव्यमितिपूर्वार्धेनसहव्याचष्टे॥यभ्दूतंभविष्यदित्यादिना॥ ततश्चेयमक्षरयोजना यभ्दूतमतीतंभव्यंभविष्यच्चशब्दाद्वर्तमानंचतदिदंसर्वंपुरुषएवपुरुषाधीनमेवयदधीनायस्यसत्तातत्तदित्येवभण्यतइत्युक्तेः । पुरुषःयद्यस्मादन्नेनेतितृतीयाद्वियीयार्थे अद्यतेविनश्यतइत्यन्नं संसारिजातं अतिरोहति अतिशेते तदधिपतिरितियावत् । तस्मादमृतत्वस्येतिभवितृप्रधानोयंनिर्देशः । अमृतत्वस्यमरणादिभयरहितस्यापिमुक्तवर्गस्यईशानःप्रेरकः । सोमृतस्याभयस्येशोमर्त्यमन्नंयदत्यगादितिभागवतोक्तोरीतिहेतुहेतुमद्भावस्यस्पष्टमप्रतीतेराह ॥ मुक्ताविति ॥ मुक्तावनधीनत्वाज्ञानेनमोक्षप्रदानंकिंनस्यादित्यतउक्तं ॥ बुद्धिमतइति ॥ भविष्यद्बुद्धिमतइत्यर्थः । तदेवकुतइत्यतउक्तं ॥ सर्वज्ञस्येति ॥ योगेनेत्युपलक्षणं तस्मादहमजःस्मृतइतिरूढिरप्यस्तीतिद्रष्टव्यं । ननुब्राह्मणशब्दस्यब्रह्मणावेदेनेत्याद्युक्तरीत्यायौगिकत्वेब्रह्मणइतिभवेद्ब्राह्मणइतितुकथमित्यतआह ॥ स्वरव्यत्यासेति ॥ आधिक्येऽधिकमित्येवहरिणासूत्रमीरितमितिऋग्भाष्यो

PGDF
Sri Gargeshwari Digital Foundation

क्तेर्ब्रह्मणावेदेनगम्यत्वाधिक्यविवक्षयादीर्घस्वरव्यत्यासइत्यर्थः ॥ तदंतर्गतेति ॥ ब्रह्मणिब्रह्मरूपोसौशिवरूपीशिवे स्थितइत्युक्तेरितिभावः । नकेवलमभेदेमानाभावः किंतुभेदसाधकमानविरोधश्चेत्याशयेनाह ॥ स्वधर्मनिष्ठइत्यादि ना ॥ इदमुक्तंभवति । हरिविरिंचौभिन्नौ कर्मफलभोगतदभावरूपविरुद्धधर्मादिकरणत्वात् नचासिद्धिः विरिंचेकर्म फलभोगस्योदात्तवचनसिद्धत्वादिति वचनार्थस्तु पुमान्ऋजुर्जीवःअनादितोभगवज्ञानभक्त्यादिसंपन्नोपिविशेषेणापरोक्ष ज्ञानानंतरंशतजन्मभिः एकोनशतसंख्याकब्रह्मकल्पैः स्वधर्मनिष्ठःहर्युपासनादिस्वयोग्यधर्मनिष्ठावानेवविरिंचतांप्राप्नोति ततःपरमांश्रियमेतीति ॥ यथाश्रुतेतुविरिंचजन्मनएकोत्तरशतत्वप्राप्त्याऋजूनामपरोक्षज्ञानानंतरंशतकल्पैरेवमोक्षइतिनि यमानुपपत्तिः ब्रह्मणस्त्वेवतावत्वमित्यनुव्याख्यानव्याख्यानसुधायांब्रह्मणस्तुतावत्वमेवब्रह्मकल्पानांशतेनैवकर्मक्षयवत्व मित्युक्त्याएकोत्तरशतजन्मवतोविरिंचस्यप्रारब्धभोगाभावप्रसंगश्च नचेष्टापत्तिः प्रारब्धकर्मशेषस्तुविरजातरणावधि त स्यतावदेवचिरंयावन्नविमोक्ष्येत्यादिविरोधात् एवमेवलिंगाल्लातव्यतःपूर्वमृजोर्ब्रह्मत्वतःशतादित्यनुव्याख्यानं शतजन्म प्रयत्नतइत्यादिचतुर्थतात्पर्यादिकमपिव्याख्येयं यत्तूदात्तानुव्याख्यानव्याख्यानसुधायांयस्यैतस्माद्ब्रह्मकल्पादारभ्य ब्रह्मकल्पानांशतंगतेब्रह्मत्वंभविष्यतीत्युक्तंतदप्यनुव्याख्यानानुवादमात्रं शतेआगतेइतिपदच्छेदोवेत्यदोषः अतएवस न्यायरत्नावल्यामुदात्तानुव्याख्यानव्याख्यानावसरेएकोनशतब्रह्मस्वतीतेष्वित्युक्तमितिनदोषः । विश्वोवायुः ॥ ॥ इतिश्रीमतत्वप्रकाशिकावाक्यार्थमंजर्यांशर्करायांश्रीनिवासविरचितायांप्रथमाध्यायस्यतृतीयः पादःसमाप्तः ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥ ॥ ॥

SGDF
Sri Gargeshwari Digital Foundation

। श्रीवेदव्यासायनमः ॥ **अवसरप्राप्तानामिति** ॥ आनंदमयनयोक्तरीत्यान्यत्रैवप्रसित्थानांसमन्वयस्यप्रथमंबु
यनारोहात्प्रथममन्यत्रोभयत्रप्रसित्थानांसमन्वयजिज्ञासायांतन्निरूपणेनतज्जिज्ञासाविछेदादितिभावः ॥ **प्रकारांतरा-**
भावादिति ॥ तथाचेंद्रादिशब्दानामन्यत्रैवप्रसित्थत्वाभावेअन्यत्रापिप्रसित्थत्वप्राप्त्यातादृशशब्दसमन्वयपरतृतीयपा
दवैय्यर्थ्यंदुर्वारमितिभावः । तर्हिसर्वत्रप्रसित्थोपदेशादित्यादावादित्यश्रुत्यादिनान्यत्रप्रसित्थसर्वगतत्वादेःसमन्वयनिरू
पणेनतेषामप्यन्यत्रैवप्रसित्थत्वप्रसंगइत्यतआह ॥ **पूर्वंक्वचिदिति** ॥ अत्रवक्तव्यमानंदमयनयएवास्माभिरुक्तंतत्रैवानु
संधेयं । अल्पानल्पविषयत्वाभ्यांचावैय्यर्थ्यमित्याह ॥ **पूर्वमिति** ॥ नचवर्णानामपिवाचकत्वेविभक्त्यंतत्वेनपद
त्वमेवेतिपृथग्ग्रहणमयुक्तमितिवाच्यं एकानेकवर्णात्मकविवक्षयातदुपपत्तेः ॥ **असंभवादिति** ॥ प्रबलहेतुभिरन्यत्रप्र
सित्थत्वेकथमपिभगवत्परत्वस्यवक्तुमशक्यत्वादितिभावः ॥ **अंशइति** ॥ एषांशब्दानांसमन्वयःप्रागुक्तस्तदंशइत्य
र्थः ॥ **प्रागनुक्तहेतुभिरिति** ॥ तदधीनत्वादर्थवदितितथाह्यधीयतइत्यादिप्रागनुक्तहेतुभिरित्यर्थः । तदेवोपपादय
ति ॥ **जन्मादीति** ॥ प्रमाणीकृततृतीयसूत्रे ननु उक्तरीत्याकतिपयशब्दसमन्वयेप्रतिज्ञातव्येसर्वशब्दसमन्वयप्राति
ज्ञानसंगतेत्यतआह ॥ **जन्मादिसूत्रेहीति** ॥ **गुणपरिपूर्णत्वस्यैवेति** ॥ किंतद्ब्रह्मेतिलक्षणाकांक्षायांजिज्ञास्ये
प्रयुक्तब्रह्मशब्दनिर्वचनलभ्यानंतगुणपूर्णत्वमेवलक्षणत्वेनवक्तव्यं नतुजन्मादिकारणत्वमात्रमितिभावः ॥ **नहीति** ॥
येनजन्मादिकारणत्वमात्रोक्त्याकृतीस्यादितिभावः । एवंसतियथाश्रुतसूत्रानुपपत्तिरित्यतस्तत्तात्पर्यमाह ॥ **जन्मादि**
कारणत्वेति ॥ सूत्रेगुणांतरत्यागेनजन्मादिकारणत्वस्यैवोपलक्षकत्वेनोपपादनेकिंनिमित्तमित्याशंकापरिहारार्थमुक्तं
॥ **तस्याखिलगुणसाधकत्वेनेति** ॥ साधकत्वंचांतःसमुद्रगमित्याद्यनुव्याख्योनव्यक्तं । तत्रैव गुणपूर्णत्वएव

॥ **कतिपयेति** ॥ तथाचनयत्किंचिच्छास्त्रस्यतत्रप्रामाण्यमितिभावः ॥ **ॐआनुमानिकमप्येकेषामितिचेन्न-**
शरीररूपकविन्यस्तगृहीतेर्दर्शयतिचॐ ॥ आनुमानिकमपिसांख्यानुमानगम्यंप्रधानादिकमेवाव्यक्तात्पुरुषःप
रइत्यादिकेषांचिच्छाखासूच्यते अतोनविष्णौसर्वशब्दसमन्वयइतिचेन्न तत्राव्यक्तादिशब्दैःविष्णुग्रहणात् कुतःयतोद
र्शयतिअव्यक्तमचलंशांतमितिश्रुतिः चशब्दादव्यक्तोक्षरउच्यतइतिस्मृतिश्च विष्णोरेवाव्यक्तादिशब्दवाच्यत्वेकथम
न्यत्रव्यवहारइत्यतोअव्यक्तादिशब्दवाच्यब्रह्मसंबंधात्प्रधानादावव्यक्तादिशब्दव्यवहारइत्याशयेनोक्तं ॥ **शरीरेति**॥
शरीरस्यरूपमिवरूपंयस्यतच्छरीररूपंकुत्सितंशरीररूपंशरीररूपकं प्रधानादिकं तत्राविन्यस्तस्यास्थितस्य विष्णोरव्यक्तादि
पदेनगृहीतेरित्यर्थः ॥ **महतइति**॥ महतोमहत्तत्वात्तदभिमानिचतुर्मुखाद्वा अव्यक्तंप्रधानंतदभिमानिश्रीतत्वंवापरं अव्य
क्तात्पुरुषःपूर्णसंग्दुणोभगवान्परइत्यर्थः ॥ **योनिमिति** ॥ अन्येकेचिद्देहिनोमृताःसंतोशरीरत्वाय शरीरवत्वाय मनु
ष्यादियोनिंप्राप्नुवंति । अन्येचस्थाणुंवृक्षादिजन्म अनुगछंति कुतएवंवैषम्यमित्यतउक्तं ॥ **यथेति** ॥ कर्मानुसारेण
ज्ञानानुसारेणचेत्यर्थः । समावृत्यातिक्रम्येतियावत् ॥ **अव्यक्तादपीति** ॥ तथाच नतस्यसाक्षान्महतःपरत्वमितिभावः
॥ **प्रमाणेनेति** ॥ निरनिष्टोनिरवद्यइत्यादीत्यर्थः शंकते ॥ **परमात्मनइति** ॥ उक्तंसाक्षादप्यविरोधजैमिनिरि
त्यत्र प्रायुंक्त प्रयुक्तवान् यावतायेनप्रकारेण कुत्सयामासगर्हयामास ॥ **अन्यथेति** ॥ अव्यक्तादेर्मुख्यशरीरत्वे
शरीरसमत्वप्रतिपादकरूपपदवैय्यर्थ्यादित्यर्थः । परमात्मनएवेत्यादिनोक्तशंकापरिहारप्रकारंदर्शयति ॥ **यद्यपीति** ॥
विपरीतंप्रधानादेर्मुख्यवाच्यत्वं ॥ **एवमेवहीति** ॥ शब्दानांमुख्यतःप्रधानवाचकत्वं प्रधानान्वयादप्रधानवाच
कत्वमित्येवंलौकिकप्रसित्थिरप्यस्तीत्यर्थः ॥ **नचमंचादाउक्तव्यभिचारइति** ॥ प्रधानादेर्भगवत्तंत्रत्वेनशब्दामु-

SGDF
Sri Gaudiya Dharma Foundation

ख्यार्थत्वसाधकत्वेनयत्परतंत्रत्वमुक्तं तस्यमंचाःक्रोशंतिमार्गाश्चरंतीत्यादिप्रयोगस्थमंचादिशब्दमुख्यार्थेमंचादौपुरुषतंत्र त्वेनाविद्यमानत्वेपितत्रमंचादिशब्दामुख्यार्थत्वाभावाद्व्यभिचारइतिनशंक्यमित्यर्थः ॥ **समाकर्षादिति** ॥ सर्वशब्दानां ब्रह्मणःसकाशाज्जगतिसम्यगाकर्षणाद्व्यवहारोनतुलक्षणयेतिन्यायस्येत्यर्थः ॥ **लक्षणानाश्रयणादिति** ॥ प्रधानादौप रतंत्रत्वेनाव्यक्तादिशब्दलक्ष्यार्थत्वंनसाधितंयेनव्यभिचारःस्यात्किंतुशक्यत्वएवहीनशक्तिविषयत्वंसाधितं मंचादौचमं चशब्दहीनशक्तिविषयत्वमस्तीतिनव्यभिचारइतिभावः ॥ **अल्पत्वमिति** ॥ परतंत्रत्वमित्यर्थः । उदाहरिष्यमाण श्रुतिस्थतुछपदार्थेनैवमुक्तं । अभ्वित्यस्यार्थोविभ्विति तेनस्वतंत्रत्वं अव्यक्ताछादितत्वोवत्यातदंतर्गतत्वंचोक्तंबोध्यं । श्रुत्यंतरंचोदाहर्तव्यमिति जिवादिविन्यस्तत्वादिप्रतिपादनार्थमिदं । एवमनेनजीवेनेत्यादिश्रुत्युदाहरणप्रयोजनंद्रष्टव्यं । प्राचीनचिंता परमात्मनोमुख्यवाच्यत्वंतत्संबंधादन्यस्येतिचिंतादर्शयति । शब्दश्चशब्दश्चतांभ्यां ईश्वरभावात्ईश्वर त्वात् निष्कलं प्राकृतषोडशकलाहीनं उक्तंगीतायां । तस्यचाक्षरस्यान्यत्वशंकानिरासायपूर्वांशोदाहरणमितिभाव ॥ **अनेनेति** ॥ अनेनजीवेनात्मना अनिरूत्धरूपेणेमास्तिस्रोदेवताःअनुप्रविश्यनामरूपेव्याकरवाणीत्यर्थः ॥ **ॐसू क्ष्मंतुतदर्हत्वात् ॐ** ॥ सूक्ष्मंतुसूक्ष्ममेवाव्यक्तशब्दवाच्यं ब्रह्मचातिसूक्ष्ममितितदेवमुख्यतोव्यक्तपदवाच्यं अवक्तत्व स्यैवाव्यक्तपदनिमित्तत्वात्कथंसूक्ष्ममव्यक्तपदवाच्यमित्यतउक्तं ॥ **तदर्हत्वादिति** ॥ तस्यसूक्ष्मत्वस्यैवाव्यक्तशब्दप्रवृ त्तिनिमित्ताव्यक्तताहत्वात्सूक्ष्ममेवाव्यक्तपदवाच्यमित्यर्थः । कुतइत्यतआह ॥ **अव्यक्तत्वोपयोगीति** ॥ अणुर्वोदि तव्यइत्यन्वयः । पृथग्जनाःपामराः । तदुक्तंगीतातात्पर्ये । प्राणधारणहेतुतांजीवनामेतिसंबंधः जीवप्राणधारणइतिधा तोरितिभावः॥ **प्रधानविशिष्टेति**॥ प्राधान्येनोभयग्रहणएवतस्यदोषत्वमितिभावः॥ **गौणाश्रयणस्येति** ॥ अमुख्या

SGDF Sri Gargeshwari Digital Foundation

श्रयणस्येत्यर्थः ॥ परावरत्वेति ॥ महत्परत्वपुरुषावरत्वप्रतिपादकोदात्तश्रुतिवैय्यार्थ्यादित्यर्थः ॥ ॐ तद-
धीनत्वादर्थवत् ॐ ॥ अवरत्वादिवाचिशब्दजातंभगवत्यर्थवत्तद्वाचकमितियावत् कुतःतदधीनत्वात् अवरादिशब्द
प्रवृत्तिनिमित्तावरत्वादिधर्माणांभगवदधीनत्वादित्यर्थः । तथापिकुतोर्थवदित्यतोऽर्थापत्तेरेवेत्याह ॥ अन्यगतेत्यादि
ना ॥ अनिष्टस्यावद्यत्वेपिसामान्यविशेषभावेनपृथगुक्तिः ॥ अस्पृष्टिनियमादिति ॥ तथाचनतदधिकरणत्वंतत्र
संभवतीतिभावः संकोचः तदतिरिक्तनामपरत्वरूपः ॥ निरवकाशत्वादिति ॥ सर्वशब्देनैवसर्वनामतालाभेपुनर्ब
हुवचनप्रयोगेणतस्यासंकुचितत्वंसूचयति । अन्यथातद्वैय्यर्थ्यमितिभावः । तर्हिनहिंस्यात्सर्वभूतानीत्यत्राप्यसंकोचः
स्यादित्यतआह ॥ बाधकाभावाच्चेति ॥ तत्रचाग्निषोमीयंपशुमालभेतेत्यादिकंबाधकमस्तीतिभावः । अवरत्वादि
श्रुतिवैय्यर्थ्यस्यैवशंकितत्वेनाव्यक्तग्रहणमनर्थकमित्यतआह ॥ अत्रेति ॥ चशब्दइति ॥ नकेवलंसूक्ष्ममित्युक्ताव्य
क्तशब्दप्रवृत्तिनिमित्ताधिकरणत्वात्किंत्वव्यक्तादीनांतदधीनत्वाच्चेतिसमुच्चायकइत्यर्थः । पंकजेपंकजन्ये ॥ इतिशंकाच्च
निरस्तेति ॥ अव्यक्तग्रहणेनेत्यनुवर्तते । तथाचपूर्वनाल्पप्रवृत्तिनिमित्तत्वमात्रप्रधानस्याव्यक्तशब्दमुख्यार्थत्वेहेतुत्वेनो
क्तं किंत्वव्यक्तशब्दप्रवृतिनिमित्ताव्यक्तत्वस्यपराधीनत्वमपीतिभावः । अभ्युपेत्यचेदमुदितं भृत्यादौजयप्रभृतिशब्दानाम
मुख्यत्वेऽन्याधीनप्रवृत्तिनिमित्तकत्वमात्रस्यतथाल्पज्ञानादिमतिविद्वदादिशब्दानाममुख्यत्वेप्रवृत्तिनिमित्ताल्पत्वमात्रस्यनि-
मित्तत्वदर्शनात् । अल्पपंकजेपद्मेचपंकजशब्दस्ययोगरूढत्वेनरूढिनिमित्तपङ्कत्वादिजातौतारतम्याभावेनतदपेक्षयामुख्यत्वा
भावेप्यवयवार्थाल्पत्वप्रयुक्तमुख्यत्वस्याल्पज्ञानादिमतिविद्वदादिशब्दानामिवसत्वेनव्यभिचाराभावाच्चप्रधानादेरव्यक्तादिश
१५ ब्दमुख्यार्थत्वेप्रत्येकमुभयोरपिहेतुत्वविरोधादितिध्येयं। तथात्वात् बहुलप्रयोगसित्वत्वात्॥युत्पत्तीति॥कर्तृव्युत्पत्तीत्यर्थः

SGDF
Sri Gargeshwari Digital Foundation

प्रातिपदिकाद्धात्वर्थेबहुलमिष्टवच्चेतिधातुसूत्रादवरादिशब्देभ्यस्तत्करणादिकेधात्वर्थेचौरादिकेणिचिसतितस्याचोञ्णितिप्रा
प्तवृत्ध्यपवादायेष्टवद्भावस्योक्तत्वेनेष्टेपरतेष्टेरितिटिलोपस्यविधानाद्टिलोपेचसतिसनाद्यंताधातवइतिधातुसंज्ञायांपचाद्यचिकृ
तेणेरचिटीतिणिलोपेचसतिअवरयतीत्यवरइत्यादिसिध्यतीतिभावः । बंधयतीतिकृत्वाबन्धउच्यतइत्यादियोज्यं ॥

॥ ॐ ज्ञेयत्वावचनाच्च ॐ ॥ ब्रह्मैवाव्यक्तशब्दमुख्यार्थोनप्रधानादिः तमेवैकंजानथेतिब्रह्मणएवमुमुक्षुज्ञेयत्ववचनात्
अन्याषाचोविमुंचथेतिप्रधानादेर्ज्ञेयत्वावचनादज्ञेयत्ववचनाच्चेत्यर्थः । श्रुतिमुख्यार्थतदभावौप्रतिमुमुक्षुज्ञेयत्ववचनतदभाव
योरप्रयोजकत्वपरिहारार्थमभिप्रायमाह ॥ यज्ज्ञानेनेति ॥ अव्यक्तात्पुरुषःपरइत्यादिवेदस्यब्रह्मप्रतिपादकत्वेऽन्यप्र
तिपादकत्वेवा मोक्षजनकत्वंनस्यादितिभावः ।विष्णोर्मोक्षहेतुज्ञानाविषयत्वेन सकलवेदप्रतिपाद्यत्वेश्रुतिमाह ॥तथाचेति ॥
ईड्यस्यविष्णोर्गुणोत्कर्षज्ञातर्यादृशीप्रीतिस्यात्तादृशीप्रीतिःकर्मादिकारिपुनस्यात् । यतःसर्वोपिजनस्तत्प्रीणनाद्विष्णुप्रीते
र्मोक्षमाप्नोतिततःसर्वेवेदाविष्णुपराएवेत्यर्थः ॥ ॐ वदतीतिचेन्नप्राज्ञोहि ॐ ॥ महतःपरंध्रुवंनिचाय्यतंमृत्युमुखा
त्प्रमुच्यतइतिश्रुतिःप्रधानस्यापिमुमुक्षुज्ञेयत्वंवदतीतिचेन्न हियस्मात्प्राज्ञोविष्णुरेवतत्रोच्यतइत्यर्थः । ध्रुवंनित्यं निचाय्यआ
चार्योपदेशेननिश्चित्य मृत्युःसंसारःतल्लिंगंप्रधानेसमर्थयति ॥ महांतमिति ॥ अत्रसमावृत्येत्यनेनप्रधानस्यमहत्वापे
क्षयाधिकपरिमाणोक्त्यातत्परत्वासिद्धिरितिभावः ॥ अन्यस्यापीति ॥ प्रयोगप्रवृत्तिनिमित्तातिशयाभ्यांभगवतिपरम
मुख्यत्वेपिअन्यत्रापिमुख्यवृत्तिमात्रांगीकारेणात्रापिश्रुतौमहत्परशब्देनप्रधानंग्राह्यमितिभावः ॥ स्थूलस्येति ॥ लोक
विरुद्धतयाप्रतीतधर्मवत्वेनभगवतोऽचिंत्यशक्तिप्रतिपादनायैतच्छ्रुतिप्रवृत्तिरितिभावः ॥ सुतरामिति ॥ महतत्वस्यसा
पेक्षस्थूलत्वादितिभावः । विशिष्य साक्षात् अमुख्यार्थतां परंपराश्रयणलक्षणां ॥ ॐ प्रकरणात् ॐ ॥ सोध्वनः

पारमाप्नोतितद्विष्णोःपरमंपदमित्येतत्प्रकरणार्थोपासकस्यविष्णुपदप्राप्युक्तयावैष्णवत्वेननिर्णीतात्प्रकरणात्प्राज्ञएवतत्रो
च्यतइत्यर्थः ॥ प्रधानपरस्यापीति ॥ बुध्यपेक्षयापरममहदव्यक्तपरत्वेपियोबुद्धेःपरतस्तुसइतिगीतायांयोभगवान्बु
द्धेःपरतोवर्ततेसइतिविशिष्यबुद्धिपरत्वंयथोच्यतेतथात्रप्रधानपरस्यापिविशिष्यमहत्परत्वोक्तिरुपपन्नेत्यर्थः ॥ पूर्वमि
ति ॥ अनाद्यनंतमित्यतःपूर्वंमहतःपरमव्यक्तमितिवाक्यादित्यर्थः । तद्भावात् प्रसक्तत्वात् एतत् एतद्वाक्यस्यप्रधान
परत्वमित्युक्तार्थविस्मरणविजृंभितमितिचोद्यमानुमानिकमित्यादिनोक्तोयोर्थःमहतः परमव्यक्तमितिवाक्यस्याविष्णुपरत्वरू
पस्तद्विस्मरणोत्थमित्यर्थः ॥ साधकमस्माकमिति ॥ उक्तरीत्यापूर्वंमहत्परत्वेनपरमात्मनएवमुख्यतःप्रकृतत्वेनतस्यैव
परामर्शोयुक्तोनामुख्यतयाप्रकृतप्रधानस्येतिभावः । शंकते । सत्यमिति ॥ प्रकरणस्यापिसावकाशत्वेनेतिसंबंधः ।
इतोपिइदंप्रकरणंवैष्णवमेवेत्याह ॥ अनाद्यनंतइति ॥ इतिशब्दांतंप्रतीकंगृहीत्वाश्रुतिःस्वयमेवव्याख्यातीतिध्येयं । पु
रुषुशरीरेषुप्राणादिरूपेणह्यूयतइतिपुरुहूतः ॥ ॐ त्रयाणामेवचैवमुपन्यासःप्रश्नश्च ॐ ॥ आद्यःचशब्दोहेतौ
द्वितीयोयुक्तिसमुच्चये एतदुपनिषदि त्रयाणांपितृसौमनस्यस्वर्ग्याग्निब्रह्मणामेवैवंवीतमन्युस्त्वांददृशिवान्मृत्युमुखात्प्र
मुक्तइति स्वर्ग्यमग्निंनचिकेतप्रजानन्निति देवैरत्रापिविचिकित्सितंकिलेत्येवंप्रकारेणक्रमेणोपन्यासोयतोतश्चप्राज्ञएवात्रोच्य
ते नप्रधानमित्यर्थः । त्रयाणामेवोपन्यासःकुतइत्यतउक्तं ॥ प्रश्नइति ॥ सुमनायथास्याद्वीतमन्युरितिसत्वमग्निंस्वर्ग्य
मध्येषिमृत्योप्रब्रूहित्वमितियेयंप्रेतेविचिकित्सामनुष्येइतिक्रमेणतृतयविषयएवयतोतउपन्यासश्चतृतयविषयएवेत्यर्थः ॥ पि
तृसौमनस्येति ॥ गौतममनःप्रसादेत्यर्थः । त्रये त्रयमध्ये तत्प्रकारंतृतयप्रकारमाहसूत्रकारः । व्याचख्यौ व्या
चष्टे ॥ मृतजीवस्येति ॥ प्रेतेमृतेमनुष्ये विषयसप्तमीयं । येयंविचिकित्सासंशयःकुतः यतःएकेयंमृतजीवोस्तीतिव

SGDF
Sri Gargeshwari Digital Foundation

दंत्येकेतुनास्तीतिअतइतिपूर्वपक्षव्याख्यानं । सित्थातेतुप्रेतेमुक्तेमनुष्येभगवान्नियामकत्वेनास्तिनवेत्यादिव्याख्यानध्येयं ॥ तद्भाष्यएवेति ॥ नायंसंशयोनचकेतसोयुज्यते स्वयंमृत्वायमंप्राप्तस्यमृतास्तित्वनिश्चयादित्याशयेन । नचमृत्वा यमंप्राप्तस्यनचिकेतसोमृतोस्तिनवेतिसंशयोस्तीत्यादिनाकाटकभाष्येतस्यजीवपरत्वनिराकरणादितिभावः ॥ ॐ महद्वच्च ॐ ॥ यथामहच्छब्दस्यान्यत्रप्रसित्थत्वेपिमहांतंविभुमित्यत्रमहच्छब्दवाच्यंब्रह्म तथान्यत्रप्रसित्थाव्यक्तादिशब्दवाच्यं ब्रह्मेत्यर्थः । दृष्टांतांतरानुक्तेराह ॥ दार्ष्टांतिकेति ॥ प्रयोगोहिशक्तिज्ञापकः प्रवृत्तिनिमित्तंतुशक्तिविषयतावच्छेदक तयानियामकं नियम्यस्यतुनियामकानुसारित्वंप्रसित्थमेवेतिभावः ॥ सहनवतीति ॥ सहतीतिसिंहइतिनिर्वचना-दितिभावः । वृत्यंतरेणाव्यक्तत्वगुणयोगाद्गौण्यादिरूपेणेत्यर्थः ॥ किम्विति ॥ नमुख्यइतिकिम्वित्यर्थः ॥ ॐ च-मसवदविशेषात् ॐ ॥ चमसशब्दोयज्ञपात्रेप्रसित्थोपिशिरसिमुख्यस्तथाव्यक्तादिशब्दोपिब्रह्मणिमुख्यइत्यर्थः । नन्विदंतच्छिरइत्यनुशासनसत्वात्तस्यतथात्वेप्यत्रकुतइत्यतउक्तं ॥ अविशेषादिति ॥ नामानिसर्वाणीतिश्रुतेरिदंत च्छिरइतिश्रुत्याविशेषाभावात्तत्साम्यात्तद्वदनुशासनरूपत्वादित्यर्थः । अन्यथानुशासनसित्थस्यापिचमसशब्दस्यावाचक त्वे तच्छ्रुतेः इदंतादितिश्रुतेःसकाशात् तात्पर्यमाह ॥ तद्वादिति ॥ अर्वाग्बिलइति ॥ योऽधःछिद्रवान्यश्चोर्ध्वं घटवद्बुध्नाकारवान्सचमसइतिमंत्रेयच्चमसशब्दाभिधेयंवस्त्वभिहितंतदिदंप्रत्यक्षादिसित्थं मनुष्यादीनांशिरएव कुतःहि-यस्मादेषोर्वाग्बिलऊर्ध्वबुध्नश्चभवतितस्मादित्यर्थः । शिरोविवक्षयैषइतिपुल्लिंगानुपपत्तिरित्यतआह ॥ एषइतीति ॥ दक्षिणेति ॥ अत्रवाक्येयदन्नमात्मानभवतितदन्नंदक्षिणात्वेनवनुतइतियोजनायांयच्छब्दस्यान्नपरत्वेपिविधेयात्मत्वविव क्षयायइतिपुल्लिंगानिर्देशवदिहाप्येषइत्यस्याशिरःपरत्वेपिविधेयचमसविवक्षयापुल्लिंगनिर्देशइत्यर्थः ॥ मुखादीति ॥ आ

SGDF Sri Gargeshwari Digital Foundation

स्यकर्णघ्राणादिरूपछिद्रमेवशिरसोबिलमित्यर्थः ॥ १ ॥ कर्मक्रमेति ॥ कर्मतत्क्रमादित्यर्थः ॥ ज्योतिष्टोमादीति ॥ यद्यपिसूत्रादौज्योतिःशब्दएवोपात्तः तथापिज्योतिष्टोमेनस्वर्गकामोयजेतेत्युत्पत्तिवाक्यविहितज्योतिष्टोमयागस्यवसंतेवसंत इतिवाक्येनकालाख्यगुणविधानादुत्पत्तिवाक्यानुसारेणात्रत्यज्योतिः शब्दोपिज्योतिष्टोमपरएवेत्याशयेनज्योतिष्टोमशब्दग्रहणमितिध्येयं । कालोवसंतादिः कर्मयज्ञादि क्रमोवेदकरणानंतरंवेदिकरणादिः अधिकारित्वंफलस्वामित्वावस्था नियोज्यत्वं विधिप्रेर्यत्वावस्था यजमानत्वं कर्तृत्वावस्थेत्यवस्थाभेदेनैकस्याधिकारित्वाद्युक्तिरुपपन्ना । फलंस्वर्गादि ऋत्विजो होत्रादयः प्रमाणांतरेण प्रत्यक्षदिना येनतदभावाख्यविरोधोनस्यादितिभावः । व्युत्पत्ययोगादयुक्तंचेत्तच्छब्दवाच्यत्वमित्याह ॥ किंचेति ॥ गुणपूर्त्यसिद्धेरिति ॥ अवयवव्युत्पत्तावेवगुणलाभादितिभावः । किंज्योतिरादिपदानांप्रकाशादिवाचकत्वमुपेत्यज्योतिष्टोमादिशब्दानांभगवतियोगोंगीक्रियते उतान्यवाचकत्वंविना द्वितीयंदूषयति ॥ ज्योतिषामिति ॥ भगवन्नामेति ॥ प्रातिपादिकप्रकृतिप्रत्ययादीनांसर्वेषांविष्णुनामत्वादितिभावः । आद्य आह ॥ स्तोमादीति ॥ अन्यत्रापीति ॥ अतोनकालकर्माद्यभावापातइतिभावः ॥ लक्षणेति ॥ मुख्यार्थप्रवाहसंबंधेनतीरेप्रवृत्तगंगादिशब्दस्यलाक्षणिकत्वनिश्चयादितिभावः ॥ ॐ ज्योतिरुपक्रमात्तुतथाह्यधीयतएके ॐ ॥ ज्योतिरादिशब्दवाच्यंब्रह्मैव नकर्मादिः कुतःहियस्मादेकेशाखिनःउपक्रमात् एषइमंलोकमभ्यार्चदितियोगेनशतर्च्यादिशब्दवाच्यत्वमुपक्रम्यतावाएताइतिहारिमेवतथासर्वशब्दवाच्यत्वेनाधीयंतेपठंतितस्मादित्यर्थः । तथेतिसौत्रपदानुवादः ॥ योगस्योक्तत्वादिति ॥ यस्माद्ब्रह्मादिदेहप्रविष्टंभगवंतंशतंवर्षाण्यभ्यार्छत्तस्माच्छतर्चिनइतियोगस्योक्तत्वादित्यर्थः समग्रैतच्छ्रुतिव्याख्यानंप्राणस्तथानुगमादित्यत्रास्माभिःकृतंद्रष्टव्यं । कथमित्यतआह ॥ एतमेवेति ॥ प्रथमप्राप्तवसंत

SGDF
Sri Gargeshwari Digital Foundation

त्यागेनज्योतिग्रहणेकिंबीजमतआह ॥ ज्योतिःशब्दस्येति ॥ तस्यैवेति ॥ राजागच्छतीत्यादौप्रधानपरराजशब्दस्यैवप
रिचारोपलक्षकत्वदर्शनादितिभावः ॥ तुशब्दएवार्थइति ॥ तस्यप्रागेवहरिमेवाभिधीयतइत्यध्याहृतेनसंबधोदर्शितइतिध्ये
यं प्रथमप्राणशब्दस्यसप्तम्यंतत्वेतद्भ्रष्येभिहितत्वेपिप्रथमांतत्वमभ्युपेत्याह । विष्णुरिति ॥ ॐ कल्पनोपदेशाच्चमध्वा
दिवदविरोधः ॐ ॥ यथासावादित्योदेवमध्वित्यत्रमधुशब्दस्यादित्यस्थविष्णावुपासनार्थमुक्तत्वेपिनक्षौद्रकादौव्यवहार
विरोधः तथाविष्णोर्महायोगवृत्याज्योतिष्टोमादिसर्वशब्दवाच्यत्वेप्यन्यस्यापिवृत्यंतरेणवाच्यत्वान्नकर्मादिविरोधः । महा
योगवृत्यैववाच्यत्वंकुतइत्यतउक्तं ॥ कल्पनोपदेशाच्चेति ॥ कल्पनार्थंचगुणपूर्णत्वेनोपासनार्थमेवसर्वशब्दवाच्यत्वो
पदेशाद्वृत्यंतरेगुणालाभान्महायोगवृत्तिरेवाश्रयणीयेतिभावः ॥ असाविति ॥ असौज्ञानिप्रत्यक्षविषयआदित्यनामादि
त्यांतर्गतोविष्णुःसुखपूर्णत्वान्मधुदेवोपजीव्यत्वाद्देवमधुनामकइत्यर्थः ॥ वृत्तिरिति ॥ शब्दबोधानुकूलपदार्थोपस्थिति
हेतुःपदपदार्थसंबंधोवृतिः तात्पर्यरूपेणार्थप्रतिपादकत्वंवा ॥ योगवृत्येति ॥ प्रादुर्भावार्थकाज्जनेरौणादिकेडिप्रत्ययेडि
त्वादिलोपेजीतिभवति प्रवेशार्थकस्यवतेःक्तिप्रत्ययेजरत्वरेत्यादिनावकारस्योपधाकारस्यचोटिकृतेसवर्णदीर्घोकित्यपिछां
दसेगुणेओतिरितिभवति । तथाचजिर्जातंजगदोतंप्रविष्टंयस्मिन्नसौज्योतिरित्यादियोगवृत्येत्यर्थः । वृत्यंतरेणवाच्यत्वंकिंन
स्यादित्यतआह ॥ सर्वशब्दवाच्यत्वमिति ॥ चशब्दएवार्थइति ॥ तस्यचयोग्यतयाकल्पनपदेनान्वयप्रदर्शना
योपासनार्थमेवेतिप्रागेवोक्तमितिध्येयं ॥ विरोधश्चनेतिवेति ॥ नकेवलंसर्वशब्दार्थत्वांगीकारेतथाह्यधीयतएकइत्यु
क्तसाधकसद्भावः किंतुकर्मक्रमादिविरोधोपिनेतिसमुच्चयार्थोवेत्यर्थः । शिष्यानुजिघृक्षयाह ॥ प्रयोगमात्रमिति ॥
मात्रेत्यवयवार्थसादृश्यसंबंधसापेक्षताव्युदासार्थं तेनमहायोगरूढियोगरूढिरूढोपचाररूढलक्षणाभ्योव्यवछेदः । मात्र

पदेनैवेतरव्यवच्छेदसिद्धेर्बाहुल्यमितिस्वरूपसंकीर्तनं ॥ प्रवृत्तिनिमित्तमात्रमिति ॥ निर्वचनलभ्योर्थः प्रवृत्ति
निमित्तंतेनतादृशघटत्वादिप्रवृत्तिनिमित्तसापेक्षरूढिव्यवच्छेदः । प्रयोगसापेक्षताव्युदासायमात्रपदं तेनयोगरूढिव्यवछे
दः नचमहायोगेतिव्याप्तिः । भुक्तिमात्रमितिवत्मात्रपदस्यप्रवृत्तिनिमित्ताल्पत्वस्यापिविवक्षितत्वेनतदतिशयोपेतमहा
योगव्यावृत्तेः । प्रवृत्तिनिमित्तंप्रयोगबाहुल्यंचेतिरूढिमात्रेयोगमात्रेचातिप्रसंगवारणायोभयोपादनं अत्रप्रवृत्तिनिमिता
ल्पत्वस्यवाविद्वन्मात्रप्रयोगबाहुल्यस्यवाविवक्षितत्वेननमहायोगरूढवृत्तावतिप्रसंगः ॥ मुख्यार्थस्येति ॥ योगादि
व्यवछेदायातिरिक्तेत्यंतं ॥ वाच्यार्थानुपपत्येति ॥ पूर्वप्रतीतार्थानुपपत्येत्यर्थः । तेनलक्षितलक्षणाद्यनुगमः
इदंचामुख्यार्थग्रहणहेतुत्वेनोक्तंनतुलक्षणांतर्गतत्वेन । अतएवपूर्वायोगेपरग्रहइत्यनुव्याख्यानमेवसुधायांव्याख्यातं ।
गौण्यामतिव्याप्तिवारणाययोग्यइति शब्दप्रतिपाद्यसंबधइत्यर्थः । तेनलक्षितलक्षणासंग्रहः नचाजहत्स्वार्थलक्षणा
यामतिव्याप्तिः तत्रस्वार्थस्यापिलक्ष्यत्वेनतत्रस्वसंबंधाभावादितिवाच्यं । भेदानुमाने अवस्थाभेदमादायैकस्यैवपक्षसपक्ष
त्ववदत्रापिव्यवस्थाभेदमादायस्वस्यापिस्वसंबंधसद्भावात् । पैंगल्यंपिंगलत्वं ॥ तदितरत्रेति ॥ अन्यत्रप्रसिद्धस्तं
भादीनामित्यर्थः । ननुनारायणादिशब्दवत्स्तंभादिशब्दानामपिहरौविद्वद्रूढित्वेनप्रयोगबाहुल्यप्रवृत्तिनिमित्तातिशया
भ्यांतेषामपिमहारूढियोगोपेतत्वेनकथमिदंवैषम्यमित्यतआह ॥ स्तंभादिशब्दानामिति ॥ विद्वदविद्वत्सर्वजनसं
बंधिप्रयोगोपेतत्वस्यैवमहच्छब्दार्थत्वमितिभावः । तद्भेदः महारूढियोगोपेतनारायणादिशब्देभ्योवैलक्षण्यं ॥ २ ॥
आधाराधेयत्वंचाग्रेयस्मिन्निति सप्तम्यानिर्दिष्टेत्यादौव्यक्तं ॥ यस्मिन्निति ॥ यस्मिन्हरौपंचपंचजनाः प्रतिपुरुषंप्रा
णादयः पंचजनाः आकाशोमूलप्रकृतिः तन्नियामकभगवद्रूपविशेषाश्चेत्येतेआश्रितास्तमेवात्मानंमन्येजानीयां । किंतज्ज्ञा

PDF
Sri Gargeshwari Digital Foundation

नेनेत्यतआह ॥ विद्वानिति ॥ अमृतंनित्यमुक्तंब्रह्मविद्वानमृतोमुक्तोभवतीत्यर्थः । द्विवचनप्रयोजनमाह ॥ सर्वेति ॥ योयोधूमवानित्यादाविववीप्सायाःसर्वसंग्राहकत्वादितिभावः । तच्छब्दस्यपंचजनादिशब्दस्य ॥ अवरादिशब्दवदिति ॥ अवरत्वादिनियामकतयातच्छब्दवाच्यत्वस्यान्यत्रादर्शनादितिभावः । हेत्वंतरेणसोवरः सोनित्यइत्यादिना तादृशं निरवकाशं ॥ वाक्यशेषबलेनेति ॥ यच्छब्दोक्तमेवतमेवेतिपरामृश्यतस्यात्मत्वविधानादितिभावः । ॥ हरेराधेयत्वमिति ॥ पराधीनस्यैवघटादेर्भूतलाधेयत्वदर्शनादितिभावः ॥ ॐ नसंख्योपसंग्रहादपिनानाभावादतिरेकाच्च ॐ ॥ पंचजनादिशब्दवाच्यत्वेनबहुत्वसंख्यास्वीकारेपिनविरोधः कुतः नानाभावात् भगवतोनानारूपाणांसद्भावात् नचाधाराधेयभावानुपपत्तिः यच्छब्दोक्तरूपस्यरूपपंचकापेक्षयातिरिक्तत्वेनतत्संभवादित्यर्थः । ॥ विरोधपदाकर्षणमिति ॥ अविरोधइत्यतोबुध्याविवेकेनेतिभावः । ईश्वराधारेत्यत्रबहुव्रीहिः ॥ अवस्थानमात्रेणेति ॥ पराधीनत्वव्यावृत्यर्थमात्रशब्दः । श्रुत्यंतरणां नामानिसर्वाणीत्यादीनां ॥ ॐ प्राणादयोवाक्यशेषात् ॐ ॥ पंचजनाः प्राणप्राणादिभगवद्रूपविशेषाएव प्राणस्यप्राणमित्यादिवाक्यशेषादित्यर्थः । उक्तशंकानिरासायविशेषहेतोरेववक्तव्यत्वात्किंपंचजनस्वरूपनिरूपणेनेत्यतआह ॥ पंचजनलिंगोक्त्येति ॥ पंचजनानांविष्णुत्वानिश्चायकलिंगोक्त्येत्यर्थः ॥ प्राणस्यप्राणमितीति ॥ प्राणस्यप्राणमुतचक्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रंमनसोमनोविदुरितिवाक्यशेषादित्यर्थः । भाष्येत्वेतत्समानार्थकमाध्यंदिनशाखास्थवाक्यमेवोदात्ततामितिध्येयं । श्रोत्रस्यश्रोत्रत्वप्रदमित्यादियोज्यं । पूर्ववाक्यतःपंचपंचेत्यस्मात् ॥ ॐ ज्योतिषैकेषामसत्यन्ने ॐ ॥ एकेषांकाण्वानांशाखायामन्नेअन्नाख्यरूपेअसत्यपिज्योतिषांज्योतिरितिप्रागुक्तज्योतिषासहपंचत्वंबोध्यमित्यर्थः ॥ यस्मादर्वागिति ॥ अहोभिःसहसंवत्स

SGDF
Sri Gargeshwari Digital Foundation

रोयस्मादर्वाक्परिवर्ततेयस्मिन्स्वव्यापारंकर्तुंनसमर्थइतियावत् । तंज्योतिषांज्योतिष्टुप्रदंआयुरचलंनित्यमुक्तंब्रह्मदेवाः उपासतइत्यर्थः । श्रुत्योर्विसंवादंपरिहरति ॥ अत्रेति ॥ प्रकारांतरमाह ॥ पृथगिति ॥ यथावासुदेवादिचतुर्व्यूहापेक्षयानारायणसहितवासुदेवादेःपृथग्व्यूहत्वं तथान्नेनसहितप्राणादेःसकाशाज्योतिःसहितप्राणादेःपृथक्त्वमितिभावः । ॥ ३ ॥ आत्मनआकाशइति ॥ अत्रभूतंभूताभिमानीचतद्देहांतर्नियामकः । हरिश्चाकाशशब्दोक्तइत्युक्तरीत्याचतुर्णामुत्पत्तिर्ज्ञेया। सर्वत्रकाशमानत्वादाकाशः बलज्ञानस्वरूपत्वाद्वायुः स्वतोनगछतीत्यगंजगत्तंनयतीत्यग्निः । आपालनादापः बहुरूपत्वाद्बहुवचनं । पृथितत्वात्पृथिवी उष्टानांजाठराग्निनादह्यमानानांआश्रयत्वादौषधिः । अतृत्वादुपजीव्यतयाद्यत्वाच्चान्नं पुरिशेतइतिपुरुषइत्यर्थः ॥ निमित्तविशेषादर्शनाच्चेति ॥ परमात्मनोव्यक्तादिशब्दवाच्यत्वप्रतिपादकाव्यक्तमचलंशांतमित्यादिश्रुतिरूपनिमित्तविशेषवदत्रतदभावादित्यर्थः ॥ वाक्ययोजनानुपपत्तेश्चेति ॥ आत्मादेः स्वस्मादाकाशादिरूपस्वयंसंभूतान्यगतसंभवनियामकइत्यर्थउक्तःस्यात्तत्रचस्वस्यान्यगतसंभवकर्तृत्वेस्वस्यानुपयोगादात्मनइत्यादेरन्वयानुपपत्यावाक्ययोजनानुपपत्येत्यर्थः ॥ॐ कारणत्वेनचाकाशादिषुयथाव्यपदिष्टोक्तेः ॐ नकेवलंमूलकारणत्वेनतद्वाचकात्मशब्दवाच्योहरिरपितुकारणत्वेनचावांतर कारणत्वेनापिनिमित्तेनतद्वाचकाकाशादिशब्दवाच्यश्चतर्हिकार्यकारणभावविरोधइत्यतउक्तं ॥ आकाशादिष्विति ॥ स्थितत्वादितिशेषः । यआकाशेतिष्ठन्नित्यादिनातस्याकाशस्थत्वोक्त्यातस्याकाशाद्युत्पत्तौतदवस्थत्वेनतस्याप्यभिव्यक्त्याकार्यत्वं वाय्वादिस्थरूपव्याक्तिहेतुत्वेन कारणत्वंचयुक्तं यआकाशइत्युक्तोहरिः कुतइत्यतउक्तं ॥ यथाव्यपदिष्टोक्तेरिति ॥ यथायेनाश्रुतत्वादिनाप्रकारेण सयोतोश्रुतइत्यादौनिर्दिष्टस्तेनैवप्रकारेणाकाशादौयमाकाशोनवेदेत्यादिनोक्तेरित्यर्थः । आकाशादिषुस्थितत्वे-

SGDF
Sri Gargeshwari Digital Foundation

पिकार्यकारणभावविरोधपरिहारःकथमित्यतआह ॥ तथाचेति ॥ ननुतर्हिविकारशब्दान्नेतिचेदित्याद्यनुपपत्तिपरिहारएवकर्तव्योनत्वानंदमयोभ्यासादिविशेषहेतुर्वक्तव्यइत्यतआह ॥ यंत्विति ॥ ४ ॥ एवंहरावन्यत्रचमुख्यवृत्तौसिद्धायामस्यविचारस्यावसरप्राप्तिमाह । अथपुनःप्रकारांतरेणपरमात्मनिसर्वशब्दसमन्वयासंभवमाशंक्यतत्परिहारत्वेनसूत्रमवतारयतीतिपूर्वाधिकरणचतुष्टयेनगतार्थत्वनिरासायोक्तं ॥ प्रकारांतरेणेति ॥ सर्वमानविरोधकर्मक्रमादिविरोधबहुलसंख्याविरोधोत्पत्तिमत्त्वादिविरोधरूपप्रागुक्तप्रकारापेक्षयामुख्यवृत्तेर्हरौ तदन्यत्रचतुल्यतापत्तिरूपान्यप्रकारेणेत्यर्थः अत्रशास्त्रसंगत्यादिकमूह्यं । यदातुअत्रव्यवहारलोपप्रसंगेनान्यत्रैवप्रसिद्धानांसर्वशब्दानांपरमात्मैकवाचितासमर्थनादस्तिशास्त्रादिसंगतिः । समन्वयसूत्रेसर्वशब्दानांभगवदेकवाचित्वमुक्तं । तच्चानुपपत्तिग्रस्तत्वेअसत्स्यादित्यारंभणीयमेतत् लौकिकावैदिकाश्चशब्दाःविषयाः भगवदेकवाचिनोनवेतिसंदेहः पूर्वोक्तमेवसंदेहबीजं पूर्वपक्षमाहेतिपाठोदृश्यते तदातुव्यक्तमेव । एवमग्रेपिशंकार्यः । सूत्रंव्याचष्टे सित्धांतयत्सूत्रमवतार्यव्याचष्टइतिपाठद्वयं यद्यपितत्वप्रदीपेसमाकर्षादित्यादिसूत्राष्टकस्यपूर्वाधिकरणशेषत्वमुक्तं युक्तंचैतत् अनुव्याख्यानेविरोधसर्वबाहुल्यकारणस्त्रीनिषेधिनामित्येतत्पादीयाधिकरणोपाध्युक्तिदशायांपृथगुपाध्यनुक्तेस्तथापूर्वपक्षसित्धांतयुक्तिसंग्रहदशायामपिपृथगुक्तयनुक्तेः । भाष्येसमन्वेतव्यशब्दविशेषानुक्तेश्च तथापिपूर्वतंत्रेहेतुदर्शनाच्चेतिसूत्रस्यविरोधादिकरणशेषत्वेपिप्रथङ्न्यायसूचकत्वमिवास्यापितदस्तीतिदर्शयितुमत्रटीकायामधिकरणांतरंकृतमिति चंद्रिकायांपाठद्वयेपिसर्वशब्देत्यनेनज्योतिराधिकरणोपाधिरेवात्राप्युपाधिरितिसूचितं ॥ अत्रोक्तमिति ॥ अवाचकानेकशब्दान्ज्ञानिनोव्यवहारार्थमज्ञानिनोऽज्ञानादेवान्यत्रप्रयुंजतइत्युक्तमित्यर्थः । अव्यवस्था घटादौपटप्रयोगलक्षणा ॥ ईश्वरसंबंधादिति ॥ वाच्चेश्वरसंबंधतदभावाभ्यां

व्यवस्थेतिभावः ॥ ॐ समाकर्षात् ॐ ॥ सर्वशब्दानांब्रह्मणःसकाशाज्जगतिसम्यगाकृष्यरूढत्वेनसंकेतितत्वान्नव्यवहारलोपोनवाचकत्वसाम्यमित्यर्थः ॥ अन्योन्यनिरपेक्षेति ॥ परमात्मनिशब्दवृत्तेःजगन्नैरपेक्ष्यवत्जगत्यापिपरमात्मनिरपेक्षेत्यर्थः स्वतइतिअनन्यापेक्षयेत्यर्थः । ततःब्रह्मणः तर्हियोगिकानांसाम्यमस्त्वित्यतआह ॥ अल्पेति ॥ समाकृष्यव्यवहारस्यलोकवेदप्रयोजनकत्वाभावादाह ॥ लौकिकेति ॥ सिध्यर्थमित्यर्थः ॥ प्रथमसूत्रइति ॥ प्रथममुदाहृतेसाक्षादप्यविरोधमित्यत्रेत्यर्थः एवमेवद्वितीयइत्यादिनेयं तथाचपराधीनतयावाच्यत्वस्यतत्रनिरासान्नानवस्थापातइतिभावः ॥ अत्रोक्तस्यैवेति ॥ नतुलक्षणयेत्यर्थः ॥ अविवेचितेति ॥ परमात्मनिशब्दानांविद्वद्रूढिरन्याधीननिरवधिकप्रवृत्तिनिमित्तकत्वरूपमहायोगोजगत्यविद्वद्रूढिर्भगवदधीनाल्पप्रवृत्तिनिमित्तकत्वरूपयोगमात्रमितिविवेकरहितरूढ्यादिनेत्यर्थः ॥ ॐ जगद्वाचित्वात् ॐ ॥ शब्दानांबहुलव्यवहारेणजगद्वाचित्वज्ञानात्तत्रप्रसिद्धिरुपपन्नेत्यर्थः ॥ अग्निर्माणवकइति ॥ ॐ जीवमुख्यप्राणलिंगादितिचेन्नतद्व्याख्यातं ॥ सर्वस्यभगवदधीनत्वाच्छब्दजातंतत्रार्थवादितिनयुक्तं । अस्ययदेकामितिवायुनैवेतिचसर्वस्यजीवमुख्यप्राणाधीनत्वस्यापिश्रुतत्वेनतयोरपिमुख्यवाच्यत्वप्रसंगादितिचेन्न । यतस्तल्लिंगमंतर्यामिसंबंधितयाव्याख्यातमित्यर्थः । तच्चेत्यनुवादः । अस्यमहतोवृक्षस्यनेनीयंते पुनःपुनःभृशंवानियम्यंते ॥ बाधकाभावादिति ॥ व्यवहाराभावेपिभेकस्यपंकजपदवाच्यत्वादितिभावः । जीवमुख्यप्राणयोरपिस्वावरस्वामित्वसत्वेनशब्दमुख्यार्थत्वापत्तिरित्यतआह ॥ यद्यद्विभूतिमदिति ॥ श्रीमत् कांतियत् तेजसौक्ष्येनसंभवःसंबंधोयस्यतत्तथोक्तं । तथाचतत्स्वामित्वमपितत्साभिहितभगवन्निष्ठमेवेतिभावः । लौकिकशब्दानामन्यपरत्वमुपेत्याह ॥ वैदिकानामिति ॥ मुमुक्षुंप्रतीतिशेषः । कर्मणःस्वयंप्रयोजनत्वाभावेनतस्यमोक्षसाध

SGDF Foundation

नत्वं स्वर्गादिसाधनत्वंवास्वीकार्यं । तदुभयंक्रमेणदूषयति ॥ **भगवज्ज्ञानेत्यादिना** ॥ ॐ **अन्यार्थंतुजैमिनिः प्रश्नव्याख्यानाभ्यामपिचैवमेके** ॐ ॥ शब्दानांजगद्वाचित्वमन्यज्ञानार्थंतुभगवज्ज्ञानार्थमेव । कस्मिन्नुभगवइति कथंनुभगवइतिचक्रमेणशौनकश्वेतकेतुप्रश्नाभ्यां तस्मैसहोवाचेतियथासौम्येतिचांगिरोद्दालकव्याख्यानाभ्यामपिचैवमेव यस्तंनेवेदेत्येकशाखिनःपठंतीत्यर्थः ॥ **एतज्ज्ञानमात्रस्येति** ॥ तथाचफलांतरप्रश्नोयुक्तएवेतिभावः तात्पर्यमाह ॥ **तंप्रकारमिति** ॥ **सफलमिति** ॥ परीक्ष्यलोकानित्युक्तदिशाब्रह्मज्ञानांगवैराग्योत्पादनेनवाविविदिषंतियज्ञेन दानेनेत्युक्तदिशाअंतःकरणशुद्ध्युत्पादनेनवाएषसेतुरितिपरमात्मनःसर्वाधारतयाज्ञातव्यत्वोक्त्याआधेयनिरूपकत्वेनवास फलमित्यर्थः एवमग्रेपि ॥ **ज्ञातफलमिति** ॥ घटादिकारणत्वेनमृत्पिंडज्ञानेएतावत्तन्मयंभवतीतिविशेषज्ञानादपेक्षित मृन्मयसंपादनसंभवादित्यर्थः ॥ **एवमिति** ॥ वैराग्यव्युत्पादनद्वारासर्वकारणत्वसर्वाधारत्वसर्वसंहृतत्वसर्वनियतृत्वादिनापरमात्मज्ञानेतज्जन्यत्वपरतंत्रत्वादिविशेषज्ञानादीश्वरप्रीत्यापुरुषार्थप्राप्तेरितिभावः ॥ **अर्थादिति** ॥ कंठतो नुक्तेरितिभावः । ऋचोअक्षरेपरमेव्योमन्यस्मिन्देवाअधिविश्वेनिषेदुः । यस्तन्नवेदकिमृचाकरिष्यतियइत्तद्विदुस्तइमेसमास तइतिसमस्तांऋचंप्रकृताभिप्रायेणव्याचष्टे ॥ **तदक्षरमित्यादिना** ॥ अक्षरइत्यनुवादः ॥ **नचेति** ॥ ज्योतिष्टोमादिशब्दानांकर्मादावेवव्युत्पन्नत्वादितिभावः ॥ **खंडपदानामिति** ॥ ज्योतिष्टोमेत्यादिकर्मवाचकसमस्तपदावयवानांज्योतिरादिपदानामित्यर्थः ॥ ॐ **वाक्यान्वयात्** ॐ ॥ वाक्यान्वयान्निमित्तात्ज्योतिष्टोमादिसमस्तशब्दानामन्यवाचित्वमंगीकार्यमित्यर्थः ॥ **पृथक्पृथागिति** ॥ कर्माद्यनेकार्थेषुवाचकतयास्थितस्येत्यर्थः ॥ **अंततइति** ॥ मोक्षंप्रतिप्रसन्नः परमेश्वरएवोपायइतितत्स्वरूपेसत्यंज्ञानमित्यादिनानिरूपितेकथमसौप्रसीदतिइत्यपेक्षायांतत्साधनत्वेन

SGDF
Sri Gargeshwari Digital Foundation

नतदपरोक्षज्ञानंतदर्थश्रवणादिकंतदंगतयाकर्माणिविधीयंतइत्येवंसमस्तस्यापिकर्मादिप्रतिपादकवेदस्येश्वरस्वरूपएवपर्यवसानमित्यर्थः । अतःकर्मादिप्रतिपादकवाक्यस्यान्यवचनसापेक्षत्वात् ॥ ज्ञानस्यैवासंभवेनेति ॥ मंदानांप्रतिपदान्वयायोग्यत्वादितिभावः ॥ कइति ॥ छंदसांवैदिकपदानांभगवतियोगमुत्तमाधिकारिव्यतिरिक्तःकोवेदनकोपीत्यर्थः ॥ ॐ प्रतिज्ञासित्थेलिंगमाश्मरथ्यः ॐ ॥ नान्यःपंथाइतिप्रतिज्ञातोयोर्थःज्ञानमेवमुक्तिहेतुरितितत्सित्थेर्निश्चयस्यलिंगंकर्मादिवचनंजनकंसइज्ञानार्थंभवतीत्याश्मरथ्याचार्योमन्यतइत्यर्थः ॥ सपरिकरमिति ॥ फलेतिकर्तव्यतासहितमित्यर्थः । अमृतोभवतीतिसंबधः सभिन्नंसाहितं परामृश्य आलोच्य तस्यमोक्षस्य ॥ तत्राचेति ॥ तत्राकृतोनित्यपुफमर्थस्यमोक्षस्यकृतेनकर्मणासित्थिर्नेत्युक्तेरितिभावः ॥ ॐ उक्रमिष्यतएवंभावादित्यौडुलोमिः ॐ ॥ ज्ञानेनबंधादुक्रमणमिछतःपुसः एवंज्ञानंहेतुतयाकर्मादेर्भावादवश्यंभावात्तद्वचनंज्ञानार्थंभवतीत्यौडुलोमिराचार्योमन्यतइत्यर्थः ॥ फलोक्तीति ॥ कर्मणांस्वर्गादिफलकत्वोक्तीत्यर्थः ॥ ॐ अवस्थितेरितिकाशकृत्स्नः ॐ ॥ कर्मादेर्ब्रह्मण्यनवस्थानादाधारत्वेनब्रह्मज्ञानार्थमाधेयंकर्मादिवेदेनोच्यतइतिकाशकृत्स्नाचार्योमन्यतइत्यर्थः । अयुक्तंचेत्याह ॥ विरुत्धानामिति ॥ अनेकाधिकारिविषयत्वादिति ॥ ब्रह्मज्ञानार्थित्वाभावेनस्वर्गाद्यर्थित्वावस्थाविशिष्टाल्पाधिकारिविवक्षयाश्मरथ्यमतं । ब्रह्मजिज्ञासुत्वावस्थाविशिष्टाल्पाधिकारीविवक्षयौडुलोमिमतं । ज्ञानित्वावस्थाविशिष्टाल्पाधिकारीविवक्षयाकाशकृत्स्नमतमित्यनेकाधिकारिविषयत्वान्मतभेदोपपत्तेर्नविरोधइत्यर्थः ॥ ५ ॥ स्त्रीशब्दानां स्त्रीलिंगवाचकशब्दानां ॥ एषेति ॥ स्त्रीरूपाभगवतिप्रकर्षेणकरोतीतिप्रकृतिःविकाररहितत्वादविकृतिरित्यर्थः ॥ याप्राणेनेति ॥ यादेवोत्तमाऽदनाददतिशब्दवाच्याभगवतीमुख्यप्राणेनसहदेहादौप्रविशतीत्यर्थः ॥ स्त्रीलिंगत्वादिति ॥ साक्षादपत्ये

SGDF Digital Foundation

त्पादकत्वरूपस्त्रीलिंगवाचकत्वादित्यर्थः । तदयोगात् स्त्रीलिंगायोगात् नारायणादिरूपविशेषेतत्संभवमाशंक्याह ॥ नचेति ॥ नियामकविशेषाभावेनेति ॥ नपुंसकलिंगब्रह्मशब्दवाच्यत्वे अथकस्मादुच्यतेब्रह्मेतिवत्स्त्रीलिंग शब्दवाच्यत्वेविशेषमानाभावादित्यर्थः ॥ ॐ प्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधात् ॐ ॥ नकेवलंपुल्लिंगशब्दवा च्योहरिरपितु स्त्रीलिंगप्रकृत्यादिशब्दवाच्यश्च हंतैतमेवेतिप्रतिज्ञा यथानद्यइतिदृष्टांतस्तयोरनुपरोधादनुसारादित्यर्थः ॥ दृष्टांतस्योक्तत्वादिति ॥ तथाचनामानिसर्वाणीत्येतदपेक्षयास्याविशेषश्रुतित्वमितिभावः ॥ आस्वादनइति ॥ अयमर्थः आस्वादनीयएवनोदासितव्यइत्यर्थेवर्ततइत्यर्थः । सूत्रेप्रकृतिशब्दस्यैवोपादानात्स्त्रीशब्दाइतिकथंभाष्येबहुवच नमित्यतआह ॥ प्रकृतिपदमिति ॥ प्रधानस्त्रीरमा ॥ ॐ अभिध्योपदेशाच्च ॐ ॥ मायामितिश्रुतावभिध्या याः ईश्वरेछायाःप्रकृतित्वोपदेशाच्चेछास्वरूपोहरिःप्रकृतिशब्दवाच्यइत्यर्थः ॥ उपचारइति ॥ विंध्यादित्यादेःसाधारण त्वादितिभावः ॥ यत्संबंधेति ॥ इन्प्रत्ययस्यसंबंधवाचित्वात्तवेतिषष्ठ्याश्चसंबंधेविधानादितिभावः । एवंरूपेण सामान्यरूपेण साक्षात् विशिष्य ॥ ॐ साक्षाच्चोभयाम्नानात् ॐ ॥ साक्षाच्चसामान्यपारंपर्येविनैवस्त्रीशब्दवा च्यत्वपुरुषशब्दवाच्यत्वरूपोभवस्यैषश्रुतावुक्तत्वात्प्रकृत्यादिशब्दवाच्योहरिरेवेत्यर्थः ॥ नहीति ॥ तथात्वेगुणपूर्त्यसि- त्येरितिभावः ॥ ॐ आत्मकृतेःपरिणामात् ॐ ॥ परिणामात्प्रकृतेःपरिणामंविधायतत्रात्मनोबहुधाकरणात्प्रकृ- तिशब्दवाच्यंब्रह्मेत्यर्थः । अन्वित्यस्यार्थोऽनुकूलतयेति । स्मृतावनुप्रवेशस्यप्रकृतित्वप्रयोजकत्वमुच्यतइतिप्रतीतिनिरा सायाह ॥ स्मृतिरपीति ॥ अनुप्रविश्येत्यनंतरंतांपरिणामेत्यादिद्रष्टव्यमितिभावः । प्रतिज्ञाययेनाश्रुतंश्रुतंभवतीत्यादि ना युक्त्यायथासोम्येत्यादिना ॥ तत्सिद्धिरिति ॥ घटादेर्मृदुपादानकत्वेनतज्ज्ञानेज्ञातत्वज्जगतोपिब्रह्मोपादा

नकत्वेनतज्ज्ञानेज्ञातत्वमित्युक्तावुपादानत्वंसिध्यतीत्यर्थः । व्याघातात् यथैकेनमृत्पिंडेनेत्यादिना निरस्ते आ- नुमानिकमित्यादिना असंगतिमेवदृष्टांतोक्त्युपपादयति ॥ तदुक्तेरिति ॥ प्रधानस्वरूपनिषेधोक्तेरित्यर्थः ॥ ज- गत्कारणत्वेति ॥ उपादानत्वेनेतिशेषः ॥ सममिति ॥ प्रकृतेरपिसाक्षिवेद्यत्वादितिभावः । अतएवोक्तंपत्यतौ प्रकृतिःकालोऽव्याकृताकाशश्चेति ब्रह्मणोजगदुपादानत्वेनिर्विकारोक्षरःशुद्धइत्यादिबहुमानविरोधइत्याशयेनाह ॥ अ- लमिति ॥ ॐ योनिश्चहिगीयते ॐ ॥ हियस्माद्योनिश्चस्वदेहादुत्पादकंब्रह्म यद्भूतयोनिमित्यत्रगीयते अतःप्रकृ त्यादिशब्दवाच्यइत्यर्थः ॥ स्वदेहादेवेति ॥ प्रलयेस्वोदरनिवेशितस्यब्रह्मादिप्राणिजातस्यस्थूलदेहविशिष्टतयाजनक इत्यर्थः । ऐतरेयभाष्यदिशास्वयंसमाधानांतरमाह ॥ भगवतइति ॥ स्त्रियःसतीस्तांउमेपुंसआहुरितिश्रुतेरितिभावः निषेधोनैनमित्यादिना ॥ ६ ॥ निषेधमुखवेद्यत्वेति ॥ प्रथमप्रतीतौनास्तीत्युपलभ्यमानत्वेत्यर्थः । निःस्वरूपत्व मादिपदार्थः ॥ ॐ एतेनसर्वेव्याख्याताव्याख्याताः ॐ ॥ एतेनतदधीनत्वादिप्रागुक्तहेतुसमुदायेनसर्वेशून्या सदादिशब्दाब्रह्मवाचकत्वेनप्रतिपादिताइत्यर्थः । अव्यक्तत्वादित्यनेनश्रुताव्यक्तत्वादिकंशून्यादिशब्दप्रवृत्तिनिमित्तोपपा दनायोक्तमितिसूचयति ॥ अन्यसुखमल्पंकरोतीति ॥ शमूनंयापयतीतिव्युत्पत्तेरितिभावः । तोदनात्तुछउच्यतइ त्यत्रतोदनशब्दस्यतुछशब्दप्रवृत्तिनिमित्तत्वमुच्यतइतिभ्रांतिवारयति ॥ तोदनात्तुदइति ॥ दुःखहेतुत्वादित्यर्थः तुदव्यथनइतिधातोः । तर्हिछप्रत्ययस्यनिमित्तानुक्तिरित्यतआह ॥ अदृश्यःछइति ॥ दुर्जनैरितिशेषः कुतइत्यत आह ॥ छन्नत्वादिति ॥ छद्आछादनइत्यस्माड्प्रत्ययेटिलोपेचछइतिरूपसिद्धिरितिभावः । अनेनस्वयंपरोवि ष्णुर्यस्माच्छमूनंकुरुतेतस्माच्छून्यइतिप्रोक्तः अदृशःसन्तोदनात्तुछउच्यतइतिस्मृतावन्वयउक्तोभवति ॥ अभक्ष्यत्वा

SGDF
Sri Gargeshwari Digital Foundation

दिति ॥ अशभोजनइतिधोतोरितिभावः ॥ सर्वस्यतदधीनत्वादित्युभयत्रसंबध्यतइति ॥ स्वसुखादन्य सुखस्याल्पत्वकरणेतोदनेदुर्जनैरदृश्यत्वेकेनाप्युत्पादयितुमयोग्यत्वेऽभक्ष्यत्वेचसंभाव्यमानस्यभगवदधीनत्वस्यहेतुत्वेनशमू-नंकुरुतइत्यादौपूर्ववत्रशून्यादिशब्दप्रवृत्तिनिमित्तस्वामित्वस्यविष्णौशून्यादिशब्दप्रवृत्तौनिमित्तत्वेनतत्तच्छब्दाभिदेयतेत्युत्तर त्रचसंबध्यतइत्यर्थः । उक्तंबाधकवशात्सर्वशब्दःसंकोचइत्यतआह ॥ निषेधेति ॥ तत्रैव असत्यैव ईश्वरोपितत्रै-वकथंतत्करोतीत्यतआह ॥ ईश्वरस्येति ॥ ७॥ इतिश्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यांशर्करायांश्रीनिवा सविरचितायां प्रथमाध्यायस्यचतुर्थःपादःसमाप्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ इति श्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यां प्रथमाध्यायःसमाप्तः ॥

SGDF Gurgaon Gurgaon Foundation

SGDF
Sri Gargeshwari Digital Foundation

॥ इति श्रीमत्तत्वप्रकाशिका वाक्यार्थमंजर्यां ॥

॥ प्रथमाध्यायः समाप्तः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ श्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यां ॥

॥ द्वितीयाध्यायः प्रारंभः ॥

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीमदानंदतीर्थभगवत्पादाचार्यगुर्वंतर्गतनिर्दोषरामायनमः ॥ निर्विघ्नमस्तु ॥ यत्पादसेवयासंतोजनादुःखादिवर्जिताः। तंरामंसर्वदोषघ्नंप्रणमामिनिरंतरं ॥ १ ॥ पूर्वाध्यायेति ॥ पूर्वाध्यायेत्यर्थः ॥ अशेषशास्त्रप्रामाण्येनेति ॥ स्वर वर्णपदवाक्यात्मकाशेषशास्त्रस्यविष्णुजगज्जन्मादिकारणत्वादिप्रापकत्वेनेत्यर्थः ॥ तस्ययुक्त्यादिविरोधइति ॥ तथाच विरोधेपरित्दृतएवसमन्वयसिद्धेः । पूर्वाध्यायार्थसमन्वयस्यकार्यत्वंएतदध्यायार्थाविरोधस्यकारणत्वमितिपूर्वोत्तराध्याय योःकार्यकारणभावलक्षणासंगतिरितिभावः । उपादित्साउपादातुमिच्छा समयःसिद्धातः । ननुस्मृत्यविरोधप्रतिपाद-कत्वेऽस्यनैतत्पादांतर्भावः । कथंचिदंतर्भावेपिनप्राथम्येबीजमित्याशंक्यनिराकरोति ॥ यद्यपीत्यादिना ॥ स्मृती नामिति ॥ पाशुपतादिस्मृतयोहिस्वयमात्माभिमतवाक्यतयासमयरूपाअपिस्वोत्कार्थेयुक्त्यादींश्चसंवादयंत्योयुक्त्यादि चतुष्टयरूपाइत्यर्थः ॥ प्राथम्योपपत्तेरिति ॥ एकैकविरोधापेक्षयाविरोधचतुष्टयात्मकस्मृतिविरोधस्यप्रबलतयाप्रथमं निरसनीयत्वादितिभावः । दोषःसंगत्यभावरूपः ॥ अनेनेति ॥ विष्णोर्जगत्कारणत्वेयुक्त्यादिरूपस्मृत्यविरोधंदर्श-यतीत्यर्थकभाष्येणेत्यर्थः । विगानंविवादः ॥ ॐस्मृत्यनवकाशदोषप्रसंगइतिचेन्नान्यस्मृत्यनवकाशदोष प्रसंगात्ॐ ॥ स्मृतीनांपाशुपतादीनांरुद्रादिसर्वज्ञप्रणीतत्वान्निरवकाशत्वेनएतद्विरोधेविष्णुजगत्कारणत्वप्रतिपादक श्रुतेरप्रामाण्याख्यदोषप्रसंगइतिचेन्न । अन्यासांपंचरात्रस्मृतीनामत्याप्तविष्ण्वादिप्रणीतत्वेनश्रुतिसंवादेनचानितरांनिरव काशेनतद्विरुद्धपाशुपतादिस्मृतीनामप्रामाण्याख्यदोषस्यप्रकर्षेणसंगात्संबंधात् अत्यंताप्रामाण्यादित्यर्थः । विरोधंव्यन-क्ति ॥ पाशुपतेति ॥ वस्तुविकल्पेति ॥ उभयोरपिप्रामाण्येतदुभयानुसारेणएकस्मिन्जगतिविष्णुमात्रजन्यत्वाशिव मात्रजन्यत्वरूपविरुद्धधर्मवत्वप्रसंगादित्यर्थः ॥ देशकालेति ॥ श्रुतिर्यद्देशकालीनंविष्णोर्जगत्कारणत्वंप्रतिपादयति

SGDF
Sri Gargeshwari Digital Foundation

तद्भिन्नदेशकालीनंरुद्रस्यजगत्कारणत्वंस्मृतिःप्रतिपादयतीत्यविरोधइत्यर्थः ॥ **सकलेति** ॥ सकलदेशकालीनेत्यर्थः ॥ **विरोधेत्विति** ॥ प्रथमेप्रथमाध्यायेस्मृतिपादेचिंतितं ॥ ज्योतिष्टोमेऔदुंबरींस्पृष्टवोद्गायेदितिश्रुत्याऔदुंबरींयज्ञसद स्थूणांस्पृष्टवाउद्गात्रागानंकर्तव्यमितिविहितं स्मृतिकारास्तुतत्स्पर्शविरुद्धंतस्याःकार्त्स्न्येनवाससावेष्टनंस्मरंति औदुंबरी सर्वावेष्टयितव्येति तत्स्मरणंप्रमाणमप्रमाणंवेतिसंशयेस्मृत्यधिकरणेस्मृतीनांमूलश्रुत्यनुमापकतयाश्रुतिमूलत्वेनप्रामाण्यसमर्थनादियमपिस्मृतिःमूलश्रुतिमनुमापयंतीप्रमाणमितिपूर्वपक्षः । सर्वथाऽप्रामाण्यस्यान्याय्यत्वात्स्पर्शार्थंद्वित्रांगुलंहित्वा तदितरसर्ववेष्टनरूपार्थांतरपरत्वंस्मृतेरितिभाट्टरीत्यासिद्धांतः । प्रभाकररीत्यातुस्पर्शनसर्ववेष्टनयोर्विरुद्धतयातत्कर्तव्यताबोधकयोरपिविरुद्धत्वादग्न्यौष्ण्यग्राहिप्रत्यक्षेणतच्छैत्यानुमानस्येवस्पर्शनश्रुतिप्रत्यक्षेणसर्ववेष्टनस्मृत्यनुमानस्यबाधान्मूलश्रुत्यभावेनाप्रामाण्यमितिसिद्धांतः । सूत्रार्थश्चश्रुतिस्मृतिविरोधेऽसतिस्मृतिःअनुमानंस्वमूलभूतश्रुत्यनुमापिका । तयोर्विरोधेतुअपौरुषेयतयामूलानपेक्षंश्रुतिवचनमेवमानंस्यादिति तथाचतद्वदेवप्रकृतेऽन्यार्थत्वमप्रामाण्यंवास्यादित्यर्थः ॥ ॥ **सार्वज्ञस्येति** ॥ तथाचविवक्षितार्थतत्वज्ञानकरणपाटवयोर्हितोपदेष्टृत्वेनाविप्रलंभकत्वविवक्षयोर्लाभइतिभावः ॥ ॥ **श्रुतेश्चेति** ॥ यदबुद्धिपूर्वकंतदप्रमाणंयथापिपीलिकालिपि अबुद्धिपूर्वकश्चवेदोअपौरुषेयत्वांगीकारात् अतोअप्रमाणमेवेतिभावः । तर्ह्युदात्तजैमिनिसूत्रविरोधइत्यतआह ॥ **क्वचिदिति** ॥ सर्ववेष्टनविषयइत्यर्थः । तदपिकुतइत्यतआह **मूलमूलिनोरिति** ॥ उपजीव्योपजीवकयोरित्यर्थः । अतदर्थत्वंविष्णुजगत्कारणार्थत्वाभावः । नितरां निरतिशयं ॥ ॐ **इतरेषांचानुपलब्धेः** ॐ ॥ अयोग्यजगत्कर्तृत्वाद्यपेक्षयाइतरेषांप्रत्यक्षयोग्यानांफलानांतदुक्तानुष्ठानेपिप्रत्यक्षतोनुपलब्धेश्च तद्विसंवादेननाप्तोक्तत्वमितरस्मृतीनामित्यर्थः । ननुयोग्यानुपलब्धेरेवाभावग्राहकत्वेनायोग्यानांप्र-

त्यक्षानुपलब्ध्याभावनिश्चयायोगात्कथंफलादीनामितिभाष्यमित्यतआह ॥ **प्रत्यक्षयोग्यत्वमिति** ॥ पूर्वसूत्रसन्निधापितरुद्रादिजगत्कारणत्वाद्यतींद्रियस्येतरेत्यत्रप्रतियोगित्वेनविवक्षितत्वादितिभावः । अतएवप्रागदृष्टादितरेषामित्युक्तं । यया स्वीकृतयासर्वात्मनाऽनुपलब्ध्या ॥ **सूचनादिति** ॥ तस्यानुक्तोपलब्धिसमुच्चायकत्वादितिभावः ॥ **उपलब्धार्थेति** ॥ उपलब्धःफलानर्थरूपोर्थोयस्यसतथा । सर्वस्यरुद्रकारणत्वप्रतिपादकभागस्य ॥ ॐ **एतेनयोगःप्रत्युक्तः** ॐ ॥ एतेनप्रागुक्तफलानुपलंभेनयोगशास्त्रमपिनिरस्तमित्यर्थः ॥ **अभ्यासावस्थेति** ॥ अभ्यासावस्थायाउत्कर्षःसंपत्तिर्यस्मिन्कालेतस्मिन्नेवेत्यर्थः । तथाचकालांतरफलदर्शनेपितदुक्तकालेअदर्शनादप्रामाण्यमितिभावः ॥ १ ॥ अप्रयोजकत्वमाशंक्याह ॥ **अविद्यमानाभिधात्रीणामिति** ॥ नन्वेवमेकदेशाप्रामाण्येपिजगत्कारणत्वप्रतिपादकभागप्रामाण्यं किंनस्यादित्यतआह ॥ **एवंचेति** ॥ एतद्दृष्टांतेनतस्याप्रामाण्यसाधनसौलभ्यादितिभावः ॥ ॐ **नविलक्षणत्वादस्य तथात्वंचशब्दात्** ॐ ॥ अस्यश्रुतिपंचरात्रस्मृतिरूपशास्त्रस्यतथात्वं । पाशुपतादिवदप्रामाण्यंनास्ति । श्रुतेरपौरुषेयत्वेनस्मृतेस्तदनुसारित्वेनततोविलक्षणत्वात् । तथात्वंचश्रुतेरपौरुषेयत्वं । स्मृतेस्तदनुसारित्वं चशब्दात् । वाचाविरूपेतिश्रुतेर्भारतंपंचरात्रमितिस्मृतेश्चसिद्धमित्यर्थः । नित्येअपौरुषेये । ततःअदोषत्वात् ॥ **वेदादिप्रामाण्यस्येति** ॥ यथार्थज्ञानजनकरूपत्वस्येत्यर्थः । तज्ज्ञानात् वेदादिज्ञानात् । कुतइत्यतआह ॥ **नहिनिर्दोषेति** ॥ निर्दोषश्रुतिरूपग्रहेतदनुसारिस्मृतिस्वरूपग्रहेचेत्यर्थः ॥ श्रुतिस्मृत्योः ज्ञानजनकत्वेतावन्नविवादः । निर्दोषत्वतदनुसारित्वग्रहेयथार्थत्वशंकानवकाशत्वेनयथार्थज्ञानजनकत्वरूपप्रामाण्यग्रहेनाकिंचिदपेक्षेतिभावः । तथात्वं स्वतःप्रामाण्यं । स्वतएव । संवादस्वरूपग्राहकेणैव । एवंसंवादांतरग्राह्यंप्रामाण्यं ॥ **नानवस्थेति** ॥ यत्रजिज्ञासाविरहस्तत्र

SGDF Sri Gurudev Dattaji Foundation

संवादानपेक्षणादितिभावः ॥ **ध्रौव्यादिति** ॥ तत्रसंवादापेक्षायामनवस्थैवेतिभावः ॥ **फलसंदेहेति** ॥ फलज्ञान प्रामाण्यसंदेहेत्यर्थः । तथाचात्रव्यभिचारान्नप्रामाण्यनिश्चयस्यप्रवृत्तिहेतुत्वमितिभावः ॥ **सापिननिःशंकेति** ॥ तथाचप्रामाण्यनिश्चयस्यनिःशंकाप्रवृत्तिप्रत्येवहेतुत्वोक्तेर्नव्यभिचारइतिभावः । यावच्छंकमित्यव्ययं सर्वत्रसंवादक प्रमाणेषु ॥ **क्वचिन्नोत्पद्यतइति** ॥ व्यासंगकोटिस्मरणाभावादिनेतिशेषः ॥ **कथमिति** ॥ शंकानिवृत्यर्थंसंवादपरं परायाआश्रयणीयत्वादितिभावः ॥ **द्वितीयोनिरस्तप्रायइति** ॥ ज्ञानस्यबुभुत्सितग्राह्यतयाज्ञातेचतस्मिन्नप्रामाण्या नुपलब्धौनिःशंकप्रवृत्तेःतस्याश्चप्रामाण्याध्यवसायाधीनत्वेनतदर्थविशेषप्रमाणरूपजिज्ञासाध्रौव्येततएवव्यासंगकोटिस्मरणा भावाद्यसंभवेनशंकायाआवश्यकत्वादितिभावः ॥ **स्वतस्त्वप्रासिरिति** ॥ संवादेनाप्रामाण्यशंकानिवृत्तौस्वरूपग्राहके णैवप्रामाण्यनिश्चयादितिभावः ॥ **शंकाभावेपीति** ॥ अप्रामाण्यशंकाशून्यसुखादिज्ञानप्रमाण्यज्ञानेपीत्यर्थः ॥ **संवादक मुभयत्रापीति** ॥ अप्रामाण्यशंकानिरसनेप्रामाण्यग्रहणेचेत्यर्थः कुतइत्यतआह ॥ **कल्पकेति** ॥ कल्पकंशंकते ॥ **बाधकवदिति** ॥ विसंवादवदित्यर्थः । तथाचतत्रयथाविसंवादकस्यप्रामाण्यशंकानिरासाप्रामाण्यज्ञापनयोर्व्यापार स्तथात्रकिंनस्यादित्यर्थः । तथाचतद्वदेवात्राप्यन्वयव्यतिरेकयोःप्रयोजकत्वमितिभावः । वैषम्यमाह ॥ **अप्रामाण्य शंकाशून्यस्येति** ॥ सुखादिज्ञानेअप्रामाण्यशंकाशून्यस्यसंवादाभावेपिप्रामाण्यस्यानुभूयमानत्वेनव्यतिरेकव्यभिचा- रान्नसंवादस्यप्रामाण्यज्ञापनेव्यापारइत्यर्थः ॥ **बाधकेनविनेति** ॥ तथाचानन्यथासिद्धान्वयव्यतिरेकाभ्यांबाधक स्याप्रामाण्यज्ञापनेव्यापारइतिभावः । परतः संवादतः । अभ्यासदशापन्नज्ञानप्रामाण्येसिद्धिवारणायाभ्यासदशायामि त्युक्तं ॥ **प्रतिकूलतर्केति** ॥ अनवस्थारूपेत्यर्थः । स्वतस्त्वेस्वरूपग्राहकेणैवप्रामाण्यनिश्चयेनतत्संशयोनस्यादिति-

SGDF Sri Gargeshwari Digital Foundation

बाधकसत्वात्कथमनुकूलतर्काभावइत्यतआह ॥ **संशयस्येति** ॥ दोषात् अप्रामाण्यशंकारूपात् तथाचतर्कस्यान्यथासिद्धिरितिभावः । प्राचीनतार्किकमतावष्टंभेनाह ॥ **स्वतस्त्वेनेति** ॥ बौद्धचार्वाकादिविप्रतिपत्त्याअनुमानादिप्रामाण्येपिसंशयदर्शनादित्यर्थः । यद्वालिंगादिज्ञानप्रामाण्यसंशयेनतज्जन्यानुमित्यादिप्रामाण्यसंशयदर्शनादित्यर्थः । यद्वालिंगोपहितलैंगिकभानपक्षेअनुमितिप्रामाण्यस्यसादृशाद्यतिदेशवाक्यार्थोपहितवाच्यत्वभानपक्षेउपमितिप्रामाण्यस्यस्वतस्त्वांगीकारात्तयोःप्रामाण्ययोःस्वग्राहकज्ञानप्रामाण्यसंशयाहितसंशयदर्शनादित्यर्थः । तथाचानुभवसिद्धतत्संशयोपपत्तिवदत्रापितदुपपत्तिरितिभावः ॥ **भागासिद्धिंचाह** ॥ **अनभ्यासेति** ॥ प्रत्यग्रोत्पन्नसुखादिस्थलइत्यर्थः । नन्वथापिप्रामाण्यंपरतोज्ञायतेप्रामाण्याप्रामाण्यान्यतरमात्रकोटिकसंशयकोटित्वादप्रामाण्यवदित्याद्यनुमानेनपरतस्त्वसिद्धिरितिचेन्न । अस्यापिप्रतिकूलतर्कपराहत्याद्युक्तदोषलंघनाजंघालुत्वादित्याशयेनाह ॥ **अलमिति** ॥ प्रकृतोपयोगाप्रतीतेराह ॥ **अत्रेति** ॥ **अनेनेति** ॥ मैवंतदुक्तानुपलब्धेरप्रामाण्यमितिव्याख्यायनित्यत्वरूपाविलक्षणत्वंचशब्दादेवेतिव्याख्यानेनेत्यर्थः ॥ **उभयतइति** ॥ नैवशब्दादित्यनेनचेत्यर्थः । तस्मैनूनमभिद्यवेवाचाविरूपनित्यया वृष्णेचोदस्वसुष्टुतिमितिश्रुतिंव्याचष्टे ॥ **तस्माइति** ॥ अभिद्यवइत्यस्यार्थःसर्वतःप्रकाशायेति वृष्णेइत्यस्यातिसमर्थायेति ॥ **स्वात्मानमिति** ॥ अनेनविरूपवाक्यमेवेदमितिसूचयति ॥ **अनादिनिधनतयेति** ॥ अन्यथापौनरुक्त्यमितिभावः । साक्षितया प्रामाण्यतया ॥ **श्रुत्युपपादनमिति** ॥ स्वतःप्रामाण्यनित्यत्वयोःसिद्धौवेदप्रामाण्यसिद्धिःतत्सिद्धौचप्रमाणभूतवेदेनतत्सिद्धिरित्यन्योन्याश्रयप्रसंगादितिभावः ॥ **अप्रामाण्येति** ॥ पाशुपतादेरंगीकृते ॥ **आपादनमात्रस्य क्रियमाणत्वादिति** ॥ तथाचवेदप्रामाण्यस्यएतदधिकरणपूर्वपक्षिणांगीकृतत्वान्नान्योन्याश्रयइत्यर्थः । प्रकारांतरेण

SGDF
Sri Gargeshwari Digital Foundation

अन्योन्याश्रयंपरिहरति ॥ युक्तेश्चेति ॥ भाष्येआप्त्यनिश्चयान्नित्यत्वापेक्षत्वाच्चमूलप्रमाणस्येतिदेवतानयेवेदनित्यत्वे अन्यथानवस्थितेरित्यत्रप्रामाण्यस्यस्वतस्त्वेचयुक्तेश्चोपन्यस्तत्वादित्यर्थः । तथाचयुक्तिसिद्धार्थेश्रुतेःसंवादित्वेनोपन्यासा न्नान्योन्याश्रयइतिभावः । तदेवाविद्यमानाभिधायकत्वमेव । अत्रदोषएवनेत्यतआह ॥ अयमेवेति ॥ उक्तस्यादर्शन मितियदयमेवेत्यर्थः ॥ ॐ दृश्यतेतु ॐ ॥ अधिकारिणांवेदोक्तफलंदृश्यतेउपलभ्यतइत्यर्थः ॥ योग्यानामिति ॥ तत्फलइतिशेषः । उपलक्षणमेतत् । तत्कर्मवैगुण्यादिप्रतिबंधकशून्यानामित्यपिद्रष्टव्यं । अप्रामाण्यप्राप्तेरेवेति । अन्यथा विप्रलंभकवाक्यस्याप्येवंप्रामाण्यंस्यादितिभावः । कोयमधिकारोयद्वतांफलदर्शनमितरेषांतदभावइत्यपेक्षायामाह ॥ अधि कारित्वमिति ॥ अन्योपलक्षणमिति । अयोग्यत्वोपलक्षणमित्यर्थः ॥ २ ॥ पूर्वोक्तंउभयविधवाक्यदर्शनं तथा त्वेपीत्यस्योत्तरमाह । मृन्नवत्क्रीति । आदिसृष्टावेवेति ॥ उदात्तवाक्यानांसृष्टिप्रकरणस्थत्वादितिभावः ॥ ॐ अ भिमानिव्यपदेशस्तुविशेषानुगतिभ्यां ॐ ॥ मृदब्रवीदित्यादावभिमानिचेतनस्यैवव्यपदेशोनजडस्य नन्वभि मानिन्याअप्रत्यक्षत्वंपृथिव्यादिवस्त्वंतरमधिष्ठायवचनादिकंचकथं । कथंचपरिच्छिन्नानेकाभिमन्यमानगतत्वमित्यतउक्तं। ॥ विशेषानुगतिभ्यामिति ॥ विशिष्यतइतिविशेषःशक्तिः अनुगतिःव्याप्तिःताभ्यामित्यर्थः ॥ अवधारणइति ॥ तस्यचबुध्याविवेकेनाभिमानिपदेनान्वयः । ननुनयुक्तिविरोधमात्रेणश्रुतेरन्यार्थकत्वंकल्प्यते । किंतुयुक्त्युपजीव्यप्रत्यक्ष विरोधादित्यतआह ॥ नचेति ॥ आदिकालीनमृदादीनामेवश्रुत्यावचनादिकमुच्यतेतेषांचनास्मदादिप्रत्यक्षत्वमितिनप्र त्यक्षंश्रुत्युपजीव्यमितिप्रागेवोक्तमित्यर्थः ॥ अन्यार्थकल्पनइति ॥ तदधीनत्वादिन्यायेनमृदादिशब्दानामभिमन्यमाना पेक्षयाभिमानिष्वेवमुख्यत्वेनमृदादिशब्दानांमुख्यार्थलाभादित्यर्थः । तथाचमुख्यार्थलाभायैवान्यार्थग्रहणंनयुक्तिविरोधभी

त्येतिभावः । नाभिमानिदेवताःसंतीत्यन्वयः ॥ वचनाद्ययोगेति ॥ शरीराद्यभावेवागाद्यभावादितिभावः । उक्तंतथा हीत्यनेन देवतेतितासामितिचवैरूप्येणप्रयोगेहेतुमाह ॥ अत्रेति ॥ ननुसूत्रेअभिमानिनीनांव्यपदेशइतिसंभवात्कैकव चनमित्यतआह ॥ दृश्यतेचेति ॥ अभिमानिन्याइत्येकवचनांतविग्रहस्यग्राह्यत्वमितिभावः । ननुतासांसामर्थ्यमिति भाष्येणदृश्यतेचेतिसूत्रेसामर्थ्यस्यैवकर्मत्वमुच्यते नदेवतायाइतिकथंतदत्रविग्रहज्ञापकमित्यतआह ॥ दृश्यंतइति ॥ तत्रताइतितच्छब्देनदेवतानामपिपरामर्शादितिभावः ॥ ॐ दृश्यतेच ॐ ॥ अभिमानिदेवतातत्सामर्थ्यंचयोगिभिरुपल भ्यतेचेत्यर्थः ॥ कुतइति ॥ महद्भिः दृश्यतइत्येतत्कुतःप्रमाणादस्माभिर्ज्ञेयमित्यर्थः । महद्भिरित्येतत्स्वारस्यानु सारेणाह ॥ अथवेति ॥ अभ्युपगमइति ॥ अभ्युपगमरूपमूलंदृश्यतेचेतिसूत्रेणोच्यतइत्यर्थः । एवंतासामितिभा ष्यमाकांक्षाक्रमेणद्विधायोजयित्वाइदानींयथाक्रमेणयोजयति ॥ अथवेति ॥ अत्रमृदब्रवीदित्यादौ ॥ ३ ॥ नन्वत्र शून्यस्यकारणत्वनिषेधपरतयाश्रुतिसूत्रव्याख्यानमभावस्यचभावोपिधर्मोथापिहिधर्मिणइत्यनुव्याख्यानविरुद्धं । तत्रवि श्वप्रागभावस्यैवकारणत्वनिषेधपरतयाव्याख्यानादितिचेन्न । श्रुतिसूत्रयोरनेकार्थत्वेनैकार्थमभ्युपेत्यप्रवृत्तग्रंथयोर्विरोधाभा वात् वक्ष्यमाणत्वात् अर्थाद्युक्तिविरोधइतिभाष्यव्याख्यानावसरे ॥ ॐ असदितिचेन्नप्रतिषेधमात्रत्वात् ॐ ॥ असद्वेतिश्रुतावसच्छून्यंकारणत्वेनोच्यतइतिचेन्न । तस्यकेवलप्रतिषेधप्रतीतिविषयत्वेनशशविषाणवत्कारणत्वानुपपत्ते रित्यर्थः ॥ तस्येति ॥ घटादौनास्तीति बुद्धिविषयत्वसत्वेपिकारणत्वस्यैवसत्वाद्व्यभिचारइत्युक्तं ॥ स्वरूपतएवेति ॥ भावधर्मात्मकतामंतरेणेत्यर्थः । घटादेश्चप्रतियोगित्वरूपभावधर्मात्मकत्वेनैवतथात्वमितिनदोषः । स्वरूपतएवप्रतिषे धबुद्धिविषयत्वंप्रागभावेवर्ततेतत्रकारणत्वमेवास्तीतिव्यभिचारइत्यतउक्तं । अभावधर्मात्मकतामंतरेणेति । प्रागभावत्व

SGDF Sri Gangadharan Foundation

रूपाभावधर्मात्मकत्वेनैवप्रतिषेधबुद्धिविषयोनतंदतरेणेतिनदोषः । तथेत्यनंतरंसिद्धांतिनेतिशेषः ॥ **अर्थांतरइति** ॥ शून्यकारणत्वविषयत्वइत्यर्थः ॥ ॐ **अपीतौतद्वत्प्रसंगादसमंजसं** ॐ ॥ असतःकारणत्वेअपीतौप्रलये तद्वत् प्रसंगात् तन्मात्रावशेषप्रसंगात् । असत्कर्तृत्वमतमसमीचीनमित्यर्थः ॥ ॐ **नतुदृष्टांतभावात्** ॐ ॥ नप्रलये असन्मात्रावशेषोअभ्युपगंतुंशक्यते । तदानींपदार्थसत्वसाधकानुमानेदृष्टांतभावात् दृष्टांतसद्भावादेवेत्यर्थः । दृष्टांत मात्रस्यासाधकत्वादाह ॥ **अत्रैताविति** ॥ ॐ **स्वपक्षदोषाच्च** ॐ ॥ स्वपक्षेसर्वासत्वसाधनेदृष्टांताभावरूपदोषाच्चेत्यर्थः ॥ **परंपरयेति** ॥ विमतंप्रलयेअसद्भवितुमर्हतिभावत्वान्नष्टभाववदितिपरंपरयेत्यर्थः । तर्हियत्रसर्वासत्वाभावःतत्रप्रल यकालत्वाभावः यथास्थितिकालइतिव्यतिरेकोस्त्वित्यतआह ॥ **व्यतिरेकइति** ॥ स्थितिकालःअतीतानागतसकल पदार्थोपेतः स्थितिकालत्वाद्व्यतिरेकेणप्रलयकालवदित्यपिव्यतिरेकसंभवादातिप्रसंगइत्यर्थः ॥ **एतेनेति** ॥ विमतंस्थिति कालेप्यसद्भवितुमर्हतिभावत्वादतीतभाववदित्यतिप्रसंगेनेत्यर्थः ॥ ॐ **तर्काप्रतिष्ठानादन्यथानुमेयमितिचेदेवम प्यनिर्मोक्षप्रसंगः** ॐ ॥ तर्कस्यानुमानस्याप्रतिष्ठानादव्यवस्थितत्वेनाप्रमाणत्वात् अन्यथाअसतःकारणत्वादिरूपे णापिअनुमेयमनुमातुंशक्यमितिचेन्न । एवंसतितर्कस्याप्रामाण्यांगीकारेमोक्षाभावप्रसंगइत्यर्थः । ननुत्वयाअसतःकारण त्वेतर्केउपन्यस्तेतत्प्रतिरोधितयाअस्माभिस्तर्कउपन्यस्तस्तद्दूषणायत्वयापुनस्तर्काभिधानमनुचितं किंचास्मत्तर्कएवत्वत्तर्क बाधकोनतुवैपरीत्यमित्यतआह ॥ **नहीति** ॥ प्रामाणिकंतर्कातिरिक्तप्रमाणप्राप्तं युक्तएवेति सत्कारणत्वंतुनैवमितिभावः । वादी समयी समयप्रयोजनाभावादितिभावः ॥ **शास्त्रमंतरेणापीति** ॥ तथाचनतेनसमयित्वमितिभावः । सोपिमोक्षसाध कोपि यद्यपिचार्वाकेणानुमानप्रामाण्यमपिनाभ्युपगतं तथापितत्रसंवादेनप्रामाण्यव्यवहारमात्रंतेनांगीकृतंअतएवमुक्तिः ।

Sri Gargeshwari Digital Foundation

यथोक्तं संवादेनचप्रामाण्याभिमानइति ॥ विरुद्धाविति ॥ परस्परमितिशेषः ॥ उभावपीति ॥ किंत्वेकंप्रामाणिकमप
रमप्रामाणिकमित्यर्थः । इत्यंगीकार्यमितिशेषः । तर्हिविप्रतिपन्नोत्पत्तिः सतोभवितुमर्हतीतिप्रकृततर्कएवाप्रामाणिकः
सन्प्रतितर्कबाध्योस्त्वित्यतआह ॥ प्रकृततर्कश्चेति ॥ ॐ एतेनशिष्टाअपरिग्रहाऽपिव्याख्याताः ॐ ॥ एतेन
दृष्टांतभावेनाभावेनशिष्टाअवशिष्टाअपरिग्रहाःवेदपरिग्रहरहितातद्विरुद्धाश्चाकारणत्वादिवादानिरस्ताइत्यर्थः ॥ नसंमतमि
ति ॥ तस्यापीश्वरजन्यत्वादितिभावः ॥ वक्ष्यमाणेति ॥ द्वितीयपादइतिशेषः ॥ तृतीयानुप्रवेशादीति ॥
आदिपदेनैतत्पादानंतर्भावग्रहणं ॥ पूर्ववदिति ॥ अर्थाद्युक्तिविरोधोपीत्युक्तरीत्येत्यर्थः ॥ अन्येष्वपीति ॥ जी
वकर्तृत्वेनाभिमतघटादिष्वित्यर्थः ॥ घटादीनांजीवकर्तृत्वाभावइति ॥ यदिघटादीनांजीवकर्तृत्वंनस्यात्तर्हिविम
तंचेतनकर्तृकंकार्यत्वादित्यनुमानेदृष्टांताभावःस्यात् । नचेष्टापत्तिः । तथात्वेअचेतनकर्तृत्वनिषेधाभावापत्तेरित्यर्थ
॥ अस्वातंत्र्यमित्युक्तमिति ॥ तथाचघटादौपराधीनजीवकर्तृत्वानिषेधान्नोक्तानुमानेदृष्टांताभावः ॥ ४ ॥ ॐ भो-
क्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॐ ॥ भोक्तुर्जीवस्यापत्तेर्ब्रह्मत्वप्राप्तेरेकीभवंतीतिश्रुत्युक्तत्वेनतयोरविभाग.भे
दाभावइतिचेन्नस्याल्लोकवत् । यथालोकेस्थानैक्याभिप्रायेणोदकेउदकस्यैकीभावव्यवहारस्तथैकीभावव्यवहारः स्यादि-
त्यर्थः ॥ उभयगतेति ॥ विरुद्धधर्माधिकरणयोरैक्यायोगाज्जीवस्यअसर्वकर्तृत्वादित्यागेनेश्वरगतसर्वकर्तृत्वादि
सालक्षण्यग्रहणेनेश्वरस्यवासर्वकर्तृत्वादित्यागेनजीवगतासर्वकर्तृत्वादिसालक्षण्यग्रहणेनेत्यर्थः ॥ सर्वथेति ॥ आद्येति
व्याप्तेःद्वितीयेसंभवादित्यर्थः ॥ कर्माणीति ॥ पूर्वोक्ता कालाद्यभिमानिदेवताः कर्माणितदभिमानीपुष्करःविज्ञानस्व
रूपआत्माजीवश्चेत्येतेसर्वे अव्ययेपरेब्रह्मणिएकीभवंति संश्लिष्टाभवंतीत्यर्थः । अतश्चकिमितिप्रश्नोत्तरमाह ॥ तेनैवेति ॥

SGDF Digital Foundation

जीवईश्वराभिन्नःतथाश्रुत्युक्तत्वादित्यत्रव्याप्तिमाह ॥ योयथेति ॥ मुक्तजीवस्यनिर्धर्मकत्वेनसर्वकर्तृत्वादिविरुद्धधर्माभावात्तदभिन्नस्येश्वरस्यसर्वकर्तृत्वनिर्वाहःसंभवतीत्याशयेनशंकते ॥ मुक्तजीवाभिन्नस्येति ॥ विरुद्धधर्माभावेपिनिर्धर्मकाभिन्नस्यसर्वकर्तृत्वरूपधर्मनिर्वाहासंभवात्कथंचिदित्युक्तं । निर्वोढुं निर्वहितुं । कुतइत्यतआह ॥ नहीति ॥ नहिघटभिन्नःपटःकदापिघटाभिन्नतांयातीत्यर्थः । तर्हिश्रुतेःकागतिरित्यतआह ॥ ऐक्योक्तिस्त्विति ॥ स्वातंत्र्येण स्वेच्छया । नात्रश्रुतेरुपचरितार्थत्वमुच्यतइत्यतआह ॥ एवंमुनेरिति ॥ एवंविजानतांमुनीनामात्माधिपतिर्ब्रह्मापिमुक्तःपरमात्मानंप्राप्यतादृगेवभवतिकिमुतान्यइत्यर्थः । एतेनश्रुत्युदाहरणेन आंतरानुपपत्तिंचाह ॥ निरंजनइति ॥ ॥ सन्निहितेति ॥ एकीभवंतीत्येतत्समीपस्थेत्यर्थः । तत्रक्रमेणसारूप्यसामीप्ययोर्भेदाविनाभूतयोरुक्तेरितिभावःयथाश्रुतासंभवादाह ॥ इत्युक्तोपीति ॥ अध्याहारभयादाह ॥ मुक्तोपीति ॥ अत्रपरमात्मनेत्यस्यतत्प्रसादेनेत्यर्थोबोध्यः । तादात्म्यंमुक्तिरित्यत्रचतुर्थतात्पर्योदाहृतप्रमाणमाह ॥ हराविति ॥ तादात्म्यंहरिणेतियोज्यं । हरावित्यनेनतस्मिन्हरौ आत्माअंतःकरणंनियतंयत्रभवतितत्तदात्मंतदेवतादात्म्यमितिवातस्यहरेरात्मादेहोयत्रप्रवेशस्थानंभवतितत्तदात्मंतदेवतादात्म्यमितिवातादात्म्यंमोक्षइत्युक्तंभवति ॥ अल्पेति ॥ अधमेत्यर्थः । एतन्नासौभवतीत्यादिकं ॥ वर्तमानेति ॥ नाश्नुवंतीतिवर्तमाननिषेधादित्यर्थः ॥ फलाध्यायेति ॥ चतुर्थाध्यायएवमुक्तिरूपफलविचारादितिभावः ॥ चेतनाचेतनेति ॥ यदुक्तंप्रकृतिनयेब्रह्मणश्चेतनाचेतनात्मकप्रपंचोपादानत्वेनतदभिन्नत्वमिति । तदयुक्तं । तथात्वेभोग्यविषयादिपदाभिधेयाचेतनस्यभोक्तृविषयिशब्दाभिधेयचेतनत्वप्रसंगात् । यद्यदभिन्नाभिन्नंतत्तेनाभिन्नमितिव्याप्तेः । तथाचाचेतनोभोग्यश्चेतनोभोक्तेतिव्यवस्थानस्यात् नचेष्टापतिः प्रत्यक्षसिद्धत्वादित्यर्थः ॥ समुद्रेति ॥ यथाफेनतरं-

SGDF Sri Gargeshwari Digital Foundation

गादेःसमुद्राभिन्नत्वेनपरस्परमैक्येपिव्यावहारिकभेदेनान्योन्यव्यवस्थातथेहापीत्यर्थः ॥ युक्तिविरोधपरिहारेपीति ॥ प्रथमातिक्रमेकारणाभावादितिभावः ॥ ब्रह्मात्मकत्वनिरासेनेति ॥ प्रकृतिनयादिभाष्योक्तदिशाब्रह्मोपादानकत्वाभावेनतदात्मकत्वेनिरस्तेउक्तशंकायाएवानुदयान्नतत्समाधानायान्यथाव्याख्यानंयुक्तमित्यर्थः । भोग्यस्यभोक्तृत्वापत्तेरितिव्याख्यानेअश्रुतकल्पनंचेत्याह ॥ भोक्तृत्वेति ॥ ५ ॥ तस्यजगत्कर्तृत्वस्य तेनयुक्तिविरुद्धत्वलक्षणनेसाध्यवैकल्यंपरिहरति ॥ घटसृष्टाविति ॥ ॐ तदनन्यत्वमारंभणशब्दादिभ्यः ॐ ॥ स्वतंत्रसाधनस्यतदनन्यत्वंब्रह्मानन्यत्वं तदतिरिक्तंस्वतंत्रसाधनंनास्तीतियावत् आरंभणमुपादानंतदभावप्रतिपादकश्रुतेः अपरतंत्रत्वादियुक्तिभिश्चेत्यर्थः । किमुक्तंभवतीतिप्रश्नोत्तरमाह ॥ स्वरूपसामर्थ्यादेवेति ॥ नतुसाधनांतरापेक्षयेत्यर्थः । आक्षेपमात्रस्याभिमतसाधकत्वाभावादाह ॥ विपर्ययेपर्यवसानादिति ॥ नकिंचिदित्यादिरूपेणेत्यर्थः ॥ सिद्धसाधनतेति ॥ ईश्वरस्यस्वतंत्रसाधनसापेक्षतांगीकारादितिभावः । यतोभूमिंजनयन्विश्वकर्माविद्यामौर्णोन्महिनाविश्वचक्षाइत्युत्तरार्धेनसहकिंस्विदितिश्रुतिंव्याचष्टे । विश्वकर्मेति । वीत्युपसर्गाद्भूवेतिशेषोक्तिः । येनच अधिष्ठानादिना और्णोदित्यस्यार्थः ॥ आवृणोदिति ॥ भूमिंद्यामितिवर्तते कतमत्स्विदिति किमित्यर्थः । कथेत्यस्यार्थःकथंरूपमिति ॥ समत्वादिति ॥ कुत्साप्रश्नवितर्केषुक्षेपेकिंशब्दइष्यतइत्युक्तेरितिभावः ॥ किंस्विद्धिमस्येति ॥ हिमस्यभेषजमौषधंनिवारकंकिंस्वित्किमित्यादिप्रश्नस्याग्निर्हिमस्यभेषजमित्यादिपरिहारवदित्यर्थः । युक्तिभिरितिबहुवचनघटनायाह ॥ अत्रेति ॥ ईश्वरःस्वतंत्रसाधनंनापेक्षतइतिप्रतिज्ञायामित्यर्थः । अपरतंत्रत्वात् परसापेक्षत्वाभावात् । स्वतंत्रत्वात्स्वेच्छानुसारित्वात् अतोनाभेदः ॥ ॐ भावेचोपलब्धेः ॐ ॥ ईश्वरातिरिक्तस्वतंत्रसाधनस्यभावेसत्वे

NGDF
Sri Gargeshwari Digital Foundation

उपलब्धेःप्रसंगः प्रमाणैरुपलभ्येतेतियावत् । तर्हिवेदानुक्तानांरमोपास्यानांगुणादीनामभावप्रसंगइत्यतआह ॥ **भगव**
दिति ॥ कतिपयगुणादीन्विशिष्योत्काइतोन्येपिसंतीतिप्रतिपादनेसामान्यतः श्रुत्युक्तत्वंप्राप्तमितिभावः । अवष्टभ्यआ
श्रित्य ॥ ॐ **सत्वाच्चावरस्य** ॐ ॥ अवरस्यभगवदधीनस्यसत्वादेवनाद्यइत्यादिविरोधइत्यर्थः । अद्भ्यःसंभूतःपृथि
व्यैरसाच्चविश्वकर्मणःसमवर्ततताधि तस्यत्वष्टाविदधद्रूपमेतितत्पुरुषस्यविश्वमाजानमग्रइतिश्रुतिंव्याचष्टे ॥ **तत्पुरुषा-**
ख्यइति ॥ अवादीत्यादिपदेनपृथिवीतन्मात्राभिर्भूतगुणैःशब्दादिभिःआजानामित्यस्यार्थोजातइति । अथशब्दोहेत्व
र्थइत्याशयेनाह ॥ **यस्मादिति** ॥ उच्यते एकोनारायणआसीदित्यादौ ॥ **साधनाद्यपेक्षेति** ॥ किंस्वदासीदि
यादिसाधनाक्षेपः अद्भ्यः इत्यादिनाचतद्भावः । नह्येतद्द्वयंप्रकारांतरेणयुक्तं । अतःस्वातंत्र्येणनास्तितदधीनतयास्तीत्ये
वांगीकार्यतथाचेदमपिनन्वित्यादिचोद्योत्तरमित्यर्थः ॥ ॐ **असद्व्यपदेशान्नेतिचेन्नधर्मांतरेणवाक्यशेषात्** ॐ ॥
नासदासीदितिप्रलयेसर्वासत्वप्रतिपादनेनसाधनस्यैवाभावान्नतस्येश्वराधीनत्वमितिचेन्न । स्वतंत्रत्वादिधर्मांतरेणैवासत्व
व्यपदेशोनस्वरूपेण । तदभावात् कुतः तमआसीदितिवाक्यशेषेप्रकृत्यादिसत्वप्रतिपादनेनतदन्यथानुपपत्तेरित्यर्थः ।
नासदासीन्नोसदासीत्तदानींनासीद्रजोनोव्योमापरोयत् । किमावरीवःकुहकस्यशर्मन्नंभःकिमासीद्गहनंगभीरं नमृत्युरा
सीदमृतंनतर्हिनराऽत्र्याअन्हआसीत्प्रकेतः आनीदवातंस्वधयातदेकंतस्माद्धान्यंनपरःकिंचनासेतिश्रुतिंव्याचष्टे ॥ **तदा-**
नीमिति ॥ यदन्यद्वायोश्चांतरिक्षाच्चेत्तत्सदितिवाय्वंतरिक्षंचासदितिश्रुत्यनुसारेणासच्छब्दस्यवाय्वाकाशपरत्वात्सच्छब्द
स्यपृथिव्यप्तेजःपरत्वादाह ॥ **पंचभूतानीति** ॥ रजःशब्दउपलक्षकइतिभावेनाह ॥ **गुणत्रयमिति** ॥ परंव्योमा
व्याकृताकाशमितितत्वोद्योतटीकायांव्याख्यातत्वेपिसाधनसत्वाक्षेपप्रकरणादत्रपरंव्योमप्रकृतिरितिव्याख्यानं । तर्हितदा

SGDF Sri Gargeshwari Digital Foundation

नीमितिस्पष्टत्वान्नोक्तं । प्रकेतइत्यस्यार्थःप्रभावइति कुहेत्यस्यकुत्रेति शर्मन्नित्यस्यसुखार्थमिति आवरीवइत्यस्यावर्त
तेति निवातं वातप्रेरणांविना ॥ **विकृतेति** ॥ महदाद्यात्मनापरिणतरूपंनासेत्यर्थः ॥ **धर्मांतरापेक्षयेति** ॥
व्यक्तंनासीदित्यादिध्येयम् । तमआसीत्तमसागूव्हमग्रेप्रकेतंसलिलंसर्वमाइदमितिवाक्यंव्याचष्टे ॥ **यत्तमइति** ॥
आइत्यस्यार्थोअपरिमितमिति अप्रकेतंप्रभावरहितमितिस्फुटं । अन्यथास्वरूपतोअसत्वे व्यवहारं अयंभोक्ताइदंभोग्य
मितिलौकिकैःक्रियमाणं ॥ **वाचारंभणमिति** ॥ विकारोनामधेयंविकारिसर्वंजगत् वाचारंभणंवागालंबनमा
त्रंनवस्तुतोब्रह्मव्यतिरेकेणास्तीतितदभिमतोर्थः । अजामेकांलोहितशुक्लकृष्णांबव्हींप्रजांजनयंतींसरूपामितिपूर्वार्धेनसहा
जोह्येकइतिश्रुतिंव्याचष्टे ॥ **रजःसत्वेति** ॥ तर्हिजीवेशभेदेकिमायातमित्यतआह ॥ **अत्रेति** ॥ तस्यापिगुहाधिकरण
न्यायेनभोगस्यसर्वदातदबद्धत्वरूपत्यागस्यचसद्भावात् क्रियाप्रबंधेलडितिस्मरणादितिभावः । प्रकृतोपयोगमाह
॥ **नित्यमबाध्यमिति** ॥ एतेनदृष्टानुसारेणेत्यनेन ॥ **श्रुतियुक्तिभ्यामिति** ॥ एकैकया असिद्धत्वेपिसमुचितयोर
नेकत्वेनप्राबल्यात्तत्सिद्धिर्भवष्यतीतिभावः ॥ **तत्तोपीति** ॥ अनेकत्वापेक्षयास्वभाववलीयस्त्वस्यतयोःस्वभावोबलवा
नितिप्रमाणसिद्धत्वादितिभावः ॥ **आभासत्वाच्चेति** ॥ तथाचनानेकत्वेपिप्राबल्यमितिभावः । अनाद्यनंतमित्या
दिवहुप्रमाणोदाहरणानुरोधेनाह ॥ **प्रबलबहुप्रमाणेति** ॥ विभज्यविविच्य तदर्थेप्रतीयमानार्थे अनुभवस्य
शास्त्रविशिष्टत्वाभावादाह ॥ **तदनुकूलइति** ॥ शास्त्रार्थविषयतयाशास्त्रानुकूलइत्यर्थः ॥ **तत्साधनत्वेति** ॥
ज्ञानावरत्वेहेतुः एवमनुप्रमाणस्येत्याद्यपि सर्वविषयेप्रत्यक्षादुत्तमत्वे प्रमाणांतरत्वेति प्रत्यक्षावरत्वेहेतुः ॥ ॐ**युक्तेः**
शब्दांतराच्चॐ ॥ स्वेच्छयासाधनांतरोपादानस्य युक्तेः युक्तत्वात् महिमाऽविरोधित्वादितियावत् । प्रागुक्त

SGDF
Sri Gargeshwari Digital Foundation

शब्दतोन्यस्यशब्दस्यतदावेदकस्यसत्वाच्चनसाधनाभावोवाच्यइत्यर्थः ॥ **लोकसिद्धत्वादिति** ॥ स्वाधीनभृत्यादिसापेक्षप्रवृत्तेः राजादौदृष्टत्वादितिभावः ॥ **साम्येनेति** ॥ दृढांगस्यलीलयादंडंग्रहीत्वागच्छतस्तान्निरपेक्षत्वप्रसिद्धेरितिभावः ॥ **अधिकोत्कर्षेति** ॥ सकलवैभवेनराजगमनस्यतद्धेतुत्वदर्शनादितिभावः । राज्ञस्तत्सत्वात्तथास्तुप्रकृते साधनमेवनेत्यतउक्तं ॥ **साधनसत्वाभ्युपगमेनेति** ॥ उक्तरीत्येतिशेषः । अद्भ्यःसंभूतोहिरण्यगर्भइत्यष्टाविति श्रुतिः । हिरण्यगर्भःअबुपलक्षितैःभूतैःसंभूतइति । कलामुहूर्ताःकाष्ठाश्चाहोरात्राश्चसर्वशः अर्धमासामासाऋतवः संवत्सरश्चकल्पंतामित्यनेनोक्ताः कलाद्यष्टौदेवताश्चसंभूताइतितत्वप्रदीपेव्याख्याता ॥ **प्रतीतेश्चेति** ॥ ईश्वरकर्तृकहिरण्यगर्भसृष्टावेवावादिसाधनांतरप्रतीतेरित्यर्थः ॥ **प्राचीनेति** ॥ अद्भ्यःसंभूतःपृथिव्यैरसाच्चेत्यादीत्यर्थः ॥ ॐ **पठवच्च** ॥ पटसृष्टिवत्साधनांतरसापेक्षेत्यर्थः ॥ ॐ **यथाप्राणादिः** ॥ यथाप्राणदेहेंद्रियादिकंप्रेरणार्थमीशेनानुप्रविष्टत्वेनास्यतंत्रंतथेदंसाधनजातमपीत्यर्थः । ननुतत्रप्रवेशमात्रमुच्यतेनप्रेरणार्थमित्यतआह ॥ **अन्यथेति** ॥ ६ ॥ तदनंतरं एतेनेत्यनंतरं । अतएवशंकोदयादेव । अनुभवात् घटादिकार्ये भ्रांतइति भावेक्तःभ्रांतिरित्यर्थः ॥ **एवंचेति** ॥ महदादिकं अन्यानधीनजीवकर्तृकंकार्यत्वाद्घटवदितिप्रयोगादितिभावः ॥ ॐ **इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः** ॥ इतरस्यजीवस्यजीवाद्भवंतीत्यत्रकारणत्वेनव्यपदेशात्तस्यस्वतंत्रकारणत्वमितियदितर्हिहिताकरणाहितकरणयोर्दोषत्वप्रसक्तिः तेतस्यनस्यातामितियावत् । नहिस्वतंत्रस्यतद्वयंयुक्तं । ईश्वराधीनकर्तृकत्वेचसयथाकारयतितथाकरोतीतिनदोषत्वमितिभावः ॥ **नियमादिति** ॥ लोकेप्रासादादिमहाकार्यकर्तुः श्रमादेःदर्शनादितिभावः । ॥ ॐ **अधिकंतुभेदनिर्देशात्** ॥ ब्रह्मतुअधिकशक्त्यादिमत्वेनजीवतोभ्यधिकं श्रोतेत्यादिनाभेदस्याखिलश्रोतृ

त्वाद्यतिशयस्यनिर्देशादित्यर्थः ॥ **ईश्वराभ्युपगमेति** ॥ अभ्युपगमेतत्साधकमानविरोधः । तेनकर्तृत्वेनैवसिद्धेः अनभ्युपगमेदृष्टांताभावइत्यर्थः ॥ **परसिद्धेनैवेति** ॥ तथाचनेदंसाधनानुमानं किंतुदूषणानुमानं यदीश्वरोनन्यापेक्षयाजगत्कर्तातर्हिचेतनत्वाज्जीवोपितथैवजगत्कर्तास्यादितिपरासिद्धेनैवपरस्यबोधनादित्यर्थः । यथाहुःपरसिद्धेर्दूषणमिति ॥ ॐ **अश्मादिवच्चतदनुपपत्तिः** ॥ जीवस्यचेतनत्वेप्यश्मादिवत्पाषाणादिवत्अस्वतंत्रत्वेनस्वतंत्रकारणत्वानुपपत्तिरित्यर्थः । तर्हिकथंनिर्णयइत्यतआह ॥ **स्वतंत्रोहीति** ॥ स्वरूपप्रमितिप्रवृत्तिषुपरानपेक्षत्वंहिस्वतंत्रत्वं कार्यकरणेपरानपेक्षत्वंचतदेकदेशभूतं प्रवृत्तौपरानपेक्षरूपत्वात् समुदायत्वेनैकदेशसाधनंचसंगतं । शतवत्वेनपंचाशत्वसाधनात् अतस्तदेवप्रयोजयकमित्यर्थः ॥ **अपिशब्दार्थइति** ॥ तथापीत्यर्थइत्यर्थः । एतेनजीवस्यास्वातंत्र्यप्रयुक्ताकर्तृत्वकथनेन ॥ **कर्मसापेक्षतयेति** ॥ जीवस्यास्वतंत्रकर्तृत्वेपिनहिताक्रियादिदोषप्रसक्तिः स्वीयहितक्रियादिप्रतिबंधकवशातदुपपत्तिरित्यर्थः । भाष्येइच्छानुसारेणकदाचिदेकमंगंकदाचित्सर्वाण्यंगानिइंगयतिचेष्टयतइत्यर्थः । पूर्वारुचिंसूचयन्नेवाह ॥ **अस्वातंत्र्यस्येति** ॥ ॐ **उपसंहारदर्शनान्नेतिचेन्नक्षीरवद्धि** ॥ जीवेउपसंहारस्यआरब्धकार्यसमापनस्यदर्शनान्नस्वतंत्रकर्तृत्वानुपपत्तिरितिचेन्न । क्षीरवत् यथागोषुदृश्यमानंक्षीरंप्राणाधीनंतथाजीवेप्रतीयमानमपितदीशाधीनमित्यर्थः । अवसाययति समापयति ॥ **ओं देवादिवदपिलोके** ओं ॥ देवादीनामिवसतोपिईश्वरस्यानुपलंभोयुक्तः । तेषांतादृशसामर्थ्येनादृश्यत्वेपीशस्यतत्कुतइत्यतउक्तं ॥ **अपिलोकइति** ॥ पिशाचादीनामपितादृशसामर्थ्यमस्तिकिम्वीश्वरस्येत्यर्थः ॥ **तच्चेति** ॥ अभिमान्यधिकरणेतादृग्देवसत्वंप्रतिपादितमित्यर्थः । तदभावात् अश्रुतकल्पनाभावात् युक्तीनामित्यत्यध्याहारंविनायोजयति ॥ **वाक्यानामिति** ॥ ओं **कृत्स्नप्रसक्तिर्नि-**

PDF Sri Lalitha Trust Digital Foundation

रवयवत्वशब्दकोपोवा ओं ॥ जीवःसर्वकार्येषुसर्वसामर्थ्येनप्रवर्ततेएकदेशेनवा नाद्यः तृणादानादावापकृत्स्न-
सामर्थ्यप्रसक्तेः नद्वितीयः निरंशत्वप्रतिपादकश्रुतिविरोधादित्यर्थः । अयमित्यनुवादः । एतेननिरंशत्वश्रुतिव्या
कोपेन ॥ कार्यानुसारेणेति ॥ शिलोद्धरणेसर्वशक्त्याप्रवृत्तिःतृणोद्धरणेएकदेशेनप्रवृत्तिरित्यर्थः । उपाहितःउपाधि
संबद्धः ॥ सर्वस्येति ॥ महारजनाद्युपाधेःस्वासंबद्धभागादेवभेदकत्वादितिभावः ॥ स्वाभाविकद्वित्वेति ॥
अन्यथोपाधिसंबंधात्पूर्वंअंशव्यवहारायोगादितिभावः ॥ अनवस्थेति ॥ तस्याप्यौपाधिकांशसंबंधस्यैववक्तव्यत्वादि
तिभावः ॥ नापीति ॥ अविद्यायाअपिअस्वतंत्रत्वादितिभावः ॥ ७ ॥ उक्तन्यायइति ॥ प्रथमाध्यायोक्तप
माणानीत्यर्थः ॥ नेहनानेति ॥ इहब्रह्मणिनानाअंशादिविभागोनेत्यर्थः ॥ एतेनेति ॥ ईश्वरस्यदोषित्वप्रतिपा
दनेनेत्यर्थः । नहिस्वदोषपरिहाराक्षमः परदोषंपरिहरतीतियुक्तमितिभावः ॥ ओं श्रुतेस्तुशब्दमूलत्वात् ओं॥ ने
श्वरस्यकर्तृत्वेयुक्तिविरोधः श्रुतेस्तु । लोकविरुद्धधर्माणामीशेअविरुद्धत्वप्रतिपादकश्रुतेरेव । श्रुत्युक्तमपियुक्तिविरुद्धंकथ
मभ्युपेयमित्यतउक्तं ॥ शब्दमूलत्वादिति ॥ शब्दैकप्रमाणकत्वादीश्वरस्यनतत्रयुक्तिविरोधःशंक्यइत्यर्थः ॥ शब्दैकस
मधिगम्यत्वस्येति ॥ शब्देतरप्रमाणागोचरत्वस्येत्यर्थः । तथोक्तइतिअमनुरवागनिंद्रोऽप्रवृत्तिरित्युक्त्येत्यर्थः ।
स्वयंतुमंतृत्वादेर्मनुरित्याद्युक्तइत्यपिध्येयं ॥ ओं आत्मनिचैवंविचित्राश्चहि ओं ॥ आत्मनिचपरमात्मन्येवएवंविधा
युक्तिविरोधनिरासकाः विचित्राः अघटितघटकाःशक्तयःसंतिनजीवे विचित्रशक्तिरितिश्रुतेरित्यर्थः । विचित्रशक्तेर्युक्तिवि
रोधनिरासकत्वंकुतइत्यतआह ॥ तदुक्तमिति ॥ गीताभाष्येइतिशेषः ॥ ओं स्वपक्षदोषाच्च ओं ॥ जीवपक्षेकृत्स्नप्रस
क्त्यादिदोषादेवयुक्तिविरोधोनाविरोधतांनेतव्यइत्यर्थः । निरंतरशब्दार्थोनिर्भेदइति ॥ पुण्यपापेति ॥ तेनसदोष

Sri Gargeshwari Digital Foundation

इत्यनेननपुनरुक्तिरितिभावः ॥ ॐ सर्वोपेताचतद्दर्शनात् ॐ ॥ आत्माख्यदेवतासर्वाभिःशक्तिभिरुपेता ।
तथाच ज्ञापकंसर्वैर्युक्तेतिश्रुतेरित्यर्थः । आत्मनीतिप्रकृतत्वात्सर्वोपेतइतिपुंलिंगनिर्देशःस्यादित्यतआह॥ श्रुत्यनुसारेणे
ति ॥ ॐ विकरणत्वान्नेतिचेत्तदुक्तं ॐ ॥ अपाणीत्यादौहस्तादिकरणशून्यत्वोक्तेर्नेशस्यकर्तृत्वमितिचेन्न ।
तत्करणादिराहित्यंप्राकृतविषयमितितत्रैवनतस्येत्यनेनोक्तंयतइत्यर्थः । मृतस्येतिदृष्टांतः ॥ प्राकृतविषयत्वेनेति ॥
तत्रकार्यंप्रकृतिजन्यमित्युक्तेरितिभावः ॥ .८ ॥ अपूर्णत्वादिति ॥ सृष्ट्यादिनायत्प्रयोजनंतदूनत्वादितिभावः
॥ ॐ नप्रयोजनवत्वात् ॐ ॥ नेश्वरप्रवृत्तिःस्वप्रयोजनार्था कुतःप्रयोजनवत्वात् । प्रवृत्त्यायत्प्रयोजनंप्रागेवतद्व
त्वादितिभावः ॥ प्राप्तप्राप्तव्येति ॥ प्राप्तंप्राप्तव्यंयेनासौतथोक्तस्तस्मादित्यर्थः ॥ ॐ लोकवत्तुलीलाकैवल्यं ॐ ॥
लोकेमत्तादेर्नृत्यादिक्रियायथा तथेशस्यापिसृष्ट्यादिक्रिया लीलायाःकैवल्यंकेवलत्वंप्रयोजनंविनालीलैवेत्यर्थः ।
॥ लोकानुग्रहेति ॥ अनेनकृपालूनांकेवलंपरप्रयोजनोद्देशेनप्रवृत्तेर्दृष्टत्वात्परमकृपालोरीश्वरस्यप्रयोजनोद्देशेनप्रवृत्ति
रित्यपिसमाधानंसूचितं ॥ ९ ॥ नैर्घृण्येति ॥ निर्दयत्वमित्यर्थः । विभागेनविषमतया ॥ ॐ वैषम्यनैर्घृण्येन
सापेक्षत्वात्तथाहिदर्शयति ॐ ॥ नेश्वरस्यवैषम्यनैर्घृण्ये कर्मसापेक्षत्वात् हियस्मात्तथाप्रस्तुतार्थंदर्शयति ।
पुण्येनपुण्यमितिश्रुतिरित्यर्थः ॥ ॐ नकर्माविभागादितिचेन्नानादित्वात् ॐ ॥ ईश्वरापेक्ष्यंकर्मनास्ति कुतःअवि
भागात् अस्वतंत्रत्वात् तस्यापीशकृतत्वादितियावत् । स्वकृतकर्मापेक्षयाफलदानेवैषम्याद्यनिस्तारादितिचेन्न ।
कर्मप्रवाहस्यानादित्वेनपूर्वपूर्वकर्मानुसारेणोत्तरोत्तरंकर्मकारयित्वातदनुसारेणफलदानेदोषाभावादित्यर्थः ॥ ॐ उपप-
२ द्यतेचाप्युपलभ्यतेच ॐ ॥ कर्मापेक्षणेपिस्वातंत्र्यमुपपद्यतएव । तस्यस्वाधीनत्वात् स्वाधीनकर्मापेक्षानामानपेक्षै

SGDF
Sri Gargeshwari Digital Foundation

वेतिपुनर्वैषम्यादीत्यतउक्तं ॥ उपलभ्यतेचेति ॥ तादृशंवैषम्यादिकंसकारयेदित्यादिश्रुतावदोषत्वेनोपलभ्यतएवे-त्यर्थः । तदुक्तमनुव्याख्याने वेदाप्रामाण्यकारणमेववैषम्यादिकंनांगीकार्यं । अन्यत्तुस्वाधीनकर्मसापेक्षत्वेनप्राप्तंवै षम्यादिनामकंदोषोनेत्यर्थः ॥ १० ॥ तर्हिपादासंगतिरितिपृच्छति ॥ किमुक्तंभवतीति ॥ उत्तरमाह ॥ उक्ता वशिष्टेति ॥ अतिप्रसंगादिति ॥ धूमसद्भावेपितन्नियतवन्ह्यभावप्रसंगादित्यर्थः ॥ ॐ सर्वधर्मोपपत्तेश्च ॐ ॥ सर्वेषांधर्माणांज्ञानानंदादीनांब्रह्मण्युपपत्तेरुपपत्तिसिद्धत्वाद्गुणाःश्रुताविति श्रुतिसिद्धत्वाच्चेत्यर्थः । रमादीत्यादिपदेनचतु र्मुखग्रहणं । तस्यापिश्रुत्यनुक्तभारताद्युक्तगुणचिंतयितृत्वादितिभावः ॥ ११ ॥ इतिश्रीमत्तत्वप्रकाशिकावाक्या र्थमंजर्यांशर्करायांश्रीनिवासविरचितायांद्वितीयाध्यायस्यप्रथमः पादः ॥ २।१ ॥ ॥ ॥ ॥

॥ श्रीमत्कृष्णद्वैपायनायनमः ॥ इदानींसमयविरोधनिराकरणेनिमित्तमाह ॥ सर्वविरोधानामिति ॥ इदानींत नसमयानांकथमपौरुषेयश्रुतिसिद्धजगत्कर्तृत्वविरोधित्वमित्यतउक्तं ॥ अनादीति ॥ प्रवाहतोअनादीत्यर्थः । वैदि कसमयस्यतृतीयस्यसत्वात्कथंद्वैविध्यमित्यतआह ॥ वेदवादिनामिति ॥ वेदावष्टंभेनपूर्वपक्षंकुर्वतां असदित्या दौप्रथमपादेनिराकृतत्वादितिभावः । अक्षपादेतिनारदीयस्मृतिः तेषुहैतुकेषु ॥ अतिप्रसंगेति ॥ रक्ततंतुनाशुक्ल पटोत्पत्तिरूपेत्यर्थः ॥ ॐ रचनानुपपत्तेश्चनानुमानं ॐ ॥ सांख्यानुमानपरिकल्पितंप्रधानंनकर्तृ कुतःरचनानु पपत्तेःजडस्य रचयितृत्वानुपपत्तेः तत्र मानाभावाच्चेत्यर्थः ॥ कारणत्वमात्रसाधकमिति ॥ उपादानत्वेना प्यपपत्तेरितिभावः ॥ ॐ प्रवृत्तेश्च ॐ ॥ पटादिसृष्टौचेतनप्रवृत्तेर्दर्शनाच्चनप्रधानंकर्त्रित्यर्थः ॥ व्यवहारमात्रामिति ॥

नत्वात्मनिकर्तृत्वावगाह्यनुभवइत्यर्थः ॥ अन्यथेति ॥ अहंदुःखीत्येतदपिव्यवहारमितिवक्तुंशक्यत्वादितिभावः ॥ परस्पराश्रयेति ॥ प्रकृतेःकर्तृत्वसिद्धौअहंकरोमीत्यादेः व्यवहारमात्रत्वसिद्धिःतत्सिद्धौदृष्टांतस्यसाध्यविकलत्वेनानु मानस्याविरोधकत्वेनप्रकृतेः कर्तृत्वसिद्धिरित्यन्योन्याश्रयप्रसंगादित्यर्थः । ईश्वरेच्छानुसारित्वस्यघटादिसृष्टावपिसत्वेन नदृष्टांतःसाध्यविकलइतिभावेनाह ॥ प्रतिपादयिष्यतइति ॥ उत्तरसूत्रद्वयेनेत्यर्थः ॥ ॐ पयोंबुवच्चेत्तत्रापि ॐ ॥ यथापयः क्षीरंस्वतोदध्यात्मनापरिणमते यथाचांबुजलंस्वतोगच्छति तथाप्रधानंकर्त्रितिचेन्न । तत्रापिपयःप्रभृतिष्वपि ईशप्रवृत्तेः श्रुतिसिद्धत्वादित्यर्थः । स्यंदतेस्रवति स्यंदस्रवणइतिधातोः । पयोंबुवदेवायस्कांतोपिईशाधीनोस्त्वित्य तआह ॥ उदाहरणेति ॥ तदेवव्यनक्ति ॥ नहीति ॥ ॐ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॐ ॥ नऋतइतिश्रुत्याईशव्यतिरेकेणकस्यापिकर्मणोअनवस्थानाच्चनकोपिदृष्टांतःसिध्यति । अतोनपेक्षणीयत्वात्सद्भिरनादरणी यत्वाच्चाचेतनस्यकर्तृत्वमित्यर्थः । निषुसीदगणपतेगणेषुत्वामाहुर्विप्रतमंकवीनां नऋतेत्वत्क्रियतेकिंचनारेमहामर्कमघवंचि त्रमर्चेतिश्रुतिंव्याचष्टे ॥ इंद्रियेति ॥ मगवच्छब्दार्थोधनवन्नित्यादि निषुसीदअत्यंतस्थितोभव । निस्वित्युपसर्ग द्वयं अर्कमित्यस्यार्थःपरमानंदमिति त्वांत्वमेवेत्येतद्वयंक्रमेणोपपादयति ॥ यनइति ॥ विशब्दार्थोविशेषेणेति । आरइत्यस्यदूरेसमीपेवेति ॥ १ ॥ तर्हिप्रधानस्यप्राधान्यंनस्यादित्यतआह ॥ यथेति ॥ ॐ अन्यत्राभावाच्चतृणादि वत् ॐ ॥ अन्यत्रईशादन्याधारत्वेनजगतोअभावात्तत्प्रेरणांविनाकस्यापिकार्यस्यसत्वाभावादितियावत् । तंविनाप्रकृ त्यादिकारणसत्वाभावाच्चतृणादीनांपर्जन्यइवनेश्वरोनुग्राहकमात्रं किंतुसर्वस्वतंत्रएवेत्यर्थः ॥ सर्वपदार्थानामिति ॥ तथाचतदुदाहरणेनप्रकृतानुपयोगीतिभावः । अभेदप्रतिपादकत्वभ्रमंवारयति ॥ तदधीनसत्तेति ॥ द्रव्यं प्रकृतिः

PDF Foundation

॥ चशब्देनसूचितमिति ॥ कारणसत्तादिप्रदत्वंचप्रामाणिकैरंगीकृतमितिचशब्देनसूचितमित्यर्थः ॥ २ ॥ पूर्वपूर्वस्मादिति ॥ देहरूपचेतनादित्यर्थः । प्रकारांतरेणापिदेहरूपचेतनोत्पत्युपपत्तिमाह ॥ क्वचिदिति ॥ यथाक्रमुकचूर्णपर्णादीनांप्रत्येकंमदजनकत्वाभावेपि समुदायेतज्जनकत्वं तथापृथिव्यादिभूतानांप्रत्येकंचैतन्योत्पादकत्वाभावेपि समुचितभूतचतुष्टयस्यस्वभावादेवचैतन्यजनकत्वोपपत्तेश्चेतिभावः । समुचितानामपिभूतानांनसर्वत्रचैतन्योत्पादकत्वमित्यभिप्रेत्यक्वचिदित्युक्तं ॥ श्रुत्यादीति ॥ यतोवेत्यादीत्यर्थः । एवमग्रेपि । ननुधर्मादेःसकलजगन्निमित्तकारणत्वे नतदभावेकार्यमात्रविलोपप्रसंगइत्यतआह ॥ नहीति ॥ ॐ अभ्युपगमेप्यर्थाभावात् ॐ ॥ अभ्युपगमेपिसिद्धांतेपिअर्थाभावात्विषयप्रयोजनयोरभावात्व्याहतमेतन्मतमित्यर्थः ॥ तदभावादिति ॥ श्रुतशास्त्रस्यापिधनाद्यभावदर्शनादित्यर्थः । वार्ता वाणिज्यं ॥ लोकोपकारइति ॥ तथात्वेनिरंकुशकामोपभोगप्रवृत्तेरितिभावः । हिंसा ॥ नाप्राप्तेननिमित्तेन । शास्त्रप्रवृत्तेःप्रागधर्मादिशंकयामर्यादाभूत् । शास्त्रेणतदभावज्ञानेचपरस्परधनवनिताद्यपहारेणपरस्परहिंसादिकंस्यात् । तथाचापकारएवानेनकृतःस्यात् । नहिकपर्दिकालाभायलक्षलाभंनाशयन्नुपकारीभवतीतिभावः । अभ्युपेत्याह ॥ नचेति ॥ सुखदुःखप्राप्तिनिवृत्त्योरन्यतराभावादितिभावः । दृष्टंजनानुरागप्रभवंधनादि तदप्यदृष्टायत्तमित्याह ॥ नहीति ॥ अदृष्टेति ॥ कृतघ्नतानिमित्तप्रत्यवायेत्यर्थः । अप्राप्तेप्रमाणांतरेण ॥ अपरामर्शइति ॥ इंद्रियसन्निकृष्टघटादिप्रतियोगिकाभावज्ञानस्येवधर्माद्यभावज्ञानस्यझटितिजायमानस्यादर्शनादित्यर्थः । ननुघटोस्तिनवेतिविमर्शानंतरंघटोनास्तिअनुपलभ्यमानत्वादितिघटाभाववदत्रापिधर्माद्यभावज्ञानंस्यादित्यतआह ॥ परामर्शेति ॥ अनुमानंतुत्वन्मतेनप्रमाणमितिभावः ॥ केति ॥ योहियमर्थमर्थयमानोयंविषयंजिज्ञासतेतस्यैवतत्राधिकारि

SGDF Sri Gargeshwari Digital Foundation

त्वादितिभावः ॥ सिद्धांतइति ॥ मास्तुप्रयोजनमित्युक्त्योर्व्याहतिमुपपादयितुंतदर्थयोर्विरोधमाह ॥ नहीति ॥ सप्रयोजनस्यैवाभ्युपगमासिद्धांतत्वादितिभावः ॥ ३ ॥ ॐ पुरुषाश्मवदितिचेत्तथापि ॐ ॥ अत्रतथेत्यस्याद्वृत्तिः अव्ययानामनेकार्थत्वादेकस्यतत्रेत्यर्थकत्वं । द्वितीयस्यव्यतिरेकानवस्थितेरित्युक्तपरामर्शकत्वं । तथाचयथापुरुषस्यचेतनस्यसंबंधेनशरीरमश्मानयनादिकर्तृ तद्वत्प्रधानंजीवसंबंधाज्जगत्कर्त्रितिचेत् । तत्रापिपुरुषाश्मादावपितथाईश्वरव्यतिरेकेणानवस्थितिः । ततश्चदृष्टांताभावइत्यर्थः ॥ पुरुषोपसर्जनस्येति ॥ पुरुषाख्यामुख्यसहकारिसहितस्येत्यर्थः । निवृत्तानिष्पन्ना हैतुकंमन्यमानः स्वात्मानंहैतुकंमन्यमानः । श्रुत्यवष्टंभेन श्रुतिबलेन ॥ ॐ अंगित्वानुपपत्तेः ॐ ॥ जीवस्य प्रधानत्वेत्वयोच्यमाने सर्वजनसिद्धस्यशरीरं प्रत्यंगित्वस्य प्रधानत्वस्यानुपपत्तेर्नोक्तदृष्टांतोयुक्तइत्यर्थः । अंगमप्रधानं ॥ ४ ॥ दोषःसाध्यवैकल्यं । नऋतइतिश्रुत्यातत्रापीश्वराधीनत्वमित्यतआह ॥ श्रुतेरिति ॥ प्रत्यक्षबाधादित्यर्थः ॥ ॐ अन्यथानुमितौचज्ञशक्तिवियोगात् ॐ ॥ प्रागुक्तादन्यथाजीवप्राधान्येनप्रकृतेरुपसर्जनत्वेनानुमितौच शरीरत्वरूपांगित्वानुपपत्तिः कुतः ज्ञशक्तिवियोगात् । ज्ञस्यजीवस्यशरीरसंबंधे शक्त्यभावादित्यर्थः । ॥ अन्यतरेति ॥ अशक्तत्वपक्षेजीवस्यवैय्यर्थ्यं शक्तत्वपक्षेशरीरवैय्यर्थ्यमित्यर्थः ॥ पूर्वमप्येवमिति ॥ प्रकृतिसंबंधार्थंकेवलस्यशक्त्यभावात्प्रकृत्यंतरसंबंधस्येतिवाच्यं । एवंतत्रापीत्यनवस्थेत्यर्थः । ननुप्रकृतिसंबंधस्यानादित्वात्तदर्थंप्रकृत्यंतरसंबंधापेक्षेत्यतोनानवस्थेत्यतआह ॥ अनादितेति ॥ उदाहर्तव्येति ॥ अचेतनसंबंधस्यैवप्रकृतिरितिनियमेव्यभिचारस्थलत्वेनेतिशेषः ॥ ॐ विप्रतिषेधाच्चासमंजसं ॐ ॥ सर्वश्रुतिस्मृतियुक्तिविरुद्धत्वाच्चानीश्वरमतमसमंजसमित्यर्थः । परंस्वतंत्रं ॥ ५ ॥ परमाण्वारंभेति ॥ त्र्यणुकषष्ठभागस्यद्व्यणुकादिक्रमेणकार्यारंभकत्व

CDF
Sri Gargeshwari Digital Foundation

मेवनतुतः स्वनापरिणामवादेत्यर्थः । ईश्वरस्याष्टगुणमात्रत्वंवक्तुंउपोद्घातमाह । षट्खल्वित्यादिना ॥ गुणाश्रयइति ॥ गुणात्यंताभावानधिकरणमित्यर्थः । तेनप्रथमक्षणावच्छिन्नघटेनाव्याप्तिः । अन्यत्कार्यरूपं ॥ कर्मान्यत्वेति ॥ अत्रकर्मसामान्यद्रव्यव्यावृत्तयेक्रमेणविशेषणानि । ननुगुणेगुणत्वसमवायस्यद्रव्यत्वाद्यभावस्यापिसत्वेनासंभवीदंलक्षणमितिचेन्न । संयोगसमवायान्यतरसंबंधेनयद्यत्रास्तितत्प्रत्येवसआश्रयइत्यंगीकारात् । गुणस्याभावसमवायौप्रतिविशेषणविशेष्यभावेनाश्रयत्वेपिसंयोगसमवायान्यतरसंबंधेनानाश्रयत्वादितिभावः ॥ संयोगाविभागयोरिति ॥ नचसंयोगविभागयोरतिव्याप्तिः । उभयासमवायीकारणत्वस्यविवक्षितत्वादितिभावः ॥ नित्यमिति ॥ अत्रसंयोगविशेषगगनसमवायव्यावृत्तयेक्रमेणविशेषणानि । नन्वत्रानेकसमवेतत्वंनामानेकत्वसंख्यावत्समवेतत्वंवास्वाश्रयप्रतियोगिकान्योन्याभाववत्समवेतत्वंवा । नाद्यः रूपत्वेअव्याप्तेः । तदाश्रयेरूपेसंख्याभावात् । नद्वितीयः एकपदंवय्यर्थ्यात् । विशेषाणांप्रतिव्यक्तिनियतत्वेनैकैकस्यविशेषस्यस्वाश्रयप्रतियोगिकान्योन्याभाववत्समवेतत्वाभावेनतत्रातिव्याप्त्यभावात् । नचविशेषसमुदायेतिव्याप्तिः । समुदायिभिन्नसमुदायाभावात् । भावेवातस्यसमवेतत्वाभावेनतेनैवतद्व्यावृत्तेरितिचेदुच्यते नात्रैकत्वंलक्षणशरीरांतर्गतं । किंतुसामान्यंसर्वत्रानुगतव्यवहारहेतुत्वादेकमेव नतुविशेषवत्प्रतिव्यक्तिभिन्नमितिस्वरूपकथनार्थमितिसंप्रदायविदः । नन्वथापिकालाकाशसंयोगेतिव्याप्तिरितिचेन्न अनंगीकारात् । तयोरमूर्तत्वेनपरस्परसंयोगाभावेनामूर्तत्वभंगाभावाच्चेत्यर्थः ॥ अनेकविधमिति ॥ सत्ताद्रव्यत्वादिरूपेणपरापरोभयविधरूपेत्यर्थः ॥ नित्यइति ॥ संयोगाकाशव्यावृत्तयेक्रमेणविशेषणे ॥ अंत्याइति ॥ अंतेभावाइत्यर्थः । गुणादीनांव्यावर्तकाणामभावेस्वयंव्यावर्तकतयाविद्यमानाइतियावत् । आद्यपरिमाणुप्रभृतिषुसमानगुणकर्मजातिमत्सुयोगिनामय

मस्माद्भिन्नइतिव्यावृत्तिबुद्धिजनकस्यान्यस्याभावात्तदर्थंतन्मात्रवृत्तितयाव्यावृत्तिबुद्धिजनकाविशेषाअंगीक्रियंते । अत्रांत्याइत्येवलक्षणंअन्यत्स्वरूपकथनमितिबोध्यं । तत्पदार्थेषु यद्यत्र स्वसमवेतकार्यजनकत्वमितिफलितोर्थः । द्रव्यमेव नगुणादिकंसमवायिकारणं ॥ आदिसृष्टाविति ॥ महेश्वरसिसृक्षयापरमाणुषुक्रियोत्पद्यते । ततोद्वयोर्द्वयोरन्योन्यसंयोगेनद्व्यणुकोत्पत्तिस्त्रिभिर्व्यणुकैस्त्र्यणुकमित्यादिक्रमेणमहापृथिव्याद्युत्पत्तिरित्यर्थः । प्रत्यासन्नंप्रत्यासत्तियुक्तं । ॥ अवधृतसामर्थ्यमिति ॥ अवधृतंसम्यङ्निश्चितंसामर्थ्यंकार्यजननेयस्यतत्तथोक्तं । तदवधारणेहेतुश्चानन्यथासिद्धत्वं । अत्रतंतुतंतुत्वव्यावृत्तयेक्रमेणविशेषणे ॥ कार्येकार्थेति ॥ कार्येणसहैकत्रसमवायः कारणेनसहैकत्रसमवायश्चेत्यर्थः ॥ कार्यद्रव्यस्येति ॥ यथातंतुसंयोगः पटलक्षणकार्येणसहैकत्रतंतुषुसमवेतः पटसमवायिकारणं । ॥ कार्यगतेति ॥ यथातंतुरूपंकार्येणपटेनसहैकत्रतंतुषुसमवेतंपटरूपासमवायिकारणं ॥ कर्मचेति ॥ यथातंतुक्रियापटलक्षणकार्येणसहैकत्रतंतुषुसमवेतापटगतविभागकारणं । अत्रचशब्देनाश्रयगतगुणानामादिशब्देनकार्यैकार्थप्रत्यासत्तेश्चग्रहणं । यथापार्थिवपरमाणुगतंरूपादिकंप्रतिपार्थिवपरमाणुतेजः संयोगस्वरूपादिलक्षणकार्येणसहपरमाणुलक्षणैकार्थेसमवेतत्वेनकारणत्वं ॥ कारणगतगुणकर्मणीति ॥ कर्मसमवायीकारणगतगुणकर्मणीत्यर्थः । यथाफलगतंगुरुत्वंतद्गतपतनंप्रतितल्लक्षणकार्येणसहफललक्षणैकार्थसमवेतमसमवायिकारणं । यथावाफलगतंद्वितीयपतनंतद्गततृतीयपतनासमवायिकारणं । इदंचैकदेशिमतेन । वस्तुतस्तुतृतीयादिपतनंप्रतिवेगस्यैवासमवायिकारणत्वं । अतएवसुधायांकर्मणआश्रयगताःगुरुत्वद्रवत्वसंयोगाअसमवायिकारणमित्येवोक्तं ॥ संख्यादिनैवेति ॥ परमाणुगतद्वित्वेनद्व्यणुकपरिमाणंतद्गतत्रित्वेन त्र्यणुकपरिमाणंआदिपदेनवर्तुलपिंडपरिमाणंकारणप्रचयसंग्रहः । तत्राप्यवयवपरिमाणस्यहेतुत्वमितिभावः ।

Foundation

॥ एतदन्यादिति ॥ समवायसमवायिभिन्नमित्यर्थः ॥ शिष्टषड्गुणायोग्यइति ॥ नित्ययथार्थज्ञानस्येश्वरस्य मोहासंभवेतत्प्रभवरागद्वेषयोरयोगेनतज्जन्यधर्माधर्मयोरभावात्तन्निमित्तसुखदुःखयोर्नित्यज्ञानत्वादेवस्मरणलक्षणकल्पकाभावेनभावनाख्यसंस्कारस्यचायोगाच्छिष्टषड्गुणायोग्यइत्यर्थः ॥ ॐ महद्दीर्घवद्वाह्रस्वपरिमंडलाभ्यां ॐ ॥ यथामहत्वादीर्घत्वाच्चपरिमाणाच्चतुर्णकादिकार्यगतंपारिमाणंजायते तथाचह्रस्वत्वात्पारिमांडिल्याच्चपरिमाणात्तत्कार्येपरिमाणमुत्पद्येत । अन्यथामहत्वदीर्घत्वाभ्यामपिनोत्पद्येताविशेषादित्यर्थः ॥ नतावदिति ॥ नापिबाधकभावाभावाभ्यामितितावच्छब्दः ॥ प्रत्यासत्तिरेवेति ॥ नतुसामर्थ्यावधारणमितिलक्षणाभावएवेत्यर्थः । तत्रयंपुरस्कृत्ययस्य यंप्रतिपूर्वभावोवगम्यतेतत्तेनान्यथासिद्धमित्युक्तान्यथासिद्धिसत्वादितिभावः ॥ महत्वेपीति ॥ उक्तान्यथासिद्धेस्तत्रापिवक्तुंशक्यत्वादितिभावः । बाधकंशंकते ॥ पारिमांडल्यादेरिति ॥ नास्तिनोहानिरिति ॥ त्र्यणुकादिसर्वकार्याणामापेक्षिकाणुत्वसत्वेनतत्राणुशब्दवाच्यत्वस्येष्टत्वादितिभावः । ननुपरमाणुगतपारिमाणमेवअणुपारिमाणंनत्र्यणुकादिसर्वकार्यगतमतः कथमिष्टापत्तिरित्यतआह ॥ संकेतमात्रमिति ॥ अवर्जनीयप्रत्यासत्तिर्नेत्यत्रहेत्वंतरमाह ॥ द्व्यणुकादीति ॥ तथाचानन्यगत्यापारिमांडल्यादेरेवकारणत्वमितिनसामर्थ्यावधारणाभावइतिभावः। ननुसंख्यादिनैवतज्जन्मेत्युक्तत्वात्कथंकारणांतराभावइत्यतआह ॥ संख्यादेरिति ॥ त्र्यणुकादिगतबहुत्वसंख्यादेश्चतुर्णकादिमहत्वारंभकत्वप्रसंगादित्यर्थः । तथाचतत्रापिपरिमाणस्यारंभकत्वंनस्यादिभावः । यद्वाद्व्यणुकगतसंख्यावत्परमाणुगतसंख्यायाअपिद्व्यणुकेमहत्वारंभकत्वप्रसंगादित्यर्थः ॥ भिन्नतयेति ॥ समवायिकारणाद्विविक्ततयेत्यर्थः । तथाविधस्यैवदंडादेर्निमित्तकारणत्वादितिभावः ॥ भिन्नतयेति ॥ द्वित्वसमवायिकारणात्मनः सकाशादितिशेषः ।

SGDF Sri Gargeshwari Digital Foundation

अभ्युपगम्य संयोगस्यकारणत्वं विवक्षितः व्यतिषंगविशेषाविशिष्टः ॥ **कस्नदेति** ॥ व्यतिषंगविशेषाविशिष्टतंतू नामेवपटत्वादितिभावः ॥ ॐ **उभयथापिनकर्मातस्तदभावः** ॐ ॥ उभयथापीश्वरेछायानित्यत्वानित्यत्वरूपप्रकारद्वयेपिपरमाणुषुकर्मनसंभवत्यतस्तदभावः । द्व्यणुकादिकार्याभावइत्यर्थः । तस्याःसकाशात् दूषणांतरमाह । ॥ **सतिकारणइति** ॥ तस्यकारणत्वेनाभिमतस्य नचकारणांतराभावात्कार्याभावइतिवाच्यं । वक्ष्यमाणरीत्या कारणांतरस्यैवाभावादितिभावः । अप्रसक्तत्वात्कथंतत्परामर्शइत्यतउक्तं ॥ **परिमाणाभिदानेति** ॥ तद्दस्वादिपरिमाणाश्रयतयातदपिप्रसक्तमितिभावः । यथाकथंचिद्विशेषलाभात्किमनेनानौपाधिकत्ववर्णनेनेत्यतआह ॥ **सृष्टमिति** ॥ उपाध्यभावेउपहितासंभवादितिभावः ॥ **आविर्भावेति** ॥ शक्त्यात्मनाविद्यमानस्यतदाव्यक्त्यंगीकारादित्यर्थः । उक्तदोषः अन्योन्याश्रयः ॥ **न्यायेति** ॥ कालस्यनित्यत्वेप्रलयेपिकार्योत्पत्तिः । अनित्यत्वेतस्यापिजन्यत्वेनकालांतरापेक्षेत्यादिन्यायेनेत्यर्थः। समुद्बोधविशेषःकार्योन्मुखत्वं ॥ ॐ **समवायाभ्युपगमाच्चसाम्यादनवस्थितेः** ॐ ॥ अवयवावयव्यादीनांभिन्नत्वमुपेत्यतेषांसमवायाभ्युपगमाच्चतन्मतमसत् कुतः समवायस्यापिसमवायिभ्यांभिन्नत्वसाम्यात् मृद्घटःसमवायइत्यादिविशिष्टबुध्युपपत्तयेसमवायांतरापेक्षायांतत्राप्येवंतत्राप्येवमित्यनवस्थानादित्यर्थः । ननुनित्यगुणादीन्प्रतिगुण्यादेसमवायिकारणत्वाभावात्तन्निरासससमयेतेषांग्रहणमसंगतमित्यतउक्तं ॥ प्रसंगादिति ॥ समवायाश्रयनिरूपणप्रसंगादित्यर्थः । शंकते ॥ **भिन्नयोरिति** ॥ अवयवत्वादिविशेषणत्वोपपत्तयेअवयवीत्यादिविशेष्योपपत्तयेचेत्यर्थः ॥ **मृद्घटसमवायइति** ॥ मृद्घटयोःसमवायइत्यर्थः ॥ **संयोगेपीति** ॥ तथाचसंयोगीघटइत्येतन्निर्वाहायसंयोगघटयोःसमवायांगीकारोव्यर्थःस्यादितिभावः ॥ **नचैवमिति** ॥ द्रव्यस्यैवस्वनिर्वाहकत्वमभ्युपेत्यसमवायि

SGDF
Sri Gargeshwari Digital Foundation

निरासेगुणकर्मादिविलोपःस्यात् । द्रव्यस्यैवशुक्लश्चलतीत्यादिप्रत्ययनिर्वाहकत्वासंभवादित्यतिप्रसंगोनेत्यर्थः ॥ **साध्यशून्यामिति** ॥ आकाशतत्परिमाणयोर्नित्यसंबंधासम्मतेरितिभावः । ननुमहत्वतदाश्रयाकाशगतविशेषणविशेष्यभावः संबंधनिमित्तः विशेषणविशेष्यभावत्वात् दंडदेवदत्तगतविशेषणविशेष्यभाववदित्यनुमानेनतस्यसंबंधनिमित्तत्वशिद्धावाकाशपरिमाणयोर्नित्यत्वेनतयोःसंबंधोनित्यएवसिध्यतीतिनोक्तदोषइत्याशंक्याह ॥ **विशेषणाविशेष्येति** ॥ **व्यभिचारइति** ॥ घटाभाववद्भूतलनिष्ठविशेषणविशेष्यभावइतिशेषः । भावमात्रनिष्ठत्वेसतीतिविशेषणाददोषइत्यतआह । ॥ **विशेषणेऽतिप्रसंगइति** ॥ व्यभिचारस्थलभिन्नत्वेसतीतिसर्वत्रवक्तुंशक्यत्वेनव्यभिचारमात्रोछेदप्रसंगइत्यर्थः ॥ ॐ **नित्यमेवचभावात्** ॐ ॥ ईशेछाकालपरिमाण्वादिकारणानांनित्यमेवसत्वान्नित्यंकार्यमेवस्यात् नतुकदाचित्प्रलयइत्येवार्थः । अदृष्टविलंबात्कार्यानुत्पादइत्यतआह ॥ **अदृष्टस्यचेति** ॥ स्वं अदृष्टं वैय्यर्थ्यमदृष्टस्य ॥ **सामग्रीसंपत्ताविति** ॥ प्रकृतेचसामग्रीसद्भावादेवादृष्टानुमानान्नादृष्टाभावेनकर्माभावोवाच्यइत्यर्थः ॥ **प्रागसत्तइति** ॥ उत्पत्तेःपूर्वंसत्तासंबंधशून्यस्येत्यर्थः ॥ ॐ **रूपादिमत्वाच्चविपर्ययोदर्शनात्** ॐ ॥ किंचपार्थिवादिपरमाणूनांरूपादिमत्वात्प्रकृतनित्यत्वविपर्ययोअनित्यत्वंस्यात् । यद्रूपादिमत्तदनित्यमितिघटादौदर्शनादित्यर्थः ॥ **रूपादिमत्वेति** ॥ भौतिकत्वेनरूपादेर्विशेषणान्नेशादौव्यभिचारइतिभावः ॥ ॐ **उभयताचदोषात्** ॐ ॥ नित्यत्वेघटादेरपितथात्वापत्तिः । अनित्यत्वेकारणाभावेनपरमाण्वनुत्पत्तिरितिपक्षद्वयेपिदोषसत्वादित्यर्थः ॥ **अवयवित्वादिति** ॥ कार्यत्वेसतिरूपवत्वस्यैवानित्यत्वप्रयोजकत्वादितिभावः ॥ ॐ **अपरिग्रहाच्चात्यंतमनपेक्षा** ॐ ॥ परमाण्वारंभवादस्यश्रुत्याद्यपरिगृहीतत्वात्तद्विरुद्धत्वाच्चानपेक्षात्यंतमनादरणंयुक्तमित्यर्थः । कथमनेनश्रुतिविरुद्धत्वमुक्तमित्यतस्तत्पूर्वार्धोदाहर

णपूर्वकमाह ॥ **अहमासमिति** ॥ **सृगालवाक्यमिति** ॥ सृगालरूपेंद्रवाक्यमित्यर्थः । अनेनतर्कविद्यानुरागस्य जंबुकजन्महेतुत्वंसूचितंभवति ॥ ६ ॥ **प्राथमिकत्वादिति** ॥ बुद्धोक्तमतैकदेशमवलंब्यजिनेनमतांतरकरणादिति भावः ॥ **बहुविधत्वेपीति** ॥ वैभाषिकसौत्रांतिकमाध्यमिकयोगाचारभेदेनेत्यर्थः । ईश्वराभावंवक्तुमाह । **रूपविज्ञानेति** ॥शरीरेंद्रियविषयात्मनावस्थिताःरूपरसगंधस्पर्शात्मकाःपरमाणवोरूपस्कंधाः । निर्विकल्पकज्ञानंविज्ञानस्कंधः दुःखंवेदनास्कंधः । सुखंचदुःखाभावएव । सविकल्पकंज्ञानंसंज्ञास्कंधः । समनंतरप्रत्ययःसंस्कारस्कंधइतिद्रष्टव्यं । अस्मन्मताभिप्रायेणाह ॥ **परमाणुपरिमाणस्येति** ॥ वैशेषिकमताभिप्रायेणाह ॥ **तदारब्धस्येति** ॥ **यदिति** ॥ पदार्थानांसत्वंनामस्वसदृशकार्यजनकत्वरूपमर्थक्रियाकारित्वं । तत्रयदिघटस्यस्थायित्वंतर्हिप्रतिक्षणेघटांतरंसमुत्पादयेत् । सोप्येवं एवंचाल्पतरकालेकुलालशालापूर्त्तिःस्यात् । अतोघटांतरमुत्पाद्यस्वयंनश्यतीत्यंगीकार्यं । तथाघटस्यव्याप्तत्वे तत्कार्यस्यसर्वत्रोपलब्धिप्रसंगात्परिछिन्नत्वंचांगीकार्यमितिभावः ॥ ॐ **समुदायउभयहेतुकेपितदप्राप्तिः** ॐ ॥ समुदायःकिमेकपरमाणुजन्यउतानेकपरमाणुजन्यः । आद्ये एकस्मात्समुदायइतिव्याहतमित्यपिशब्दसूचितदूषणं । द्वितीयेसमुदायेउभयहेतुकेऽनेकपरमाणुजन्येअंगीकृतेसतितदप्राप्तिः तस्यसमुदायस्यानुपपत्तिः । अन्योन्याश्रयादित्यर्थः । ननुयेभ्योमिलितानेकपरमाणुभ्योसमुदायोजन्यतेनतेतत्समुदायजन्याः किंतुसमुदितपरमाण्वंतरजन्याइतिनान्योन्याश्रयइत्यतआह । **अत्रातिपीडायामिति** ॥ समुदितपरमाण्वंतरस्यापिमिलितानेकपरमाण्वंतरहेतुकत्वावश्यंभावादिति भावः ॥ ॐ **इतरेतरप्रत्ययत्वादितिचेन्नोत्पत्तिमात्रनिमितत्वात्** ॐ ॥ समुदायस्यसर्वदासत्वेपितत्प्रतीति व्यवहारयोरितरेतरप्रत्ययत्वादिदंचेदंचेत्यपेक्षाबुध्यधीनत्वात्तदभावेतत्प्रतीत्याद्यभावेनलयाद्युपपत्तिरितिचेन्न । विरलप-

PDF
Sri Gargeshwari Digital Foundation

रमाणुजातमिलितपरमाणूनांतादृशसमुदायोत्पत्तिमात्रेनिमित्तत्वादपेक्षाबुध्यादौनिमित्तत्वाभावादित्यर्थः ॥ तदंगीक्रिय तएवेति ॥ नात्रसमुदायोनामपरमाणूनांसंयोगः । अनंगीकारात् नापिद्रव्यांतरं तस्यैवावयवित्वात् । किंत्वनेक त्वसंख्यारूपएव । सचविरलेष्वपिपरमाणुषुसर्वदास्तीतिभावः । वित्तिःप्रतीतिः ॥ व्यवहारादेरिदंचेदंचेति ॥ अनेकत्वसंख्यायाअपेक्षाबुद्धिर्व्यंग्यत्वेनतत्प्रतीतिर्व्यवहारयोरप्यपेक्षाबुध्यधीनत्वादित्यर्थः ॥ सामीप्यापेक्षेति ॥ विप्रकृष्टेइदंचेदंचेत्ययोगादितिभावः । घटेतेत्यनंतरंकथमित्यनुवर्तते । कात्रकथंतेत्यतआह ॥ नहीति ॥ त्रयाणामेक विषयत्वेनैवकार्यकारणभावादितिभावः।तथात्वंक्षणिकत्वंतथाचैकस्यपुरुषस्यदर्शनमन्यस्यापेक्षाबुद्धिरन्यस्यव्यवहारइतीभि न्नाधिकरणत्वान्नतेषांकार्यकारणभावइतिभावः ॥ तदभ्युपगमइति ॥ एतद्बाधकवशात्वयाक्षणिकत्वमेवांगीकार्यं । स्थायित्वांगीकारेचतद्धानिरित्येवमर्थादुक्तैवेत्यर्थः ॥ विशेषेति ॥ विशिष्यतइतिविशेषः विसदृशइत्यर्थः । विरले भ्योनिमित्तोत्पत्तिरितियावत् एवमग्रेपि ॥ ॐ उत्तरोत्पादेचपूर्वनिरोधात् ॐ ॥ उतरस्यस्वसदृशकार्यस्योत्पादे चउत्पत्तावेवपूर्वस्यकारणस्यनिरोधान्नाशान्नविसदृशकार्योत्पत्तिश्चेत्यर्थः । तर्हिघटोपिस्वसदृशघटमुत्पाद्यतत्रवैसादृश्यमुत्पा दयेदित्यतआह ॥ नचेति ॥ ॐ असतिप्रतिज्ञोपरोधोयोगपद्यमन्यथा ॐ ॥ किंकारणेनष्टेकार्यमुत्पद्यतेविद्य मानेवा । आद्येअसति नष्टेकारणेकार्योत्पत्तिरित्यंगीकारेतस्यकार्यमितिप्रतिज्ञायाउपरोधोहानिरित्यर्थः । अन्यथाविद्य मानेकारणेकार्योत्पत्तिरितिद्वितीयपक्षांगीकारेकार्याणांयौगपद्यमविच्छिन्नोत्पत्तिरेकदावस्थानंचस्यादित्यर्थः ॥ अतिप्र- संगादिति ॥ तंतुनाशोत्तरक्षणजन्यघटस्यतत्कार्यत्वप्रसंगादित्यथः । आत्मानंस्वरूपं ॥ विनाशाकारणाभावादिति ॥ द्वितीयक्षणस्यैवतन्नाशकारणत्वादितिभावः ॥ यौगपद्यमिति ॥ घटिकादिस्थूलकालावच्छेदेनयुगपदवस्थानंस्यात्

SGDF Sri Gargeshwari Digital Foundation

तथाचाल्पतरकालेकुलालशालापूर्तिःस्यादितिभावः । यौगपद्यंप्रकारांतरेणोपपादयति ॥ **तथेति** ॥ कारणंहिक्षणिकंयदिकार्यमपितत्सत्तासमानकालीनसत्ताकंतर्हिकार्यकारणयोःसहोत्पादइत्युक्तंस्यात् तत्कर्याणामप्येवमेवन्यायइतितत्संतानभाविनामशेषकार्याणामेकक्षणावस्थानरूपंयौगपद्यंस्यात् तच्चप्रत्यक्षविरुद्धमितिभावः ॥ **नचक्षणार्धेति** ॥ तथाचनद्विक्षणिकत्वप्रसंगइतिभावः ॥ **पूर्वमध्येति** ॥ पूर्वमध्यांत्यभागराहित्याभिधानादित्यर्थः ॥ **ॐ प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॐ** ॥ प्रतिसंख्याबुद्धिः अप्रतिसंख्यातदभावः बुद्धिपूर्वकंमुद्गरप्रहरादिनाघटनाशः प्रतिसंख्यानाशःसएवससंताननाशइत्युच्यते पुनर्घटानुत्पादात् तद्विनाप्रतिक्षणंजायमानोनाशः अप्रतिसंख्यानाशः सएवनिःसंताननाशइत्युच्यते । घटोत्पत्तिविच्छेदाभावात् तथाचससंताननाशप्रतिक्षणनाशयोरप्राप्तिरनुपपत्तिः कुतःकार्यजननाविच्छेदादित्यर्थः । निर्वर्त्य निष्पाद्य अन्यथासंतानसाहित्येननाशापत्तेरितिभावः॥ **स्वकार्यवियोगकालइति** ॥ कार्योत्पत्युत्तरक्षणइत्यर्थः ॥ **कारणंसदेवेति** ॥ असतःकार्येणवियोगायोगादितिभावः ॥ **विविक्ततयेति** ॥ वित्तिव्यवहारविषयमिलितपरमाणुजन्यपरमाणूनांविरलतयेत्यर्थः ॥ **निरस्तमिति** ॥ उत्तरोत्पादेचपूर्वनिरोधादितिविसदृशकार्यजनकत्वनिराकरणेनेत्यर्थः ॥ **अवास्तवत्वादिति** ॥ सत्वस्यैवतत्प्रयोजकत्वादितिभावः ॥ **नहीति** ॥ औपाधिकसत्वस्योपाधिसत्वाधीनत्वादितिभावः । कथमित्यतःसमुदायावास्तवत्वंतेनांगीकारयन्नतेनेत्युक्तंविशदयति ॥ **समुदायेत्यादिना** ॥ **विरोधादिति** ॥ विरलपरमाणूनांसमुदायोत्पादकत्वांगीकारेणतन्मात्रत्वेजन्यजनकभावविरोधादित्यर्थः ॥ **सएवावयवीति** ॥ सचत्वयानांगीकृतइतिभावः । अवास्तवोवयवी अंगीक्रियतइत्यतआह

३

SGDF
Sri Gargeshwari Digital Foundation

॥ अवास्तवत्वइति ॥ तेषामिति ॥ तथाचनतेषामेकोघटइतिसाक्षात्कारविषयत्वमितिभावः । शंकते ॥ तथापीति ॥ ॐ उभयथाचदोषात् ॐ ॥ कारणेसतिकार्यभवत्येवेतिनियमेसमानकालीनत्वेनकार्यकारणभावानुपपत्तिः अनियमेऽसत्वापत्तिरित्युभयपक्षेपिदोषादित्यर्थः । पूर्वोत्तरक्षणस्थदीपयोर्भेदेक्षणिकत्वंसेत्स्यतीत्याह ॥ यद्विरुद्धेति ॥ ॥ ॐ आकाशेचाविशेषात् ॐ ॥ आकाशेपरिमाणविशेषाभावात्तस्यस्थायित्वे अन्यस्यापितथात्वंशक्यसाधनमित्यर्थः ॥ तत्रतदनभ्युपगमादिति ॥ आकाशोद्भौविनाशौचनित्यंत्रयमसंस्कृतमितितदुक्तेरितिभावः ॥ तत्रापीति ॥ त्वदभिमतक्षणिकत्वंतत्रनास्तितस्यबहुक्षणवृत्तित्वादितिभावः ॥ त्वदनुमानेसिद्धेरिति ॥ उभयथाचदोषादित्यत्र प्रपंचप्रदीपादौचबौद्धांगीकृतार्थक्रियाकारित्वस्यदूषितत्वादितिभावः ॥ ननास्तीति ॥ किंत्वस्त्येव ततश्चनास्मदुक्तहेतोत्वदुक्तसाधनवैकल्प्यमितिभावः ॥ ॐ अनुस्मृतेश्च ॐ ॥ तदेवेदमितिप्रत्यभिज्ञानाच्चनानुमानात्क्षणिकत्वसिद्धिरित्यर्थः ॥ परिछूनेति ॥ छिन्नोत्पन्नकेशसमुदायेयथासादृश्यात्सएवायमितिप्रत्यभिज्ञा तथापूर्वोत्तरक्षणस्थदेवदत्तयोः सादृश्यात्सएवायमितिप्रत्यभिज्ञेत्यर्थः ॥ विरुद्धधर्मेति ॥ देवदत्तेवृत्त्यादिरूपेत्यर्थः ॥ अन्यथाक्षणेपीति ॥ कालभेदेनविरुद्धधर्मवत्यपिभेदे एकक्षणवृत्तिनोपिदेवदत्तस्यपुरुषभेदेनज्ञातत्वाज्ञातत्वरूपविरुद्धधर्माधिकरणत्वेनभेदःस्यादित्यर्थः ॥ प्रदीपइति ॥ तस्यापिकालभेदेनाविरुद्धधर्माधिकरणत्वोपपत्तेरितिभावः ॥ निरंतरेति ॥ अव्यवहितेत्यर्थः ॥ उक्तरीत्याऽपास्तमिति ॥ अनुस्मृतेश्चेत्युक्तरीत्याबाधितविषयत्वादित्यर्थः ॥ दृष्टांताभावादिति ॥ मुसलाहतैकक्षणवृत्तिपरमाण्वात्मकघटाख्यदृष्टांतस्वरूपेतत्रसाध्यसाधनयोःसत्वेचविप्रतिपत्तेरितिभावः ॥ तस्यावस्तुत्वादिति ॥

सतएवत्वयाक्षणिकत्वस्यसाधनीयत्वेनावस्तुनस्तत्साधनमनुपयुक्तमितिभावः ॥ ७ ॥ शून्यमतेति ॥ शून्यजगत्कारणत्वाभिधायिमाध्यमिकमतेत्यर्थः ॥ अतंत्रयेति ॥ देशकालवस्तुभ्यःपरिछेदरहितमित्यर्थः ॥ असंगस्येति ॥ निष्क्रियस्येत्यर्थः । स्पष्टमेवंसुधायां । संत्रीयतेनेनेतिसंवृत्तिरविद्या ॥ ॐ नासतोदृष्टत्वात् ॐ ॥ असतःशून्यस्यजगत्कारणत्वंनयुक्तं असत्कारणत्वस्यलोकेऽदृष्टत्वादितिभावः । त्वद्रीत्यात्वांबोधयामीत्यतआह ॥ दृष्टोवेति ॥ नेतिवर्तते अप्रयोजकत्वंशंकते ॥ नन्वदृष्टमपीति ॥ ॐ उदासीनानामपिचैवंसिद्धिः ॐ ॥ एवमसतःकारणत्वेसति उदासीनानांहेयोपादेयधीविषयत्वराहित्यादुदासीनानांगगनारविंदादीनामसतांसकाशात्सौरभ्यादिकार्यसिद्धिः स्यादित्यर्थः । तेर्केप्यप्रयोजकत्वंशंकते ॥ खपुष्पादीनामिति ॥ अन्यत्रेत्यनुवादः शून्यादितिव्याख्या परमार्थतोत्पद्येतेत्यन्वयः । विपरिवर्ततेविपरीतज्ञानविषयोभवति उक्तदोषः अन्यत्रादृष्टत्वरूपः असतएवशून्यस्यैव ॥ ॐ नाभावउपलब्धेः ॐ ॥ जगदभावःशून्यव्यतिरेकेणनास्तीतिनयुक्तं उपलब्धेः सदित्युपलभ्यमानत्वादित्यर्थः ॥ बाधविरोधादिति ॥ तथात्वेकिंतुशून्यमेवेतिस्यादितिभावः । स्वाप्नस्यगजादेः ॥ ॐ वैधर्म्याच्चनस्वप्नादिवत् ॐ ॥ स्वप्नजाग्रत्वादिवन्नेदंजगदसत् कुतःवैधर्म्यात् स्वप्नएवायंनजाग्रदितिबाधविषयत्वाख्यवैलक्षण्यादित्यर्थः । जाग्रत्वंजाग्रदभेदः ततःजगतःसकाशात् ॥ ८ ॥ ॐ नभावोनुपलब्धेः ॐ ॥ भावःज्ञानात्मकंजगदितिनयुक्तं तथाऽननुभवादित्यर्थः ॥ अतीताधिकरणन्यायेनेति ॥ सदितिदृष्टत्वादितिन्यायेनेत्यर्थः । ननुययोःसहोपलंभस्तयोरभेदोयथाघटरूपयोः सहोपलभ्येतेचनीलतद्ज्ञाने परस्परव्यतिरेकेणानुपलब्धेरित्यनुमानंमानमित्याशंक्याह ॥ नचेति ॥ इतरेतराश्रय-

Sri Gargeshwari Digital Foundation

त्वमिति ॥ प्रत्यक्षस्यभ्रांतित्वे अनुमानप्रामाण्यंतस्मिंश्चसतिप्रत्यक्षस्यभ्रांतित्वमित्यन्योन्याश्रयत्वमित्यर्थः ॥ **स्ववृत्तिविरोधेनेति** ॥ स्वस्यैवक्रियात्वेनकर्मत्वेनचवृत्तिविरोधादित्यर्थः । एतच्चपरमतेन सिद्धांतेसाक्षिणःस्वप्रकाशत्वांगीकारात् अतएवदोषांतरमाह ॥ **अज्ञानइति** ॥ ज्ञानप्रागभावादौज्ञानावरणसंवृतौचव्यभिचारः । नहिज्ञानाभावादिरपिज्ञानंविरोधादितिभावः ॥ **असिद्धिरिति** ॥ ज्ञानस्वरूपत्वस्यासम्मतेरितिभावः ॥ ॐ **क्षणिकत्वाच्च** ॐ ॥ ज्ञानस्यक्षणिकत्वात्पदार्थानांस्थायित्वाच्चनाभेदइत्यर्थः ॥ ॐ **सर्वथानुपपत्तेश्च** ॐ ॥ नसर्वबौद्धमतंयुक्तं सर्वश्रुत्यादिविरुद्धत्वेनसर्वथानुपपन्नत्वादित्यर्थः । उक्तंप्रथमाधिकरणमारभ्यवक्ष्यमाणंसमाप्तिपर्यंतं बौद्धेनश्रुत्यंप्रामाण्यस्यानभ्युपगमात्तंप्रतितद्विरोधाभिधानमयुक्तामित्यतआह ॥ **एतच्चेति** ॥ ९ ॥ **सदसदुभयमिति** ॥ सदित्येकः असदितिद्वितीयः सदसदात्मकमितितृतीयः सदसद्विलक्षणमितिचतुर्थः सत्वेसतिसद्विलक्षणमितिपंचमः असत्वेसत्यसद्विलक्षणमितिषष्ठः सदसदात्मकत्वेसतिसदसद्विलक्षणमितिसप्तमइतिसप्तप्रकारोपेतमित्यर्थः ॥ ॐ **नैकस्मिन्नसंभवात्** ॐ ॥ एकस्मिन्जगतिसत्वादिसप्तप्रकारानयुक्ताः कुतः असंभवात् अप्रामाणिकत्वेनासंभावितत्वादित्यर्थः । विरोधपरिहारायोक्तं ॥ **व्यवस्थितेति** ॥ देशादिभेदेनेत्यर्थः । सर्वमपि प्रकारसप्तकमपि । तत्राप्यस्माभिर्दोषाभिधानादितिभावः । असिद्धंचसर्वत्रदोषदर्शनमित्याह ॥ **सदसत्प्रकारेति** ॥ व्यवस्थितेतियोज्यं ॥ **शरीरावच्छेदमिति** ॥ यथाघटगतंपरिमाणंघटाकाशेप्रतीयतेनतद्व्यतिरेकेणतस्यस्वतःपरिमाणमस्ति तथात्मनोनस्वतःपरिमाणंकिंतुदेहपरिमाणमेवतत्रप्रतीयते अतोदेहसमानपरिणामवत्वमित्यर्थः ॥ ॐ **एवंचात्माकात्स्न्यं** ॐ ॥ एवंचात्मनःकायपरिमाणत्वेसत्यात्मनःपिपीलि-

SGDF Sri Gargeshwari Digital Foundation

कादेहस्थस्यगजशरीरप्राप्तौतत्राकात्स्न्यंसर्वदेहाव्यापित्वंस्यादित्यर्थः ॥ जैनमतप्रसंगेति ॥ निरसनीयत्वेनबुद्धिप्रसक्तेजैनमतेप्रसक्तमित्यर्थः । अतिरेकः आधिक्यं ॥ ॐ नचपर्यायादप्यविरोधोविकारादिभ्यः ॐ ॥ पर्यायादपिक्रमादपिक्रमात्तद्देहपरिमाणत्वांगीकारादपि अविरोधोनचभवति कुतः विकारादिभ्यःविकारित्वानित्यत्वादिदोषप्राप्तेरित्यर्थः ॥ ॐ अंत्यावस्थितेश्चोभयनित्यत्वादविशेषात् ॐ ॥ अंत्यस्यमुक्तिगतात्मपरिमाणस्यावस्थितेस्तदवछेदकतयानित्यदेहावश्यंभावेनोभयस्यमुक्तात्मतद्देहयोर्नित्यत्वादद्यतनदेहानामपिनित्यत्वंस्यात् देहत्वाविशेषादित्यर्थः । किंचातइतिप्रश्नोत्तरमाह ॥ तथासतीति ॥ व्याचष्टांवदतु । इदंकिमित्यतआह ॥ तच्छरीरमिति ॥ ॥ १० ॥ प्राबल्यादिति ॥ शक्तिसूर्यगणपत्यादीतरदेवापेक्षयापशुपतेर्वेदपुराणादौमोहनार्थंजगत्सृष्ट्यादिकर्तृत्वसर्वोत्तमत्वादेरुक्तत्वेनतदवलंबेनप्रवृत्तपाशुपतमतस्यात्यंतास्मन्मतविरोधितयाप्राबल्यादित्यर्थः । मायां प्रकृतिं ॥ ॐ पत्युरसामंजस्यात् ॐ ॥ पत्युःपशुपतेः नजगत्कारणत्वं कुतः असामंजस्यात् पारतंत्र्यादिदोषवत्वेनतस्यासमीचीनत्वादित्यर्थः । एषशब्दस्य आईशइतिविग्रहः गुणःशकारस्यव्यत्ययेनषकारइत्यभिप्रेत्याह ॥ आसमंतादीशस्येति ॥ मीब्हुषइत्यस्यार्थः अभीष्टसेचकस्येति । वयाइत्यस्यबंधकइति वयबंधनइतिधातोः ॥ कथंबंधकत्वमतउक्तं ॥ अहंकाररूपेणेति ॥ तस्यतदभिमानित्वादितिभावः । इरावशब्दार्थोन्नमिति ॥ ॐ संबंधानुपपत्तेश्च ॐ ॥ पत्युरशरीरत्वाज्जगताकार्यकर्तृभावसंबंधानुपपत्तेश्चनपत्युःकारणत्वमित्यर्थः ॥ ॐ अधिष्ठानानुपपत्तेश्च ॐ ॥ पृथिव्याद्यधिष्ठानानुपपत्तेश्चनपत्युःकारणत्वमित्यर्थः ॥ ॐ करणवच्चेन्नभोगादिभ्यः ॐ ॥ कारकजातमेवतस्यकरणवद्देहइवातोनसं-

SGDF
Sri Gargeshwari Digital Foundation

बंधानुपपत्तिरितिचेन्न भोगादिभ्योःदुःखाद्यनुभवरूपभोगोत्पत्तिमरणाख्यदोषेभ्यइत्यर्थः । कारकग्रामस्य करणसमुदायस्य ग्रहादिव्यावर्तनायसाक्षादित्युक्तं । तत्रापि अस्मदादिशरीरेपि असंभवात्पुनःसृष्टिकाले उपादानहानयोरितिसत्सप्तमी ॥ उक्तपक्षावेवेति ॥ संबंधानुपपत्तेः करणवच्चेदित्युक्तशरीराभावतद्वत्वपक्षावित्यर्थः ॥ ॐ अंतवत्वमसर्वज्ञतावा ॐ ॥ शिवस्यदेहवत्वे अंतवत्वंपरिछिन्नत्वमशरीरत्वेसर्वज्ञताभावःस्यादित्यर्थः ॥ इच्छाग्रहीतेति ॥ यज्ञदत्तस्तुनैवमितिभावः ॥ अनेनेति ॥ शरीराभावेज्ञानस्यैवायोगेनेत्यर्थः । ज्ञानं ईशस्य ॥ सूत्रकृतानिरस्तमिति ॥ आत्मनिचैवंविचित्राश्चहि । सर्वोपेताचतद्दर्शनात् । विकरणत्वान्नेतिचेत्तदुक्तमित्यादावित्यर्थः ॥ प्रमाणविशेषैरिति ॥ श्रुतिरूपैरित्यर्थः । श्रुतौ अंगंदेहंप्रत्यंगंकरादिलक्षयामहेजानीमः ॥ देहस्येति ॥ व्यक्तिशब्दोक्तस्येत्यर्थः ॥ ॥ ११ ॥ पूर्वोक्तन्यायेन असामंजसादित्यनेन महावाममतमाह ॥ शक्तिरेवेति ॥ ॐ उत्पत्यसंभवात् ॐ ॥ नशक्तेर्जगकारणत्वं कुतः उत्पत्यसंभवात् स्त्रीमात्रादपत्योत्यत्यसंभवादित्यर्थः । केषांचित् मध्यमवामानां ॥ ॐ नचकर्तुःकरणं ॐ ॥ कर्तुश्चानुग्राहकस्यशिवस्यकरणंज्ञानादिसाधनंनास्तीत्यर्थः । केचित्तु अणुवामाः ॥ ॐ विज्ञानादिभावेवातदप्रतिषेधः ॐ ॥ कर्तुःविज्ञानादिसद्भावेंगीकृतेतदप्रतिषेधः तस्यशैवमतस्याप्रतिषेधोनकृतइत्यर्थः ॥ अनुमतमेवस्यादिति ॥ तथाचापसिद्धांतइतिभावः ननुतदपित्वन्मतविरोधित्यतआह ॥ तच्चेति ॥ ॐ प्रतिषेधाच्च ॐ ॥ सकलश्रुत्यादिविरुद्धत्वाच्चासमंजसंशक्तेयमतमित्यर्थः ॥ १२ ॥ इतिश्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यां शर्कराश्रीनिवासविरचितायां द्वितीयाध्यायस्य द्वितीयःपादः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १७ ॥

SGDF Sri Gargeshwari Digital Foundation

श्रीगुरुभ्योनमः ॥ अध्यात्मेति ॥ आत्मानंदेहमधिकृत्यवर्तमानमिंद्रियादीत्यर्थः ॥ अंतिमत्वादिति ॥ तस्याः सन्निहितत्वेनप्रथममविचारविषयत्वेनतद्विचारश्चतुर्थपादइतिभावः ॥ उक्तेति ॥ जगत्कारणत्वादीत्यर्थः ॥ अभ्युपगतार्थद्वयइति ॥ श्रुत्यर्थत्वेनाभ्युपगतपरापरतत्वरूपद्वये अन्यतरार्थेजगतिश्रुतीनामप्रामाण्यप्राप्तावन्यार्थेब्रह्मजत्कारणत्वादावनाश्वासप्रसंगादित्यर्थः । प्रकारांतरेणोक्तोपयोगमाह ॥ जगत्स्वरूपेति ॥ नन्वत्रपादेसूचीकटाहन्यायेन वक्ष्यमाणक्रमानुसारेणाधिभूताधिदैवपरमात्मजीवेतिवक्तव्यं अतःकथंजीवादित्वेनग्रहणमित्यतआह ॥ अत्रेति ॥ जीवादिविचारस्यबह्वर्थविषयकत्वेन जिज्ञासुंप्रत्यभ्यर्हितत्वादल्पाचतरत्वाच्च क्रमोल्लंघनमित्यर्थः । नन्वधिभूताधिदैवेष्विति कथं अव्ययंविभक्तीत्यादिनाव्ययीभावेसति तस्याव्ययीभावश्चेत्यव्ययत्वादव्ययादावसुपइतिसुपोलुकाभाव्यत्वादितिचेदुच्यते । नात्राव्ययीभावोयेनोक्तदोषः किंतुकर्मधारयएव । तत्राधिभूतेत्यत्राधिराधिक्यार्थः । एवंचाधि अधिकानिचतानि भूतानिचेत्यधिभूतानि भूतानामाधिक्यंच कार्यकारणसाहित्येनेत्यभिप्रेत्य तस्यतात्पर्यमाह ॥ सकारणकार्यभूतानीति ॥ कारणमव्यक्तादिकार्यमन्नादि तत्सहितपंचभूतानीत्यर्थः । वक्ष्यमाणरीत्याविद्यादिशब्दानामन्योपलक्षकत्वादितिभावः । अधिदैवेत्यत्राधिरैश्वर्यार्थः । ततश्चाधि ईश्वराणिचतानिदैवतानिचेतिविग्रहमभिप्रेत्यतत्तात्पर्यमाह ॥ तदभिमानिदेवतेति ॥ सकारणकार्यभूताभिमानिदेवतेत्यर्थः । आकाशोत्पत्तीत्येतदुपपादनायभूतेष्वित्याद्युक्तं ॥ असंभवीति ॥ आकाशोत्पत्तिविनाशाकर्तृत्वादितिभावः । आकाशोत्पत्तिसमर्थनेनैवासंभवेनिवृत्ते किंश्रुत्यविरोधेनेत्यतउक्तं ॥ श्रुतिविरोधेनेति ॥ आकाशोत्पत्तिश्रुतेःश्रुत्यंतरविरोधेनाप्रामाण्येतद्दृष्टांतेनविशिष्टभागस्याप्यप्रामाण्यप्रसंगादितिभावः ॥ अतएवेति ॥ उत्पत्तिश्रुतेरप्रमाणत्वेनतद्विरोधाभावादेवेत्यर्थः ॥ भाक्तत्ववर्णनमिति ॥ आकाश

*४

NMDF
Sri Gargeshwari Digital Foundation

पदवाच्यानांभूताव्याकृततदभिमानिनांमध्ये अव्याकृतादीनांस्वरूपानादित्वपरत्ववर्णनमित्यर्थः ॥ **अन्यार्थतयेति** ॥ प्रादुर्भावतयेत्यर्थः । वाय्वादावित्यनंतरमनुवृत्तसंभूतशब्दस्येतियोज्यं । कुतइत्यतआह ॥ **नहीति** ॥ ॐ नवियद श्रुतेः ॐ ॥ वियदनुत्पत्तिमन्नभवति कुतः अश्रुतेः अनुमितिश्रुत्यभावादित्यर्थः ॥ **नियमेनेति** ॥ क्वचिदभावसद्भावेपि पृथक्प्रमाणस्योपन्यासादितिभावः ॥ ॐ **अस्तितु** ॐ ॥ अस्त्येववियदुत्पत्तिश्रुतिरात्मनआकाशइत्यादिकेत्यर्थः ॥ ॐ **गौण्यसंभवात्** ॐ ॥ अनादित्वश्रुतिर्गौणी गौणानादिपरा अन्यथोत्पत्तिश्रुतिबाहुल्यासंभवादित्यर्थः । सूक्ष्मोप्रतिघातः अतींद्रियः बाह्येंद्रियागोचरः आकाशपदेनात्मनआकाशइत्यत्रत्येन ॥ **भूताकाशेति** ॥ भूताव्याकृततदभिमानिरमागणेशावित्यर्थः ॥ **रूपित्वादिति** ॥ भौतिकरूपित्वादित्यर्थः । नीलिमा नीलरूपवान् ॥ **पराधीनविशेषेति** ॥ अत्राकाशस्यमूर्तपदार्थसंबंधरूपः रमायासिसृक्षत्वरूपः पराधीनविशेषोनुव्याख्यानानुसारेणद्रष्टव्यः ॥ **सर्वेति** ॥ आकाशपदवाच्यसर्वेत्यर्थः । कुतइत्यतआह ॥ **भूतइति** ॥ अनादिपदार्थस्यस्वरूपतोत्पत्त्यभावस्यभूतबाधितत्वादित्यर्थः । नन्वनयाव्यवस्थयाबहुवाक्यविरोधनिरासेपि अनुभवयुक्तिविरोधस्तुस्यादेवेत्यतआह ॥ **अनेनेति** ॥ उत्पत्तिश्रुतिप्राबल्यनिरूपणेनसाक्ष्यनुभवस्य विभुत्वयुक्तेश्चाव्याकृताकाशस्वरूपानादित्वविषयत्वेनसाधकाशत्वादितिभावः ॥ **असंभवयुक्तीति** ॥ अनादित्वे उत्पत्तिश्रुतिबाहुल्याद्यसंभवयुक्तीत्यर्थः ॥ ॐ **शब्दाच्च** ॐ ॥ अथहवावेतिश्रुतेश्चानादित्वश्रुतिर्गौणी उत्पत्तिश्रुतिमुख्यार्थेत्यर्थः । पुरुषप्रकृतिकालानांदेहोत्पत्याद्युत्पत्तेःसत्वेनकथंनित्यत्वोक्तिरित्यतआह ॥ **पुरुषादिपदैरिति** ॥ प्राणश्रद्धयोर्जीवचैतन्यस्यसकलजीवचैतन्यग्राहकपुरुषपदेनैव नित्यवर्गेगृहीतत्वाद्देहादेश्चभौतिकानीत्यनित्यवर्गेग्रहणात्किमर्थंपृथग्गृहणमित्यतआह ॥ **पुरुषपदेनेति** ॥ अधिकमनो

SGDF Sri Gargeshwari Digital Foundation

वृत्तिज्ञानं तस्यप्रलयेप्यपरिलोपादितिभावः । पृथग्ग्रहणेनापिज्ञाननित्यत्वंकथंज्ञापितमित्यतउक्तं ॥ सपरिकरयोरिति ॥ देहज्ञानादिपरिकरविशिष्टयोरित्यर्थः । प्राणश्रद्धापदप्रवृत्तिनिमित्तभूतपरिकरविशिष्टयोर्नित्यानित्यत्वंपरिकरधर्माणांमध्ये कस्यचिन्नित्यत्वंकस्यचिदनित्यत्वंविनानुपपन्नमितिपरिकरभूतमनोवृत्तिज्ञानविशेषस्यनित्यत्वंदेहादेरनित्यत्वं परिकरयोर्ग्रहणेनज्ञापितंभवतीत्यर्थः ॥ उक्तप्रतिज्ञाद्वयेति ॥ पुरुषादयोनित्याः प्राणादयोऽनित्याइतिप्रतिज्ञाद्वयेत्यर्थः ॥ तत्प्रकारश्चेति ॥ चतुष्टयात्मकआकाशश्चतुर्भिरपिभागैरुत्पद्यते उक्तायाउत्पत्तेश्चतुर्ष्वपिसत्वात् अवकाशतदभिमानिस्वरूपभागेननोत्पद्यतइतिप्रागेवोक्तइत्यर्थः । उपरि उत्तराधिकरणे ॥ मुख्यार्थत्वदर्शनादिति ॥ नहिपरमात्मनोमुख्योत्पत्तिरस्ति येनतत्रानुत्पत्तिमच्छब्दस्य मुख्यार्थःस्यादितिभावः ॥ ॐ स्याच्चैकस्यब्रह्मशब्दवत् ॐ॥ यथैकस्यैवब्रह्मशब्दस्यहरौमुख्यत्वं अन्यत्रामुख्यत्वं तथैकस्यैवानुत्पत्तिवाचिशब्दस्यविष्णौमुख्यत्वेप्यन्यत्रामुख्यत्वंस्यादित्यर्थः ॥ कारणेति ॥ पूर्णरूपप्रवृत्तिनिमित्तभावाभावरूपेत्यर्थः ॥ ॐ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॐ ॥ आकाशेप्यनुत्पत्तिवाचिशब्दस्यमुख्यत्वे इदंसर्वमसृजतेतिप्रतिज्ञाविरोधःस्यात् कुतः अव्यतिरेकात् आकाशस्यसर्वमध्यपातितत्वादित्यर्थः । आत्मावेत्यादिस्पष्टंसादित्वप्रतिपादकशब्देभ्यइत्यर्थः । ननुगौण्यसंभवादित्यत्रासंभवादित्यनेनैवश्रुतिबाहुल्यस्यलाभाच्छब्देभ्यइत्येतत्पुनरुक्तमित्यतआह ॥ अनेनेति ॥ असंभवप्रतियोगिनःश्रुतिबाहुल्यस्यशब्देभ्यइत्यनेनोक्तेतद्विवरणरूपत्वमितिभावः । इदमित्यनुवादः ॥ ॐ यावद्विकारंतुविभागोलोकवत् ॐ ॥ यावदित्यवधारणेयावद्विकारंविक्रियमाणएवार्थोविभागोविभक्तः अल्पशक्तिमान् लोकवत् घटवदित्यर्थः । आकाशेत्यनुवादः परंपरयेतिव्याख्या आकाशाद्वायुरित्युक्तपरंपरयेत्यर्थः ॥ असित्वमिति ॥

SGDF
Sri Gargeshwari Digital Foundation

द्रव्यत्वस्यसंयोगविभागाविनाभावादितिभावः । नन्वथहवावनित्यानिपुरुषःप्रकृतिरात्माकालइतिप्रकृत्यादीनांत्रयाणांनि
त्यत्वस्योक्तेःकथंतद्विभागेनजायंतइत्युत्पत्तिरुच्यतइत्याशंक्यपरिहरति ॥ नचास्येति ॥ अनेनेति ॥ प्रकृत्यादेरपिविका
रित्वसाधकविशेषप्रमाणोदाहरणेनेत्यर्थः ॥ १ ॥ तासामिति ॥ प्राच्यादिदिक्स्थितपरमात्मबाहुविशेषाणांधर्मज्ञाना
दिरूपप्रधानवायुपुत्रइत्यर्थः । योयंपवते बीजतेसैषादेवतानादिरित्यर्थः । गौणार्थत्वंस्वरूपानादित्वरूपं ननुभाष्योदाहृत
श्रुतावाकाशादिपदैर्भूतान्येवोच्यंतेतेभ्यश्चमुख्यवायोःस्वरूपनित्यत्वमेवविशेषइत्यतआह ॥ नचाकाशपदेनेति ॥ नि
म्लोचोस्तमयः ॥ एवंविधस्येति ॥ नित्यत्वव्याप्तोक्तबहुहेतुमतउत्पत्तिरनुभवबाधितेत्यर्थः ॥ ॐ एतेनमातरि
श्वाव्याख्यातः ॐ ॥ एतेनाश्रुतेरित्यादिप्रागुक्तहेतुसमुदायेनमातरिश्वावाय्वनुत्पत्त्यादिपरशब्दोपिगौणत्वेनव्याख्या
तइत्यर्थः । एतेनेत्यनेनपरामृष्टहेतुसमुदायंक्रमेणाह । अनुत्पन्नत्वेनाश्रुतत्वादिनामुख्यानुत्पत्त्यनुपपत्तेरित्यंतेन ॥ प्रमा
णविरोधेनेति ॥ नजायतेम्रीयतइत्यादीश्वरस्यानादित्वप्रतिपादकप्रमाणविरोधेनेत्यर्थः । कुतइत्यतआह ॥ पराधी
नेति ॥ तथाचोत्पत्तेःपारतंत्र्यरूपत्वेनतदनंगीकारेस्वातंत्र्यमनिवार्यमितिभावः ॥ द्वयोर्युक्तमिति ॥ तथात्वेद्वयोरपि
सर्वोत्तमत्वप्राप्तेरितिभावः । तदप्यस्त्वित्यतआह ॥ अन्योन्येति ॥ परस्पराधीनत्वानधीनत्वयोरित्यर्थः । वायोः
सर्वोत्तमत्वेविष्णुस्तदधीनइत्यंगीकार्यं । विष्णोःसर्वोत्तमत्वेवायुस्तदधीनइत्यंगीकार्यं । एकस्यैवोच्चत्वंनीचत्वंविरुद्ध
मितिभावः । व्यूह्य समूहीकृत्य स्वात्मानंनियामकत्वेन कथमनेनस्मृतिवचनेनश्रुतियुक्तिपरिहारइत्यतआह ॥ अत्रेति ॥ प
रात्परनित्यत्वमित्यस्यव्याख्यानंस्वातंत्र्यलक्षणमिति परनित्यत्वमित्यस्यदेहादेरपिनित्यत्वमिति ॥ सम्यगनित्यतेति ॥
पार्थिवादिवद्रूपचयापचयशून्येभ्यइत्यर्थः ॥ अतिशयेननित्यतोच्यतइति ॥ उपलक्षणमेतत् अतिशयितचेतनत्वंसर्वदे

NMDF
Digital Foundation

वोपास्यत्वंवृत्तिज्ञानप्रवाहोदयनिम्लोचाभावेनतस्योदयनिम्लोचाभावश्चोच्यतइतिनयुक्तिविरोधोपीतिग्राह्यं । अमुख्यमु
ख्याभिमानिनौप्रवहप्रधानवायू विरोधंशंकते॥तैत्तरीयेति ॥ तेजःपूर्वैवेति ॥ तत्तेजोऽसृजतेत्युक्तेरितिभावः । प्रागेवमू
लतएव ॥ २ ॥ सत् ब्रह्म । सौम्येतिसंबुद्धिः इदं अस्य ॥ ॐ असंभवस्तुसतोनुपपत्तेः ॐ ॥ सतोब्रह्मणअसंभवस्त्वनु
त्पत्तिरेव कुतः अनुपपत्तेः असतःसकाशात्सज्जन्मनोकाप्यदर्शनेनानुपपत्तेरित्यर्थः । तर्हितस्याःकागतिरित्यतआह॥अनुप
पत्तिश्रुतिश्चेति ॥ व्यवस्थास्वरूपानादित्वरूपा॥ सिद्धेति ॥ सिद्धार्थेत्यर्थः । अतएव उक्तव्यवस्थायाव्यवच्छेद्यत्वा
देव ॥ सतइत्यनेनैवेति ॥ सत्वंस्वातंत्र्यमुद्दिष्टमितिभारतोक्तेरितिभावः । तेनैवसच्छब्देनगतिः अस्वतंत्ररूपो
पाधिः एतदेवाह ॥ गगनेति ॥ कथंप्राणःसदितिप्रश्नोत्तरमाह ॥ महत्त्वादिति ॥ स्मृतिंचाहेति ॥ हेदेव
त्वंकविःसर्वज्ञोजश्च तथापिभवान् शक्त्यां भार्यायां गुणानां कर्मणां अदृष्टानां योनौ हेतावजायां प्रकृतौ रेतोगर्भं
आदधे स्थापितवान् । ततस्तस्याःप्रकृतेःसत्प्रमुखावायुप्रधानावयंयदर्थेयत्प्रयोजनायबभूविम तेतवकिंकरवामेत्यर्थः
॥ उपचयेति ॥ उत्तरोत्तरमुपचयोधिकइत्यर्थः । विशेषितत्वंविशिष्टित्वं विकारवद्देहसंबंधएवतस्यनस्वतोविकारइ
तिभावः । कारणत्वात् उपादानत्वात् ॥ तद्धर्मादेरिति ॥ अतोनाविकारइत्यनेनपुनरुक्तमितिभावः । भगवद
भिन्नत्वानुवादप्रतीतिनिरासायाह ॥ एकैवेति ॥ तथात्वेइच्छाद्यभेदेनोक्तःस्यादितिभावः । अविभिन्नेत्यादेःप्रयो
जनांतरमाह ॥ एतेनेति ॥ ३ ॥ ननुतेजउत्पद्यतेनवेत्यविचार्यपरमात्मनोजायते अन्यतोवेतिविशेषविचारकरणम-
युक्तमित्यतउक्तं ॥ एवमिति ॥ तर्ह्याकाशाविषयेतत्किंनविचार्यतइत्यतउक्तं ॥ वियदादीनांचेति ॥ तद्ब्रह्मवा
युद्वारेति वायुलक्षणावांतरकारणव्यवधानेनेत्यर्थः ॥ अविरोधादिति ॥ अन्यनिषेधाभावादितिभावः ॥ ॐ तेजो

SGDF
Sri Gargeshwari Digital Foundation

तस्तथाह्याह ॐ ॥ यथावियदादितथातेजोप्यतःभगवतएवोत्पद्यते कुतः हियस्मात्तत्तेजइतिश्रुतिराहेत्यर्थः ॥ देव तात्वादिति ॥ तथाचश्रुतिद्वयस्यापिनिमित्तपरत्वेनविरोधप्राप्तौवायोरग्निरितिश्रुतेर्देवताद्वारत्वमात्रपरत्वेनव्यवस्थां वक्तुमयमायासइतिभावः । ननुवाय्वादिशब्दानामुभयपरत्वेनोपादनत्वमात्रग्रहणेविरोधाभावस्तदवस्थएवेत्यतआह ॥ उपादानशक्तिश्चेति ॥ तत्तेजोऽसृजतेतिश्रुतेःब्रह्मणोभूतवाय्वनुप्रवेशेनतद्भूतोपादानत्वशक्तिप्रेरकत्वेनापिकारण त्वप्रतिपादकत्वेनवायोरग्निरितिश्रुतेर्ब्रह्मनैरपेक्षेणोपादानत्वप्रतिपादकत्वेविरोधप्राप्तौब्रह्मप्रेरितोपादानत्वशक्तियुक्तत्वरूप द्वारवत्वप्रतिपादकत्वेनवायोरग्निरितिश्रुतेर्व्यवस्थांवक्तुमयमायासइतिभावः ॥ ४ ॥ प्रत्यक्षमूलव्याप्तिकत्वेनयुक्तेःप्राब ल्यमुक्त्वाश्रुतिमूलव्याप्तिकत्वेनापितदाह ॥ तथाचश्रुत्यंतरमिति ॥ तत्तेजइति ॥ तत्तेजोरमाख्यमैक्षताविचारमक रोत् । किमित्यहंबहुरूपंस्यांतदर्थंजगदुत्पादयामीति इत्थंविचिंत्य तत्तेजोपोऽम्नामकप्राणसहितं तदाभिमन्यमानं अबा ख्यं भूतमसृजत् यस्मादादौतेजसएवापोजातास्तस्मादद्यापि पुरुषः यत्रक्वचिद्देशे कालेवा शोचतिरोदतेस्वेदतेतिस्विद्य तेवातत्तत्रापस्तेजसएवजायंतइतिहिप्रसिद्धमित्यर्थः ॥ ॐ आपः ॐ ॥ आपोप्यतएवजायंतेयस्माद्ब्रह्मैवेदमितिश्रुति स्तथाहेत्यर्थः । तर्ह्यसूत्रितत्वंस्यादित्यतआह ॥ सूत्रपदामिति ॥ तद्विषयंतेजोगतभगवद्विषयं ॥ पूर्वंन्यायेनैवेति ॥ द्वारत्वप्रतिपाकत्वन्यायेनेत्यर्थः ॥ ५ ॥ साक्षादन्यद्वारावेति ॥ नवियदश्रुतेरेवेनमातरिश्वाव्याख्यातइत्यधिक रणाभ्यां आकाशवाय्वोः साक्षाद्ब्रह्मजातत्वे तेजोतस्तथाह्याह आपइत्यधिकरणाभ्यां भूतवाय्वादीनामाकाशादिद्वारा ब्रह्मजातत्वेचसिद्धेसतीत्यर्थः ॥ द्वारविषयेति ॥ अवांतरकारणविषयेत्यर्थः । तत्रकोटिद्वये किमस्येत्यादिप्रश्न द्वयोत्तरमाह ॥ तत्रश्रुतीति ॥ शंकायामित्यर्थः । सावकाशत्वादिनाव्यवस्थास्त्वित्याह ॥ निरवकाश

त्वेनेति ॥ श्रुतिद्वयस्येतिवर्तते । अन्यतरसावकाशत्वमाशंक्यनिराकरोति ॥ नचेत्यादिना ॥ बहु-वाक्येति ॥ ताअन्नमसृजंततताआपोन्नमसृजंत अद्भ्यएवतत्ध्यन्नाद्यंजायतइत्यादिहुवाक्येत्यर्थः ॥ तस्मादिति ॥ तस्मादन्नस्याप्कार्यत्वादेवयत्रक्वचदेशेवर्षतितत्रैवभूयिष्टमन्नंभवति । अन्यथासिद्धिंनिरस्यति ॥ अद्भ्यएवेति ॥ तदन्नाद्यंप्रसिद्धान्नप्रभृतिपार्थिवमद्भ्यएवजायतेनान्यस्मादित्यर्थः । अशितंभक्षितं त्रेधापुरीषमांसमेदोरूपेण ॥ लिंगा दिति ॥ वृष्टिजन्यत्वाद्यत्वपुरुषाद्यात्मनापरिणामरूपादित्यर्थः । उक्तश्रुतिविरोधादिति पृथिवीजन्यौषधिजन्यत्वप्रति पादकौषधीभ्योन्नमितिश्रुतिविरोधादित्यर्थः॥ बहुकल्पनापातादिति ॥ अन्नस्याजन्यत्वमौषधिजन्यत्वंपृथिव्याश्चाज न्यत्वंचेतिबहुकल्पनापातादित्यर्थः ॥ मुख्यार्थेति ॥ साक्षादजन्यत्वरूपेत्यर्थः ॥ ॐ पृथिव्यधिकाररूपश ब्दांतरादिभ्यः ॐ ॥ अन्नंपृथिव्यैव नप्रसिद्धान्नं कुतः अधिकारात् तत्तेजोसृजतेत्यादिभूतप्रकरणात् । यत्कृष्णंतद न्नस्येतिकृष्णरूपात् पृथिवीवान्नमितिशब्दांतरात् वेदोनाप्रमाणमपौरुषेयत्वादितियुक्तेश्चेत्यर्थः ॥ तासामिति ॥ तासांतेजोबन्नादिदेवतानांमध्यैकैकदेवतांत्रिवृतंत्रिवृतंस्वाभिमन्यमानभूतेनसहान्योन्यप्रविष्टामकरोदित्यर्थः ॥ भूतवि षयत्वादिति ॥ अन्नंचभौतिकमेवनभूतमितिभावः । ननुदेवतानामन्योन्यप्रवेशे एकैकत्रकार्यंत्रयेणभाव्यंतत्कथमित्य तोयदग्नेरित्यादिवाक्यंप्राप्तंतस्यार्थः । अग्नेर्यद्रोहितंलोहितंरूपंतत्तेजसोरूपंतेजोभिमानिश्रीरूपसंभवं अग्नेर्यच्छुक्लंरूपंतदपां रूपमम्नामकवायुरूपजन्यं अग्नेर्यत्कृष्णंरूपंतदन्नाभिमानिरुद्ररूपसंभवं ॥ जानीयादिति ॥ तेजोशितमितिव दिति ॥ तत्रतेजसएवभक्षणासंभवात् यथातेजःशब्दःतैजसपदार्थपरस्तथापृथिवीवाचकोन्नशब्दःपार्थिवपदार्थपरइ- त्यर्थः । प्रत्यक्षवत् साक्षिवत् पद्मस्वर्णगतपीतयोर्लोकेऽवांतरविशेषदर्शनान्नभाष्येपुनरुक्तिःशंक्या ॥ ६ ॥

SGDF Foundation

तदभावेति ॥ आदिपदोक्तसंहारकर्तृत्वाभावेत्यर्थः । यथाकथंचित् उक्तप्रकारद्वयेनापि तदेवव्यनक्ति ॥ तस्येति ॥ भाक्तार्थत्वेनेति ॥ रुद्रोमाविशांतकइति श्रुतेर्विष्णुसंहृतभिन्नपदार्थसंहर्तृस्वरूपविभागविषयत्वेनेत्यर्थः ॥ युक्तीति ॥ क्वचिदपिविष्णोःसंहारकर्तृत्वेनांगीकारेपिपितृत्वरूपयुक्तिविरोधानिस्तारादित्यर्थः । असि आविशेति मध्यमपुरुषानुरोधेनाह ॥ रुद्रत्वमिति ॥ मेत्येतदस्मच्छब्दादेशरूपंनिषेधार्थकंचतंत्रेणोपात्तमितिभावेनाह ॥ मामाविशेति ॥ मेत्यस्यानुवृत्तिमत्वाह । मामाप्ययस्वेति ॥ ॐ तदभिध्यानादेवतुतल्लिंगात्सः ॐ ॥ सतुविष्णुरेवसंहर्ता कुतः संसारमोक्षस्यतदभिध्यानात्तस्यभगवतोभिध्यानमिछातदधीनत्वात् । किंततइतिचेत् तल्लिंगात् । तस्मान्मोक्षस्यभगवदिच्छाधीनत्वलिंगात् सपरमात्मासंहारकर्तृत्वेनानुमीयतइत्यर्थः । किंचातइतिप्रश्नोत्तरमाह ॥ तदिच्छेति ॥ तत्कृतइत्यनंतरंमोक्षइत्यनुवर्ततेभूयश्चेतिचशब्दाद्वीप्सालोपइत्याशयेनभूयोभूयइत्युक्तं । तत्वभावादित्यस्यार्थोयथार्थध्यानाच्चेति ॥ शक्तस्यैवेति ॥ प्रामाणिकत्वाल्लयस्तावदंगीकार्यः । सचकार्यत्वात्सकर्तृकः कर्ताचशक्तएवभवेच्छक्तश्चविष्णुरेवेतिसंहर्तेतिभावः । ईरितमित्यस्यनपुंसकत्वेक्रियाशब्दवृत्तयोगादाह ॥ सृष्ट्यादिकमिति ॥ पूर्वत्रापीत्यर्थः । तेनसमस्तमित्यस्यनविशेष्यानुक्तिदोषः । आख्यारूपेनामशरीरेयस्यासावितीन्प्रत्ययार्थः ॥ संहर्तृत्वेति ॥ कलसंहरणइतिधातोरितिभावः ॥ ममत्वेति ॥ अनेनममत्वादिदोषयुक्तत्वाख्यसाधनधर्मावच्छिन्नसाध्यव्यापकरूपोपाधिरुक्तोभवति ॥ ७ ॥ उत्तरयति ॥ श्रुतिविगानमिति ॥ ॐ विपर्ययेणतुक्रमोत उपपद्यतेचॐ ॥ लयक्रमः विपर्ययेणतुसृष्टिक्रमाद्विपर्ययेणैवभवति कुतः अतोयःक्रमाद्युक्रमाच्चेतिश्रुतेरेव तर्हि लोकविरोधइत्यतउक्तं ॥ उपपद्यतेचेति ॥ पूर्वोत्पन्नानांसामर्थ्याधिक्याद्विपर्ययउपपद्यतेचेत्यर्थः । उत्तरमाह ॥ एते

SGDF Sri Gargeshwari Digital Foundation

नेति ॥ क्रमशब्दस्यव्युक्रमपरत्ववर्णनेत्यर्थः तत्रापिक्रमशब्दस्यव्युक्रमपरत्वादितिभावः ॥ लौकिकानामिति ॥ अनेनपूर्वोत्पन्नत्वात्पूर्वलयइत्यत्रसामर्थ्याभावउपाधिरित्युक्तंभवति ॥ सन्निधानमिति ॥ पदार्थस्वारस्यानुसारेणोक्त्वातेषामितिबहुवचनानुरोधेनाह ॥ प्रथमावेति ॥ पूर्वव्याख्यानेतुवीप्सयैवबहुवचनोपपत्तेरितिभावः । सन्निधीयतेसन्निहितोभवति ॥ ८ ॥ अक्षरादिति ॥ अत्रसर्वशब्दस्यषष्ठ्यंततयाविपरिणतस्यविलयशब्देनाप्यन्वयादितिभावः ॥ लिंगेति ॥ क्रमादुत्पन्नयोर्मनोविज्ञानयोःक्रमाद्विलयाख्येत्यर्थः ॥ ॐ अंतराविज्ञानमनसीक्रमेणतल्लिंगादिति चेन्नाविशेषात् ॐ ॥ विज्ञानमनसीविज्ञानमनस्तत्वे अंतरा विनाक्रमेणव्युक्रमेणान्येषांलयः कुतः तल्लिंगात् तत्रोक्तेर्थेमनसश्चेत्यादिश्रुत्युक्ताक्रमादुत्पन्नयोर्विज्ञानमनसोःक्रमाल्लयाख्यलिंगादितिचेन्न अविशेषात् विज्ञानमनसोरुत्पत्तिक्रमेणैवलयइत्यत्रविशेषप्रमाणाभावाद्युक्रमाद्विलयश्चेत्यविशेषप्रमाणाच्चेत्यर्थः ॥ नचसामर्थ्येति ॥ पूर्वोत्तरलययोःक्रमेणाल्पाधिकसामर्थ्ययोःप्रयोजकत्वेनमनोविज्ञानयोश्च सामर्थ्याधिक्यमेतेषामित्युक्तरीत्याक्रमेणाधिकाल्पसामर्थ्यवत्वादितिभावः ॥ समसामर्थ्यस्यापीति ॥ स्मृतौपूर्वोत्पन्नानांसामर्थ्याधिक्यायोगव्यवच्छेदकावधारणद्यभावादितिभावः । वाक्तदभिमानिन्युमामनसितदभिमानिनिरुद्धे तन्मनोज्ञानआत्मनि विज्ञानतत्वाभिमानिनि लीयतइतिस्मरेदितिवाक्यशेषार्थः ॥ ॐ चराचरव्यपाश्रयस्तुस्यात्तद्व्यपदेशोभाक्तस्तद्भावभावित्वात् ॐ ॥ अत्रचरेतिचंचलत्वान्मनोरूपमिंद्रियंतज्जन्यंज्ञानंचोच्यते अचरेत्यचंचलत्वान्मनस्तत्वंविज्ञानतत्वंचोच्यते स्यादितिसंभावनायां सचासौव्यपदेशश्चतद्व्यपदेशस्तथाचतद्व्यपदेशःमनोविज्ञानमितिशब्दःचराचरव्यपाश्रयःस्यात् । यद्यपिमनस्तत्वांतःकरणविज्ञानतत्वावबोधरूपचतुष्टयविषयकःसंभावितः तथापिप्राणःमनोमनसश्चविज्ञानमितिश्रुतौ तद्व्यपदेशस्तुभाक्तः अंतःकरणावबोधरूप

CC-DF
Sri Gargeshwari Digital Foundation

भागविषयएवनतुमनोविज्ञानविषयकः नचांतःकरणावबोधकविषयकत्वेनुपपत्तिरस्ति कुतः तद्भावभावित्वात् अत्रत दितितंत्रं तत्राद्यःसप्तम्यंतश्चराचरपरामर्शकः चराचरशब्दौचचेतनाचेतनात्मकसर्वपरौ द्वितीयश्चषष्ठ्यंतोमनःपरामर्शकः त थाचतेषुचराचरेषुस्थावरजंगमात्मकसर्वविषयेतस्यमनसोभावेनधर्मेणालोचनेनावबोधस्यभावित्वादुत्पन्नत्वादित्यर्थः ॥ **अध मानामिति** ॥ उभयत्रापितत्वानांनीचक्रमेणाभिव्यक्तेरितिभावः । देहस्येत्यपरोक्षापेक्षया व्यक्तावपरोक्षे नीचक्रमेणव्य क्त्यंगीकारएवसर्वोत्तमस्यहरेरंतेपरोक्षज्ञानमितियुज्यतइतिभावः ॥ ९ ॥ **ॐ नात्माश्रुतेर्नित्यत्वाच्चताभ्यः ॐ** ॥ आत्मापरमात्मानलीयतेकुतः अश्रुतेःब्रह्मलयस्याश्रवणात् ताभ्योनित्योनित्यानांसनित्योनिर्गुणःसनित्योविभुरित्यादि श्रुतिभ्यस्तस्यनित्यत्वाच्चेत्यर्थः ॥ **उक्तत्वादिति** ॥ असंभवस्तुसतोनुपपत्तेरित्यत्रेतिशेषः ॥ **प्रेरयतीति** ॥ अ तोनपुनरुक्तिरित्याशयः ॥ **अपिहितत्वेति** ॥ आछादितत्वेत्यर्थः । प्रादुर्भावश्चेति तपसस्तन्महिनाजायतैकमितिश्रुतिवि शेषेणेत्यर्थः अपिहितार्थेप्रयुक्तइतिलयादर्शनादितिभावः । श्रुत्यंतरबलादित्यनंतरमर्थांतरंपरिकल्प्यतइत्यनुवर्तते परत्वंप्र तिगुणशब्दोक्तब्रह्मादेरवधित्वात्तत्रचापादानेपंचम्याभाव्यत्वादाह ॥ **गुणेभ्यइति** ॥ अप्रधानेभ्यइत्यर्थः ॥ **देहनि त्यत्वस्येति** ॥ अन्यथास्वरूपनित्यषष्ठ्यतनित्यपदोक्तजीवाधिक्यालाभादितिभावः ॥ १० ॥ असंगतिंपरिहरति ॥ **नित्यत्वादेवेति** ॥ विवक्षितत्वात् अनादिपदेनतत्रजीवस्यप्रागभावाप्रतियोगित्वे उत्पत्तेरेवेति प्रलयेसर्वोत्प त्तिनिमित्तकारणदृष्टाश्रयत्वेनजीवसत्वस्यांगीकार्यत्वेनतस्यप्रागभावप्रतियोगित्वेतदानींजीवाभावेननिराश्रयादृष्टासंभवात् कारणाभावेनजगदुत्पत्तेरेवाभावप्रसंगादित्यर्थः ॥ **नचाकाशादीनामिति** ॥ अनादित्वरूपहेतुविशिष्टानामप्यव्या कृताकाशादीनांपराधीनविशेषलाभरूपोत्पत्तिमत्वेनव्यभिचारइत्यर्थः । तेषांपक्षसमत्वान्नव्यभिचारइत्याह ॥ **असंप्र-**

SGDF Sri Gargeshwari Digital Foundation

तिपत्तेरिति ॥ उत्पत्तेरितिशेषः ॥ व्यधिकरणत्वादिति ॥ अनुमानस्यजीवानुत्पत्तिसाधकत्वेनप्रत्यक्षस्यदेहोत्पत्तिग्राहकत्वेनभिन्नविषयत्वादित्यर्थः ॥ ॐ ज्ञोतएव ॐ ॥ जानातीतिज्ञोजीवः अतःपरमात्मनःसकाशादुत्पद्यतएव कुतः अतएततेवाएतइतिश्रुतेरेवेत्यर्थः ॥ ॐ युक्तेश्च ॐ ॥ अनादिनोपिजनेर्युक्तत्वाच्चेत्यर्थः । उपाधेः देहस्य ॥ पराधीनेति ॥ जीवस्यदेहलाभएवपराधीनविशेषावाप्तिरूपोत्पत्तिरितिभावः ॥ ११ ॥ आत्मनइत्यनेनपुनरुक्तिंसर्वाभेदप्रतीतिंचनिवारयितुमाह ॥ सर्वस्येति ॥ सर्वस्वरूपत्वप्रतीतिमपाकर्तुमाह ॥ पूर्णाइति ॥ सर्वःपूर्णगुणत्वतइत्युक्तेरितिभावः । भाष्येशिनीतः बंधयतः ॥ व्याप्तत्वमणुत्वंचेति ॥ व्याप्तत्वंप्रतीयतइत्यनंतरंजीवस्येतिशेषः अणुत्वमित्यनंतरंजीवस्यप्रतीयतइतिशेषइतिविवेकः । जीवविषयेत्यनंतरंकिंत्वीश्वरविषयेतिशेषः परिशेषरूपयुक्तिंवक्तुंप्रसक्तंप्रतिक्षिपति ॥ नतावदित्यादिना ॥ नन्वात्मेंद्रियसन्निकर्षस्याप्रयोजकत्वादणोरात्मनोयुगपत्सर्वेंद्रियजन्यज्ञानमस्त्वित्यत आह ॥ नहीति ॥ अप्राप्तेति ॥ असंबंधेत्यर्थं निवर्तयति निष्पादयति ॥ उक्तदोषत्वादिति ॥ एवंचात्माकात्तत्स्न्यमित्यत्रपिपीलिकादेहप्राप्तौ अपूर्तिःस्यादित्यादिदोषोक्तेरित्यर्थः । ततःकिमितिचेदत्रप्रष्टव्यं किमंशाएवगमनादिक्रियांकुर्वंति उततत्समुदायः अथतदारब्धोवयवी आद्येआह ॥ तेषांचेति ॥ अंशानांप्रत्येकंगमनसामर्थ्यमस्तिनवा आद्येकश्चिदेकांदिशंगच्छेदपरस्त्वन्यां शरीरैकदेशगमनंभागांतरस्यान्यत्रगमनमतःशरीरविनाशःस्यात् द्वितीयेशरीरेक्रियानस्यात् नहियदैकांशोगच्छतितदंशेनापिगंतव्यमितिनियमोस्तीत्यर्थः । एकमत्यात्पक्षद्वयेप्यदोषइत्यतआह ॥ नहीति ॥ द्वितीयंदूषयति ॥ नचेति ॥ समुदायिभिन्नसमुदायाभावादितिभावः । तृतीयंव्याचष्टे ॥ नचांशेति ॥ एवंपरिशेषमुक्तानुमानंचाह ॥ तथाचेति ॥ सर्वभूतसंयोगित्वमेवव्याप्यत्वमितिभावः ॥ ॐ उत्क्रांतिगत्यागतीनां ॐ ॥

SGDF
Sri Gargeshwari Digital Foundation

अणुरेवजीवः कुतः उत्क्रांतिगत्यागतीनांहेतूनांसकाशात् उत्क्रांत्यादिमत्वादितियावत् ॥ प्रसंगादिति ॥ जीवस्योत्क्रांत्यादिकर्तृत्वोक्तौक्रियास्वातंत्र्यंसर्वकर्तृत्वमितितस्यस्वातंत्र्यमप्रतीतौतस्यात्यंतंनिषिद्धतयातदस्वातंत्र्यंस्मृतमत्रविचार्यतइत्यर्थः । स्वयमेवस्वेनैव ॥ स्मृत्यनुसारेणेति ॥ तत्रैकशब्देनान्यनिषेधादितिभावः ॥ ॐ स्वात्मनाचोत्तरयोः ॐ ॥ जीवस्योत्क्रांतिःस्वात्मनाचपरमात्मनैवनस्वतः कुतः उत्तरयोः उत्तरवाक्ययोःसकाशात् उत्तरवाक्यद्वयेतथाप्रतिपादनादितियावत् उच्चीयते ऊर्ध्वंनीयते अतोनपुनरुक्तिरितिभावः । नन्वेषह्येवेतिद्वितीयवाक्येस्वात्मशब्दाभावात् सूत्रयुत्तरयोरितिद्वितीयवाक्यग्रहणंकथमित्यतआह ॥ एषह्येवेतीति ॥ सुआनंदमादत्तइतिस्वात्मोच्यते एतदेवानंदमादत्तइत्यनेनोच्यतइतिभावः ॥ ॐ नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात् ॐ ॥ जीवोनाणुःकुतःअतच्छ्रुतेः व्याप्ताइत्यनणुत्वश्रुतेरितिचेन्नतस्याःश्रुतेर्ब्रह्मपरत्वात् कुतः इतराधिकारात् सआत्मेदंसृजतीतिपरस्यब्रह्मणःप्रकरणादित्यर्थः ॥ उपचर्यतइति ॥ यथाभवन्मतेमनोगतमेवदुःखाद्यात्मनिष्टतयोपचर्यतेतथेतिभावः । अतएव भगवत्परत्वादेव निरंतरोनिर्भेदः आतेनयातंमनसोजवीयसारथेयंवामृभवश्चक्रुरश्विना यस्ययोगेदुहिताजायतेदिवउभेअहनीसुदिनेविवस्वतः । निमिषश्चिज्जवीयसारथेनायातमश्विना अंतिषद्भूतुवामवइतिमंत्रद्वयंव्याचष्टे । हेअश्विनावित्यादिना ऋभवइत्यस्यार्थोदेवाइति यस्ययोगइति निमित्तसप्तमीत्यभिप्रेत्याह ॥ यत्संबंधादिति ॥ विवस्वतइत्यस्यतात्पर्यंभगवत्प्रसादेनेति दिवोदुहितइत्यस्यार्थोविद्योत्पन्नतत्वज्ञानइति अस्यजायतइतिश्रौतपदेनान्वयः उभेअहनीइत्यस्यार्थः जीवन्मुक्तिमुक्त्यवस्थेइति सूदिनइत्यस्यार्थःसाध्याविति जायतइत्यस्यवचनविपरिणामेनानुवृत्तिमभिप्रेत्याह भगवतइति भूत्वित्यस्यार्थोभवत्विति श्रुतौसदित्येतदवइत्यस्यविशेषणं ॥ ॐ स्वशब्दोन्मानाभ्यां ॐ ॥ स्वशब्दपर्यायात्मशब्दः उन्मानमपरिमितत्वं ताभ्यांचव्याप्यत्वश्रु

SGDF Sri Gargeshwari Digital Foundation

तेरीश्वरपरत्वमित्यर्थः ॥ आनंत्येति ॥ तत्रानंताइत्युक्तेरितिभावः ॥ ॐ अविरोधश्चंदनवत् ॐ ॥ जीवस्याणुत्वेप्यविरोधःदेहव्याप्तिविरोधाभावः कथं चंदनवत् हरिचंदनबिंदुवदित्यर्थः ॥ ॐ अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिहि ॐ ॥ चंदनबिंदोर्देहेकचित्सम्यगन्यत्रासम्यगित्यवस्थानविशेषाद्वैशेष्याद्व्याप्तिसंभवेपिजीवस्यतदभावान्नयुक्तादेहव्याप्तिरितिचेन्न । जीवस्याप्यवस्थितिवैशेष्याभ्युपगमात् कुतः हृदित्येषआत्मेतिश्रुत्याहृद्येवजीवस्यसम्यगवस्थित्युक्तेरित्यर्थः ॥ व्याप्त्यव्याप्तीति ॥ स्वरूपेणाव्याप्तिरंशैर्व्याप्तिरितिविवेकः ॥ ॐ गुणाद्वालोकवत् ॐ ॥ अणोरपिजीवस्यगुणाच्चिल्लक्षणाद्देहव्याप्तिःसंभवति कथं आलोकवत् आलोकस्यदीपादेःप्रकाशाख्यगुणेगहेनांतेव्याप्तिवदित्यर्थः । आलोकवत् दीपवत् आलोकस्यप्रकाशस्य उभयोरप्यालोकशब्दवाच्यत्वादेवंव्यवहारः ॥ घटादिरूपस्यैवेति ॥ नीलघटसंबंधबालार्कप्रभादौप्रतीयमानमारुण्यादिकंन्यायमतेपिनप्रभानिष्ठं तस्यशुक्लभास्वररूपत्वादितिभावः । ननुदीपेगच्छतिप्रभायागतिदर्शनेनक्रियावत्वाद्द्रव्यत्वमितिचेन्न । घटेगतेरूपस्यापिगतिदर्शनेनव्यभिचारात् अन्यथातत्रैवरूपस्यस्थितिःस्यादितिध्येयं प्रकाशस्यापिरूपंप्रतीयतइतिकिंनस्यादित्यतआह ॥ नहीति ॥ यद्यालोकेरूपंस्यात्तर्हिघटाद्यसंबद्धस्याकाशेविद्यमानप्रकाशस्यापिरूपंगृह्येत नचैवमस्ति अतोनरूपित्वमित्यर्थः ॥ दीपंविहायेति ॥ गुणस्तुरूपादिर्न द्रव्यव्यतिरेकेणवृत्तेरितिभावः ॥ विवादादिति ॥ उत्तराधिकरणेगुणस्यापिगंधस्यद्रव्यंविहायप्रवृत्तेर्वक्ष्यमाणत्वादितिभावः ॥ तदनुविधानेति ॥ दीपानुसारेणगमनागमनादिमत्त्वेनेत्यर्थः । तेजोबलैश्वर्यमहावबोधसद्वीर्यशक्त्यादिगुणैकराशिरितिस्मृतौतेजसिगुणत्वसंगृहायादिशब्दः कारणं उपादानं ॥ कारणांतरेति ॥ तदेवतत्रैव तैजसपरमाणवएवव्यणुकादिक्रमेणालोकमंडलमारभंतइत्येतच्चमानाभावादुपेक्ष्यतइतिभावः

SGDF
Sri Gargeshwari Digital Foundation

॥ अप्रतीतिप्रसंगादिति ॥ परैरकार्यद्रव्यस्यबहिरिंद्रियग्राह्यत्वानंगीकारेणचक्षुषातदप्रतीतिप्रसंगादित्यर्थः । तदवयवत्वादेवतेनसहगमनमित्यतआह ॥ नहीति ॥ कंथा पटः ॥ विरोधादिति ॥ प्रदीपावयवतमसोःसहावस्थानमेवनसंभवति तमसआलोकाभावरूपत्वेनविरोधादित्यर्थः ॥ क्रमेणैवेति ॥ पुनःपुनर्दीपागमापगमयोर्पुनस्तदवयवेषुविकीर्यमाणेषु उत्तरोत्तरंप्रकाशबाहुल्यंस्यादित्यर्थः ॥ तदैवोत्पन्नेति ॥ नूतनेत्यर्थः ॥ अनुभवविरुद्धमिति ॥ नूतनपटावयवानांविकीर्णतयाऽदर्शनादित्यर्थः ॥ घटादेरपीति ॥ सर्वमूर्तंघटेनस्पृष्टंमूर्तत्वाद्घटस्पृष्टपटवदित्यपिसाधयितुंशक्यत्वादितिभावः॥१२॥जीवस्येति ॥ एकमेत्युक्तस्येतिशेषः । तत् विभुत्वं तेषां अगस्त्यादीनां कथमित्यतोघटितघटनमेवैश्वर्यशब्दार्थमित्याह ॥ एतदेवेति ॥ अशक्यंकर्तुं अनिष्टंकर्तुं एकप्रकारोपेतस्यप्रकारांतरोपेततयाकर्तुंसामर्थ्यमित्यर्थः । अतइत्यस्यपरिहरतीत्यनेनान्वयायोगादाह ॥ अतोविरोधइति ॥ ॐ व्यतिरेकोगंधवत्तथाचदर्शयति ॐ ॥ अणोरपिजीवस्यांशैर्व्यतिरेकः विभागोस्तिकथंगंधवत् यथापुष्पाद्गंधस्यविभागस्तद्वत् कुतः तथातेनरूपेण अथैकएवेतिश्रुतिर्दर्शयतियतइत्यर्थः ॥ स्वरूपैक्यविषयत्वादिति ॥ एकएवसन्नित्युक्तेरितिभावः ॥१३॥ ॥ षड्विधेति ॥ उपपत्तिविशेषाणांषड्विधत्वादियमुक्तिः अतएवमृत्पिंडादिदृष्टांतैरुपपादनादित्यनेनोपपत्तिकथनंनानुपपन्नं ॥ तस्यतावदेवेति ॥ तस्यापरोक्षज्ञानिनोमोक्षेतावानेवविलंबः यावत्प्रारब्धाद्विमोक्षेत अथप्रारब्धक्षयानंतरमेवब्रह्मसंपद्यतइत्यर्थः । येनब्रह्मणाश्रुतेन ॥ मृत्पिंडादीति ॥ यथासौम्येकेनमृत्पिंडेनेत्यादिनेतिशेषः । यथा घटादीनांमृदात्मकत्वेनतज्ज्ञानेतज्ज्ञातमेवंसर्वजगतोब्रह्मात्मकत्वेनतज्ज्ञानेतज्ज्ञानमितिपराभिमतोर्थः । अतत्वावेदकत्वं मिथ्यावेदनपरत्वं ॥ ॐ पृथगुपदेशात् ॐ ॥ जीवोब्रह्मणःसकाशात्पृथक् भिन्नएव कुतः उपदेशात् भिन्नोजीवइतिश्रुतेरित्यर्थः ॥ ॐ तद्गुणसारत्वात्तद्व्यपदेशःप्राज्ञवत् ॐ ॥ जीवस्यतद्व्यपदेशोब्रह्माभेदकथनं तद्गुणसारत्वात् तस्यब्रह्मणोगुणः आनंदादिः तत्सदृशगुणःसारः स्वरूपंयस्यतद्गुणसारः तस्यभावस्तत्वं तस्मादेवनत्वभेदात् कथंप्राज्ञवत् यथाप्राज्ञःपरमात्माजगद्गुणसदृशस्वरूपत्वेनतदभिन्नउच्यते तथेत्यर्थः । गौण्यामुख्यया सादृश्यंनिमित्तीकृत्यप्रवृत्ततया ॥ अन्यत्राभिनिवेशादिति ॥ आग्रहादन्यइत्यर्थः ॥ उपजीव्येति ॥ धर्मिग्राहकत्वेनोपजीवेत्यर्थः । कथमित्यतआह ॥ जीवेति ॥ नाहंसर्वज्ञइति ॥ साक्षिणाजीवस्य यःसर्वज्ञइतिब्रह्मणश्चविरुद्धधर्माधिकरणतयावगमादितिभावः ॥ प्रमाणविरोधेति ॥ तत्वंपदमुख्ययोःसार्वज्ञासार्वज्ञविशिष्टयोरैक्यस्यविरुद्धधर्माधिकरणत्वयुक्तिविरुद्धत्वेनतत्वंपदयोश्चिन्मात्रलक्षकत्वंमायिनाप्यंगीकृतमित्यर्थः । तदेवव्यनक्ति ॥ लक्षणावृत्तावितिः ॥ तथालाक्षणिकार्थत्वेनलोकोत्तरप्रज्ञेनलोकोत्तमज्ञानवतेत्युपहासः देवानांप्रियोमूर्खइतिनिपातादलुक्समासः अनभिज्ञइत्यर्थः । तदेवव्यनक्ति ॥ नहीति ॥ लिंगतात्पर्यनिर्णयइत्युपक्रमादीनांतात्पर्यमात्रज्ञापकत्वेनशब्दार्थज्ञापकत्वायोगादिति । तर्हियापितात्पर्यज्ञापकत्वमित्युच्यतेइतिशंकते ॥ लिंगबलादिति ॥ अन्यार्थत्वादिति ॥ भेदपरत्वादित्यर्थः । तथाहि शकुनिसूत्रादिदृष्टांतबलेनसआत्मातत्वमसीत्यत्रातत्वमसीतिपदच्छेदेनभेदएवोच्यते नह्यभेदंप्रतिज्ञायभेददृष्टांताभिधानंयुक्तं अतएवैकमेवेत्येतत्समाभ्यधिकराहित्यप्रतिपादनेनभेदपरं एवमैतदात्म्यमित्यपि यथासौम्येत्यादिचप्राधान्यादिनैकविज्ञानेनसर्वविज्ञानपरं एवंचैकमेवाद्वितीयमितिभेदस्योपक्रमादितदात्म्यमिदंसर्वमितितस्यैवोपसंहारात् । अतत्वमसीतिनववारमभ्यासात् शास्त्रंविनाशास्त्रगम्येश्वरभेदस्याप्राप्त्यापूर्वत्वात् अथसंपत्स्यतइतिफलश्रवणात् येनाश्रुतंश्रुतंभवतीत्यर्थवादात् शकुनिसूत्रदृष्टांतैरुपपादनाच्चेति । अन्यत्रछांदोग्यभाष्यादौवदन्कर्मनिर्णये एवंगौणार्थतया ॥ समन्वयेति ॥ वैदिकशब्दानांरूढि-

SGDF Sri Gargeshwari Digital Foundation

योगौविनावृत्यंतरेणभगवत्परत्वनिषेधकंतद्वाक्यमित्यर्थः ॥ अर्थांतरेति ॥ योगस्याप्यावश्यकत्वप्रतिपादनावसरएवे त्यर्थः ॥ कश्चिदितिविशेषणादिति ॥ तेनार्थमात्रनिषेधादितिभावः । ननुतत्वमसीत्यादेर्गौणार्थमात्रप्रतिपादक त्वेनरूढ्यादिनार्थांतरप्रतिपादकत्वाभावाद्विरोधस्तदवस्थएवेत्यतआह ॥ साचेति ॥ सागौणीवृत्तिश्चपरकीयन्यायेन तत्वमसीतिपदच्छेदमभिप्रेत्यैव वस्तुतस्तुशकुनिसूत्रदृष्टांतानुसारेण सआत्माअतत्वमसि त्वंअतदसि तद्भिन्नोसि इति रूढ्याभेदप्रतिपादकत्वमेवेत्यर्थः ॥ १४ ॥ ब्रह्मन्ब्रह्मणि ॥ आनंत्यायेति ॥ कदापिनाशरहितमोक्षायसमर्थोभव तीत्यर्थः ॥ सफलमिति ॥ आनंत्यावाप्तिश्चनयुज्यतइतिभाष्ये उक्तत्वादितिभावः ॥ अत्रेति ॥ नहिसादिवि- नाशिनएतद्वयंयुक्तमितिभावः ॥ प्रतिबिंबस्यैवेति ॥ ब्रह्मप्रतिबिंबभूतस्येत्यर्थः ॥ नहीति ॥ प्रतिमुखादेरनि त्यत्वस्यैवदर्शनादितिभावः ॥ ॐयावदात्मभावित्वाचनदोषस्तद्दर्शनात्ॐ ॥ जीवस्यतदुपाधेश्चयावदात्मभा- वित्वादात्मापरमात्मायावत्कालंतिष्ठतितावत्कालसत्वान्नदोषः अनादिकर्मनिबंधानंत्याप्त्यनुपपत्तिरूपदोषोनास्ति कुतः तद्दर्शनात् तस्ययावदात्मभावित्वस्यनित्यःपरइतिश्रुतावुक्तेः चशब्दात्स्मृतेरित्यर्थः । नाशत्रयाभावमुपपादयति ॥ बिं बस्येत्यादिना ॥ आत्मानित्योजीवोनित्यइतिपादद्वयस्याभिन्नस्थानगतत्वान्नपुनरुक्तिरितिभावेनाह ॥ स्मृतिद्वय वचनाच्चेति ॥ भाष्योदाहृतश्रुतिस्मृतिभ्यांजीवस्वरूपस्यनित्यत्वंबाह्यदेहस्यानित्यत्वमित्येवोच्यतेनतुस्वरूपस्यैवप्रतिबिं बघटकत्वंनबाह्योपाधेरित्युक्तं । तथाचकथंताभ्यामुक्ताखिलार्थप्रतिपत्तिरित्यतःस्वयमुक्ताशेषार्थप्रतिपादकंप्रमाणांतरमाह ॥ उक्तंचैतदिति ॥ अन्यत्रचतुर्थतात्पर्ये कुतोन्यस्थितिरित्यतआह ॥ सर्वेति ॥ भवेत् विद्येत मास्तु प्रतिबिंबावस्थानमित्यतआह ॥ कथंचेति ॥ उपाधेश्चेति ॥ प्रथमतात्पर्यं ॥ १५ ॥ आनंदादि

SGDF Sri Gargeshwari Digital Foundation

स्वरूपत्वाभावइति ॥ आनंदीभवतीतिमुक्तौतद्वत्वोक्त्यातत्स्वरूपत्वाभावस्यैवोक्तेरित्यर्थः ॥ प्राणाभूतानीति ॥ यत्रजीवेप्राणाइंद्रियाणिभूतान्याकाशादीनिबंधकतयासम्यक्तिष्ठंति सपरमात्मप्रसादेनपरलोकंयातीतिभाष्योदात्तश्रुतिशेषार्थः । व्यवधानस्य प्रतिबंधकस्य एवमावरणत्वेनाभिमतस्यावरकत्वंनसंभवतीत्युक्तं इदानीमावरणमेवनेत्याह ॥ अत्रेति ॥ संसारइत्यर्थः ॥ तस्यैवेति ॥ जीवस्याहमित्यादिनावरणानुपपत्त्युक्त्याज्ञानाभावरूपाज्ञानस्यैवानुपपत्तेरुक्तत्वादित्यर्थः । नह्यावरणाभावेऽज्ञानाभावेनिर्निमित्तंभवितुमर्हतीतिभावः ॥ वैपरीत्यादिति ॥ शरीरस्यानंदाद्यनुभवरूपभोगायतनत्वेनभोगप्रतिबंधकत्वानुपपत्तेरितिभावः ॥ अतएव इदानीमावरणाभावादेव ॥ ॐ पुंस्त्वादिवत्वस्यसतोभिव्यक्तियोगात् ॐ ॥ जीवस्यसतस्तुसतएवप्राग्विद्यमानस्यैवास्य ज्ञानानंदादिरूपत्वस्य पुंस्त्वादिवत् बाल्येऽसतःपुंस्त्वस्त्रीत्वादेरिवाभिव्यक्तियोगात् अभिव्यक्त्याभितःसुष्ठुव्यक्त्यानिमित्तेनयोगादानंदीभवतीत्यादिव्यपदेशोपपत्तेरित्यर्थः । कालतःयौवने ॥ तन्निमित्तेति ॥ ज्ञानाभावनिमित्तत्रिगुणात्मकस्वगुणाछादिकाविद्यांगीकारादित्यर्थः । वक्ष्यमाणानुरोधेनाह ॥ केषांचिदिति ॥ तदामुक्तौ ॥ ॐ नित्योपलब्ध्यनुपलब्धिप्रसंगोन्यतरनियमोवान्यथा ॐ ॥ अन्यथावरणानंगीकारेमध्यमजीवानामानंदादेर्नित्योपलब्ध्यनुपलब्धिप्रसंगःनित्यमानंदादेरुपलब्धिस्तथा अनुपलब्धिः आनंदोपलब्ध्यभावोदुःखाद्युपलब्धिरितियावत् तदुभयंसमंस्यात् अन्यतरनियमः मुक्तियोग्यानामानंदादेरुपलब्धिनियमः तमोयोग्यानामानंदाद्यनुपलब्धिनियमःस्यादित्यर्थः व्यक्तिरित्यनुवादः ऋग्भाष्यादिसंग्रहायाह ॥ मोक्षयोग्यानामिति ॥ नन्वसुरादीनामानंदस्वरूपत्वाभावादेवतदनुपलब्धिरित्यतस्तस्यतात्पर्यमाह ॥ दुःखाद्यनुभवएवेति ॥ स्वरूपदुःखस्यावरणाभा-

SGDF
Sri Gargeshwari Digital Foundation

वेवंषयिकसुखोत्पत्तेरप्ययोगादितिभावः । आवरणाभावस्योपलब्धिप्रत्येवप्रयोजकत्वेनकथमनुपलब्धिःसंपद्यतइत्यत आह ॥ **दुःखाद्यनुपलब्धिश्चेति** ॥ **समैवेति** ॥ मध्यममनुष्याणांमिश्रस्वरूपत्वेनसुखदुःखस्यचोपलब्धिः समैवस्यादित्यर्थः । नित्यानंदइतिस्मृत्यनुसारेणाह ॥ **एवमिति** ॥ अन्यथोक्तयावदर्थाप्रतिपादकत्वेनप्रकृतासंगते रितिभावः । संसारदशायांतन्मात्रोपलब्ध्यभावादाह ॥ **तद्भोग्याइति** ॥ १६ ॥ अन्यःईशात् शंकते ॥ **जीवकर्तृत्वेति** ॥ तत्कर्मफलं संपद्यते प्राप्यते अनन्ययोगेन अन्यसाहाय्यत्यागेन हियस्मादतएवेत्यन्वयः । तथाचस्ववचनवि रोधइतिभावः । तर्हिलाघवायजीवस्यैवकर्तृत्वमस्त्वित्यतआह ॥ **नखल्विति** ॥ ॐ **कर्ताशास्त्रार्थवत्वात्** ॐ ॥ जीवःकर्तैव कुतःतथात्वेशास्त्रस्यविधिनिषेधरूपस्यप्रयोजनवत्वलाभात् अन्यथातद्व्यर्थ्यापत्तेरित्यर्थः ॥ **परगतेति** ॥ ईश्वरगतेत्यर्थः ॥ **विवेकाग्रहइति** ॥ इदंकर्तृत्वंनेश्वरगतमपितुमद्गतमेवेत्यात्मीयतयाकल्पनमस्त्येवेत्यर्थः । तादृशं काल्पनिककर्तृत्वोपेतं ॥ ॐ **विहारोपदेशात्** ॐ ॥ नजीवस्यकर्तृत्वंभ्रांतिकल्पितं कुतः विहारस्यक्रीडाकर्तृत्वस्यो पदेशात् मोक्षेपिजक्षन्क्रीडन्नित्यभिधानादित्यर्थः । मोक्षेपीत्यस्यार्थोविगलितेति निवृत्ताशेषभ्रमेपीत्यर्थः । अतएवाह ॥ **कैवल्यइति** ॥ केवलं याथार्थज्ञानादिस्वरूपाविर्भावरूपइत्यर्थः ॥ ॐ **उपादानात्** ॐ ॥ मोक्षाद्युद्देशेनसाधना द्युपादानस्यप्रत्यक्षसिद्धत्वान्नकाल्पनिकंकर्तृत्वमित्यर्थः ॥ **अतिप्रसंगादिति** ॥ परकृतभोजनेस्वकृतानुसंधानमा त्रेणस्वात्मनःतृप्तिःस्यादित्यर्थः ॥ ॐ **व्यपदेशाच्चक्रियायांनचेन्निर्देशविपर्ययः** ॐ ॥ जीवःकर्तैव कुतः उपासनारूपायांक्रियायांतस्यकर्तृत्वेनव्यपदेशात् आत्मानमेवलोकमुपासीतेत्यभिधानात् जीवस्यकर्तृत्वंनचेत्तर्हिनिर्देश स्यात्मानमित्यस्यविपर्ययः आत्मेतिव्यत्यासःस्यादित्यर्थः । लोकंसर्वाधारं ॥ **नहीति** ॥ कर्तुःक्रियाश्रयत्वेनतदभा

वेनिराश्रयक्रियायोगादितिभावः ॥ ॐ**उपलब्धिवदनियमः**ॐ ॥ यथोपलब्धौज्ञानेऽनियमःइच्छानुसारेणप्राप्त्य भावस्तथाक्रियायामपीत्यर्थः । निरूपिते अपेक्षिते ज्ञानविशेषणमेतत् साध्यसमःपक्षसमः कर्मणीवज्ञानेप्यनियम स्यप्रत्यक्षेणानिश्चयादितिभावः । स्वज्ञानेतावदयंप्रत्यक्षः परकीयेप्रकारांतरमाह ॥ **नहीति** ॥ व्याप्रियतेव्यापा रवान्भवतियेनपरकीयज्ञानेच्छादेरतींद्रियत्वेनानिश्चयइतिभावः ॥ **तत्साधनइति** ॥ स्वाभिलषितज्ञानायतत्सा धनंसंपादयति तच्चप्रत्यक्षसिद्धं तथाचतेनतदनुगुणज्ञानेच्छानुमानमनंतरंफलविशेषेणज्ञानविशेषानुमानंचसुलभमितिभावः ॐ **शक्तिविपर्ययात्** ॐ॥ नजीवःस्वतंत्रः कुतःजीवशक्तेःपरमात्मशक्त्यपेक्षयाविपर्ययादल्पत्वादित्यर्थः ॥ ॐ **समा ध्यभावाच्च** ॐ ॥ समाधेःअलंबुद्धेःजीवेअभावाच्चतस्यास्वातंत्र्यमित्यर्थः ॥ **स्वतंत्रस्येति** ॥ स्वसत्तादौपरानपेक्षस्यैवे त्यर्थः ॥**किमिति**॥कुतइतिप्रश्नोत्तरंकिमित्यर्थः । स्वतंत्रःक्रियायां ॥ ॐ **यथाचतक्षोभयथा** ॐ ॥ यथातक्षावर्धकीउभ यथावेतनदातृनियम्यत्वेनकर्तृत्वेनचोच्यते तथाजीवोपीशनियम्यः कर्तेत्यर्थः । चशब्दोदार्ष्टांतिकसमुच्चायकः ॥ **वचनचेत नेति** ॥ इत्थंकुर्विलिवचनानुसारेणकरणेनद्रव्यदानादिनाचतक्ष्णःशक्तेःकारयित्रधीनत्वबदित्यर्थः ॥ **गतःपक्षइति** ॥ तथाचापसिद्धांतइतिभावः॥**नजीवस्येति**॥कर्तृत्वशक्तेरीश्वराधीनत्वेतस्यैवकर्तृत्वादितिभावः॥ॐ**परात्सुतच्छ्रुतेः** ॐ॥ जीवस्यकर्तृत्वशक्तिःपरात्तुईशादेव कुतःतच्छ्रुतेः तस्यकर्तृत्वशक्तेरीश्वराधीनत्वस्यैव कर्तृत्वंकरणत्वंचेतिश्रुतिसिद्धत्वादित्यर्थः ॥ ॐ **कृतप्रयत्नापेक्षस्तुविहितप्रतिषेधावैय्यर्थ्यादिभ्यः** ॐ ॥ कृतंकर्म ईशः जीवस्यकर्मप्रयत्नादिकमपेक्ष्यैवतंप्रे रयति किमर्थंविधिनिषेधशास्त्रवैय्यर्थ्याभावाय वैषम्यादिनिरासायचेत्यर्थः । उक्तोपिवैषम्यनैर्घृण्यइत्यादिना ॥ **तत्क र्मेति** ॥ अपेक्ष्यकर्मेत्यर्थः ॥ **तत्प्रेरणइति** ॥ तादृशकर्मप्रेरणइत्यर्थः ॥ **इत्युच्यतइति** ॥ अतोनव्याह

IIT F
Sri Gangeshwari Digital Foundation

तिरितिभावः ॥ १७ ॥ **यवव्रीहिश्रुत्योरिति** ॥ यथायवैर्यजेतव्रीहिभिर्यजेतेतिश्रुत्योर्यवैर्वायजेतव्रीहिभिर्वायजेतेतिव्यवस्थितविकल्पेनविरोधपरिहारस्तथाजीवोंशोवानंशोस्त्वितिव्यवस्थितविकल्पेनांशानंशश्रुत्योर्विरोधपरिहारइत्यर्थः॥**वस्तुविकल्पेति** ॥ तत्रश्रुतिद्वयस्यनिरवधारणत्वेनोक्तरीत्याविकल्पसंभवेपिप्रकृतेश्रुतिद्वयस्यसावधारणत्वेनोभयथार्थग्रहेएकस्मिन्जीवाख्येवस्तुन्यंशत्वानंशत्वरूपद्वैरूप्यायोगादित्यर्थः ॥ **नचेति** ॥ यथैकस्यैवघटस्यदेशकालभेदेनसत्वासत्वंतथेत्यर्थः ॥ **समस्तेति** ॥ अत्रसर्वेषांतंतूनांपटाद्भेदाभेदांगीकारादेकस्येत्युक्तं एकस्यापितंतोःखंडपटाद्भेदाभेदांगीकारात्समस्तपटेति नानात्वात् विरुद्धार्थप्रतिपादकत्वात् ॥ ॐ **अंशोनानाव्यपदेशादन्यथाचापिदाशकितवादित्वमधीयतएके** ॐ ॥ जीवःपरमात्मनोंशएव कुतः नानाव्यपदेशात् पितापुत्रत्वादिनानाप्रकारेणतस्येशसंबंधित्वोक्तेः किंचब्रह्मदाशाब्रह्मकितवाइत्येकेशाखिनः दाशाःमत्स्यग्राहिणःब्रह्मकितवाःवंचकाः ब्रह्मेत्येवंब्रह्मणोदाशकितवादित्वंदाशकितवोपलक्षितसर्वजीवाभेदमधीयंतेपठंति एकेचअन्यःपरोन्योजीवइत्यन्यथाचभेदेनाधीयंते अतएतदुभयान्यथानुपपत्यांशत्वमित्यर्थः ॥ **वक्ष्यामइति** ॥ अंशोह्येषःपुत्रभ्रात्रित्यादिश्रुतिस्मृत्युदाहरणेनेतिशेषः । परेणेत्यस्यार्थःपरादिति अवइत्यस्यावमइति जातइतिव्यपदेशइतिशेषोक्तिः व्यंजकत्वादितिभावः ॥ **तज्ज्ञानंचदुर्लभमिति** ॥ कवीयमानःकइहप्रवोचद्देवंमनःकुतोअधिप्रजातामित्युत्तरार्धंतज्ज्ञानंचदुर्लभमित्याहेत्यर्थः । तद्व्याचष्टे ॥ **कोन्विति** ॥ कवीयमानइत्यस्यार्थःसर्वज्ञकल्पइति इहेत्यस्यप्रजास्विति ब्रह्मेतिशेषोक्तिः कुतइत्यस्यतात्पर्यंकस्यचेति अधीत्यस्याधिक्येनेति स्त्रियःसतीस्तांउमेपुंसआहुःपश्यदक्षण्वान्नविचेतदंधः कविर्यःपुत्रःसईमाचिकेतयस्ताविजानात्सपितुष्पितासदिति ऋचंव्याचष्टे ॥ **यइति** ॥ तांउइत्यस्यार्थः तानेवेति जइत्यस्यार्थः एवेति आङोर्थः सम्यगिति मदुपास्याइतिकोवक्ती

SGDF
Sri Gargeshwari Digital Foundation

त्याकांक्षायामाह ॥ एतद्दीर्घतमोवाक्यमिति ॥ उक्तंचानुव्याख्याने ॥ ॐ मंत्रवर्णात् ॐ ॥ पादोस्येतिश्रुतेश्च जीवईशांशइत्यर्थः ॥ ॐ अपिस्मर्यते ॐ ॥ नकेवलमंशत्वंश्रूयतेकिंतुममैनांशइतिस्मर्यतेपीत्यर्थः ॥ ॐ प्रकाशादिवन्नैवंपरः ॐ ॥ परोमत्स्यादिरूपोपरमात्माएवंजीववत् भिन्नांशोन कथं प्रकाशाद्यभिमानिवदित्यर्थः । चार्थःचशब्दार्थः ॥ भेदाभेदानुपपत्तिरिति ॥ मत्स्यादीनामभेदोजीवानांभेदइत्यनुपपत्तिरित्यर्थः ॥ भेदाभेदसाम्यादिति ॥ उभयोरपिखंडितत्वेनस्वोपादानेनतेजआदिनाभिन्नाभिन्नत्वेनकालाग्न्यादेरभेदःखद्योतादेर्भेदइतिकथमित्यर्थः ॥ ॐ स्मरंतिच ॐ ॥ जीवस्याभिन्नांशत्वंमत्स्यादेरभिन्नांशत्वंचस्मृतिकर्तारःस्मरंतिचेत्यर्थः ॥ इत्युक्तइति ॥ प्रथमभागवतेजगृहे पौरुषंरूपमित्यादिना यस्यांशांशेनसृज्यंतेदेवतिर्यङ्नरादयइत्यंतेनोक्तइत्यर्थः । द्वितीयंतुभवायास्यरसातलगतांमहींउद्धरिष्यन्नुपादत्तयज्ञेशःसौकरंवपुरित्यादिनोक्तेरित्यर्थः॥इंद्रारिव्याकुलंलोकंमृडयंतियुगेयुगेइत्युत्तरार्धंव्याचष्टे॥वराहादयइति॥ मृडयंतिसुखयंतीत्यभिधीयतइतिसंबंधः। परमित्यस्यार्थोऽभिन्नमिति । अव्यक्तमित्यस्याकार्यमितिअव्यूढगुणेत्यस्यानाद्यनपगतेति वस्त्वित्यस्यभगवत्स्वरूपेति पुनर्भवइत्यस्यसंसारीति इत्युच्यतइत्यन्वयः कृष्णशब्दस्यावतारेप्रसिद्धत्वेनकथं मूलरूप्येवेतिव्याख्यानमित्यतआह॥ कृष्णशब्दश्चेति ॥ ईज्यतेपूज्यते इदंवाक्यंमुक्तसेव्येमूलरूपप्रेयुक्तमितिभावः । तदेवस्वरूपांशस्यभवतीतिशेषोक्तिः कृष्णाद्यवतारइति तस्यकृष्णंप्रत्यर्जुनवाक्यत्वादितिभावः ॥ ॐ अनुज्ञापरिहारौदेहसंबंधाज्योतिरादिवत् ॐ ॥ जीवस्यदेहसंबंधान्निमित्तात्तदनुज्ञापरिहारौपरमात्मानुज्ञाधीनवृत्तिमोक्षौचस्तःकथंज्योतिरादिवत् यथाज्योतिरादेरध्यभिमान्यादेर्देहसंबंधात्सूर्याद्यनुज्ञाधीनप्रवृत्त्यादिस्तथेत्यर्थः॥ कनीनकेति ॥तारकेत्यर्थः रक्तेत्यर्थः ॥ उत्तरत्रेति ॥ब्रह्मांडबाह्यजलाभिमानीवरुणः अंतःशुद्धोदकसमुद्राभिमानीतदभिन्नांशःश्लेष्माभिमानी तद्भि

PDF
Sri Gargeshwari Digital Foundation

न्नांशइतिद्रष्टव्यमित्यर्थः ॥ स्वांशिकर्मेति॥ शरीरसंबंधित्वस्याभिन्नांशेपिसत्वाद्व्यभिचारः ततःस्वांशिकर्मानिर्मितेत्युक्तं शरीरसंबंधित्वंचतद्योग्यत्वंतेननमुक्तेषुभागासिद्धिः।मोक्षधर्मेचेतीति॥तत्रहिनशरीराणिभौतिकानिभवंतिभूतानिचेश्वरबुद्धिजातानितत्कथंतानितंबध्नीयुरित्युक्तेरितिभावः। अक्षरार्थश्च हेविशांपते इहचेतनवर्गेअस्मिन्लोकेयत्किंचिद्देहसंबद्धंतत्सर्वं ईश्वरबुद्धिजैःपंचभिर्भूतैराविष्टंबद्धं ईश्वरस्तु महत् महनीयःभूतंसर्वदाविद्यमानःनारायणःमुक्ताश्रयः विराट् नित्याभिव्यक्तिरूपःसगुणःस्वातंत्र्यादिगुणवान्भूतानिप्रलीयंतेयस्मिन्ततभूतप्रलयं अव्यक्तंतदभिमानिनीरमा तस्येशस्यशुश्रूषुःसेवाकर्तीतिप्रमेयदीपिकातोवगंतव्यः अस्त्वेतन्मूलरूपविषयं अवताराणांतुदेहसंबंधित्वंस्यादेवेत्यतआह ॥ अवतारप्रसंगादिति ॥ यत्तद्दर्शितवान्ब्रह्मरूपंहयशिरोभिदमितिहयग्रीवावतारप्रसंगइत्यर्थः ॥ स्वांशिकर्मेति ॥ देहसंबंधित्वादित्युक्तेस्वरूपासिद्धिः दृष्टांतस्यसाधनविकलताच अतःस्वांशिकर्मानिर्मितेत्युक्तं स्वांशिकर्मनिर्मितदेहसंबंधित्वस्यदृष्टांतेसत्वेपिपक्षेतदभावात् नञ्द्वयगर्भत्वंतथाचपक्षेविशेष्याभावेनदृष्टांतेविशेषणाभावेनविशिष्टाभावानुगमइतिभावः ॥ अतएवेति ॥ एवं प्रयोगद्वयस्यात्राभिमतत्वादेवज्योतिरादिवदितिदृष्टांतोयथेत्यादिनाविवृतइत्यर्थः अतोनभाष्यकारानभिमतमेतदितिभावः ॥ॐ असंततेश्चाव्यतिकरः ॐ ॥ जीवस्यासंततेरपूर्णत्वान्नमत्स्यादिसाम्यंनास्तीत्यस्याव्यतिकरःव्यत्यासाभावइत्यर्थः ॥ ॐ आभासएवच ॐ ॥ जीवईशस्याभासएवप्रतिबिंबएवमत्स्यादिस्तुनतथा अतोपिनोक्तव्यत्यासइत्यर्थः । रूपंरूपंप्रतिरूपोबभूवतदस्यरूपंप्रतिचक्षणाय । इंद्रोमायाभिःपुरुरूपईयतेयुक्ताह्यस्यहरयःशतादशेति ऋचंव्याचष्टे ॥ जीवसमुदायइति ॥ शृण्वेवीरमित्यादित्रिविधजीवसंघस्यप्रस्तुतत्वादेवमुक्तं मायाभिरित्यस्यार्थःसामर्थ्येनेति पुरुरूपइत्यस्यानंतबिंबरूपइति युक्ताइत्यस्यव्यूहशइति तदतिरिक्तेतिस्वरूपातिरिक्तेत्यर्थः । भाष्येयथाछायापुरुषाधीनातथैत

ज्जीवजातमेतस्मिन्नीशेआततमधीनमित्यर्थः । अनंशत्वश्रुतेर्गतिंचाहेत्यादिनालब्धमर्थंदर्शयति ॥ एवमिति ॥ १८ ॥ श्रुतिविगानमेवदर्शयति ॥ रूपंरूपमिति ॥ प्रकरणवशादिति ॥ श्रुतीनांपरस्परविरोधपरिहारात्मकपादरूपप्रकरणवशाच्छ्रुत्यंतरंप्रतिबिंबत्वाभावप्रतिपादकमनुमीयतइत्यर्थः । यद्यपिनैवांशोनैवसंबंधइत्यादिप्रत्यक्षश्रुतिरस्तितथापितस्याःस्पष्टंप्रतिबिंबत्वाभावप्रतिपादकत्वाभावादेवमुक्तमितिध्येयं । भेदःवैचित्र्यं एवमग्रेपि ॥ भवत्वेकइति ॥ तथाचश्रुत्यंतरविरोधादितिभावः ॥ ॐ अदृष्टानियमात् ॐ ॥ जीवानामीश्वरप्रतिबिंबत्वेप्यन्योन्यवैचित्र्यंसंभवति कुतः अदृष्टानांयोग्यतादिनामनियमाद्वैचित्र्यादित्यर्थः ॥ कारणांतरमिति ॥ पूर्ववाद्युक्तैकप्रतिबिंबत्वाभावरूपनिमित्तंविनानिमित्तांतरमित्यर्थः ॥ ॐ अभिसंध्यादिष्वपिचैवं ॐ ॥ इच्छादिष्वपिएवंवैचित्र्यमदृष्टवैचित्र्यादेवेत्यर्थः ॥ उत्तरेति ॥ उत्तरदोषवैचित्र्यादेवेत्यर्थः । तदभावेदोषवैचित्र्याभावे ॥ ॐ प्रदेशादितिचेन्नांतर्भावात् ॐ ॥ प्रदेशात्स्वर्गादिस्थानवैचित्र्याज्जीववैचित्र्यमितिचेन्न स्थानवैचित्र्यस्यापिअदृष्टवैचित्र्येंतर्भावात् तदधीनत्वादित्यर्थः॥युक्तेरविरुद्धत्वादिति॥जीवानांमिथोवैचित्र्यरूपयुक्तेरदृष्टवैचित्र्येणान्यथासिद्धत्वादुपोद्बलकाभावेनानुमितिश्रुतिर्जीवस्यसोपाधिप्रतिबिंबत्वाभावविषयेत्यर्थः ॥ १९ ॥ इतिश्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यांद्वितीयाध्यायस्यतृतीयःपादः संपूर्णः ॥ ॥ ॥ ॥ ॥ ॥

॥ श्रीगुरुभ्योनमः ॥ ॐ तथाप्राणाः ॐ ॥ यथावियदादयोजातास्तथाप्राणाइंद्रियाण्यपिजायंतइत्यर्थः । ॥ विप्रतिपत्त्यभावेनेति ॥ तेजआदेर्ब्रह्मान्यकार्यत्वेघर्मात्स्वेदादिदृष्टिवदत्रप्राणानांब्रह्मान्यकार्यत्वेप्रापकाभावेनविप्र

SGDF
Sri Gurudev Dattaprasad Foundation

तिपत्यभावेनेत्यर्थः ॥ ॐ गौण्यसंभवात् ॐ ॥ प्राणानादित्वश्रुतिःसूक्ष्मरूपेणानादित्वरूपगौणानादित्वपरा कुतः मुख्यानादित्वासंभवात्तथातदुत्पत्तिश्रुतिबाहुल्यासंभवादित्यर्थः । अन्यथोत्पत्तिश्रुतिबाहुल्यासंभवादितिवियदधिक रणीयभाष्यानुरोधेनाह ॥ एतस्माज्जायतइति ॥ नन्विंद्रियाणामुपचयंविनासंसारकारणमस्तिनवा नाद्यः उपचयवै य्यर्थ्यात् द्वितीयेआह ॥ उपचयादिति ॥ प्रलयेवियुक्तानामिति ॥ प्रलयकालेस्वोपचयकारणभूतैर्वियुक्तानामिं द्रियाणांप्रतिसृष्टिकालंप्राग्वियुक्तभूतैःपुनरुपचयइत्यर्थः । तथाचयस्मिन्प्रलयकालेऽनुपचयस्तदासंसारकारणत्वंनास्त्येव यदासृष्टिकालेसंसारकारणत्वंतदोपचयोस्त्येवेतिनोक्तदोषइतिभावः । नन्विंद्रियाणांभूतैरुपचयांगीकारोऽनुपपन्नः तथा त्वेतैजसानींद्रियाण्याहुरितितेषांतैजसाहंकारकार्यत्वप्रतिपादकप्रमाणविरोधादित्यतआह ॥ अत्राहंकारेति ॥ तैजसा हंकारोत्पन्नानामेवेंद्रियाणांभूतैरुपचयमात्रमुच्यतेनत्वहंकारकार्यत्वंनिषिध्यतइत्यर्थः । नन्वथापिप्राणाएवेदमग्रआसुस्ते भ्योभूतानिजज्ञिरइतिभूतानामिंद्रियजन्यत्वकथनमयुक्तं । तथात्वेतामसानितुभूतानीतितेषांतामसाहंकारकार्यत्वप्रतिपाद कप्रमाणविरोधादित्यतआह ॥ अहंकारोत्पन्नेति ॥ अन्योन्याश्रयवारणायसूक्ष्मेत्युक्तं केषांचिदेवसूक्ष्मप्राणानांभू तोपचयकारणत्वंतदन्येषांभूतोपचितत्वमितिव्यक्तिभेदेनान्योन्याश्रयत्वाभावादितिभावः । ननुप्रागभावाप्रतियोगित्वा दिनासाम्यसंप्राप्तिरिष्टैवेत्यतआह ॥ मुख्यनित्यतायामिति ॥ पराधीनविशेषतादिराहित्यादेरेवमुख्यनित्यताशब्दार्थ त्वादितिभावः ॥ अनेनेति ॥ परेणसाम्यसंप्राप्तेरितिस्वातंत्र्यमापादयतातेषामस्वातंत्र्यसूचनेनाल्पशक्तित्वादियुक्तयो पिसंगृहीताइत्यर्थः ॥ ॐ प्रतिज्ञानुपरोधाच्च ॐ ॥ सइदंसर्वमसृजतेतिप्रतिज्ञानुसाराच्चप्राणाउत्पत्तिमतएवेत्यर्थः । सर्वशब्देनप्राणानामपिगृहीतेरितिभावः ॥ १ ॥ इंद्रियाणामिति ॥ मनोव्यतिरिक्तेंद्रियाणामित्यर्थः । यदाहुर्वायुपु-

SGDF Sri Gargeshwari Digital Foundation

राणे ॥ **सर्वप्रमाणेति** ॥ सोनादिनापुण्येनपापेनचानुबध्यइत्यादिप्रमाणेत्यर्थः । नित्यमनुत्पत्तिमत् ॥ ॐ तत्प्राक्श्रुतेश्च ॐ ॥ मनउत्पत्तिमदेव कुतः तेभ्यःप्राणेभ्यःप्राक् पूर्वश्रुतेरेतस्मादितिमनउत्पत्तिश्रुतेरित्यर्थः ॥ **अतएवेति** ॥ उक्तरीत्यामनसोनादित्वेनपुंसोवियोगाभावात् नह्यमनाःपुमांस्तिष्ठतीत्युक्तयुक्तिविरोधेनेत्यर्थः ॥ **नचाविशेष्येति** ॥ अन्येंद्रियाण्यनित्यकोटौनिक्षिप्याविशेष्यमनसोनित्यत्वोक्तिविरोधइत्यर्थः ॥ २ ॥ नचेत्यस्यवाच्यमिति वक्ष्यमाणेनान्वयः ॥ **समाख्याश्रुताविति** ॥ नित्ययानित्ययास्तौमि ब्रह्मतत्परमंपदमिति श्रुतिर्वानित्या अनित्यावावस्मृतयश्चान्यावाचइतिसमाख्याश्रुतावित्यर्थः । अवतार्य उदाहृत्य ॥ **उत्पत्तीति** ॥ इंद्रियोत्पत्तिश्रुत्यानुकूल्याच्चेत्यर्थः । श्रुत्याश्रयत्वेपिवाचोनादित्वश्रुतेःसूक्ष्मरूपानादित्वपरत्वउत्पत्तिश्रुतेस्तु उपचयार्थत्वंकिंनस्यादित्यतआह ॥ **श्रुत्याश्रयत्वंनामेति** ॥ अन्यथाश्रुत्याधारत्वमात्रत्वेश्रुतेरपिवर्णात्मकत्वादितिभावः । ततःकिमित्यतआह ॥ **सदेति** ॥ ॐ तत्पूर्वकत्वाद्वाचः ॐ ॥ वाचःवागिंद्रियस्यतत्पूर्वकत्वान्मनःकारणत्वादुत्पत्तिमत्येववागित्यर्थः । साधारणत्वात् इंद्रियव्यवहारयोरितिशेषः ॥ **पूर्ववाक्यबलेनेति** ॥ व्यवहारस्यव्यवहारकारणत्वायोगेनतत्रप्राक् शब्देंद्रियपरत्वेसिद्धेतत्समभिव्याहृतोत्तरवाक्यस्थस्यापितस्येंद्रियपरत्वस्यैववक्तव्यत्वादितिभावः ॥ **नित्यत्वोपचारइति** ॥ एवंचवाग्वेतिश्रुतेरुपचरितार्थत्वान्नतद्विरोधइतिभावः । किंचेत्युक्तदोषंनिराह ॥ **नचेति** ॥ श्रुत्याश्रयत्वं नामेत्यादिनोक्तयुक्तिंनिरस्यति ॥ **अतएवेति** ॥ उपचयात्पूर्वंयोग्यतामात्रसत्वेप्युच्चारणासमर्थत्वेनतदर्थमुपचयस्यावश्यकत्वमितिभावः । षष्ठीभ्रमंनिरस्यति ॥ **मनःसकाशादिति** ॥ नकेवलंवागिंद्रियस्योत्पत्तिप्रतिपादकतस्मान्मन इतिश्रुतिबलाद्वाग्वावनित्येतिश्रुतेरुपचरितार्थत्वं किंतु अस्यांहिश्रुतिरवतिष्ठतइतिवाक्यशेषान्यथानुपपत्तिलक्षणांतरानु-

SGDF
Sri Gargeshwari Digital Foundation

पपत्यापीत्याह ॥ **एवमभ्युपगमएवेति** ॥ वागिंद्रियस्योत्पत्तिमभ्युपगम्यश्रुतेरुपचारितार्थत्वाभ्युपगमएवेतिभावः ॥ **नित्यत्वइति** ॥ सर्वथोत्पत्तिराहित्यलक्षणनित्यत्वइत्यर्थः ॥ **तस्यापीति** ॥ नित्यत्वप्रतिपादकत्वेनप्रतीयमानायाअप्येतदर्थत्वात् उपचयरूपोत्पत्तिमतोपिश्रुतिसन्निधियोग्यत्वरूपनित्यत्वार्थकत्वादित्यर्थः । तदेवोपपादयति ॥ **वाग्वेति** ॥ उक्तार्थत्वांगीकारेपूर्ववाक्यार्थोपपत्तिरपिनियामकेत्यभिप्रेत्यनित्ययानित्ययेतिपूर्ववाक्यंयोजयति ॥ **एवंचसतीति** ॥ अस्यांहीतिवाक्यशेषस्योपचारबीजप्रतिपादकत्वेसतीत्यर्थः ॥ **पुराणाद्याश्रयत्वेनचेति** ॥ अनेनास्यांहिश्रुतिरित्युपलक्षणं । अस्यांहिपुराणादिकमवतिष्ठतइत्यपिग्राह्यमित्युक्तंभवति ननुपुराणाद्याश्रयत्वमात्रेणकथंवागिंद्रियनित्यत्वानित्यत्वेत्यतआह ॥ **एवंचसमाख्यानुरोधइति** ॥ तथाचसमाख्याश्रुतौश्रुतिर्वानित्याऽनित्यावावस्मृतयोयाश्चान्यावाचइति श्रुतिपुराणयोर्नित्यत्वानित्यत्वयोरुक्तत्वातत्रनिर्णीतनित्यत्वानित्यत्ववच्छ्रुतिपुराणाद्याश्रयत्वेनवागिंद्रियस्यनित्यत्वानित्यत्वेघटेतइतिभावः ॥ **अन्यथेति** ॥ स्वरूपेणनित्यत्वानित्यत्वविवक्षायांनिरोधात्स्वरूपेणनित्यत्वमुपचितांशेनानित्यत्वमितिविवक्षायांचवाक्यशेषादौनित्यवेदाश्रयत्वाद्युक्त्ययोगात् वाक्यदेनवेदविवक्षायांचास्यांहिश्रुतिरवतिष्ठतइतिवाक्यशेषविरोधात् अस्मदुक्तवाक्यार्थादन्यथावाक्यार्थोनयुक्तइत्यर्थः । यद्वाअन्यथासमाख्यानुरोधेननित्ययानित्ययास्तौमिपरमात्मानमितिवाक्यस्यनित्यवेदाश्रयत्वेन नित्ययाऽनित्यपुराणाद्याश्रयत्वेनानित्ययेत्यर्थकत्वांगीकारेतस्यवाक्यस्यार्थोपपत्तिर्नविद्यतइत्यर्थः । वाक्यशेषेनित्ययेत्युक्तनित्यत्वंवाग्वावनित्येतिवाचःप्रतिज्ञायाअस्यांहिश्रुतिरवतिष्ठतइतितदुपपादनवदनित्यत्वप्रतिज्ञातदुपपादनयोरभावादितिभावः ॥ ३ ॥ **ग्रहाःसोमस्येति** ॥ सोमरसग्रहणार्थाः सूक्ष्मोलूखलाकाराःपात्रविशेषाइत्यर्थः ॥ अध्वरेषुग्रहांत्सोमस्यमिमतेद्वादशेतिश्रुतेरितिभावः ॥ **एकदैवत्याभिप्राये-**

णेति ॥ समसंख्यादैवताकत्वाभिप्रायेणेत्यर्थः । द्वादशमासादीनांद्वादशादित्यादिदेवताकत्वादितिभावः ॥ **कथितयुक्तेरिति** ॥ अभिमान्यभिमन्यमानयोःसमसंख्याकत्वयुक्तेरितिभावः । अन्यथाएकदैवत्यभिप्रायाभावे ॥ **उन्मस्तेति** ॥ द्वादशेत्यादिनाप्राणादिसंख्याकथनस्यवैय्यर्थ्यादितिभावः ॥ **ॐ सप्तगतेर्विशेषितत्वाच्च ॐ** ॥ गतेर्ज्ञानस्यजनकाःप्राणाःसप्तैव कुतःविशेषितत्वात् सप्तप्राणाइत्युक्तसप्तप्राणानामुत्तरत्रगुहाशयांनिहिताःसप्तसप्तेतिज्ञानकारणत्वविशेषणोपेतत्वकथनादित्यर्थः । येषुचरंतिप्राणागुहाशयामितिवाक्यंव्याचष्टे ॥ **गुहात्हृदयमिति** ॥ द्वितीयाविभक्त्यर्थमाह ॥ **तदर्थमिति** ॥ नन्वत्रसूत्रेसप्तप्राणाइतिश्रुतेःसावकाशत्वमेवोक्तंनतुद्वादशत्वेकिंचित्प्रमाणं अतःकथंद्वादशत्वनिर्णयइत्यतआह ॥ **एतच्छ्रुताविति** ॥ सप्तप्राणाइतिश्रुतौस्मृत्युक्तरीत्यासावकाशायांसत्यामितराद्वादशवाएतेप्राणाइतिश्रुतिरत्रप्राणानांद्वादशत्वेप्रमाणत्वेनोदाहर्तव्येत्यर्थः । असहपाठेनिमित्तमाशंक्यदूषयति ॥ **अत्रेति** ॥ **उक्तविरुद्धमिति** ॥ तथाप्राणाइतिप्राणानांपरमात्मजन्यत्वोक्तिर्विरुद्धेत्यर्थः । कारणांतरं असहपाठे एभिःश्रोत्रादिभिः ॥ **ॐ हस्तादयस्तुस्थितेतोनैवं ॐ** ॥ हस्तादयस्तुप्राणाःस्थितेकर्मविषये अतःकर्मकारणत्वेनवैलक्षण्यात् एवंश्रोत्रादिभिःसहपाठोनेत्यर्थः । गतिस्थितिशब्दौसूत्रद्वयस्थौ । ननुकाम्यकर्मणःसंसारहेतुत्वेपिनिष्काम्यस्यतदभावात् तथाब्रह्मज्ञानस्यसंसारादुद्गतिहेतुत्वेपि इतरज्ञानस्यतदभावात्कथंतयोःस्थितिगतिप्रवृत्तिरित्यतआह ॥ **सजातीयत्वेनेति** ॥ यथायत्प्रपदाभ्यांप्राप्यतब्रह्मेमंपुरुषंतस्मात्प्रपदइत्याचक्षतइतिश्रुत्युक्तप्रपदशब्दप्रवृत्तिनिमित्तस्यचतुर्मुखपादतलोपरिभागगतत्वेपितज्जातीयेपुरुषांतरसंबंधिन्यपिपादतलोपरिभागेप्रपदशब्दप्रयोगः तथेहापिकाम्यकर्मब्रह्मज्ञानसजातीययोर्निष्कामकर्मान्यज्ञानयोरपिस्थितिगतिशब्दप्रयोगइत्यर्थः । तस्मात्प्रपदनादेवप्रपदंनामकीर्तितं चतुर्मुखा

PGDF
Sri Gargeshwari Jyotish Foundation

कारवतांनृणांपादतलोपरि प्रपदाख्यावर्ततइत्यैतरेयभाष्योक्तिरितिभावः ॥ ४ ॥ श्रोत्राद्यनुगमायाह ॥ जानातीति ॥ कृणोतीत्यस्यकरोतीत्यर्थः स्फुटएवेतिभावः । प्राणैर्ह्येतद्भवतीत्येतदवतारयति ॥ कुतोश्रोक्तेति ॥ अत्राणुभिरितिश्रुतौज्ञानादिकारणत्वेनोक्ताइत्यर्थः । एतच्छब्देनपश्यतीत्याद्युक्तपरामर्शः हिशब्दोहेत्वर्थइत्यभिप्रेत्यतद्वाक्यंव्याचष्टे ॥ ज्ञानकर्मेति ॥ ज्ञानकर्मकारणत्वस्यप्राणासाधारणधर्मत्वादितिभावः ॥ विष्णोर्व्यासत्वइति ॥ यथा हिचक्षुराकाशेव्याप्तमपिनदृश्यते केवलंविषयोपलब्धिलक्षणेनफलेनानुमीयते तथापरमेश्वरस्वरूपंसर्वगतमपिनदृश्यते किंतु अस्वतंत्राणांपदार्थानांसत्ताप्रतीतिप्रवृत्तिभिर्ज्ञायतइतितदर्थः । चक्षुर्दिवीवव्याप्तंयददृश्यं फलदर्शनमितिऋग्भाष्योक्तेरितिभावः ॥ प्राप्यकारित्वादिति ॥ वस्तुसंबध्यज्ञानकारणत्वादित्यर्थः ॥ अन्यथेति ॥ व्यापारवतएवकारणत्वाद्विषयप्राप्तिरूपसन्निकर्षस्यैवव्यापारत्वात्तदभावेकारणत्वविरोधादित्यर्थः ॥ ॐ अणवश्च ॐ ॥ प्राणाःस्वरूपेणाणवएव तेजसाव्याप्ताश्चेत्यर्थः ॥ अतिसुधृढेति ॥ दृष्टांतत्वान्यथानुपपत्यासुदृढेत्यर्थः । आत्मनः जीवस्य तर्हिसाम्येनानिर्णयःस्यादितआह ॥ विशेषश्रुतित्वाच्चेति ॥ चक्षसःप्रकाशोव्याततइत्यनेनदिवीवेतिव्याप्तिश्रुतेःसावकाशत्वप्रदर्शनेनास्याःश्रुतेःतदपेक्षयाविशेषश्रुतित्वान्निर्णयइत्यर्थः । स्वरूपेणव्याप्तत्वेबाधकंचाह ॥ यदिंद्रियाणीति ॥ सुप्त्याद्यभावश्चेति ॥ सर्वविषयैःसहमनस्केंद्रियसन्निकर्षस्यसदासत्वप्राप्त्यासर्वदातद्ग्रहणेसर्वेंद्रियव्यापारोपरमरूपसुप्त्यभावःस्यादित्यर्थः । द्रव्येणकुड्यादिना अनुज्ञायते अभ्युपगम्यते पूर्वपक्ष्युक्तस्यदूरश्रवणस्यानिराकृतत्वेनांगीकारोज्ञायतइतिभावः ॥ अवकाशइति ॥ अव्याकृताकाशइत्यर्थः ॥ परिशेषादिति ॥ घ्राणादिजनकानांपृथिव्यादीनामन्यथासिद्धत्वेनश्रोत्रोत्पादकत्वानुपपत्तौतस्यपरिशिष्टाकाशकार्यत्वस्यैवांगीकार्यत्वादितिभावः ॥ श्रुत्यादिविरोधइति ॥

SGDF Sri Gargeshwari Digital Foundation

आत्मनआकाशःसंभूतः आकाशेनीलिमोदेति शब्दमात्रमभून्नभइत्यादिविरोधइत्यर्थः ॥ पृथिव्यादीनामिति ॥ तेषांभूतैरुपचयइतिसामान्योक्तेरितिभावः । अन्यत्रघ्राणाद्यारंभे ॥ तच्छरीरेति ॥ अन्यत्रोपक्षीणत्वादेवपार्थिवादिशरीरानारंभकत्वप्रसंगइत्यर्थः ॥ बधिराभावइति ॥ पृथिव्यादीनांतान्प्रत्यप्यविशिष्टत्वादितिभावः । सत्यपींद्रिये पापवशादश्रवणमित्यतआह ॥ अदृष्टेति ॥ तदिंद्रियस्यबलवन्निबिडवायूपहतत्वेनाश्रवणोत्पत्तिरित्यतआह ॥ उपहतिश्चेति ॥ आकाशस्यनिस्पर्शत्वेनाप्रतिघातद्रव्यत्वादितिभावः ॥ अभ्युपगमइति ॥ पूर्वपक्ष्युक्तदूरस्थश्रवणाभ्युपगमइत्यर्थः । अत्रसर्वत्रशब्दपदेनवर्णात्मकशब्दोग्राह्यः नध्वन्यात्मकः तेनात्राकाशगुणेशब्देव्यज्यमानावर्णादयइतितत्वनिर्णयतट्टीकाविरोधः तत्रध्वन्यात्मकशब्दस्यस्यादेतदित्यादिनोक्तप्रकाराभ्युपगमादितिनिरस्तम् नचश्रोत्रस्यगत्वाग्राहित्वेध्वन्यात्मकस्यापिशब्दस्यतत्प्रकाराभ्युपगमोव्यर्थइतिवाच्यं शब्दस्यशब्दांतरजनकत्वस्वाभाऽव्यादेवतथांगीकारात् तत्कुतःसिद्धमितिचेत् बहुजनाकीर्णसभादौजनेषुमंदंमंदंभाषमाणेषुतदीयशब्दैर्महाशब्दोत्पादस्यावरकादौप्रतिध्वन्युत्पादस्यबहुलमुपलंभात् तर्हिश्रोत्रस्यगत्वाग्राहित्वंकुतइतिचेन्न प्राणावाइंद्रियाणिप्राणाहीदंद्रवंतीतींद्रियाणामिदंविषयजातमुद्दिश्यद्रवणस्यश्रुतिसिद्धत्वात् श्रोत्रस्यागत्वाग्राहित्वेशब्देनदिङ्निश्चयाभावप्रसंगाच्च अस्तितावच्छब्दश्राविणांपूर्वभागेदूरेशब्दोभवतीतिनिश्चयः नचश्रोत्रस्यगमनाभावेसंभवति श्रोत्रेणागत्वैवस्वसमीपस्थशब्दग्रहणेतस्यादूरभावित्वेनदूरेशब्दइतिज्ञानानुपपत्तेश्च क्वचिच्छब्देदिक्संशयस्तुरूपादाविवदोषबलाद्युक्तइतिध्येयं ॥ ५ ॥ प्रकृत्याप्रकरणेनान्यथास्वरूपानुत्पत्तिपरत्वेन ॥ नहीति ॥ सर्वस्यापितज्जन्यत्वेनतज्जनकस्यैवाभावादितिभावः । स्वेच्छयास्वतएवजन्मकिंनस्यादित्यतआह ॥ दुःखहेतवइति ॥ ॐ श्रेष्ठश्च ॐ ॥ नकेवलमन्येप्राणाउत्पद्यंतेकिंतुप्राणःश्रेष्ठोमुख्यप्राणश्चोत्पद्यतइत्यर्थः । अतिरोहितः

SGDF
Sri Gargeshwari Digital Foundation

अनाच्छादितः ॥ उत्पत्त्यंगीकारइति ॥ तयोरित्यनुवर्तते ॥ ॐ नवायुक्रियेपृथगुपदेशात् ॐ ॥ वायुक्रियेवाह्यवायुचेष्टा रूपक्रियेणप्राणो पत्तिश्रुतिप्रतिपाद्ये कुतस्तदुभयोत्पत्तेःपृथगभिधानादित्यर्थः । श्रद्धा मुख्यवायुभार्या ॥ युक्तीति ॥ जनका भावरुपेत्यर्थः । नन्वखिलजनकत्वादिमहात्म्योपेतस्यकथंविष्णुजनकत्वमित्यतआह ॥ यत्प्राप्तिरित्याद्युक्तेति ॥ महत्वा दिति ॥ महतोमहत्वात् महतोपिप्राणस्यकर्ता एकराट् स्वतंत्रः येनविष्णुनास्वशक्त्यैवेदंजगदावृतंसएषप्राणंनसृजेत् किंनाम सृजेदेवेत्यर्थः ॥ ६ ॥ विरोधव्यंजनायाह ॥ तस्मादिति ॥ तथाचप्राणोत्पत्त्यनंगीकारे आत्मनएषप्राणोजायतइत्यादिश्रुति-विरोधइत्यतआह ॥ तच्छ्रुतीनामिति ॥ लीलयेति ॥ तथाचोत्पत्त्यंगीकारेनस्वातंत्र्यहानिरितिभावः ॥ ॐ चक्षुरादिव त्तुतत्सहशिष्ट्यादिभ्यः ॥ ॐ ॥ चक्षुरादिवत्तुयथाचक्षुरादीशाधीनंतथाप्राणोपीशाधीनएव नस्वतंत्रः कुतःतत्स हतैश्चक्षुरादिभिःसहशिष्ट्यादिभ्यः ईशवत्वाभिधानादिहेतोरित्यर्थः ॥ युक्तिविरोधादिति ॥ उभयोरप्यन्योन्यानुरो धेननसर्वैश्वर्यमित्युक्तरीत्येश्वरद्वयासंभवयुक्तिविरोधादित्यर्थः । बाध्यतेप्रतीतार्थत्वात् ॥ ॐ अकर्णत्वाच्चनदोषस्त थाहिदर्शयति ॐ ॥ प्राणस्याकरणत्वात्कर्तृप्रयोज्यत्वादिंद्रियाणांचतत्प्रयोज्यत्वान्नदोषः । अवांतरेश्वरत्वाभावदो षोनास्ति कुतःहियस्मात्तथाप्राणस्याकरणत्वमिंद्रियाणांकरणत्वंचश्रुतिर्दर्शयतीइत्यर्थः ॥ कर्तृप्रयोज्येति ॥ सुषुप्तौप्र यत्नाभावेनचक्षुरादीनांव्यापारादर्शनाज्जीवप्रयोज्यत्वंमुख्यप्राणस्यतुतदापिव्यापारदर्शनात्तदप्रयोज्यत्वमितिभावः ॥७॥ ॥ प्राणादीति ॥ प्राणापानादीत्यर्थः ॥ मुख्यप्राणप्रसंगेति ॥ तेषांवक्ष्यमाणरीत्यातत्संबंधित्वादितिभावः ॥ शेषइति ॥ क्रमेणेतिशेषः ॥ कर्मकारित्वादिति ॥ तेषांकर्मणिचप्राणापानाविडायांचपिंगलायांचवर्ततः व्या नेःबुद्धिपुसर्वत्रउदानोब्रह्मनाडिगः सर्वत्रैवसमानस्तुसमंचरतिसर्वशइति भारतवचनाज्ज्ञेयानि । प्राणाज्ञयाकर्मकारित्वेश्रु

SGDF Sri Gargeshwari Digital Foundation

तिमाह ॥ तथाचश्रुतिरिति ॥ एषमुख्यप्राणइतरान्प्राणानपानादीन्पृथक्स्वस्वकार्यकरणायोक्तस्थानेषुसन्निधत्ते संस्थापयतीत्यर्थः ॥ व्यक्तसद्गुणत्वादिति ॥ व्यक्ताःसंतोगुणाःवक्ष्यमाणश्रुत्युक्ताःयेषांतेतथातेषांभावस्तत्वंतस्मादित्यर्थः । व्यक्तसद्गुणत्वेश्रुतिमाह ॥ पायूपस्थेति ॥ अपानमपानःपायूपस्थेगुदगुह्येंद्रिययोर्मलादेरपनयेनगुणेनापाननामासन्प्रतिष्ठतितेमुखनासिकाभ्यांसहचक्षुः श्रोत्रेचक्षुःश्रोत्रेषुप्राणश्वासादिप्रणयनात्प्राणनामास्वयमवतिष्ठते समानस्तुमध्येप्राणापानयोर्मध्येनाभिदेशेप्रतिष्ठतिहियस्मादेषःसमानःहुतंभुक्तमंन्नंसमंयथास्यात्तथाशरीरावयवंप्रतिनयति अतःसमाननामा तस्मादन्नस्यसमीकरणादेताःसप्तार्चिषाःसप्तज्ञानेंद्रियवृत्तयोभवंति । अस्मिन्शरीरेद्वासप्ततिसंख्याकाःनाड्यःसंति आसुनाडिषुव्यानश्चरति अथोदानएकयानाड्यासुषुम्नयोर्ध्वगतिश्चरति सतत्रचरन्जीवकृतपुण्येननिमित्तेनपुण्यंलोकंस्वर्गादिकंनयति पापेननिमितेनपापफलंनिरयादिनयति बहिःपृथिव्यांयाधारिका व्यानाख्यादेवतासैषापुरुषस्यापानंदेहेविद्यमानमपानवायुमवष्टभ्यधृत्वांतराशरीरांतर्वर्ततइत्यर्थः । उभयंदासत्वंस्वरूपं विकल्पोद्वैरूप्यं ॥ ॐ पंचवृत्तिर्मनोवद्व्यपदिश्यते ॐ ॥ मुख्यप्राणःपंचवृत्तिः प्राणादिपंचस्वरूपवानुपलक्षणमेतत् प्राणादिपंचदासवांश्च कुतः मनोवत् यथामनोमनआदीश्वरस्वरूपवत् तज्जन्यमनआदिवृत्तिपंचकवच्च तथामुख्यप्राणोपिवर्गद्वयवानिति अथपंचवृत्येतिश्रुतौव्यपदिश्यतेयतोतइत्यर्थः एतद्वर्गद्वयवत्वं ॥ चेतसोव्याप्तिरिति ॥ बहुस्मरणशक्तिरित्यर्थः । बहुस्मरणशक्तिश्चचेतनेत्यभिधीयतइत्युक्तेः तत्रैवश्रुतिमाह ॥ अशेषेति ॥ अतिबहित्यर्थः ननुपायूपस्थेपानमितिसद्गुणत्वप्रतिपादकश्रुतेर्मुख्यप्राणस्वरूपविषयत्वांगीकारेणवोपपत्तौसद्गुणद्वैविध्यकल्पनंकिमर्थमित्यतआह ॥ दासानुपक्रम्येति ॥ इतरान्प्राणान्पृथक्पृथगेवसन्निधत्तइतिदासानुपक्रम्यतदनंतरमेवापानमित्यादिनासद्गुणोक्तेरित्यर्थः ॥ ८ ॥ अन्यथेत्युक्तव्याप्य

Sri Gargeshwari Digital Foundation

भावस्यकेनधार्यतइत्याक्षेपेसाक्षाद्धेतुत्वासंभवादाह ॥ व्याप्त्यभावइति ॥ सप्तस्कंधेति ॥ जगदाव्यवृक्षस्यशाखा-
रूपसप्तलोकगतइत्यर्थः ॥ ॐ अणुश्च ॐ ॥ मुख्यप्राणोदेहांतर्गतेनरूपेणाणुर्बहिर्मुख्यवायुरूपेणव्याप्तश्चेत्यर्थः ॥ वा
क्यशेषइति ॥ प्राणोवाईशितव्येशइत्युदाहरणमित्यर्थः । अन्यथापरमात्मपरत्वशंकास्यादितिभावः ॥ विशेषश्रुति
त्वादिति ॥ अंतर्वाणुर्बहिर्महानित्यणुत्वमहत्त्वयोर्व्यवस्थापकत्वेनविशेषश्रुतित्वादित्यर्थः ॥ नाडीति ॥ व्याप्तत्वेगत्य
योगादितिभावः । यत्यस्मात् अतोयुक्तेःश्रुत्युक्तत्वेनप्राबल्यमितिभावः ॥ ९ ॥ अकरणत्वाच्चनदोषइतिसूत्रेमुख्यप्राण
स्यकरणत्वमेवोक्तं नतुप्राणानांकरणत्वंतकत्थमेतदितितत्राह ॥ चशब्देनेति ॥ ॐ ज्योतिराद्यधिष्ठानंतुतदा
मननात् ॐ ॥ ज्योतिराद्यधिष्ठानमग्न्यादिभूतनियामकंयद्ब्रह्मतत्तुतदेवज्योतिराद्यधिष्ठानं अग्न्याद्यंशचक्षुरादिनियामकं
तत्करणमितियावत् कुतःतदामननात् तस्यचरादिनियामकत्वस्ययश्चक्षुषितिष्ठन्नित्यादिनाभिधानादित्यर्थः ॥ सर्वप्रा
णप्रेरकेति ॥ यःप्राणेतिष्ठन्नितिप्राणशब्दस्येंद्रियपरत्वेयश्चक्षुषीत्यादिपौनरुक्त्यापत्तेरितिभावः । आदिपदोपात्तमाह
॥ यश्चक्षुषीति ॥ ननुकारणक्रमेणवचने आकाशाद्यधिष्ठानमिति कार्यक्रमेणवचनेपृथिव्याद्यधिष्ठानमितिवक्तव्यं ज्योतिरा
द्यधिष्ठानमितिवचनेकिंनिमित्तमाह ॥ चक्षुरादिवदिति ॥ उपलक्षणमेतत् । चक्षुषादर्शयतीतिश्रुतौचक्षुषआदित्वेनग्रहणा
दित्यपिद्रष्टव्यं ॥ ॐ प्राणवताशब्दात् ॐ ॥ ब्रह्म प्राणवता इंद्रियवता जीवेनकर्मास्वकरणैरिंद्रियैर्दर्शनादिकारयति कुतः
एषहीतिशब्दाच्छ्रुतेः अतस्तानिजीवकरणानीत्युच्यंतइत्यर्थः । एतत्ब्रह्मकरणत्वं ॥ तदुपपत्तिरिति ॥ मुख्यप्राणस्यजीवक
रणत्वाभावेनाकरणत्वहेतुनोक्तत्वेनमुख्यत्वोपपत्तिरित्यर्थः ॥ जीवापेक्षयाब्रह्मकरणत्वमिति ॥ तत्रअकरणत्वाच्चेतिसू
त्रेइंद्रियाणांमुख्यत्वेयत्तुहेतुत्वेनोक्तंकरणत्वंतज्जीवेनैवकरणैःकारयतिपरमात्मेत्युक्तरीत्याजीवापेक्षयाब्रह्मकरणत्वंविवक्षितं-

Sri Gargeshwari Digital Foundation

मुख्यप्राणस्यचजीवापेक्षयाब्रह्मकरणत्वाभावान्मुख्यत्वोपपत्तिरितिभावः । वृश्चतेःछेतुः ॥ ॐ तस्यचानित्यत्वात् ॐ ॥
तस्यजीवस्य चशब्दगृहीतेंद्रियतत्संबंधयोरपिनित्यत्वाच्चिरकालीनत्वाज्जीवकरणत्वश्रुतिरुपचरितार्थेत्यर्थः । अनुभवः
इंद्रियाणांस्वाधीनत्वावगाहीप्राणवत्पदेनकथंप्राणादयःसन्निधापिताइत्यतआह ॥ नहीति ॥ ननुजीवकरणसंबंधनित्यत्वस्यै
वप्रकृतोपयोगित्वात्तत्परामर्श एवकार्योनजीवप्राणपरामर्शइत्यतआह ॥ संबंधिनोरभावइति ॥ १० ॥ विशेषश्रुत्येति ॥
द्वादशैवेतिविशिष्योक्तेरितिभावः ॥ इदंद्रवणेति ॥ इदंविषयजातमुद्दिश्यद्रवणादिंद्रियमतींद्रियपदप्रवृत्तिनिमित्तवत्वयुक्ती
त्यर्थः ॥ ननूभयोरपीशवशत्वसाम्येपिजीवापेक्षयाब्रह्मकरणत्वाच्चक्षुषइंद्रियत्वंमुख्यप्राणस्यतदभावादनिंद्रियत्वमस्त्वित्यत
आह ॥ प्रातस्विकेति ॥ प्रतिव्यक्तिनियतावांतरविशेषाणांश्रोत्रादिष्वपिसत्वेनतेषांमध्येकेषांचिदिंद्रियत्वंकेषांचित्तद
भावःस्यादित्यर्थः ॥ चक्षुरादिष्वप्येवमिति ॥ चक्षुर्नेंद्रियमितिचेन्न तथात्वेश्रोत्रस्यापींद्रियत्वंनस्यादित्यादिद्र-
ष्टव्यमित्यर्थः । मनोबुध्योरुभयोरपिद्वादशत्वप्रतीतिनिरासायाह ॥ एकादशद्वादशेति ॥ छांदसत्वान्नकश्चित्क्षुद्रोपद्रवः
॥ ॐ तइंद्रियाणितद्व्यपदेशादन्यत्रश्रेष्ठात् ॐ ॥ श्रेष्ठान्मुख्यप्राणात् अन्यत्रअन्ये तेप्राणा इंद्रियाणिकुतस्तद्व्यपदेशात्
तस्योक्तार्थस्यद्वादशैवेतिश्रुत्युक्तत्वादित्यर्थः ॥ ॐ भेदश्रुतेः ॐ ॥ द्वादशप्राणानांमुख्यप्राणस्यचभेदश्रुतेर्विशेषश्रवणात्त
एवेंद्रियाणीत्यर्थः ॥ सर्वकर्तृकारयितृत्वेति ॥ कर्तृत्वेनकारयितृत्वेनचेत्यर्थः ॥ प्रागुक्तविरोधइति ॥ चक्षु-
रादिवदित्यनेनतस्येशाधीनत्वोक्तिविरोधइत्यर्थः ॥ ॐ वैलक्षण्याच्च ॐ ॥ प्राणानांमुख्यप्राणस्यचजीवप्रयत्नाधी
नत्वतदधीनत्वरूपवैलक्षण्याच्चतएवेंद्रियाणीत्यर्थः । नयापयतेनगच्छति पुरुषोयदैवंभवतितदैनंस्वपतीत्याचक्षते स्वं-
स्वतंत्रंपरमात्मानं अप्येतिसुप्तोभवतीतिवदंतिज्ञानिनः । प्राणाग्नयःप्राणापानादिमुख्यप्राणस्वरूपंभूताअंगनेतृत्वादग्नि

SGDF
Sri Gargeshwari Digital Foundation

शब्दवाच्याः जाग्रति अग्रस्तव्यापाराःस्वस्वव्यापारंकुर्वंतीत्यर्थः ॥ ११ ॥ ननुविपूर्वोदधातिःकरोत्यर्थइत्यन्यत्रोक्तत्वात् विरेचयतिविदधातीतिपुनरुक्तमित्यतआह ॥ **विरेचयतीत्यस्यैवव्याख्यानमिति** ॥ **हेतुरुच्यतइति** ॥ नतुनिरुच्यतइतिभावः ॥ **विरिंचत्वयुक्तीति** ॥ यस्माद्विरेचयेत्सर्वंविरिंचस्तेनभण्यतइत्युक्तयुक्तियुक्तत्वादेवेत्यर्थः ॥ **सृष्टिद्वारत्वेनेति** ॥ परमात्माविरिंचेनदेहादिकंसृजतीत्यर्थकत्वेनविरिंचकर्तृत्वश्रुतियुक्त्युपपत्तिरित्यर्थः ॥ ॐ **संज्ञामूर्तिक्लृप्तिस्तुत्रिवृत्कुर्वतउपदेशात्** ॐ ॥ संज्ञामूर्तयोर्नामदेहयोःक्लृप्तिःसृष्टिः त्रिवृत्कुर्वतस्तुत्रयाणांतेजोबन्नानांमिश्राणांकुर्वतोहरेरेवसकाशात् नाविरिंचतः कुतः उपदेशात्सर्वाणिरूपाणीतिश्रुतेरित्यर्थः । श्रुतौविचिंत्यकृत्वाधीरइत्यादिपुल्लिंगानुरोधेनाह ॥ **यदिति** ॥ **लिंगेति** ॥ **सेयमिति** ॥ सातेजः स्रष्टृत्वेनप्रकृतेयंनारायणाख्यादेवता इमाः प्रागुक्ताः तिस्रःतेजोबन्नाभिमानिन्योदेवताऽभिमन्यमानभूतसहिताऽनेनजीवेनात्मनानिरुत्थेनरुपेणप्रविश्यनामरुपेसंज्ञाशरीरेविशेषेणाकरोत् तदर्थंतासांदेवतानांमध्येएकैकंएकैकाभिमन्यमानभूतंत्रिवृतमन्योन्यप्रविष्टमकरोदित्यर्थः ॥ **इयमपिश्रुतिरिति** ॥ विरिंचोवेत्यादिश्रुतिरित्यर्थः ॥ १२ ॥ तत्रपृथिव्यांलयएवोच्यतेनत्कार्यत्वमतआह ॥ **कार्यस्येति** ॥ उपादेयस्यउपादानएवेत्यर्थः ॥ **आकाशंपरमात्मानमिति** ॥ तथाचशरीरंपृथिवीमप्येति तद्वतआत्माजीवआकाशंपरमात्मानमप्येति इतरैरदृश्यःप्रविशतीत्यर्थउक्तोभवति कासांचिद्भूतत्रयकार्यत्वमभिधात्रीणां ॥ ॐ **मांसादिभौमंयथाशब्दमितरयोश्च** ॐ ॥ देहस्थमांसाद्येवभौमंपार्थिवं यन्मज्जादितच्च इतरयोरप्तेजसोःकार्यंयथाशब्दंश्रुत्यनुसारेणांगीकार्यमित्यर्थः । यद्वामांसादिनकेवलभौमंकिंतुइतरयोश्चकार्यंयथाशब्दमंगीकार्यमित्यर्थः । इतरावपिपक्षावितियच्छरीरेद्रवंतदाप्यंनसर्वशरीरं यच्छरीरेउष्णंतदेवतैजसंनसर्वशरीरमितिइतरावपिपक्षौनिषेध्यावि-

SGDF
Sri Gargeshwari Digital Foundation

त्यर्थः । नात्रमांसादीनामनेकभूतकार्यत्वमुच्यतइत्यतआह ॥ भूम्यादिभूतानामिति ॥ स्वतएवस्वरूपेणैवसंभूतत्वादिति मिश्रत्वेनसम्यग्भूतत्वादित्यर्थः । प्रकृतिःप्रकर्षेणक्रियतइतिप्रकृतिःकार्यं ॥ ॐ वैशेष्यात्तुतद्वादस्तद्वादः ॐ ॥ भूम्यादिभूतसंयोगवैशेष्यात्तद्वादः भौमत्वादिविशेषवादइत्यर्थः ॥ पुनर्विशेष्योक्त्योगइति ॥ एकस्मिन्देहेसर्वेषांविशेषसंयोगेसत्याप्यमीत्यादिविशेष्योक्त्ययोगइत्यर्थः । अन्येषांवरुणलोकगतानामुक्तदोषः पुंनर्विशेषोक्त्ययोगरूपः । ननुपूर्वाध्यायांतएवद्विरुक्तेरेवधारणार्थत्वस्यअवधारणार्थंसर्वस्येतिप्रमाणेनोक्तत्वात्पुनरत्रतदुक्तिर्व्यर्थेत्यत उक्तं प्रयोजनविशेषमिति पंजभूतात्मकंसर्वमित्येतदनुरोधेनाह ॥ पांचभौतिकमिति ॥ १३ ॥ इतिश्रीमत्तत्वप्रकाशिकावाक्यार्थमजर्यांशर्कराश्रीनिवासविरचितायांद्वितीयाध्यायस्यचतुर्थःपादः ॥ ॥

॥ इति श्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यां द्वितीयाध्यायःसमाप्तः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ इति श्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यां ॥

॥ द्वितीयाध्यायः समाप्तः ॥

PDF
Sri Gargeshwari Digital Foundation

॥ इति श्रीमत्त्वत्वप्रकाशिका वाक्यार्थमंजर्यां ॥

॥ तृतीयाध्यायः प्रारंभः ॥

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीवेदव्यासायनमः ॥ वैराग्यभक्तिश्रवणमननध्यानयोगतः । सद्भिर्ज्ञेयंभजेमध्ववल्लभंकमलापतिं ॥ १ ॥ शास्त्रार्थ इति ॥ ब्रह्मणोमोक्षार्थज्ञेयत्वस्यैवसर्वशास्त्रार्थत्वादितिभावः ॥ तादिति ॥ द्वितीयसूत्रोक्तंजगत्कारणत्वेनगुणपूर्णत्व मित्यर्थः ॥ अथब्रह्मजिज्ञासेति ॥ अधिकारानंतर्यार्थकाथशब्देनाधिकारिविशेषणतयावैराग्यभक्त्यादेः ब्रह्मजिज्ञा सापदेनापरोक्षज्ञानजनकश्रवणादिरूपोपासनायाश्चप्रतिपादनादितिभावः । वर्तिष्यते प्रवर्तइष्यते । ननुमोक्षायवैराग्यमेव- कुतः यदर्थगत्यादिनिरूपणमित्यतआह ॥ भगवत्प्रसादइत्यादिना ॥ अनेनप्रथमसाधनत्वाद्वैराग्यंप्रथमपादे निरूप्यते । तत्साध्यभक्तिर्द्वितीये तत्साध्योपासनातृतीये तत्साध्यज्ञानंचतुर्थइतिपादक्रमःसूचितइतिध्येयं । भावयतःपुनः पुनर्विचारयतः ॥ नसाध्यतेति ॥ अन्यथाभूतवियोगस्यैवमोक्षत्वेनतस्यमरणेसतिस्वतएवलब्धत्वेनसाधनवैय्यर्थ्याप त्तेरितिभावः ॥ प्राचीनोक्तिरिति ॥ अथब्रह्मजिज्ञासापदाभ्यांसाधनस्यानुष्ठेयत्वोक्तिरित्यर्थः ॥ अन्यथव्य- तिरेकेति ॥ सतिप्रसादादिसाधनेमोक्षः अन्यथानेत्यदर्शनमित्यर्थः । उक्तं अथब्रह्मजिज्ञासापदाभ्यामिदंमोक्षफलकं ॥ ॐ तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तःप्रश्ननिरूपणाभ्यां ॥ जीवःमृतिकालेसंपरिष्वक्तःभूतैःसंबद्धएवरंहतिग छति किमर्थं तदंतरप्रतिपत्तौतदंतरस्यदेहांतरस्यप्रतिपत्तौप्राप्त्यर्थं कुतः वेत्थयथेतिप्रश्नवाक्यात् इतित्विति परिहारवाक्या च्चतथावगमादित्यर्थः । प्रवाहणस्यराज्ञःतत्पित्रा उद्दालकेन प्रवाहणेनपृष्टःश्वेतकेतुःस्वस्यपरिहारासामर्थ्येस्वपितरमागत्य तस्मैतन्यवेदयत् पिताचस्वेनापितद्ज्ञानात्पुत्रेणसहप्रवाहणंप्राप्यस्वेतकेतुंप्रतिकृतप्रश्नपरिहारंत्वमेवकुर्वितितंप्रत्युवाच तत- प्रवाहणःस्वकृतप्रश्नोत्तरंस्वयमेवतावुभौप्रतिजगादेतिछंदोगेपंचमेप्रसिद्धं । संपरिष्वक्तएवगछतीतिगमनकालेसंबंधाभा वेप्रश्नपरिहारोक्तागमनकालीनतत्संबंधानुपपत्तेरितिभावः । अत्रैवस्पष्टंप्रमाणमाह ॥ भूतयुक्तइति ॥ १ ॥ ॐ व्या-

SGDF
Sri Gargeshwari Digital Foundation

त्मकत्वात्तुभूयस्त्वात् ॐ ॥ अपांभ्यात्मकत्वात् भूजलाभ्यात्मकत्वात् तथाभूयस्त्वात् सर्वत्रापामेवभूतेजोपेक्षया-बाहुल्यादापइतिविशेषोक्तिसंभवेनसर्वभूतसंबंधएवजीवोगछतीत्यर्थः । तत्रप्रश्नपरिहारयोः ॥ सर्वदेहेष्विति ॥ पार्थिवशरीरेपृथिव्याःभागचतुष्टयं अपांभागत्रयं तेजसएकोभागः । आप्यशरीरे अपांभागचतुष्टयं पृथिव्याःभागत्रयं तेजसएकोभागः । तैजसशरीरेतेजसोभागचतुष्टयं अपांभागत्रयं पृथिव्याएकोभागइतित्रिविधशरीरेषु संभूय मिलित्वा अपांभागदशकंपृथिव्याःभागाष्टकंतेजसोभागपञ्चमित्यपामेवभूयस्त्वादित्यर्थः ॥ २ ॥ ननुपूर्वनयेऽपांसहगमनेतासांभ्यात्मकत्वेनभूतानामपिसहगमनसिद्धिरित्युक्तत्वात्कथमनुक्तिरित्यतआह ॥ आर्थिककल्पनायाइति ॥ ॐ प्राणगतेश्च ॐ ॥ प्राणानामिंद्रियाणांजीवेनसहगतिश्रुतेस्तदविनाभूतभूतानामपितेनसहगतिसिद्धिरित्यर्थः । मृत्यइत्यनंतरंराज्ञासहगछतीतिशेषः ॥ ३ ॥ अनिर्णयः निर्णायकाभावः ॥ ॐ अग्न्यादिगतिश्रुतेरितिचेन्नभाक्तत्वात् ॐ ॥ अग्निंवागप्येतीत्यादिनाप्राणानामग्न्यादीन्प्रतिगमनश्रवणान्नजीवेनसहतेषांगतिरितिचेन्न । अग्न्यादीन्प्रतिगतिश्रुतेर्भाक्तत्वात् भागेनाग्निगतिविषयत्वात्भागांतरेणजीवेनसहगतिरूपपन्नेत्यर्थः । दिशोदिग्देवताः ॥ अनेनेति ॥ भूतनिवृत्तिर्नामाग्न्यादिमूलरूपाणिप्रतिगछद्भिःप्राणभागैःसहभूतभागगमनमेवगमनंनतुसर्वेषांभूतानां तत्संयोगोनामपुनस्तैःसहतेषांशरीरप्रवेशएवेतिव्याख्यातंभवतीत्यर्थः ॥ ४ ॥ उभयविधेति ॥ मृतसहासहगंतृकर्मधनदर्शनमित्यर्थः । ॥ ॐ प्रथमेश्रवणादितिचेन्नताएवह्युपपत्तेः ॐ ॥ अत्रप्रथमइत्यस्यावृत्तिःश्रवणादश्रवणादित्युभयथापिपदच्छेदः तथाचप्रथमेऽग्नौश्रवणात्श्रद्धांजुह्वतीति श्रद्धाविशिष्टजीवस्यहोमश्रवणान्निमित्तात् प्रथमे उदात्तोपक्रमवाक्येऽश्रवणात् भूतसाहित्यस्याश्रवणात् जीवस्यभूतैःसहागमनमितिचेन्न हियस्मात्ताएवप्रस्तुताआपएवश्रद्धाशब्देनोच्यंते कुतः

उपपत्तेः तथात्वेआपःपुरुषवचसोभवंतीत्युपसंहारोपपत्तेः अन्यथातद्विरूपत्वेनोपक्रमाप्रामाण्योपपत्तेरित्यर्थः ॥ तस्मिन्निति ॥ तस्मिन्नसौवावलोकोगौतमाग्निस्तस्यादित्यएवसमिद्रश्मयोधूमोहरर्चिश्चंद्रमांगारानक्षत्राणिविष्फुलिंगाइत्यनेनोक्तेएतस्मिन्द्युस्थनारायणाख्येअग्नौदेवाःद्युलोकाधिपतयःश्रद्धांश्रद्धयेष्टवंतंउत्क्रांतंयजमानंजुह्वतीत्यर्थः ॥ प्रथमाग्नाविति ॥ द्युपर्जन्यपृथिवीपुरुषयोषिदाख्यपंचाग्निषुप्रथमाग्नावित्यर्थः । अपांश्रद्धारूपत्वाभावादाह ॥ श्रद्धाशब्दार्थरूपतयेति ॥ ननुश्रद्धाशब्दास्याप्सुयोगरूढयोरभावात्कथंतदर्थत्वमित्यतआह ॥ अयंखल्विति ॥ अजहदितिस्वार्थमजहदित्यर्थः । यथाश्रद्धामात्रस्यहोम्यत्वाभावात्श्रद्धाशब्दस्यश्रद्धायुक्तजीवलक्षकत्वंतथोपसंहारान्यथानुपपत्त्याबूपलक्षकत्वंचांगीकार्यमितिभावः ॥ आगमनमात्रेति ॥ आपइतिसामान्येनोक्तत्वादितिभावः ॥ भूतानीति ॥ यद्युपसंहारस्यागमनमात्रविषयत्वंतर्हिमरणानंतरंभूतानांजीवेनसहगमनाभावसिध्यर्थमुत्क्रांतोभूतानित्यजतीतिवक्तव्यंस्यात् । तथातस्मिन्नेतस्मिन्नग्नौदेवाः श्रद्धांजुह्वतितस्याआहुतेः सोमोराजासंभवति । तस्मिन्नेतस्मिन्नग्नौदेवाः सोमंराजानंजुह्वतितस्याआहुतेर्वर्षःसंभवति । तस्मिन्नेतस्मिन्नग्नौदेवाः वर्षंजुह्वतितस्याआहुतेरन्नंसंभवति । तस्मिन्नेतस्मिन्नग्नौदेवाः अन्नंजुह्वति तस्याआहुतेरेतःसंभवति । तस्मिन्नेतस्मिन्नग्नौदेवाः रेतोजुह्वतितस्याआहुतेर्गर्भःसंभवतीतिवद्गमनकाले जीवस्याद्भिः साहित्यसिध्यर्थंतस्मिन्नेतस्मिन्नग्नौदेवाआपोजुह्वतितस्याआहुतेरापोभवंतीतिवक्तव्यत्वात् । अन्यथा आपःपुरुषवचसोभवंतीत्यनुवादायोगात् । नचैवमस्ति । तथाचापइत्यनुवादबलान्मरणानंतरंसहगतानामेवापोपुनरागमनमितिज्ञायतइतिभावः । एवंद्युलोकेदेवैः निक्षिप्तोयजमानः स्वपुण्यावसानेमर्त्युलोकोन्मुखस्तस्याआहुतेः सकाशात्सोमोराजासोमलोकांतर्गतःसंभवति । वर्षवृष्ट्यंतर्गतमन्नमन्नांतर्गतंरेतस्तदंतर्गतंगर्भोगर्भस्थइत्युदात्तवाक्यशेषार्थः । तदर्थेव्या

SGDF Sri Gargeshwari Devi Foundation

ख्यातार्थे ॥ **दर्शनादिति** ॥ यत्क्षौममित्युपसंहारानुसारेणवासःपरिधत्तइत्युपक्रमस्यपीतांबररूपार्थेप्रामाण्यदर्शना दित्यर्थः । स्वरूपेण स्वरूपलाभाय ॥ ५ ॥ पूर्वोक्तमुभयविधवस्तुदर्शनं ननुतदंतरप्रतिपत्तावित्यनेनैवभूतानांजीवेन सहगतेः समर्थितत्वेनपुनःभूतानिगछंतिनवेतिसंदेहस्यैवानुदयात्कथमेतेषामधिकरणानामुत्थानमित्यतआह ॥ **पृथग्वि चाररूपत्वादिति** ॥ तत्प्रकारश्चतत्तदधिकरणेवक्तव्यइतिभावः ॥ ॐ **अश्रुतत्वादितिचेन्नेष्टादिकारिणांप्रती तेः** ॐ ॥ अश्रुतत्वाद्विशिष्यजीवेनसहभूतगतेरश्रवणान्नतस्यतैःसहागमनमितिचेन्न इष्टादिकारिणामिष्टापूर्तादिकारिणांभूतै रेवगछतीतिश्रुत्याभूतैःसहगतिप्रतीतेरित्यर्थः ॥ **अर्थादिति** ॥ अपांव्यात्मकत्वेनप्राणानांभूताविनाभूतत्वेनतदुभयगम नेतेषामपिगमनप्राप्तेरितिभावः । प्रत्यक्षशब्दार्थः ॥ **साक्षादिति** ॥ ननुप्राणगतिरूपोपपत्तिमूलकत्वेनार्थिकश्रवणमपिबलव दित्यतआह ॥ **सतिहीति** ॥ अन्यथाप्रतिपक्षसंभवेनप्रामाण्यानिश्चयादितिभावः । यथार्थइत्यादियोजनाप्रकारश्च थाखल्वित्यादिनाप्रागेवदर्शितइतिभावः ॥ **उभयार्थेचेति** ॥ एकत्रोच्चारणेउभयार्थइत्यर्थः । यत्किंचिद्विशेषवतिसामा न्याभावासंभवेदृष्टांतमाह ॥ **नहीति** ॥ **तच्चास्तीति** ॥ यत्रवावभूतानितत्रकरणानीतिव्याप्तिग्राहकं करणेर्वावनयु ज्यत इतिपक्षधर्मताग्राहकंचप्रमाणमस्तीत्यर्थः । तथाचार्थिकश्रवणस्ययुक्तिमूलत्वेनप्राबल्यमितिभावः ॥ ६ ॥ **उभयविध साधनेति** ॥ यत्रकार्येनेकसाधनानितत्रैकस्यावस्यानुष्ठेयत्वाभावः । यत्रत्वेकमेवसाधनंतत्रतस्यानुष्ठेयत्वमितिभावः । अर्केप्रां गणे ॥ ॐ **भाक्तंवानात्मवित्वात्तथाहिदर्शयति** ॐ ॥ कर्मसाध्यममृतत्वं भाक्तं भागविषयं गौणं किंचित्कालीनमिति यावत् कुतः अनात्मवित्वात् कर्मिणः आत्माज्ञानित्वात् हियस्मात्तमेवंविद्वानितिश्रुतिः आत्मज्ञानिनएवमुख्यामृतत्वं अन्य स्यत्वमुख्यमितिदर्शयतीत्यर्थः ॥ **किंचित्कालीनमिति** ॥ मन्वंतरावछिन्नकालेषुमरणरहितत्वरूपगुणयोगेनामृताइवामृता

SGDF Sri Gargeshwari Digital Foundation

इतिगौणार्थतयेत्यर्थः। कुतोन्येषांतदभावस्योक्तिरित्यतआह॥ काम्यकर्मणेति॥ हियस्मात्काम्यकर्मणः तत्फलस्यस्वर्गादेरेवसिद्धिःतस्मात्कर्मिणांमुख्यामृतत्वाभावइतियुक्तमित्यर्थः॥ मुख्यामृतत्वमिति॥ अमृतशब्दस्यमोक्षेयोगरूढत्वादिति भावः। यद्यमृतपदेनमुख्यामृतमेवोच्येततर्ह्यंगीकृतकर्मणोमोक्षसाधनत्वमित्यभिप्रेत्यपृच्छति॥ किंनामेति॥ अगन्मेति॥ तथाचसोममपाम तेनज्योतिर्ज्ञानमगन्मप्राप्नुमः। ततोमार्गस्थानर्चिरादिदेवानविदामः आप्नुमः। ततोऽमृतान्भुक्त्वाऽभूमेत्यर्थः। काम्यकर्मपक्षेचचांद्रमसंज्योतिरगन्म। ततोमार्गस्थान्धूमादिदेवानविदामेत्यर्थः॥ आत्मज्ञानलब्धइति॥ आत्मज्ञानेनाविद्यावरणाद्यनिष्टनिवृत्तिर्भवति। स्वरूपानंदस्यापिकतिपयस्याभिव्यक्तिः। ज्ञानोत्तरकर्मादिनातत्कालविषयभोगेन यावत्स्वरूपानंदोव्यज्यते अयमेवातिशयवृध्यादिशब्दार्थः। सर्वदुःखनिवृत्तिस्तुज्ञानिनोनिश्चितैवहि। उपासयाकर्मभिश्चभक्त्याचानंदचित्रतेत्युक्तेः उक्तंचप्रमेयदीपिकायां ननुमुक्तःकिमर्थंविषयानिछेत् नतावत्सुखार्थंज्ञानेनावरणरूपाविद्यानिवृत्तावात्मस्वरूपसुखस्याभिव्यक्तत्वात् पृथक्सुखस्यानंगीकारात् नापिदुःखनिवृत्यर्थं अविद्यानिवृत्यैवतत्सिद्धिरिति। मैवं। नाविद्यैवात्मस्वरूपावरणंकिंत्वीश्वरेछापि तथाचवक्ष्यति तथाचाविद्यायांनिवृत्तायामशेषानिष्टनिवृत्तिर्भवति। स्वरूपसुखंचबहुतरंव्यज्यतेनतुसर्वं। ज्ञानोत्तरमनुष्ठितेनकर्मणाप्रसन्नःपरमेश्वरः मुक्तौविषयानुत्पाद्यतद्भोगेनज्ञानानभिव्यक्तमपिस्वरूपसुखंव्यक्तीकरोति। अत्रभाष्यकृतैवप्रमाणान्युक्तानि। अनेनैवाभिप्रायेणश्रुत्यादिषुमुक्तेर्ज्ञानमात्रसाध्यत्वंज्ञानकर्मसमुच्चयसाध्यत्वंचोच्यतइति। अतएवातिशयातिरिक्तमोक्षसाधनसूचनाय संसारनिवृत्तिरित्युक्तं बंधनिवृत्तिरूपमोक्षइत्यर्थः। अस्मिन्पक्षेपूर्वंज्योतिरगन्म ततःसोममपाम ततोऽमृताऽभूमेत्यर्थः॥ इत्यादिश्रुत्यैवेति॥ आत्मविदामेवमुख्यामृतत्वमित्यर्थांतरप्रतिपादनायोदाहृतमेवेत्यर्थः। आदिपदेनतत्तत्सृजतेत्येतस्यग्रहणं। अविदितस्यापिस्वर्गादिभोजक

PDF
Sri Gangeshwari Digital Foundation

त्वादाह ॥ नामृतत्वमिति ॥ ननूपासनाकर्मणोज्ञानहेतुत्वात्कथमात्मविदपेक्षयेत्यत्रात्मानमेवेतिश्रुतिःप्रमाणमित्यतआह ॥ जानातीति ॥ परत्मानःसकाशात्यत्प्राप्तुमिछतितत्सर्वंस्वयंसृजतीतिनिरासायाह ॥ समुक्तइति ॥ ७ ॥ उक्त न्यायइति ॥ वैराग्यादेरवश्यानुष्ठेयत्वसाधकतत्तदधिकरणोक्तमित्यर्थः । फलंधनादि ननुभोगेनकर्मणांक्षयेपिबंधनिवृत्तिलक्षणमुक्तिःकथमित्यतआह ॥ कर्मानिबंधनइति ॥ क्षेप्तुं भोगेननाशयितुं ननुस्वर्गादावपिकर्मांतरापादनसंभवात्कथंभोगेनसर्वकर्मक्षयइत्यतआह ॥ तत्रेति ॥ तस्यभोगमात्रस्थानत्वादितिभावः ॥ ॐ कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां ॐ ॥ कृतस्यकर्मणोत्ययेस्वर्गादिभोगेनक्षये अनुशयवान्भुक्तकर्मशेषवानेवायाति कुतःदृष्टस्मृतिभ्यांततःशेषेणेमंलोकं भुक्तशेषानुशयवानितिश्रुतिस्मृतिभ्यामित्यर्थः । देवदैत्यानामपिजीवकृतकर्मभागित्वाद्यथायोग्यमित्युक्तं । जन्मारभ्यचतुर्दशवर्षपर्यंतमित्यर्थप्रतीतिनिरासायाह ॥ चतुर्दशमिति ॥ मर्यादार्थत्वस्य जीवंश्चतुर्दशादूर्ध्वंपुरुषोनियमेनतु । स्त्रीवाप्यनूनदशकंदेहंमानुषमार्जयेदित्यादिविरुद्धत्वादितिभावः । दशभ्योऽवराइत्यल्पत्वप्रतीतिनिरासायाह ॥ दशावरायेष्विति ॥ ८ ॥ क्लेशिष्टता क्लेशसाधनता सहभावात् विषयतयाविद्यमानत्वादुभयत्रतथाशब्दद्वयाध्याहारेणयथेतमितिश्रुतिवाक्यद्वयंव्याचष्टे ॥ यथेति ॥ ॐ यथेतमनेवंच ॐ ॥ यथायेनमार्गेणस्वर्गादिकंप्रति इतं गतं तेनायाति अनेवंच ततोन्येनचमार्गेणयातीत्यर्थः ॥ युक्तीति ॥ मार्गस्मरणयुक्तीत्यर्थः ॥ ९ ॥ गतागतस्येति ॥ गतंगमनंआगतंआगमनंतयोरित्यर्थः । भावेक्तप्रत्ययः ॥ तन्निमित्तानिमित्तयोरिति ॥ एकस्मिन्देशेकालेचपटादिकार्येणतन्निमित्तानिमित्तयोःतंतुरासभयोःसहभावदर्शनादित्यर्थः।तथाचतद्वदेवात्रयज्ञादेर्गतागतनिमित्तत्वसंशयेनगतागतस्यतज्जत्वन्यसंशयइतिभावः ॥ ॐ चरणादितिचेन्नतदुपलक्षणार्थेतिकार्ष्णाजिनिः ॐ ॥ रमणीयचरणाइतिश्रुतेः गतागतं च

रणादाचारादेवभवति नकर्मणेतिचेन्न यतश्चरणश्रुतिस्तदुपलक्षणार्था तस्यकर्मणोपलक्षणयावृत्योपादानार्थतइत्यर्थः ॥ तद्यइहेति ॥ तत् तत्र कर्मिषुयेरमणीयचरणाःसाध्वाचारमंतः तइहभूमौरमणीयांसाध्वींब्राह्मणादियोनिमापद्यंते प्राप्नुवंति । येकपूयचरणाः असाध्वाचारमंतः तेकपूयामसाध्वींशूद्रादियोनिमापद्यंतइत्यर्थः । कृतकर्मणोरित्यभिधानं । शून्यं प्रयोजनविकलं । कारी कर्मकर्ता आचारी आचारवान् तथा तदनुसारिफलभाक् ॥ अथेति ॥ यइमेग्रामाःकाम्यकर्मिणांसमुदायः इष्टं यजनं पूर्तं तटाकबंधनादि दत्तंधनादिदानं इतिशब्दःप्रभृत्यर्थः । उपासते आतिष्ठंते । तेधूमं धूमादिदेवतालोकं अभिसंभवंति प्राप्नुवंतीत्यर्थः ॥ तस्मिन्निति ॥ तेकर्मिणःतस्मिन्निंद्रलोकेयावत्संपातंतस्मादधःपतनंयावद्भवति तत्रावस्थाननिमित्तं पुण्यंयावत्समाप्यतइतियावत् तावत्कालपर्यंतंतत्रोपित्वावासंकृत्वा अथकर्मक्षयेयेतमेवमार्गेपुनरावर्ततइत्यर्थः ॥ नचेति ॥ नास्तीति नचेत्यर्थः । करणंकर्म ॥ भ्रांतिरेवेति ॥ तथाचनतद्विरोधइतिभावः । एतत् तत्रापिचरणफलस्यगतागतस्यचरणफलत्वरूपार्थांतरकल्पनं चरणश्रुतेः तद्यइहेत्यस्यसावकाशश्रुतेः इष्टापूर्तेदत्तमित्यस्याः गतागतशून्यफलंमोक्षः । नन्वनयाश्रुत्याकर्मणोगतागतशून्यफलत्वाभावसिद्धावपिगतागतफलत्वंकुतइत्यतआह ॥ इष्टापूर्तमिति ॥ तत्रेमंलोकंहीनतरंवाविशंतीत्युक्तेरितिभावः । त्रैविद्याःकाम्यकर्मिणः मांयांतीत्यर्थः ॥ अजहदिति ॥ स्वार्थाचारात्यागलक्षणयेत्यर्थः । आदिवाक्यस्य इष्टापूर्तेदत्तमित्युपक्रमवाक्यस्य ॥ यइति ॥ येयज्ञादिकर्मणालोकान्प्राप्नुवंतितआदौधूममभिसंभवंतीत्यर्थः । विरुत्धमर्थांतरकल्पनमित्यस्ति ॥ ॐ आनर्थक्यमितिचेन्नतदपेक्षत्वात् ॐ ॥ उपलक्षकत्वेचरणशब्दस्यानर्थक्यवैय्यर्थ्यक्यंमितिचेन्न रमणीयत्वादेस्तदपेक्षत्वात् चरणसामर्थ्येनतदर्थतत्सार्थक्यादित्यर्थः। प्रकृतत्वेनेष्टापूर्तेदत्तमित्युपासतइत्यनेनेत्युपलक्षणस्येतिसंबंधः। उपलक्षणत्वपक्षेरमणीयचरणाइत्यादेर्लब्धयोजनांदर्शयति ॥ एवंचेति ॥

SGDF Foundation

॥ ॐ सुकृतदुष्कृतएवेतितुबादरिः ॐ ॥ रमणीयकपूयचरणेसुकृतदुष्कृतेक्रमेणसाध्वसाधुकर्मणीएव नाचारानाचारावितिबादरिर्मन्यतइत्यर्थः । ननुनानार्थचरणशब्दस्यैकार्थपरत्वे उभयपरत्वंकुतइत्यतआह ॥ साधारणश्रुतेश्चेति ॥ रमणीयचरणाइत्यत्रचरणशब्दस्ययद्याचारमात्रार्थत्वंतदानान्यःपंथाअयनायविद्यतइतिश्रुतिविरोधः । यदिकर्ममात्रार्थत्वंतर्हि-यज्ञादिकृतामप्याचाराधीनरमणीयत्वाद्यसिद्धिरितिबाधकवशात्सांगकर्मार्थत्वस्यतंत्रन्यायेनांगांतिरूपोभयार्थकथनपरत्वस्यैवोपपत्तेरित्यर्थः ॥ १० ॥ अनिष्टादिकारिणामिति ॥ इष्टादिपुण्यकारिणांतद्विरुद्धपापकारिणांचेत्यर्थः ॥ विशिष्योक्तिरिति ॥ गतागतस्येष्टादिकर्मसमर्थनलब्धाइष्टादिकारिणांगतागतमितिविशिष्योक्तिरित्यर्थः । भयतदभावमात्रेणकथमिदंवैषम्यमित्यतआह ॥ बिभ्यदिति ॥ पतनभयत्रानेववृक्षात्पततीत्यर्थः । फलकामस्यगतागतकरणत्वेश्रुतिमाह ॥ कामान्यइति ॥ यश्चात्मानंकर्तृत्वेनमन्यमानः कामान्विषयान् कामयतेइच्छतिस्म सएवकामभिःभोक्तव्यैः कामैर्निर्मितैस्तद्भोगार्थमितियावत् भुविजायते तत्रतत्रविषयेषुपर्याप्तकामस्यालंबुद्धिमतःकृतात्मनःशिक्षितबुद्धेर्योगिनस्तु इहैवलोकेसर्वकामाःप्रविमुच्यंति विलीयंतइत्यर्थः ॥ ॐ अनिष्टादिकारिणामपिचश्रुतं ॐ ॥ नकेवलमिष्टादिकारिणामेवगतागतादिकं अपितुतद्यइहेत्यनिष्टादिकारिणामपिचश्रुतमित्यर्थः । नन्वेवंतर्हीष्टानिष्टाद्यकरणेगतागतादिदुःखाभावात् मोक्षसंभवेचकिमर्थं वैराग्यादीत्यतआह ॥ तदकारिणइति ॥ अनिष्टेत्यत्रनयोऽभावार्थत्वंविरुद्धत्वंचेतिभावः । अपिशब्देनेष्टादिकारिसमुच्चयसिद्धेश्चशब्दोव्यर्थइत्यतआह ॥ चशब्दइति ॥ अत्रोपष्टंभकमाह ॥ तदेवोत्तरसूत्रइति ॥ अन्यथाअप्राप्तस्यानुवादायोगात्संयमनेत्वनुभूयेत्यनुवादोनस्यादितिभावः ॥ ॐ संयमनेत्वनुभूयेतरेषामारोहावरोहौतद्गतिदर्शनात् ॐ ॥ सम्यक् यमनंशासनंसप्तमीद्वितियार्थे अनुभूय तु अनुभूयैव इतरेषामनिष्टादिकारिणामारोहावरोहौ केषांचि-

SGDF
Sri Gargeshwari Digital Foundation

दारोहउत्थानं केषांचिदवरोहः नीचस्थानेपातोभवति कुतः तद्गतिदर्शनात् तेषामनिष्टादिकारिणां गतेरेवंविधायाः सर्वे वाएतइतिश्रुतौदर्शनादित्यर्थः ॥ विकल्पइति ॥ भगवद्द्वेषिणामेवनित्यनरकेपातोन्येषांनेतियथानतथासम्यग्ययनंपापो परमणंयत्रेति संयमनपदेनोक्तेऽनित्यनरकेकिंतुसर्वेषांतन्नियतमितिभावेनेत्यर्थः ॥ इतिचार्थइति ॥ नवेवलंपापकर्तृत्वमेवाशुभकृच्छब्दार्थः किंतुपुण्याकर्तृत्वमप्यर्थइत्यर्थः । तेनानिष्टादिकारिशब्दस्योभयविधव्याख्यानेनश्रुतिसंवादइतिभावः ॥ ॐ स्मरंतिच ॐ ॥ नकेवलमिष्टादिकारिणामेवंविधगतिःश्रूयते किंतुतांस्मरंतिचस्मृतिकर्तारइत्यर्थः ॥ दर्शनादिति ॥ तथाचतद्वदेवभयाद्यभावेपिगतागतमनिवार्यमितिभावः ॥ ११ ॥ वैराग्यंभगवद्द्वेषादौ । पूर्वोक्तिः अवरोहः नैवेतउत्तिष्ठंतीत्युक्तिःलोकदृष्टिःनिगडस्थानादेरनित्यफलप्रदत्वदर्शना ॥ यावदिति ॥ चतुर्दशेंद्रायावत्स्वपदेतिष्ठंति तावत्कालंनरकेतिष्ठंतीत्यर्थः । ननुनरकभोगस्यनित्यत्वेपिनानित्यत्वोक्तिर्विरुद्धा नरकस्यभगवद्द्वेषाद्यतिपापीनांनित्यफलप्रदत्वेप्यल्पपापिनांपुनरावृत्त्यपेक्षयायावदिंद्राश्चतुर्दशेत्यादनित्यत्वकथनसंभवादित्याशंक्यानिषेधति ॥ नचैकस्यैवेति ॥ नारदोनारकिणांनारायणनामस्मृतिद्वारानरकंशून्यजनंचकारेत्यर्थः । नरकस्यकेषांचिन्नित्यफलप्रदत्वेशून्यत्वरूपानित्यत्वकथनविरोधइतिभावः ॥ यदुक्तमिति ॥ केषांचिदारोहःकेषांचिदवरोहइतिवैषम्योक्तिर्नरकेवैषम्याभावादयुक्तेत्यर्थः ॥ ॐ अपिसप्त ॐ ॥ सप्तप्रभेदमपिस्मरंतीत्यर्थः । ननुसप्तानामपिनित्यफलप्रदत्वेपुनरानित्यत्वोक्तिर्विरोधइत्यत आह ॥ तेषुचेति ॥ महानरौरवइतिविशेषणविशेष्यभ्रांतिंनिवारयति ॥ महान्महारौरवइति ॥ ननुरौरवादिपंचेभ्यएवारोहावरोहौनतुतामिस्रांधतामिस्राभ्यांतथाचैतानिक्रमशोगत्वेतिकथंसप्तानांपरामर्शइत्यतआह ॥ एतानिपंचेति ॥ तथाचैतच्छब्देनरौरवादिपंचैवपरामृश्यंते नतुसप्तापीतिभावः । ननुह्येकेनरकानेकविंशतिगणयंत्यष्टाविंशतिनरकाः एवं-

SGDF
Sri Gargeshwari Digital Foundation

विधानरकायमालयेसंतिशतशःसहस्रशइत्यादिनाभागवतादौबहुनरकोक्तेस्तद्विरोधःसूत्रस्मृत्योरित्यतआह ॥ **सप्तप्रधानानीति** ॥ १२ ॥ **उभयविधस्थानेति** ॥ निर्दुःखंस्वर्गादिकं सदुःखंभूम्यादिकमित्यर्थः । ननुसंभोगप्राप्तिरितिचेन्न वैशेष्यादितिसूत्रेणसार्वज्ञादिसामर्थ्यविशेषवत्वेनजीवसहावस्थितावपिनजीवसमानभोगप्राप्तिरित्युक्तत्वात्कथमियंशंकेत्याशंक्यनिषेधति ॥ **नचवैशेष्येति** ॥ **सार्वज्ञाभावप्रसंगादिति** ॥ तथाचसार्वज्ञादिसामर्थ्यवैशेष्ययुक्तिरेवासिद्धेतिभावः । ननुसाधूनेवरमयतिनासाधून् असाधूनेवारमयतिनसाधूनतःकथंसर्वंरमयतिसर्वंनरमयतीत्युक्तमित्यतआह ॥ **योग्यंसर्वमिति** ॥ ॐ **तत्रापिचतद्व्यापारादविरोधः** ॐ ॥ तत्रापिचनरकेपिचदुःखाभोगेनैवतद्व्यापारात्तस्यहरेःप्रेरणाख्यव्यापारादविरोधःहरेर्दुःखभोगप्रसंगेनवासर्वंरमयतीतिश्रुत्यावानविरोधइत्यर्थः ॥ १३ ॥ **प्रकृतपितृयानइति** ॥ चरणादित्यत्रविषयवाक्येतेधूममभिसंभवंतीत्यनेनप्रकृतइत्यर्थः ॥ **तत्प्रकृतीति** ॥ तत्प्रकरणइत्यर्थः । उभयोरप्यव्यवधानेनैकप्रकरणपठितत्वादितिभावः । ननुकथमत्रश्रुतौजीवानांगतिस्वातंत्र्यमुच्यतइत्यतआह ॥ **नहीति** ॥ चशब्देनाभिसंभवंतीतिविधिसमुच्चयः पुरुषप्रयत्नाविषयेविधिनिषेधयोरभावेनाभिसंभवंतीतिनगछंतीतिचविधिनिषेधान्यथानुपपत्यातेषांस्वातंत्र्यप्रतीतिरितिभावः । प्रतिपादितंपरेणेत्यादिना । साधनवत् साधनेतदधीनस्वातंत्र्यवत् सर्वेषांसाधनरहितानामपिसाम्यात्सर्वेषांसाधनप्राप्तेःक्षुद्रशब्दार्थोऽनित्यानीति ॥ ॐ **विद्याकर्मणोरितितुप्रकृतत्वात्** ॐ ॥ अथैतयोरित्येतच्छब्दस्यविद्याकर्मणोरित्येवार्थः कुतः प्रकृतत्वात् तद्यइत्थंविदुःअथेमेग्रामाइत्यादिनाविद्याकर्मणोरपिप्रकृतत्वादित्यर्थः ॥ **तद्यइति** ॥ तत्तस्मात्काम्यकर्मणोगमनागमनहेतुत्वात्तत्रविरक्तयइत्थंपंचाग्निविद्योक्तीत्याभगवंतंविदुः येचेमेऽरण्येमनोहरप्रदेशेश्रद्धातपइत्युपासते श्रद्धातपःप्रवृत्तिनिवृत्तिकर्मानुतिष्ठंति

तेर्चिषमर्चिर्लोकंतदभिमानिनंवाप्रविशंतीत्यर्थः । किंकारणमितिप्रश्नोत्तरमाह ॥ **स्मृतिसमाख्येति** ॥ नतुफलेविध्यभावेपिसाधनेस्वातंत्र्यंकिंनस्यादित्यतआह ॥ **विध्यादीति** ॥ तथाचयत्रजीवस्वातंत्र्यानंगीकारेबाधकंतत्रतदंगीकर्तव्यं नत्वन्यत्र ततश्चतत्रसाधनेस्वातंत्र्याभावेविध्यादिशास्त्रवैय्यर्थ्यस्यादितितदवैय्यर्थ्यायंतत्रेश्वरः स्वातंत्र्यंददातीतिप्राकर्ताशास्त्रार्थवत्वादित्युक्तं । नचैवंफलेस्वातंत्र्यानंगीकारेबाधकमस्तियेनतदंगीकर्तव्यंस्यादितिभावः ॥ १४ ॥ प्रकृतमपिसप्तेत्यनेनलोकदृष्टिरंधकारेपिविषयभोक्तुः सुखदर्शनं ॥ ॐ **नतृतीयेतथोपलब्धेः** ॐ ॥ तृतीयेतृतीयावाग्गतांवंधेतमसिनसुखमस्तिकुतः तथोपलब्धेः । अथाविद्वानितिश्रुतौतथादर्शनादित्यर्थः ॥ ॐ **स्मर्यतेपिचलोकेः** ॐ ॥ अंधेतमसिनसुखमित्येतत् तिर्यक्षुनरकेचैवेतिस्मर्यतेस्मृत्योच्यते लोकेपिसित्थंमितिशेषः । लौकिकदृष्टांतोपेतयुक्तिसित्थंचेत्यर्थः । नन्वंधेतमसिसुखराहित्यानुमानेलौकिकदृष्टांतानुपलंभात्कथमित्यतआह ॥ **अयमभिसंधिरिति** ॥ अयमाभिप्रायइत्यर्थः । स्वरूपासित्थिवारणायाह ॥ **नैतदिति** ॥ **अतिप्रबलामिति** ॥ तथाचतमसिसुखसाधकानुमानस्यानेनबाधइतिभावः । ननुस्मृतावीश्वरः स्वाप्रियेसुखंनसहतइयत्राप्रियेसुखंराजायथानसहतेतथैवपरमेश्वरइत्येतावदेववक्तव्यं । अतिप्रियेत्यादिकंतुकिमर्थमुदात्दृतमित्यतआह ॥ **अनेनैवेति** ॥ नैतेसुखित्वेनेश्वरेष्टाइत्यनुमानेनप्रथमार्धेनव्यतिरेकः तृतीयपादेनान्वयोदर्शितइत्यर्थः । दुःखस्यसुखविरुद्धत्वेनदुःखपदस्यसुखाभावपरत्वात्व्यतिरेकित्वंद्रष्टव्यं अतएवास्वरसात्पक्षांतरमाह ॥ **सदसज्जनेति** ॥ अत्रस्मृतौपूर्वंसदसज्जनानांप्रकृतत्वात् तत्रपरमेश्वरः सज्जनेषु दुःखंनसहतइत्यत्रातिप्रियेयथाराजेतिदृष्टांतोक्तिरसज्जनेषु सुखंनसहतइत्यत्रात्यप्रियइतिदृष्टांतोक्तिरितिभावः ॥ ॐ **दर्शनाच्च** ॐ॥ तमसिसुखंनेत्यर्थः।तद्विरिंचिदर्शनरूपप्रत्यक्षाच्चसित्थमित्यर्थः॥ ॐ **तृतीयेशब्दावरोधः संशो**

कजस्य ॐ ॥ तृतीयेतृतीयतमस्यपिविषेयसंशोकजस्यातिदुःखजस्यमोहस्य शब्दावरोधः शब्दश्रवणानुसारेणप्राप्तिर्भवती त्यर्थः । ननुतिर्यग्यातनातमइतितमसोऽधोगतिषुतृतीयस्योक्तत्वात्तृतीयतमसइतिकथंभाष्येऽभिहितमित्यतआह ॥ तमो पीति ॥ कथमिति ॥ शोकसाध्यमोहस्यश्रवणमात्रेणप्राप्तिः कथमित्यर्थः। नन्वत्रसूत्रेतिर्यगाद्यधोगतौतमसएवतृतीय त्वज्ञापकत्वतयातृतीयइत्युपपत्तेः भाष्येसौत्रतृतीयपदंकिमर्थं तृतीयतमःपरत्वेनव्याख्यातमित्यतआह ॥ अधोगताव ति ॥ तमसस्तृतीयत्वस्य नतृतीयइतिप्रथमसूत्रएवोक्तत्वात् अत्रसूत्रेतज्ञापनार्थंतृतीयग्रहणवैय्यर्थ्यापत्तेः तृतीयोतिर्यगा द्यधोगतौतृतीयेतमस्यपितृतीयस्याधराख्यतमोविशेषस्यग्रहणमित्यर्थः । सूत्रेषुपुनस्तृतीयग्रहणमेवकुतः यदवैयर्थ्यायेत्थं व्याख्यातमित्यतआह ॥ एतच्चेति ॥ सम्यग्व्याख्यानइति ॥ शब्दानुसारात्कथनानुसारात् सम्यक्तत्स्वरूप व्याख्यानेसतीतियावदितितात्पर्यकथनमिदं ॥ ॐ स्मरणाच्च ॐ ॥ तृतीयतमसः स्वरूपश्रवणेऽतिमूर्छेत्येतस्यचशब्दा त्तत्रैविध्यस्यचमहातमस्त्रिधाप्रोक्तमित्यादिनास्मरणादित्यर्थः ॥ १५ ॥ धूमादिभावेति ॥ धूमादिदेवतैक्यतत्पदप्रा प्त्योर्निरासादित्यर्थः । अवतीर्णाः अवरूढाः उक्तंयथेतमनेवंचेत्यनेन प्रकारांतरं सादृश्यादि ॥ शब्दस्यानेकवृत्त यइति ॥ धूमादिशब्दस्यमुख्यवृत्त्याआद्यपक्षद्वयप्रतीतिः सएवधूमोभूत्वेतिवाधूमांतरोभूत्वेतिवाप्रतीतेः गौण्याद्यमुख्य वृत्त्यासादृश्यादिप्रतीतिरितिभावः ॥ सामानाधिकरण्येति ॥ कर्मीधूमोभूत्वेवंरूपायाइत्यर्थः । उक्तरीत्याशब्दस्या नेकेत्युक्तरीत्या मुख्यवृत्त्येतियावत्तद्विरोधः श्रौतसामानाधिकरण्यविरोधः । अन्यार्थत्वंसादृश्यादिरूपं ॥ ॐ तत्स्वा भाव्यापत्तिरूपपत्तेः ॐ ॥ कर्मिणस्तत्स्वाभाव्यापत्तिः तस्यधूमादेःस्वभावइवस्वभावोयस्यसतत्स्वभावः तस्यभाव स्तत्स्वाभाव्यं धूमादिदेवतास्वभावसदृशस्वभावत्वस्याप्तिःप्राप्तिः नत्वक्त्यादेः कुतः उपपत्तेः अर्थांतरानुपपत्त्यास्यैवार्थ

SGDF Sri Gargeshwari Digital Foundation

स्योपपत्तेरित्यर्थः ॥ **सादृश्येचेति** ॥ तत्त्वमसीत्यादावित्यर्थः । आदिशब्दार्थमाह ॥ **स्थानैक्येति** ॥ **तथाप्र योगेति** ॥ परेव्ययेसर्वएकीभवंतीत्यादावित्यर्थः ॥ **कुतोर्थइति** ॥ श्रुतेरयमेवार्थःकुतःस्यादित्यर्थः । समवाये संमे लने ॥ १६ ॥ **पांथइति** ॥ मार्गजनत्यर्थः ॥ **मध्येमार्गमिति** ॥ **मार्गस्यमध्यइति** ॥ पारेमध्ये षष्ठ्यावास मस्यतेसोव्ययीभावः । पारेगंगायाः पारेगंगंमध्यंगंगायामध्येगंगमित्युदाहरणं । ननुभाष्येसदाप्येवंस्यादित्यनुक्त्वाक ल्पांतामितिकिमर्थमुक्तमित्यतआह ॥ **कल्पावसानइति** ॥ तथाचयावद्देवतापदंतावदेवत्स्वाभाव्यापत्तिनिमित्तसुख मितिनसर्वदेत्युक्तमितिभावः ॥ ॐ **नातिचिरेणविशेषात्** ॐ ॥ गर्भादिप्राप्तिरातिचिरेणातिबहुकालेनभवति किंत्व चिरेणैव कुतः विशेषात् तद्यइहेतिविशेषश्रवणादित्यर्थः ॥ **आगमनस्यैवेति** ॥ नतुबहुस्थानगमनस्यापीत्येवकारा र्थः । पर्यटन्यत्रतत्रचेतिबहुस्थानगमनपूर्वकमचिरेणैवगमनस्योक्तेरितिभावः ॥ **आपेक्षिकेति** ॥ तस्योत्तरकल्पापेक्षयेत्य र्थः ॥ **इष्टत्वविरोधइति** ॥ तत्रतत्रेत्युक्तरीत्येत्यर्थः ॥ **कारणेति** ॥ अदृष्टविशेषेत्यर्थः । इष्टत्वस्यैवप्रयोजकत्वं नकारणस्येत्यंगीकारेऽतिप्रसंगमाह ॥ **अन्यथेति** ॥ दुःखाभावस्यसर्वेषामिष्टत्वादितिभावः ॥ १७ ॥ व्रीह्यादि भावः व्रीह्यादिशरीरकत्वेनभवनं ॥ **सुखसाधनतयेति** ॥ स्वर्गादिसुखसाधनंयज्ञादिकर्मेतिश्रुतिविहितयज्ञादिकर्मकु र्वतामित्यर्थः । तच्छंका दुःखसाधनशंका । श्रुतिविहितत्वादविशेषादितिभावः ॥ **पुरुषार्थत्वमिति** ॥ तत्रापिदुः खसत्वेपुरुषैरर्थ्यत्वंनस्यादितिभावः । व्याख्येया तत्प्रवेशादिमात्रार्थत्वेन ॥ **तद्वदिति** ॥ कर्मिणाधूमादिदेवतैक्येऽ न्यस्यान्यभावयोग्यतालक्षणस्यबाधकस्यसत्वात्साश्रुतिप्रवेशादिमात्रार्थत्वेनव्याख्यातुंशक्यते । इहतुकर्मिणोनव्रीह्यादि जीवैक्यंश्रुत्यर्थः । किंतुतेषामेवव्रीह्यादिशरीरकत्वेनभवनरूपोव्रीह्यादिभावः । नचतत्रबाधकमस्ति । अतोनेयंश्रुतिस्तद्या

SGDF Digital Foundation

ख्येयेतिभावः । ईश्वरव्यभिचारान्नायंनियमइत्यतआह ॥ नहीति ॥ तथाचौत्सर्गिकोयंनियमइतिभावः । नन्वस्त्वेव मागमेनदुःखंतस्यापिवैराग्यहेतुत्वादित्यतआह ॥ तच्चदुःखमिति ॥ प्रतिपादितत्वादिति ॥ चरणादित्यत्रेति शेषः ॥ इतिशब्दइति ॥ इतिजायंतइतिश्रुतौइतिशब्दःप्रियंग्वाद्युपलक्षकइत्यर्थः ॥ ॐ अन्याधिष्ठितेपूर्ववद भिलापात् ॐ ॥ व्रीह्यादिभावोनामान्येनजीवेनाधिष्ठितेऽभिमानित्वेनाश्रितेव्रीह्यादिदेहेप्रवेशएव नतुतदाभिमानि त्वं कथंपूर्ववत् । धूमोभूत्वेत्यादिपूर्वोक्तवत् कुतः अभिलापात् । सोवाग्गतःस्थावरान्प्रविश्येतितथोक्तत्वादित्यर्थः । तत्रैव व्रीह्यादिभावएव ॥ अनवसरप्राप्तत्वादिति ॥ कारणाभावेनतस्मिन्कालेप्राप्तत्वादित्यर्थः । सामानाधिक रण्यंकर्मिणोव्रीह्यादयोजायंतइत्यादि ॥ ॐ अशुद्धमितिचेन्नशब्दात् ॐ ॥ पशुहिंसारूपत्वाद्यज्ञादिकमशुद्धंपाप साधनमितिचेन्न शब्दविहितत्वादित्यर्थः ॥ अन्यतरप्रकारेणेति ॥ व्रीह्यादिभावसहभावयोरन्यतरप्रकारेणेत्य र्थः ॥ वायव्यमिति ॥ ऐश्वर्यकामोवायव्यंवायुदेवताकंश्वेतवर्णपशुंबस्तापरपर्यायमजमालभेतहन्यादित्यर्थः ॥ सो पाधिकत्वेनेति ॥ किंनामनिषिद्धत्वमेवेत्यनेनपापसाधनत्वरूपसाध्यव्यापकत्वस्यनतद्याज्ञीयपशुहिंसायामस्तीत्यनेन हिंसात्वरूपसाधनव्यापकत्वस्यचोक्तत्वादितिभावः ॥ १८ ॥ नातिविरक्तिरिति ॥ आयासाभावादितिभावः ॥ वचनादिति ॥ तत्रैवकारेणान्यप्रवेशनिषेधादितिभावः । सिद्धत्वान्नविलक्षणत्वाधिकरणे कथमित्यनुवादः ॥ किमर्थेति ॥ कोर्थोयस्याःसाकिमर्थाकीदृशार्थवतीत्यर्थः । ॐ रेतःसिग्योगोथ ॐ ॥ कर्मिणः आदौरेतःसि ग्योगःरेतःसिंचतीतिरेतःसिक्पितातस्ययोगःसंबंधोभवति । अथतस्मादनंतरंमातृयोगोभवतीत्यर्थः ॥ प्रवेशमात्र स्येति ॥ पितुरुपयोगमंगीकृत्यतत्प्रवेशमात्रस्यवैय्यर्थ्यमुच्यतइत्यर्थः ॥ शरीरपरिणामायेति ॥ अनेनश्रुतिसूत्र

योःपितृग्रहणमकृत्वारेतःसिग्ग्रहणेप्रयोजनमुक्तमितिध्येयं ॥ अयोगव्यावार्त्तकइति ॥ तथाचवृजेदेवेत्यन्वयइतिभावः ॥ १९ ॥ योनिप्रवेशस्तावदिति ॥ पितृप्रवेशोप्ययुक्तइतिवक्ष्यमाणापेक्षयातावाच्छब्दः । तस्मिन्निति विपर्ययएवेत्यर्थः । मांधातृमुखानांपितृदेहादेवोत्पत्तिदर्शनादितिभावः ॥ बहिरिति ॥ देहाद्बहिरित्यर्थः द्रुपदादिनांतथादर्शनादित्यर्थः । ननू त्पत्यसंभवादित्यत्रस्त्रीमात्रादुत्पत्तेर्निषिद्धत्वात्कथंप्रमदायामित्युक्तमित्यतआह ॥ जरत्कार्विति ॥ तत्स्पर्शएवानुग्रहइति भावः ॥ संस्पर्शइति ॥ जरत्कारुनामिकायांयोषितिजरत्कारोपुंसःसकाशादास्तिकस्ययोनिप्रवेशंविनैवमातृशरीरप्रवेशेन जन्मादिदर्शनादितिभावः ॥ ईशक्लृप्तीति ॥ ईशक्लृप्त्यैवपितरंप्रविशत्यथमातरमितिवचनविरोधादित्यर्थः ॥ वैपरीत्य स्येति ॥ अस्याप्यर्थदेहंगर्भस्थितामितिप्रमाणसिद्धत्वेनेशक्लृप्तिमूलत्वात्तस्यैवेतद्विरोधोपिवक्तुंशक्यतइत्यर्थः । अन्यतइत्य स्यैवविवरणमन्नादेरेतिमातृभुक्तान्नादिद्वारेत्यर्थः । शरीरपरिणामायरेतसोपेक्षितत्वेनपितृप्रवेशआवश्यकइत्यतआह ॥ मातृ स्थेति ॥ शरीरप्राप्तिरपीति ॥ रेतःकलिलबुद्बुदाद्यवस्थाविशिष्टदेहसंबंधइत्यर्थः ॥ पूर्वसिद्धेरिति ॥ स्वप्रवेशात्पूर्वमेवो क्तक्रमेणपरिणतेत्यर्थः । उक्तत्वादेहंगर्भस्थितंकापीत्यनेनैवविकल्पेबीजमाह ॥ क्वापीति ॥ ॐ योनेःशरीरं ॐ ॥ कर्मीयोनेः प्रवेशानंतरंशरीरंलभतइत्यर्थः । ततःपितुस्तत्रैव मातृदेहे विशेषकारणं तपोवरादि ॥ केचिदिति ॥ मध्वाचार्यइत्यर्थः । संपूर्ण लक्षणचणंनवराजमानद्वारांतरंपरमसुंदरमंदिरंतत् । राजेवसत्पुरवरंभुवनाधिराजोनिष्कासयन्परमसौभगवान्विवेशइतिमध्व विजयोक्तेः ॥ पितृसापेक्षइति ॥ अप्सरादेर्दर्शनेनावस्कंदितपृषतरेतोमर्दनजन्यत्वादितिभावः । स्थानांतरेकुंडादौ ॥ निर पेक्षाइति ॥ याजोपयाजप्रभावेनरेतोनिरपेक्षेणजन्यत्वादितिभावः । तदेवस्थानांतरइत्येतदेव ॥ अन्योन्यइति ॥ मयुरप्रभृती नामिदमित्याहुः ॥ २० ॥ इतिश्रीमत्तत्वप्रकाशिकाव्याख्यायांवाक्यार्थमंजर्यांतृतीयाध्यायस्यप्रथमःपादः

Foundation

॥ श्रीगुरुभ्योनमः ॥ अवसरप्राप्तेति ॥ उक्तरीत्योभयनिरूपणमध्यकालएवनिरूपणीयत्वेनप्रसक्तेत्यर्थः ॥ अ
भावादिति ॥ लक्षणप्रमाणादिनातत्स्वरूपनिरूपणाभावादित्यर्थः । भगवन्महिमोक्तौकथंभक्त्युत्पत्तिरित्यतआह
॥ माहात्म्येति ॥ स्नेहोवेति ॥ माहात्म्यज्ञानपूर्वकार्थत्वात्स्नेहस्येतिभावः । तर्हिकथंभक्तिरित्युच्यतइत्युक्तमि
त्यतआह ॥ एवंज्ञानसाधनेति ॥ साधनीभूतज्ञानविषयवचनस्यापीत्यर्थः । क्वचित् शत्रौ तथाचान्वयव्यतिरे
कव्यभिचारान्नमाहात्म्यज्ञानस्यस्नेहाख्यभक्तिहेतुत्वमितिभावः । कारणांतरेण स्ववीर्यजातत्वादिना तथाचप्रमिताने
ककारणके व्यतिरेकव्यभिचारोनदोषइतिभावः । एतदेवाह ॥ नहीति ॥ मत्सरादिनिरुद्धेति ॥ तथाचसतिप्रति
बंधेऽन्यस्यव्यभिचारोनदोषइतिभावः । इदमेवाह ॥ नहीति ॥ क्वचिद्विविच्योच्यतइति ॥ संध्येसृष्टिराहहीत्यादौज
न्मादिसूत्रोक्तसृष्ट्याद्यष्टकर्तृत्वादिमाहात्म्यविवेचनादितिभावः ॥ क्वचित्समर्थ्यतइति ॥ नस्थानतोपीत्यादिनानं
दमयादिसूत्रोक्तस्वरूपाभेदादिमाहात्म्यसमर्थनादितिभावः ॥ स्वाप्नविषयेति ॥ स्वप्नावस्थास्थितगजादीत्यर्थः ।
स्वप्नेतिपाठेप्ययमेवार्थः । एवमग्रेपि । विप्रतिपत्तिः वादिनां । कुतइत्यतसत्त्वेबाधकसद्भावादित्याशयेनाह ॥ सत्त्वेचव
क्तव्यमित्यादिना ॥ पूर्वोत्तरकालामिति ॥ स्वप्नदर्शनादितिशेषः ॥ प्रातीतिकत्वादिति ॥ प्रतीतिमात्रश
रीरकत्वादित्यर्थः ॥ प्रतीतकालएवेति ॥ तात्कालिकविद्युदादिवदितिभावः । निरोधोनाशः ॥ अयोगादिति ॥
व्यवहितत्वादितिभावः । पश्यतःसतः ॥ पश्चादिति ॥ प्रबोधानंतरंपरावृत्यगमनेनेत्यर्थः । इंद्रियेति ॥ बाह्येंद्रियव्या
पाराभावादित्यर्थः । सत्यत्वेबाधकांतरमाह ॥ यदिचेति ॥ ततःद्रष्टुःसकाशात् । कुतइत्यतआह ॥ परमार्थतोस्ये
ति ॥ द्रष्टुरित्यर्थः ॥ मरुमरीचिकाजलेति ॥ मरुदेशस्थसूर्यकिरणारोपितजलइत्यर्थः । मृगतृष्णामरीचिकेतिनामातरं

SGDF Digital Foundation

॥ ॐ संध्येसृष्टिराहहि ॐ ॥ संध्येस्वप्नेपदार्थानांसृष्टिर्भवति कुतः हियस्मादथरथानितिश्रुतिस्तथाहेत्यर्थः । अ
दृष्टेः अदृष्टत्वान्निमित्तात् । सृष्टिरितिभगवदभिजातातात्कालिकेतिशेषः । अदर्शनात्लोके ॥ ॐ निर्मातरंचैकेपु
त्रादयश्च ॐ ॥ यएष्वित्येकेशाखिनःपरमात्मानंस्वाप्नपदार्थानांनिर्मातारंकर्तारमाहुः । एकेशाखिनःस्वाप्नपुत्रादयश्चत
स्मादेवजायंतइत्याहुरित्यर्थः ॥ अतएवेति ॥ जीवःसुप्तिकालेजागरणादिनावगतैश्वर्यादेवेत्यर्थः । एके मायिनः ।
तर्हिसएवकर्तास्त्वित्यतआह ॥ जीवस्येति ॥ अयोगादिति ॥ तदानींतथाननुभवादितिभावः । कल्पकत्वं आरो
पकत्वं शुक्लं शुद्धं । ननुयएष्वित्यादिनाजीवमनूद्यतदेवेत्यादिनातस्यब्रह्माभेदउच्यते अतोयच्छब्दवाच्योजीवएवेतितस्यै
वकर्तृत्वमित्याशंक्यनिराकरोति ॥ नचेति ॥ दूषितत्वात् पृथगुपदेशादित्यादौ । अंतरंगानुपपत्तिंचाह ॥ तस्मि-
न्निति ॥ तदेवेत्यनेनोक्तब्रह्मणोलोकाधारकत्वेन विशिष्टब्रह्मत्वाद्विशिष्टेनच ब्रह्मणाविरुद्धधर्माधिकरणस्यजीवस्यै
क्यांनंगीकारादितिभावः । ननुविशिष्टांशत्यागेनचिन्मात्रलक्षणैक्योक्तिरियमस्त्वित्यतआह ॥ लक्षणाचेति ॥ गत्यं
तराभावेहिलक्षणासंगतिः अत्रतुभेदेनमुख्यार्थसंभवान्नगत्यंतराभावइतिभावः ॥ प्रकरणप्राप्तत्वादिति ॥ यथाभुंजा
नइतिभोजनप्रकरणाद्वागुत्सर्जनाभावस्य भोजनसमानकालीनत्वलाभस्तथेहापिसुप्तेतिसुप्तेष्वितिसुप्तप्रकरणान्निर्माणस्यस्वा-
प्नसमानकालीनत्वलाभेनस्वाप्नपदार्थनिर्मातृत्वस्यैवप्राप्तत्वादित्यर्थः ॥ ॐ मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्व
रूपत्वात् ॐ ॥ स्वाप्नपदार्थजातंमायामात्रंतु मायाभ्यांसंस्कारेछाभ्यां मात्रंतु निर्मितमेव नान्यनिर्मितं कुतः कार्त्स्ने
नसाकल्येनानभिव्यक्तस्वरूपत्वात् बाह्यार्थक्रियासामर्थ्यरहितत्वादितियावत्॥ अनादिमनोग्रहणमिति ॥तथाचैतेषा
मेतज्जन्मन्यननुभूतत्वेपि अनादौसंसारेजन्मांतरेतदनुभवसंभवेसंस्कारोत्पत्युपपत्तेरितिभावः । कारणमुपादानं नित्येत्वे

NGDF
Sri Gargeshwari Digital Foundation

दोषांतरमाह ॥ द्वितीयइति ॥ स्वाप्नविषयस्यानादिनित्यत्वमाशंक्यप्रागूर्ध्वमनुपलब्धिरूपायापिशाचीत्वयामोचिता सेदानींतन्नित्यत्वमंगीकुर्वाणंत्वांप्रत्येवाभिधावतीत्यर्थः ॥ अनेनेति ॥ व्यावर्त्यकथनेनेत्यर्थः ॥ सम्यगभिव्यज्ये रन्निति ॥ जलाहरणादिबाह्यार्थक्रियासमास्युरित्यर्थः ॥ एतेनेति ॥ किंचस्वाप्नेत्यादिनोक्तादोषाःसंस्कारोपादानक त्वाभ्युपगमेनैवनिरस्ताइत्यर्थः । तेषांकंठशोषणमात्रहेतुत्वंनत्वस्मत्पराजयइत्याशयेनोक्तं ॥ कंठकोलाहलइति ॥ नचातींद्रियसंस्कारोपादानकत्वान्नेंद्रियग्राह्यत्वमितिवाच्यं । अतींद्रियद्व्यणुकोपादानकत्र्यणुकस्येंद्रियत्ववदुपपत्तेरितिभावः ॥ जाग्रत्पदार्थत्वमिति ॥ जाग्रत्पदार्थाभेदइत्यर्थः ॥ ॐ सूचकश्चहिश्रुतेराचक्षतेचतद्विदः ॐ ॥ स्वाप्नविषय शुभाशुभयोःसूचकः ज्ञापकश्च यस्मात्तस्मान्नासत् कुतः यदाकर्मेतिश्रुतेः तद्विदःस्वाप्नपदार्थज्ञास्तथाकथयंतिचेत्यर्थः । शाकुनंकन्यादिकं अशुभलक्षणाभावसूचकांश्रुतिंस्वयमुदाहरति ॥ एवमिति ॥ स्वप्ने एतादृशंपुरुषंपश्यतितदासपुरुष एनंहंतिहननसूचकोभवतीत्यर्थः ॥ इतिसूचितमितीति ॥ तथाचनकेवलंशुभादिसूचकत्वंश्रुतिसिद्धंकिंतुदर्शनाच्चप्रत्य क्षादपिसिद्धमित्यर्थइतिभावः ॥ भ्रांतार्थस्येति ॥ आदित्याद्यारोपितचंद्रादेरित्यर्थः । अस्यशिरोवायतिसंपरेतोस्या त्मनचिरमिवजीविष्यतीतिविद्यादितिवाक्यशेषेणमरणादिसूचकत्वोक्तेरितिभावः ॥ अन्यथाज्ञातस्येति ॥ चंद्रत्वा दिनाज्ञातस्यादित्यादेरित्यर्थः । इदंचादित्योदृश्यतइतिअधिष्ठानप्राधान्योक्त्यनुसारेणोक्तंवस्तुतस्त्वधिष्ठानस्यान्यनत्वाज्ञा नमेवसूचकं । सर्पभ्रमादावपिहिज्ञानमस्त्येवतादृशं तदेवार्थक्रियाकारीतत्सदेवार्थकारकमितित्यनुव्याख्यानोक्तेरितिध्येयं उक्तिः अधिष्ठानस्य ननुविद्यमानस्याप्यधिष्ठानस्यानुक्तिःसंभवतीत्यतआह ॥ नचेति ॥ पृथगिति ॥ नहिशुक्तिकाश कलंरजतात्पृथक्प्रतीयतइत्यर्थः ॥ १ ॥ विशेषानुक्तिरिति ॥ स्वाप्ननाशईशाधीनइतिविशिष्यानुक्तिरित्यर्थः

॥ समानविषयेति ॥ सोयंयदवयवउत्पद्यतेतद्विषयेत्यर्थः ॥ ॐ पराभिध्यानात्तुतिरोहितंततोह्यस्यबंधवि पर्ययौ ॐ ॥ परस्यपरमात्मनोभिध्यानादिच्छायाःसकाशादेवसंध्यंतिरोहितंनस्याति कुतः हियस्मादस्यजीवस्यबंधविप र्ययौसंसारमोक्षौततईश्वरादेवभवतस्तस्मादेवेत्यर्थः ॥ सुप्रसिद्धइति ॥ अनेनहिशब्दःप्रसिद्धत्वेनापिव्याख्यातः ॥ दृष्टांतमात्रमिति ॥ प्रतिदृष्टांतरस्यापिसंभवेनतन्मात्रस्यासाधकत्वादितिभावः ॥ २ ॥ संगतेति ॥ जाग्रदवस्था याःस्वप्नतिरोभावनिमित्तत्वेतन्निरूपणे एतत्स्मरणादितिभावः । कालःप्रातरादिः भ्रांतं भ्रांतिः ॥ ॐ देहयोगाद्वा सोपि ॐ ॥ जीवस्यदेहयोगाद्देहाभिमानेनवासस्थितिरूपजाग्रदपिपरमात्मेच्छातएवेत्यर्थः । देहयोग्यस्यसुप्त्यादिसाधार ण्यादाह ॥ देहाभिमानेति ॥ बाह्यदेहाभिमानेत्यर्थः ॥ स्वप्नेति ॥ वासनामयदेहाभिमानसत्वात् ॥ ३ ॥ ननु स्वप्नजाग्रत्सुप्तेः भगवदधीनत्वंकुतोनविचार्यतइत्यतआह ॥ भगवदधीनत्वइति ॥ सतेति ॥ हेसौम्य तदासुप्तोजीवः सताभगवतासंपन्नःप्राप्तस्तेनांतःप्रवेशितोभवतीत्यर्थः ॥ यत्रेति ॥ यत्रयदाएतत्सुप्तः एषसुप्तः समस्तउपरतेंद्रियवृत्तिः संप्रसन्नःसम्यक्प्रसीदति सुखमनुभवतीतिप्रसन्नोजीवः स्वप्नंनविजानाति तदा आसुनाडीषुसुप्तोभवतीत्यर्थः । इष्टाप त्तिमाशंक्यपरिहरति ॥ नचमुक्तवदिति ॥ व्यतिरेकदृष्टांतोयं ॥ किमपराद्धंसुखेनेति ॥ सज्जीवानांकिंचिदभि व्यक्तस्यस्वरूपसुखस्यान्येषांपरमात्मसंबधलक्षणनिमित्तोत्पन्नसुखस्यचानुभवसंभवादितिभावः । यथोक्तंषट्प्रश्नभाष्य टीकायां । यस्मात्परमेश्वरतेजसाभिभूतोभवत्यतस्तस्मात्तत्सन्निधानसामर्थ्योद्भूतंयत्सुखंतदस्मिन्शरीरेभवतीति । यथासु प्तौसर्वेंद्रियाणामुपरतत्वोक्तिनिमित्तंसुखंकेनवाजीवोनुभवतीत्यभिप्रायेणपृष्टेपरमेश्वरसन्निधानेनोद्भूतं सुखमात्मस्वरूपज्ञा नेनानुभवतीतिपरिहारोभिप्रेतइति । अत्रोद्भूतइत्यनेनयोग्यानांस्वरूपसुखाभिव्यक्तिरन्येषांपरमात्मनिमित्तजन्यंसुखमुच्यत

इतिसंप्रदायविदइतिभावबोधेस्फुटं॥ नस्मर्यतइति ॥ ततोनतदनुभवाभ्युपगमइतिभावः। किमत्रदुःखाभावानुमानंदेवदत्ती यसुप्त्यवस्था देवदत्तसमवेतदुःखोपेतानभवति तत्कारणशून्यत्वादितिवा । सुप्त्यवस्थाविशिष्टोदेवदत्तः नदुःखसमवायी त त्कारणरहितत्वादितिवेतिविकल्पंमनसिनिधायाद्येदोषमाह ॥ पक्षभूतेति ॥ दुःखाभावानुमानवादिनासुप्तिकालेसुप्त्यव स्थायामनुभवानंगीकारान्नोत्तरकालंतत्स्मरणं तदनुभवांगीकारेचदुःखाभावस्याप्यनुभवसंभवेनतत्स्मरणापलापायोगा दितिभावः। द्वितीयंदूषयति ॥ आत्मेति ॥ नचदेवदत्तमात्रपक्षीकारइतिवाच्यं तथात्वेजाग्रदवस्थाविशिष्टस्यदेवदत्त स्यसुखसमवेतत्वेनतदभावसाधनेबाधकप्रसंगात् सौषुप्तिकदुःखाभावसिध्यर्थांतरत्वाच्चेतिभावः॥ ॐ तदभावोनाडीषुत च्छ्रुतेरात्मनिह ॐ ॥ जीवस्यतदभावः तयोः जाग्रत्स्वप्नयोरभावः सुप्तिः नाडीष्वात्मनिनाडीस्थपरमात्मनि भवति कुतः तच्छ्रुतेः तस्यनाडीस्थत्वस्यचासुतदेतिसतासोम्येतिचश्रुत्युक्तत्वादित्यर्थः । श्रुतिद्वयानुसारेणकदाचिन्नाडीषुकचिदात्मनी त्यवस्थौ वाऽस्तुकिमुक्तव्यवस्थेत्यतआह ॥ एवंचेति ॥ सर्वत्र आकाशानादित्वसादित्वादौ ॥ ४ ॥ ॐ अतःप्रबोधो स्मात् ॐ ॥ सुप्तजीवस्यप्रबोधोऽस्मात्परमात्मनएवभवति कुतः अतः जीवस्यपरमात्मन्येवसुप्तत्वादित्यर्थः। ननुजीवस्यतस्मि न्नेवसुप्तत्वेपिसुप्तप्रबोधस्येश्वराधीनत्वंकुतइत्यतआह॥ नहीति ॥ ५ ॥ खंडेशत्वेति ॥ किंचिद्देशकालीनेशत्वेत्यर्थः ॥ अ- तिप्रसंगादिति ॥ लोकविलक्षणानिष्टधर्मस्यांगीकारप्रसंगादित्यर्थः। लोकविलक्षणयुगपदणुत्वमहत्वादिवर्तिनस्यादित्य तआह ॥ नचात्रेति ॥ अणोरणीयान्महतोमहीयानित्यादिश्रुतिः प्रमाणमितिभावः ॥ ॐ सएवचकर्मानुस्मृति- शब्दविधिभ्यः ॐ ॥ सर्वावस्थाप्रवर्तकः सएवपरमात्मैव नान्यः कुतः कर्मानुस्मृतिशब्दविधिभ्यः एषह्येवैनंसाधु- कर्मकारयतीतिसर्वकर्मणामीशाधीनत्वोक्तेः प्रदर्शकस्त्वित्यनुकलस्मृतेः एषस्वप्नान्दर्शयतीतिशब्दात् आत्मानमेवेत्युपा

SGDF Sri Gargeshwari Digital Foundation

सनाविधिश्चेत्यर्थः । नन्वीशांतरसत्वेप्येषः स्वप्नान्दर्शयतीतिश्रुतेःसावकाशत्वात्कथंविवक्षितार्थसाधकत्वमित्यतआह ॥ अवधारणस्यचेति ॥ एषएवपरमानंदइतिश्रुतस्यावधारणस्यएषस्वप्नान्दर्शयत्येषप्रबोधयतीत्यत्राप्यन्वयेनाविवि-क्षितार्थस्यभगवतएवसर्वावस्थाप्रेरकत्वस्यासिध्धेरित्यर्थः । ननुपरमात्मनएवोपास्यत्वविधानेप्यवस्थानांभगवदधीनत्वंकुतइ त्यतआह ॥ अन्यस्यापीति ॥ अन्यस्याप्यवस्थाप्रेरकत्वेतस्याप्युत्तमत्वेनोपास्यत्वप्राप्त्या आत्मानमेवेत्यवधारणंनोप पद्यतइतिभावः । ननुसौत्रश्चशब्दःकिमर्थः समुच्चयार्थस्यावधारणविरुत्धत्वादित्यतआह ॥ चशब्दइति ॥ ईशांतरक ल्पनारूपपक्षांतरेत्यर्थः । किमिदंस्मृतेरनुसारित्वमित्यतआह ॥स्फुटमिति॥ ६ ॥ अवांतरावस्था मूर्छा ॥ द्विविधेति ॥ द्विरूपेणेशतदन्यत्रभाविसुषुप्तिजाग्रदवस्थादर्शनमित्यर्थः ॥ जाग्रस्वप्नयोरिति ॥ मोहस्यजाग्रत्स्वप्नयोः सकाशात्पृ थगवस्थात्वादितिभावः नन्वथापिमोहोभगवदन्यत्रकिंनस्यादित्यतआह ॥ अन्यथेति ॥ जाग्रत्स्वप्नयोःपरमात्मनःस काशात्पृथगन्यत्रभागव्यवस्थानान्मोहस्यापितथात्वांगीकारेतदुभयसांकर्यस्यादित्यर्थः । एतदर्थमुक्तंजाग्रत्स्वप्नयोः पृथ-गवस्थात्वादिति परमात्मनइतिशेषः । नचेष्टापत्तिः तयोःपरस्परंपृथगवस्थात्वेनैकस्यमोहस्यैवसांकर्यायोगादिति-भावः । एतदर्थमप्युक्तंजाग्रत्स्वप्नयोःपृथगवस्थात्वादिति परस्परमितिशेषः ॥ नचैवामिति ॥ मोहस्यभगवत्प्रवेशाव स्थानत्वांगीकारेसुप्तेरपितथात्वेनतत्सांकर्यप्रसंगइत्यर्थः ॥ समानधर्मतयेति ॥ परमात्मप्रवेशार्थत्वेनमनआदिसर्वे द्रियोपरमत्वेनचसमानधर्मत्वेनचेत्यर्थः ॥ गुणत्वादिति ॥ सुप्तेरप्यनेकत्वेनतत्सांकर्येप्रागुक्तदोषाभावादितिभावः ॥ ॐ मुग्धेर्धसंपत्तिःपरिशेषात् ॐ ॥ भावेक्तः मुग्धेमोहे अर्धसंपत्तिः जीवस्यपरमात्मन्यर्धप्रवेशः कुतःपरिशेषात् हृदयस्यापेक्षयादूरत्वसामीप्यप्रवेशार्धप्रवेशानांमध्ये आद्यत्रिकस्यासंभवेनार्धप्रवेशस्यपरिशिष्टत्वादित्यर्थः व्याख्यातुं स्मृ-

SGDF
Sri Gargeshwar Digital Foundation

त्यैवधर्मत्वात् तेषामेतत्परिशेषेणार्थप्रवेशज्ञानं ॥ **दुःखात्मकालेति** ॥ एतावतंकालमहंदुःखमनुभवामीतित्युत्तरकाली नपरामर्शादितिभावः । ननुहृदयकंठमध्येप्रवेशावस्थानरूपमोहस्यपृथगवस्थात्वेदक्षिणाक्षिकंठमध्यप्रवेशावस्थानस्यापिपृथगवस्थात्वंप्रसज्जेत अविशेषादित्यतआह ॥ **नातिदूरसामीप्यमिति** ॥ दक्षिणाक्षिकंठमध्यप्रदेशस्यहृदयस्थानादक्षिणाक्षिवदतिदूरत्वंकंठवदतिसामीप्यंवानास्तीतिमार्गतयातत्प्रदेशगतजीवस्ययन्नातिदूरंसामीप्यंतज्जीवस्यमोहवांचिरकालं नास्तीतिहेतोस्तस्यपृथगवस्थानस्याप्रसंगइतिभावः । एतद्दुःखमात्रेत्यादि तदेवाह ॥ **नमोहइति** ॥ **अन्यार्थेति** ॥ आत्मकालदुःखातिरिक्तेत्यर्थः ॥ **दक्षिणाक्षीति** ॥ विश्वस्यदक्षिणनयनाग्रवृत्तित्वेनतैजसस्यकंठाधोभागस्थमनोवृत्तित्वेनतदुभयसामीप्यंदक्षिणाक्षिस्थस्याप्यस्तीतिकथमक्षिस्थोदूरस्थइत्यर्थः । अवस्थाशब्दस्यस्त्रीलिंगत्वात्कथंत्रयइतिपुल्लिंगप्रयोगइत्यतआह ॥ **त्रयस्तिस्रइति** ॥ कारणांतरादर्शनेनविवादाभावान्नतचिंत्यतइत्यतआह ॥ **मोहकारणानामिति** ॥ ताडनादीनामित्यर्थः ॥ **कर्मानुस्मृतीति** ॥ एषह्येवसाधुकर्मकारयतीतिसर्वकर्मणांभगवदधीनत्वोक्त्यामोहस्यापिकर्मत्वेनभगवधीनत्वंसित्यं अनुस्मृतिश्चवक्ष्यमाणा आदिशब्देनशब्दविधिग्रहणं ॥ **अतएवेति** ॥ स्मृतौभगवतोमूर्छातत्प्रबोधप्रवर्तकतयाज्ञेयत्वोक्तेरेवेत्यर्थः । सार्थक्यमेवेत्यतआह ॥ **अनिश्चितेति** ॥ नन्ववस्थितिवैशेष्यादितिचेन्नाभ्युपगमात्धृदिहीतिसूत्रेणहृदिह्येषआत्मेतिश्रुत्याचजीवस्यहृदयदेशएवसर्वदाऽवस्थानाभ्युपगमात्कथमक्ष्यादिस्थत्वमुच्यतइतिचेन्मैवं उत्तमानांमंशेनाक्ष्यादिस्थत्वेविरोधाभावादन्येषामक्ष्यादिष्वभिमानातिशयेनाक्षिस्थइत्युक्त्युपपत्तेः ॥ **उक्तं चैतरेयभाष्ये** ॥ नहिजीवस्याक्षिणीपृथक्शिरोबाह्वादिकंविद्यते त्वदिस्थमेवहितस्यरूपंजागरितेप्यक्ष्यादिषुविशेषसन्निहितंभवतिदीपप्रकाशवदिति ॥ **उक्तंचब्रह्मभाष्ये** ॥ हृदयेसंस्थितोजीवोविशेषेणहरिस्तथा । चक्षुरादिषुरूपाणि

जाग्रत्कालेतयोःसदा ॥ बहूनिसंस्थितान्येवयदैकीभावमाप्नुयुः ॥ हृदयस्थेनरूपेणतदाजीवोनकिंचन ॥ जानातीतिविदुःप्राज्ञइति उक्तंचावस्थितिसूत्रेभाष्यएव । असम्यक्सम्यगितिचह्यवस्थाभेदतःसुराः । व्याप्त्यव्याप्तियुताइति ॥ ७ ॥ सर्वत्रसर्वरूपेषु स्ववचनात्सप्तमतात्पर्येति ॥ **स्वगतेति** ॥ स्वरूपस्थेत्यर्थः तथात्वेनुग्राह्यानुग्राहकभावप्राप्तेरित्यर्थः । घटादीनामनेकस्थानस्थितानांभिन्नस्थानत्वात् ॥ **असंगतइति** ॥ आकाशस्यसमग्ररूपेणानेकस्थानस्थत्वाभावादितिभावः । ततःकिमित्यतआह ॥ **तथाचेति** ॥ तत्प्रसंगश्चेतिचशब्दसंबंधः । तथाचभेदाद्गुणतारतम्यंततश्चानुग्राह्यानुग्राहकभावःस्यादित्यर्थः । भेदस्यतारतम्यव्याप्तिरौत्सर्गिकीतिनव्यभिचारःशंक्यः ॥ ॥ **ॐनस्थानतोपिपरस्योभयलिंगंसर्वत्रहि ॐ** ॥ स्थानतोपिस्थानभेदादपिपरस्यहरेरुभयलिंगंभिन्नरूपंनास्ति कुतःहियस्मात्सर्वत्रसर्वस्थानस्थितरूपेषुनिर्भेदत्वादिनाश्रूयतइत्यर्थः । एतमित्येकवचनश्रवणादाह ॥ **एकमिति** ॥ ब्रह्मशब्दार्थःपूर्णगुणमिति ननुसूत्रेपरस्योभयत्वमेतावन्मात्रेणपूर्तौरूपग्रहणंकिमर्थमित्यतआह ॥ **एकैकदेशतइति** ॥ पादाद्यवयवैरित्यर्थः । परस्यपरमात्मनः असित्वंप्रमाणाभावात् श्रुतिःसप्तांगइत्यादिका तथाचपरस्योभयत्वंनेत्येवोक्तौपाणिपादाद्यवयवरूपैकदेशतोप्यनेकस्थानत्वेनभेदाभावोपिज्ञायते । उभयलिंगनेत्युक्तौतुभिन्नस्थानेविद्यमानानांरूपाणांभेदमात्रनिषेधोपिज्ञायेतविशिष्टनिषेधावस्थानादितिभावः । प्रतिदृशंप्रतिनेत्रंनैकधा अनेकरूपेणसमधिगच्छंति सम्यग्जानंति । तमिममहजंशरीरभाजांत्वदिनिविष्टितमात्मकल्पितानामितिपूर्वार्धतात्पर्यमाह ॥ **तथेति** ॥ प्रतिदृशमित्यस्यार्थांतरमाह ॥ **मांप्रतीति** ॥ मदभिमुखेनादित्योवर्ततइत्यादीत्यर्थः ॥ **ॐनभेदादितिचेन्नप्रत्येकमतद्वचनात् ॐ** ॥ कार्यकारणेत्यादिश्रुतौजाग्रद्बन्धोविश्वः स्वप्नबन्धस्तैजसः अज्ञानबन्धःप्राज्ञइतिविरुद्धधर्मत्वेनभेदवचनाद्भेदःपरस्येतिचे

PDF Foundation

न्न । प्रत्येकंपरस्परंमूलरूपेणचातद्वचनात् एषतआत्मेत्यादिनाऽभेदवचनादित्यर्थः ॥ **कार्यभ्रमरूपेति** ॥ अविद्या कार्यस्वातंत्र्यादिविषयभ्रमरूपजाग्रद्बन्धइत्यर्थः ॥ **तत्कारणेति** ॥ सजाग्रत्कालीनभ्रमःकारणंयस्यभ्रमस्येतिविग्रहः । तथाचजाग्रत्कालीनभ्रमकार्यस्वप्नबन्धस्तैजसइत्यर्थः । कार्यभ्रमबन्धत्वेतत्कारणाविद्याबन्धत्वमर्थासिद्धमेवेतिनोक्तं ॥ ॥ **तत्कारणेति** ॥ तयोर्जाग्रत्स्वप्नभ्रमयोःकारणंयदज्ञानंतन्मात्रसुप्तिबन्धःप्राज्ञइत्यर्थः । यःपृथिव्यांतिष्ठन्नित्यादिनोक्तएषइतिपरामृश्यतइत्याशयेनाह ॥ **यःपृथिव्यंतर्यामीति** ॥ **यश्चेति** ॥ योयंपूर्णषड्गुणोभगवानस्यांपृथिव्यांतिष्ठति यश्चायमध्यात्मंप्रतिशरीरेतिष्ठति सोयमेवमूलरूप्येवेत्यर्थः ।**हरयः** हरिनामकानि ॥ **नांतर्बहिरिति** ॥ यस्यांतर्बहिश्चनास्तीत्यर्थः स्वस्यैवसर्वांतर्बहिस्थितत्वादितिभावः । पौनरुक्त्यवारणायाह ॥ **ब्रह्मेत्यनुवादइति** ॥ एवंचयद्ब्रह्मपरमात्मासर्वानुभूतिरितियोजनेतिभावः ॥ **आदरमिति** ॥ अर्थांतरेसावकाशत्ववारणायाभेदइत्येवानुक्त्वापरस्परंमूलरूपेणचेत्यर्थकप्रत्येकशब्दग्रहणेनश्रुतीनांनिरवकाशत्वरूपादरंसूचयतीत्यर्थः । यद्वाप्रत्येकमित्यस्यवचनादित्यनेनापिसंबंधः । तथाचप्रत्येकमेकैकस्यांश्रुतावभेदवचनादित्युक्तावभेदश्रुतीनांबहुत्वरूपमादरंसूचयतीत्यर्थः ॥ **बलवत्वमिति** ॥ सूचयतीत्यनुवर्तते । भेदश्रुतेः कार्यकारणबद्धावित्यस्याः ॥ **अंतिमश्रुताविति** ॥ अयमात्मेत्यस्यामित्यर्थः ॥ ॐ **अपि चैवमेके** ॐ ॥ एकेपिशाखिनःपरमात्मनएवमभेदेनांतररूपत्वंचामात्रोनंतमात्रइत्यादिनापठंतीत्यर्थः ॥ **आक्रियमाणत्वादिति** ॥ आहूयमानत्वादित्यर्थः । ॐकारस्यभगवन्नामत्वादितिभावः । पूर्वमभेदेनैवेतिभाष्यं इत्थंभावेतृतीयेत्यभिप्रेत्याभेदेनपठितत्वादितिव्याख्यातं । इदानींसहयोगेतृतीयेत्यभिप्रेत्यतदेवभाष्यंप्रकारांतरेणव्याचष्टे ॥ **अभेदेनसहैवेति** ॥ **भेदव्यपदेशस्येति** ॥ कार्यकारणबद्धावित्यस्येत्यर्थः ॥ **अन्यत्रेति** ॥ मस्तकादूर्ध्वंद्वादशांगुलपरि-

Sri Gargeshwari Digital Foundation

मितस्थानस्थतुरीयोबद्ध उच्यतइत्यर्थः । नन्नभेदेपिभेदव्यपदेशःस्थानभेदादित्यत्रभिन्नोभिन्नेषुसंस्थितेरितिप्रमाणमुच्यते ऐश्वर्ययोगाच्चभेदइत्यत्रतत्कुतोनोच्यतइत्यतआह ॥ अभेदेपीति ॥ अनन्योप्यन्यशब्देनतथैकोबहुरूपवान् । प्रोच्यते भगवान्विष्णुरैश्वर्यात्पुरुषोत्तमइत्यानंदमयाधिकरणएवोक्तत्वादत्रनोच्यतइत्यर्थः । एवमैश्वर्ययोगाद्भेदव्यपदेशइतियथाश्रुतंव्याख्यायैश्वर्ययोगात्स्थानभेदइत्यपिहेतुहेतुमद्भावमभिप्रेत्यव्याख्यातुमाह ॥अभिन्नस्येति ॥८॥ रूपेति ॥ शरीरेत्यर्थः एवमग्रेपिरूपमस्यशिरःपाणिपादाद्यात्मकमिष्यतइत्यनुव्याख्यानोक्तेः । रूपपदेनशुक्लादिगुणप्रतीतिःस्यात् अतःशिरःपाणीतिविवरणंकृतमितिसुधोक्तेश्च।अरूपमव्ययं तदरूपमनामयइतिभिन्नंवाक्यं । एवंरुग्मवर्णकर्तारमादित्यवर्णमित्यपि॥वैय्यर्थ्यमिति ॥ अप्रामाण्येत्यर्थः ॥ ॐ अरूपवदेवहितत्प्रधानत्वात् ॐ॥ तदितितंत्रंव्यस्तंसमस्तंच तथातद्ब्रह्म अरूपवत् प्राकृतादिदेहवन्नैव कुतःतत्प्रधानत्वात् तस्यब्रह्मणःतेभ्यःप्रकृत्यादिभ्यउत्तमत्वादित्यर्थः॥ कैमुत्यंचेति ॥ अस्मिन्पक्षेतच्छब्देनपूर्वप्राप्तभौतिकरूपपरामर्शः । तथाचयदाभूतेभ्यःपरत्वेनैवभौतिकरूपराहित्यंतदाभूतकरणाव्यक्ततःपरेतद्भौतिकंरूपंनास्तीतिकिंवक्तव्यंकैमुत्यमित्यर्थः॥ ॐ प्रकाशवच्चावैयर्थ्यं ॐ॥ ब्रह्मणोरूपित्वा द्रुग्मवर्णमित्यादिश्रुतीनामवैयर्थ्यं अप्रामाण्यंनास्ति । तद्वरूपित्वश्रुतिविरोधइत्यतरक्तं ॥ प्रकाशवदिति ॥ यथांधकारेचक्षुरादिप्रकाशसत्वेपितस्यसौरादिप्रकाशविलक्षणत्वान्नास्तिप्रकाशइतिव्यवहारस्तथाभगवद्रूपस्यप्राकृतादिरूपविलक्षणत्वादरूपित्वोक्तिरित्यर्थः । शंकांतरवारकत्वेनापिसूत्रंयोजयति ॥ नचैवमिति ॥ भगवद्रूपस्याप्राकृतत्वेत्यर्थः ॥ वैय्यर्थ्यमिति ॥ रूपशब्दस्याप्राकृतरूपेव्युत्पत्यभावेनतच्छ्रोतुरर्थाप्रतीतिरितिभावः ॥ प्रकाशशब्दप्रवृत्तेरिति ॥ तद्वदेवलोकविलक्षणेपिभगवद्रूपेरूपशब्दप्रवृत्तिर्युक्ता सुवर्णघटेघटशब्दस्येवकिंचित्सादृश्यमात्रेणव्युत्पत्युपपत्तेरितिभावः । का

*३

SGDF
Sri Gargeshwari Digital Foundation

त्रकथंत्येत्यतआह ॥ **सर्वरूपाणामिति** ॥ ॐ **आहचतन्मात्रं** ॐ ॥ भगवद्रूपंतन्मात्रंज्ञानानंदादिमात्रंचाह ऐकात्मेत्यादिश्रुतिरितिभावः अत्रविग्रहः एकः आत्मा यस्यतत् एकात्मं तस्यभावःऐकात्म्यं ऐकात्म्यंचासौप्रत्ययश्चासौसारश्च ऐकात्म्यप्रत्ययसारः । आत्मभावःस्वामित्वं तद्ग्रहणेन सौत्रतच्छब्देन ॥ ॐ **दर्शयतिचाथोपिस्मर्यते** ॐ ॥ आनंदरूपमितिश्रुतिः आनंदस्यरूपंदर्शयति अथोऽपिज्ञानस्यापिरूपत्वंश्रुत्यस्फटिकेतिस्मृत्योच्यतइत्यर्थः ॥ ९ ॥ ॥ **प्रागेवेति** ॥ नस्थानतोपीत्यनेनेत्यर्थः । समर्थितत्वादिति पृथगुपदेशादित्यनेनेतिशेषः ॥ **सर्वचेतनसमुदायस्येति** ॥ पटस्यसर्वतंतुभिरत्यंताभेदस्येकैकतंतुनाभेदाभेदस्यचभवद्भिरभ्युपगमादितिभावः ॥ ॐ **अतएवचोपमासूर्यकादिवत्** ॐ ॥ अतएवब्रह्मतदंशानांमत्स्यादीनामभेदस्योक्तत्वादेव अतएव अंशत्वहेतोरेवोपमाजीवस्यमत्स्यादिवद्ब्रह्माभेदसाम्यमितिनमंतव्यं कुतः अतएव जीवस्येशप्रतिबिंबांशत्वादेव कथंसूर्यकादिवत् यथासूर्यप्रतिबिंबादिकंसूर्येणाभिन्नंनभवति तत्प्रतिबिंबांशत्वात्तथाजीवोपीशेनभिन्नइत्यर्थः ॥ **सूर्यकादिवच्चेति** ॥ अनेनचशब्दोभिन्नक्रमइतिसूचितंभवति । ननुभेदाभेदवादिनंप्रतिभेदसाधनेसिद्धसाधनमित्यतआह ॥ **इदमुक्तंभवतीति** ॥ तथाचभेदशब्देऽभेदाभावपरइतिभावः ॥ **इत्यादीति** ॥ कर्तृवाचकपदस्यक्रियानुमतेतेनान्वयमाह ॥ **इत्यादीति** ॥ पूर्वव्याख्यानेपूर्वपक्षइत्यध्याहारः । प्रतिबिंबहेतोःकुतोनुक्तिरित्याद्यरुच्याह ॥ **अथवेति** ॥ भेदशब्दार्थविशेषइतितद्धेतुना तेनप्रतिबिंबत्वहेतुना ॥ **अनेनेति** ॥ जीवस्यभेदसाधनायोक्तप्रतिबिंबत्वेनेत्यर्थः ॥ **प्राचीनेति** ॥ अभेदसाधकचेतनत्वादेरित्यर्थः । ननुतेनभेदाभेदांगीकारात्कथमभेदमात्रनिरासइत्यतआह ॥ **अभेदांशएवेति** ॥ ज्ञानैश्वर्यादीश्वरसाम्येजीवानांनेश्वराभेदःप्रयोजकः किंतुसद्भेदाभावः सचात्रनास्तीतिनसाम्यमित्याशंकते ॥ **भेदस्या**

पीति ॥ **ब्रह्मस्वरूपानुगतेरिति** ॥ मृदादिनाभिन्नाभिन्नेघटादौमृदादिस्वरूपानुगतिवद्ब्रह्मणाभिन्नाभिन्नेषुजीवेषुज्ञानैश्वर्यादिब्रह्मस्वरूपानुगतेरावश्यकत्वादित्यर्थः । किंपरेणाभिन्नाभिन्नतयांगीकृतेष्वपिमत्स्यादिष्वैश्वर्यादिब्रह्मस्वरूपानुगतेर्दर्शनात्तद्वज्जीवेष्वपिस्यादित्यतआह ॥ **मत्स्यादिवच्चेति** ॥ नन्वस्यांयोजनायामंशत्वेपिविशेषवत्वरूपयुक्तितएवप्रतिबिंबत्वरूपहेतुसिद्धेरूपंरूपमित्यादिश्रुत्युदाहरणंकिमर्थमित्यतआह ॥ **युक्तिदृष्टार्थएवेति** ॥ उपाध्यायत्तेति ॥ उपाध्यधीनत्वादिप्रसिद्धप्रतिबिंबधर्मवान्नवेत्यर्थः ॥ **अनित्यत्वेति** ॥ देहाद्युपाधेरनित्यत्वादितिभावः । यद्यपियावदात्मभावित्वादितिस्वरूपोपाधिर्नित्यउक्तः तथाप्यधीनत्वंभेदसापेक्षमितिभिन्नोपाध्यधीनत्वादावत्रविकल्पितमितिध्येयं ॥ **नसूर्यकादीति** ॥ उभयोरुपाध्यधीनत्वधर्मेणसाम्याभावादितिभावः । तर्हिमास्तुसूर्यकादिदृष्टांतः तथापिजीवप्रतिबिंबत्वमस्त्वित्यतआह ॥ **अतइति** ॥ सर्वेषांप्रतिबिंबानामुपाध्यधीनत्वव्याप्तत्वेनोपाध्यधीनत्वरूपव्यापकनिवृत्तौव्याप्यभूतप्रतिबिंबत्वस्यापिनिवृत्याभेदसाधकानामभावेनोक्तचेतनत्वाद्यनुमानेनाभेदसाधनंयुक्तमित्यर्थः । प्रतिज्ञाद्वयंक्रमेणोपपादयति ॥ **पृथगिति** ॥ **इत्युक्तैरिति** ॥ इतिसूत्रैःक्रमेणोक्तैरित्यर्थः । सर्वधर्मानभ्युपगमेकथंसूर्यकादेर्दृष्टांतत्वमित्यतआह ॥ **यौहीति** ॥ **सर्वेति** ॥ पर्वतमहानसादेरपियावत्साम्याभावादितिभावः ॥ प्रतिबिंबपदोक्तमिति ॥ तथाचहेतूक्तप्रतिबिंबशब्दार्थनिरूपणायैवभाष्ये तथोक्तिरितिभावः ॥ १० ॥ **भगवत्सादृश्येति** ॥ ज्ञानानंदादिनाभगवत्सादृश्यस्येत्यर्थः । उक्तंपुंस्त्वादिवदित्यनेन ॥ **सुप्ताविवेति** ॥ मुक्तियोग्यजीवस्यभक्तिंविनैवस्वरूपस्यसुखस्यव्यक्तिवदित्यर्थः ॥ ॐ **अंबुवदग्रहणात्तुनतथात्वं** ॐ ॥ अंबुवदग्रहणात्स्नेहयुक्तज्ञानाख्यभक्त्यभावाच्चांविनेतियावत् तथात्वंज्ञानादिसादृश्यंतुनाभिव्यज्यतइत्यर्थः ॥ **तथासतीति** ॥ स्वयमेवजायमानाभि

CC-F Foundation

व्यक्तेर्विलंबेनिमित्ताभावेनेतःपूर्वमेवतत्संभवादितिभावः ॥ तत्स्वरूपमिति ॥ जीवस्वरूपमित्यर्थः ॥ ११ ॥ ॥ अर्थतइति ॥ ब्रह्मादिषुभक्तेर्वृद्धिह्रासवत्त्वरूपतारतम्येप्रतिपादितेभगवतस्तदनुसारिफलदानमर्थात्सिध्यति । भगवतोभक्त्यनुसारिफलंविनाभक्तेर्वृद्धिह्रासवत्वानुपपत्तेरितिभावः ॥ मुक्तत्वेति ॥ संसारध्वंसवत्वेत्यर्थः । साम्यहेतोरप्रयोजकत्वंपरिहरति ॥ अन्यथेति ॥ फलसाम्येपितारतम्यांगीकारइतिभावः । साम्यमेवासिद्धमित्यतआह ॥ केषांचिदिति ॥ मुक्तिःसंसारनिवृत्तिः ॥ ॐ वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं ॐ ॥ भक्तेर्वृद्धिह्रासभाक्त्वं आधिक्यन्यूनतावत्त्वमस्ति कुतः अंतर्भावात् महत्फलवतांब्रह्मादीनामल्पफलवतामस्मदादीनांभक्तत्वेंतर्भावादेवंभक्तितारतम्यांगीकारएवपरमात्मनः उभयान्ब्रह्मादीनस्मदादींश्चप्रतिसामंजस्यात् समीचीनत्वसंवादित्यर्थः । वैरूप्येवैषम्ये ॥ ॐ दर्शनाच्च ॐ ॥ अथातइत्यादावानंदरूपफलतारतम्यस्यश्रवणादित्यर्थः ॥ १२ ॥ ॥ गुणानामपीति ॥ आकाशेगंधादेरयुक्तत्वदर्शनादित्यर्थः ॥ कर्तृत्वादिति ॥ कर्तृत्वाभ्युपगमादित्यर्थः । यावत्संहारंसंहारपर्यंतं ॥ जगत्स्थितेरिति ॥ स्थितेरेवपालनफलत्वादितिभावः । ननुरक्षारूपपालनाभावेकथमसंहारमात्रेणस्थितिरित्यतआह ॥ संहारकर्तुरिति ॥ अयोगमेवोपपादयति ॥ अन्यस्यत्विति ॥ एतेनेत्युक्तंविशदयति ॥ तत्रापीति ॥ अवांतरोपद्रवदानेपीत्यर्थः ॥ ॐ प्रकृतैतावत्वंहिप्रतिषेधतिततोब्रवीतिचभूयः ॐ ॥ विष्णोःपालकत्वंपृथगस्त्येव कुतः हियस्मान्नैतावदितिश्रुतिः प्रकृतस्य सृष्टिलयकर्तृत्वस्य एतावन्मात्रत्वंप्रतिषेधति ततः सृष्टिलयकर्तृत्वाद्भूयः अधिकंपालकत्वमपिब्रवीतीत्यर्थः ॥ प्रागुक्तमिति ॥ अस्यदेवासुमतिःप्रधानेत्यादिपूर्ववाक्योक्तमित्यर्थः । तदर्थस्त्वतोदेवानामिति पूर्वप्रकृतदेवानामेवप्रधानातिशयेनप्रथमोनासुमतिः प्रधानाबुद्धिरस्येदस्यैव प्रकृत

SGDF Sri Gargeshwari Digital Foundation

विष्णोरेवसकाशादभवदिति । एनेत्यस्यार्थोऽनेनेति सदित्यस्यभवदितिकार्यमितिचार्थद्वयं । उक्षेत्यस्यभक्ताभिलषितसेचकइति । बिभर्तिचेत्यस्यधत्तेपुष्णातिचेत्यर्थद्वयं । अनेनश्रुतिस्मृत्युदाहरणेन ॥ १३ ॥ अपरोक्षज्ञानंभक्तिप्रयोजनमितिवदताकिंब्रह्मणःव्यक्तत्वमंगीक्रियते उताव्यक्तत्वं आद्येआह ॥ स्तंभादिवदिति ॥ द्वीतीयमाशंक्यदूषयति ॥ तस्येति ॥ तदभ्युपगमइति ॥ अव्यक्तस्वभावस्यापिदर्शनाभ्युपगमइत्यर्थः । नप्रतीयते प्रत्यक्षेण ॥ ॐ तद व्यक्तमाहहि ॐ ॥ तद्ब्रह्माव्यक्तं कुतः हियस्मादरूपमितिश्रुतिस्तथाहेत्यर्थः । भक्तेःकर्तव्यत्वसिध्यर्थमाह ॥ भक्तिसाध्यादिति ॥ ॐ अपिसंराधनेप्रत्यक्षानुमानाभ्यां ॐ ॥ संराधनेपिभक्तिहीनपूजादिकरणेपिब्रह्माव्यक्तमेव कुतः ज्ञानिप्रत्यक्षेण ब्रह्म नव्यक्तमतिसूक्ष्मत्वादित्यनुमानेनच तथासिद्धत्वादित्यर्थः ॥ व्याहतिरिति ॥ प्रत्यक्षायोग्यत्वरूपमव्यक्तत्वंप्रत्यक्षसिद्धमित्यंगीकारेव्याहतिरित्यर्थः ॥ उत्तरत्र ॥ अतोनंतेनेत्यत्र ॥ गर्भस्रावेणेति ॥ अव्यक्तस्वभावस्यापिब्रह्मणोऽचिंत्यशक्त्वाप्रत्यक्षत्वात्तद्वताव्यक्तत्वस्यापिप्रत्यक्षत्वलाभादितिभावः ॥ नंक्ष्यति ॥ नष्टीभविष्यति । अनुमानस्यज्ञानिनःप्रत्यक्षविशेषादितरेषामनुपपन्नेत्यतआह ॥ प्रत्यक्षसिद्धार्थइति ॥ सिद्धसाधनत्वप्रसंगादितिभावः । उत्तरमाह ॥ ज्ञानिनामिति ॥ उत्पत्यादिरहितत्वादिति ॥ तथाचव्यक्तत्वोपयोगिस्थूलत्वालाभइतिभावः । गृहीतरूपैः अवताररूपैः ॥ तन्मात्रेति ॥ भूतसूक्ष्मरूपरसगंधस्पर्शाख्यतन्मात्रालक्षणेत्यर्थः । अवताररूपापरोक्षज्ञानस्यमोक्षाहेतुत्वान्मूलरूपापरोक्षज्ञानायभक्तिरपेक्षितेत्यतआह ॥ नहीति ॥ इतिनियमोनह्यस्तीत्यन्वयः ॥ शंकाव्यावृत्त्यर्थइति ॥ दृष्टांतरानुक्त्यासमुच्चयार्थत्वासंभवादितिभावः ॥ ॐ प्रकाशवच्चावैशेष्यं ॐ ॥ ब्रह्मप्रकाशवच्च अग्निवद्व्यक्त्यव्यक्तिमन्नभवति कुतः अवैशेष्यंतद्वद्विशेषरहितत्वंयतइत्यर्थः परए

SGDF
Sri Gargeshwari Digital Foundation

वसंभवतीत्यस्यार्थः । परमसूक्ष्मएवसंभवतीति अवताररूपाणामुत्पन्नत्वस्यशंकितत्वेनतदभावप्रतिपादनायाह ॥ **जनन मर्दयतीति** ॥ ॐ **प्रकाशश्चकर्मण्यभ्यासात्** ॐ ॥ कर्मणिब्रह्मविषयेकृतादभ्यासात् पुनःपुनःकृतश्रवणादेः सकाशात्प्रकाशश्चापरोक्षज्ञानंभवतीत्यर्थः ॥ ॐ **अतोनंतेनतथाहिलिंगं** ॐ ॥ अनंतेनापरिछिन्नशक्तिमताब्रह्मणा तत्प्रसादेनेतियावत् अव्यक्तस्यापिप्रकाशोभवति कुतः अव्यक्तत्वेप्रत्यक्षत्वेचप्रमाणसत्वात् तथाहिलिंगं बंधनिवृत्तेःप्रसादसाध्यत्वरूपं ज्ञानस्यप्रसादसाध्यत्वेलिंगं ज्ञापकं हियस्मात्तदस्तीत्यर्थः ॥ **प्रसादसाध्यत्वेपि** ॥ प्रयोजनस्तत्वभावपदोक्तोपासनाजनितमध्यमप्रसादसाध्यत्वलिंगमित्यर्थः । दर्शनस्योक्तप्रसादजन्यत्वेकथमेतल्लिंगमित्यतआह ॥ **दृष्ट्वेति** ॥ **दर्शनसाध्यत्वेति** ॥ दर्शनैकसाध्यत्वेत्यर्थः ॥ **प्रसादाद्दर्शनमिति** ॥ उपासनाजन्यमध्यमप्रसादस्यसाक्षान्मोक्षहेतुत्वाभावात् । अतत्स्वभावस्याप्रत्यक्षत्वस्वभावस्य ॥ १४ ॥ **अन्यथेति** ॥ आनंदादीनांभेदेनगुणगुणिनोरयुतसिद्धत्वाभावेनघटपटयोरिवसंयोगाभावाद्गुणगुणिभावोपपत्यर्थंसमवायस्यावश्यमंगीकार्यत्वेन तन्निराकरणानुपपत्तेरित्यर्थः ॥ **स्वरूपेणचेति** ॥ नेश्वरोगुणवान् गुणात्मकत्वात् यथानस्वःस्ववानितिवक्ष्यमाणयुक्तीत्यर्थः ॥ **गुणानामिति** ॥ आनंदाद्याः नब्रह्मगुणाः तत्स्वरूपत्वाद्ब्रह्मवदितिवक्ष्यमाणयुक्तीत्यर्थः । ननुगुणित्वरूपमहिमाभावेपि आनंदादिगुणस्वरूपत्वरूपमहिमावत्वेनब्रह्मणोभक्तिविषयत्वंस्यादित्यतआह ॥ **नचेति** ॥ पारिवृढ्यं आढ्यत्वं ॥ ॐ **उभयव्यपदेशात्वहिकुंडलवत्** ॐ ॥ ब्रह्मणोगुणात्मकत्वंगुणित्वंचेत्युभयमप्यस्ति कुतः एवपरमानंदइत्यानंदात्मत्वं आनंदंब्रह्मणइत्यानंदित्वमित्युभयोरपिव्यपदेशात्कथमेतस्योभयत्वं अहिकुंडलवत् एकस्यैवसर्पस्यकुंडलित्वंकुंडलत्वंचयथेत्यर्थः ॥ **विशेषादेवकुंडलित्वमिति** ॥ ननुयत्रात्यंताभेदस्तत्रैवविशेषइतिसिद्धांतः अहिकुंडल

योश्चभेदाभेदौ यद्वक्ष्यति भेदाभेदविषयेणकिमाद्येनदृष्टांतेनेति।सुधायांचाहेरवयवानामन्योन्यसंयोगविशेषोह्यहिकुंडलंसतावदिहनात्यंताभिन्नइतिशंकाग्रंथेयद्यप्यहिकुंडलंभेदाभेदवदितिसिद्धांतग्रंथेचोक्तं। तत्कथमेतदितिचेत् सत्यं। नात्रविशेषशब्दो भेदकार्यकारिवस्तुसामर्थ्यपरः किंतुभेदपरएव । भेदांतरंविशेषश्चसूक्ष्मंचेत्यभिधीयतइतिचतुर्थतात्पर्योक्तेः । नचैवंकथमस्यंताभेददृष्टांतइतिवाच्यं । अहेःकुंडलस्यभेदाभेदवत्वेपिमंदानामभेदबुद्धिमवतारयितुमिदंयथापृथिव्यामौषधयःसंभवंतीतिवदितिसुधोक्तरीत्याभेदमात्रेदृष्टांतत्वोपपत्तेरिति । विशेष्यापेक्षयाह ॥ **यथानस्वइति** ॥ विशेषणापेक्षयाह ॥ **दंडइति** ॥ ॐ **प्रकाशाश्रयवद्वातेजस्त्वात्** ॐ ॥ यथाप्रकाशाश्रयस्यादित्यस्यप्रकाशत्वंप्रकाशित्वंचतद्गुणात्मकस्येशस्यगुणित्वंसंभवति अन्यद्विहायादित्यग्रहणेकोहेतुरित्यतआह । तेजस्त्वादिति ब्रह्मणस्तेजोरूपत्वेनांतरंगत्वादित्यर्थः ॥ ॐ **पूर्ववद्वा** ॐ ॥ यथाकालःपूर्वेणाभिन्नोपिपूर्वःकालइतितेनविशिष्यतेतथागुणात्मकंब्रह्मगुणीतिविशिष्यतइत्यर्थः । शयनशब्दस्यनिद्रापरत्वस्यप्रकृतेऽनुपयोगादाह ॥ **शयनमवस्थाविशेषइति** ॥ **अंगविशेषणमिति** ॥ अंगधर्ममित्यर्थः । अंगविशेषणंयस्येतिवा ॥ **अभिन्नएवेति** ॥ ब्रह्मणामुक्तैश्चाभिन्नएवानंदोविशेषबलादेवब्रह्मणोमुक्तानामितितत्संबंधित्वेनोच्यतइत्यर्थः ॥ ॐ **प्रतिषेधाच्च** ॐ ॥ नेहनानेतिगुणगुणिनोर्भेदस्यप्रतिषेधादभेदइत्यर्थः ॥ **घटादिवदिति** ॥ एकमित्यनेनाभिन्नत्वोक्तौघटादिवद्ब्रह्मस्वावयवैर्भिन्नाभिन्नमितिप्रतीयेतातस्तन्निवृत्त्यर्थमेकेत्युक्तमित्यर्थः । उद्देश्यविधेयभावप्रतिपत्यर्थं पदयोरन्वयप्रदर्शनपूर्वकंकिंचनपदंव्याचष्टे ॥ **किंचननानेति** ॥ किंचनगुणगुण्यादिकंनानाभिन्नंनास्तीत्यर्थः ॥ १५ ॥ प्रकृतं पूर्वाधिकरणे अन्यथालौकिकानंदविलक्षणत्वे व्युत्पत्यभावादिति भावः ॥ ॐ **परमतःसेतून्मानसंबंधभेदव्यपदेशेभ्यः** ॐ ॥ ब्रह्मानंदादिकं अतः लौकिकानंदादेःपरंविल

SGDF
Sri Gargeshwari Digital Foundation

क्षणं कुतःसेतून्मानसंबंधभेदव्यपदेशेभ्यः । एषसेतुरितिसेतुत्वस्य यतोवाचइत्युन्मानत्वस्यपूर्णत्वस्य तस्यैवानंदस्येति बिंबप्रतिबिंबरूपसंबंधस्य अन्यश्चज्ञानमितिभेदस्यचाभिधानादित्यर्थः। उद्धृतंमानंवेदादिप्रमाणंमर्यादाचयस्मादित्यभिप्रेत्याह ॥ पूर्णत्वमिति ॥ ब्रह्मानंदस्यान्यैरभोज्यत्वादाह । मात्रंतत्प्रतिबिंबांशत्वमिति अलौकिकत्वलाभायाह ॥ अन्य विलक्षणमिति॥ साध्यावैशिष्ट्यनिरासायाह ॥ अलौकिकत्वादिति ॥ तथाचभाष्ये अलौकिकत्वादितिपंचमी तृतीयार्थे अतःपरमितिसंबंधः । ततश्चालौकिकत्वेनप्रकारेणातोलोकानंदादेःसकाशात्परंविलक्षणमितिव्याख्यानमित्यर्थः ॥ अलौकिकत्वावगमादिति ॥ अत्रातोव्यपदेशेभ्यइत्यर्थः । नचेत्यादिभाष्यस्यप्रतिज्ञाव्याख्यानपरत्वे आनंदि त्वादितिहेत्वंशोक्तिर्व्यर्थेत्यस्वरसात्प्रकारांतरेणव्याकुर्वन्साध्यावैशिष्ट्यंप्रकारांतरेणपरिहरति ॥ अथवेति ॥ लौ किकत्वादिति ॥ तथाचनात्राकारप्रश्लेषइतिभावः ॥ ॐ दर्शनात् ॐ ॥ अन्यानंदादीनांमनोवाग्गोचरत्वात् तद्गोचरब्रह्मानंदस्यतद्वैलक्षण्यमित्यर्थः । वक्ष्यमाणश्रुत्यनुसारेणदर्शनपदमन्यथोपलक्षणमितिभावेनाह ॥ मनोवागि ति ॥ ॐ बुध्यर्थःपादवत् ॐ ॥ यथालोकपादविलक्षणेष्वपिजीवेषुपादोस्येतिपादपदप्रयोगोबुध्यर्थः भूतानामी शांशत्वज्ञापनार्थः तथाऽलौकिकेप्यानंदादिपदप्रयोगोबुध्यर्थः अनुकूलवेद्यत्वादिज्ञापनार्थोयुक्तइत्यर्थः ॥ प्रसिद्ध चरणविलक्षणइति ॥ प्रसिद्धचरणस्यदेहावयवत्ववद्भूतानांपरमात्मावयवत्वाभावादितिभावः ॥ मूर्तित्रयवि लक्षणइति ॥ त्रिपादस्यामृतंदिवीत्यादिनोक्तश्चेतद्वीपानंतासनवैकुंठादिगतनारायणादिमूर्तित्रयस्यभगवत्स्वरूपांशत्व वद्भूतानांतदभावादितिभावः । भूतपादइतिभूताख्यपादइत्यर्थः । तर्हितद्वदेवभिन्नांशत्वप्रतीतिःस्यादित्यतआह ॥ ज्ञातांशइति ॥ अनुकूलवेद्यत्वेति ॥ इदंममानुकूलमेवनप्रतिकूलमितिवेद्यत्वेनेत्यर्थः । अन्यथा आनंदप्रयो

BGDF Sri Gargeshwari Digital Foundation

गंविना तर्हितद्वदेवलोकिकत्वबुद्धिः स्यादित्यतआह ॥ ज्ञानतावन्मात्रस्येति ॥ अनुकूलवेद्यत्वमात्रज्ञानवतइत्यर्थः ॥ आनंदइति ॥ भगवदानंदोलौकिकानंदवन्नभवतीत्युक्तेलोकानंदतोविलक्षणःप्रतिभाति । लोकप्रसिद्धानंदपदेनैवतदुपदेशः कुतइत्यतउक्तं ॥ नचाभातीति ॥ स्वदृष्टवाचकपदोपदेशंविनालौकिकंवस्तुनभातीत्यर्थः ॥ १६ ॥ ॥ तदभावइति ॥ भगवदानंदस्यब्रह्माद्यानंदप्रतिबिंबत्वेनैववैलक्षण्यस्यवक्तव्यत्वादितिभावः ॥ द्वैविध्येति ॥ युक्तायुक्तत्वेत्यर्थः ॥ वैचित्र्यंस्यादिति ॥ अन्यथानिनिर्बंधनत्वापत्तेरितिभावः ॥ अदृष्टानियमेनेति ॥ अदृष्टादिवैचित्रेणेत्यर्थः । अदृष्टानियमादित्यत्रविचित्रस्वभावानामपिजीवानामविचित्रभगवत्प्रतिबिंबत्वसमर्थनादितिभावः ॥ ॐ स्थानविशेषात्प्रकाशादिवत् ॐ ॥ यथासूर्यप्रतिबिंबेस्थानविशेषात्सूर्यकांतादिस्थानगुणवैचित्र्यादग्निजनकत्वादिवैचित्र्यं तथाब्रह्मादिस्थानगुणवैचित्र्यादानंदवैचित्र्यमित्यर्थः ॥ प्रतिफलितइति ॥ तदधीनत्वेसतितत्सदृशइत्यर्थः ॥ ॐ उपपत्तेश्च ॐ ॥ बिंबभूतेशसामर्थ्याच्चानंदवैचित्र्योपपत्तेर्भवत्येवान्यानंदादीश्वरानंदप्रतिबिंबमित्यर्थः ॥ उपयुज्यतइति ॥ तथाचद्वितीयसूत्रंव्यर्थमितिभावः ॥ उपयोगीति ॥ तथाचाद्यंसूत्रंव्यर्थमितिभावः ॥ तस्यसर्वत्रसाम्यादिति ॥ तस्यसूर्यादिबिंबसामर्थ्यस्यसर्वत्रजलादौविद्यमानत्वेपितद्वतसूर्यकादेराग्निजनकत्वाभावादितिभावः ॥ १७ ॥ अन्यथेति ॥ चित्तप्रतिबिंबितस्यब्रह्मप्रतिबिंबत्वाभावइत्यर्थः । यत्किंचिध्याने अन्यध्याने ॥ ॐ तथान्यत्प्रतिषेधात् ॐ ॥ यथाब्रह्मणआनंदादिकंलोकानंदादेर्विलक्षणं तथाब्रह्माप्यन्यत् चित्तप्रतीताद्विलक्षणमेव कुतःयन्मनसेतिचित्तप्रतीतस्यब्रह्मत्वप्रतिषेधादित्यर्थः । यदित्युक्तस्यब्रह्मणःकर्तृत्वेयेनब्रह्मणामनोमतमित्यनेनव्याहतिरित्यतआह ॥ पुरुषइति ॥ तदुपासनंकिंभवतीत्यतआह ॥ प्रतिबिंबोपासनमिति ॥ दृश्यतइ-

SGDF
Sri Gargeshwari Digital Foundation

तीति ॥ परंपदं ब्रह्मस्वरूपं ध्यानजन्यज्ञानेनैवापरोक्षेणदृश्यते नतुध्यानकालीनापरोक्ष्येणात् । अतश्चित्तप्रतिबिंबितं नब्रह्मेत्यर्थः ॥ १८ ॥ प्राचीनोक्तेः जन्माद्यस्ययतइत्यस्याः ॥ ॐ अनेनसर्वगतत्वमायामयशब्दादिभ्यः ॐ॥ अनेनैवब्रह्मणैवसर्वंसृष्ट्यादि । कुतः सर्वगतत्वात् एषसर्वगतइतिसर्वगतत्वश्रवणात् मायामयशब्दात् मायामयत्वव्याख्यायकश्रुतेः । अन्यकर्तृत्वेप्रमाणाभावाच्चेत्यर्थः । एतत्स्वातंत्र्यादानंसर्वगतोक्त्याकथंतस्यसर्वकर्तृत्वंप्राप्तमितितत्राह ॥ सर्वगतत्वंचेति ॥ सर्ववस्तुविषयमिति ॥ सप्तमीविषयार्थः सर्वमित्येतत्सृष्ट्याद्यष्टकपरमितिभावः ॥ इति संग्रहीतमितिशेषइति ॥ प्रमाणाभावाच्चेत्यनंतरमित्यर्थः ॥ १९ ॥ कुतइत्यतस्तदन्वयव्यतिरेकित्वादित्याशये नतावदन्वयानुविधायित्वमाह ॥ यैरिति ॥ अपेक्षापदोक्तावस्यकत्वमेवविपक्षेबाधकत्वेनोपपादयति ॥ अन्यथेत्यादिना ॥ व्यतिरेकानुविधायित्वमाह ॥ अकृतकर्मणइति ॥ फलितमाह ॥ एवमिति ॥ ॐ फलमतउपपत्तेः ॐ ॥ अतःपरमात्मनएवफलंभवति तस्यचेतनत्वेनफलदानोपपत्तिरित्यर्थः ॥ संभावनैवेति ॥ चेतनत्वस्यजीवेपिसत्वादनिश्चायकत्वादितिभावः । असौनिश्चयः ॥ ॐ श्रुतत्वाच्च ॐ ॥ रातिर्दातुरितिश्रुत्युक्तत्वाच्च ब्रह्मैवफलदात्रित्यर्थः । दानादिकर्ममात्रेणनेश्वरःफलदाता किंतुस्वनिष्ठादिपूर्वकर्मणैवेत्यभिप्रेत्यप्रवृत्तेतिष्ठमानस्येतिश्रुतिशेषमनूद्यव्याचष्टे ॥ तिष्ठमानस्येति ॥ स्थितिमात्रस्यसर्वसाधारण्यात्स्वस्मिन्मनसेत्युक्तं ॥ फलप्रदमिति ॥ रादानइतिधातोरितिभावः ॥ ॐ धर्मंजैमिनिरतएव ॐ ॥ जैमिनिः धर्मपुण्यादिकर्म अतएवपरमात्मनएवजातमाह कुतः अतएव एषह्येवेतिश्रुतेरेवेत्यर्थः । तर्हिरातिर्दातुरितिश्रुतिविरोधइत्यतआह ॥ इदंतुन्याय्यामिति ॥ द्वेधा ब्रह्मश्रुतिरूपोभयपरतया ॥ ॐ पूर्वंतुबादरायणोहेतुव्यपदेशात् ॐ ॥ पूर्वं पूर्वोक्तंब्रह्म तु कर्तृत्वरूपविशेषेणकारणं कुतः

हेतुव्यपदेशात् पुण्येनेतिब्रह्मणः कर्तृत्वेन कारणत्वव्यपदेशादितिबादरायणोमन्यतइत्य. । समप्रधानभावः प्रधानत्व साम्यं । तर्ह्यन्वयव्यतिरेकानुविधायित्वन्यायविरोधइत्यतआह ॥ कारणत्वेपीति ॥ सामान्यतइति ॥ कर्तृकरणत्वविशेषंविहायेत्यर्थः । कारणत्वमात्रंतुकर्मणः फलंप्रतिकरणत्वेप्युपपन्नमितिभावः । तत्सत्ता कर्मसत्ता ॥ २० ॥ इतिश्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यांशर्कराश्रीनिवासविरचितायांतृतीयाध्यायस्यद्वितीयःपादः ॥ ॥

॥ श्रीगुरुभ्योनमः ॥ नन्वथब्रह्मजिज्ञासापदोक्तसाधनविचारात्मकेऽस्मिन्नध्याये पादद्वयेनाथशब्दोक्तवैराग्यभक्तिनिरूपणानंतरंब्रह्मजिज्ञासापदोक्तज्ञानसाधनीभूताब्रह्मजिज्ञासास्मिन्पादेनिरूपणीया । किमुपासनानिरूपणेनेत्यतआह ॥ उपासनानामेति ॥ ननूपासनाप्रतिपादकेस्मिन्पादेसर्वपरिज्ञानोक्तिःकथंसंगता तस्याप्युपासनात्वेनसंगतत्वेपिप्रथमतःतदुक्तौकिंनिमित्तमित्यतआह ॥ उपासनाद्विविधेति ॥ श्रवणमनननिदध्यासनानामेवोपासनात्वस्यजिज्ञासाधिकरणेऽभिहितत्वात्कथंसच्छास्त्राभ्यासस्याप्युपासनात्वमित्यतआह ॥ यामाहुरिति ॥ श्रवणमननयोर्ध्यानांगत्वमेवोपपादयति ॥ समस्तेति ॥ अत्रश्रवणंतत्वज्ञानमुत्पादयदज्ञानंनिवर्तयति । मननंतुवेदार्थनिर्णयंकुर्वत्संशयविपर्ययौ निवर्तयतीतिविवेकः ॥ अतएवेति ॥ श्रवणमननयोरप्युपासनात्वादेवेत्यर्थः । ततश्चात्रभगवत्प्राप्तिसाधनीभूतायाःसर्ववेदश्रवणमननोपासनारूपायाःसमर्थनादस्तिशास्त्रादिसंगतिरित्युक्तंभवति अविषयत्वइतिछेदः ॥ सर्वोपादेयतेति ॥ एकशाखादिविषयश्रवणादिकुर्वतः शाखांतरज्ञानाभावेनसर्वशाखानिर्णायकैतच्छास्त्रेणप्रयोजनाभावादितिभावः ॥ सामान्योक्तिरिति ॥ ब्रह्मजिज्ञासाकर्ततिसामान्योक्तिरित्यर्थः ॥ पृथक्त्वेनेति ॥ क्वचिद्विज्ञानमानंदंब्रह्मेतिविज्ञानाद्यात्मकस्यक

SGDF Sri Gargeshwari Digital Foundation

चिच्चसत्यंज्ञानमनंतंब्रह्मेतिसत्याद्यात्मकस्यवस्तुनोभिदानदर्शनादित्यर्थः॥ॐसर्ववेदांतप्रत्ययंचोदनाद्यविशेषात्ॐ॥ ब्रह्म सर्ववेदांतप्रत्ययं सर्वेषांवेदानामंतेननिर्णयेनजातोयःप्रत्ययःज्ञानंतद्विषयः कुतः चोदनाद्यविशेषात् चोदनानामुपासना विधीनामादिपदोक्तयुक्तीनांचसर्वान्प्रतिविशेषरहितत्वादित्यर्थः ॥ पूर्वोत्तरविरुद्धमिति ॥ पूर्वंप्रथमाध्यायेमंत्रब्राह्मणा दिरूपस्यसर्वस्यवेदस्यसमन्वयस्योक्तत्वात् उपसंहारोऽर्थाभेदादित्युत्तरत्रापिसर्ववेदोक्तप्रकारेणध्यानस्यवक्ष्यमाणत्वात् अ त्रापिसर्ववेदपदेनमंत्रादिरूपस्यसर्वस्यापिवेदस्यग्राह्यत्वात्सर्ववेदांतेत्येकंपदमंगीकृत्योपनिषद्ग्रहणंपूर्वोत्तरविरुध्धमित्यर्थः । विविक्षितसाध्यस्यस्पष्टमप्रतीतेराह ॥ किमुक्तमिति ॥ ज्ञातव्यमित्यनंतरमुक्तंभवतीत्यनुवर्तते नन्वधिकारिविशेष निर्देशाभावेपिफलविशेषादिनाधिकारिविशेषनिश्चयोभविष्यतीत्याशंक्यनिषेधति ॥ नचवाच्यमिति ॥ ज्योतिष्टोमेन स्वर्गकामोयजेतेत्यादिकाकर्मविद्या ॥ स्वर्गकामत्वादीति ॥ लोके छादेर्यत्यादीनांनिषिध्यत्वादितिभावः। कल्पका भावमेवोपपादयति ॥ कल्पकत्वंचेत्यादिना ॥ तत्रोक्तयुक्तीनामिति ॥ आत्मत्वमेवकुतउपास्यामित्याशंका यामात्मत्वेसर्वगुणानामंतर्भावादित्यभिप्रायेणात्रेतिवाक्यस्यप्रवृत्तत्वादितिभावः । अत्रात्मत्वे एतेसर्वगुणाः एकीभवंति अंतर्भवंतीत्यर्थः ॥ इतरांशस्येति ॥ तत्वीदंतर्ह्यव्याकृतमासीदित्यादेरित्यर्थः ॥ सर्वाधिकारिसाधारणाए- वेति ॥ सर्वेषामपिज्ञानार्थिनामुमुक्षुत्वेनस्वयोग्येतरगुणसंग्राहकात्मत्वोपासकत्वादितिभावः ॥ ॐभेदान्नेतिचेदेक स्यामपिॐ ॥ प्रतिशाखंवस्तुभेदानैकंब्रह्मसर्ववेदांतप्रत्ययमितिचेन्न एकस्यामपिशाखायामर्थभेदसद्भावेनतदुक्तस्या प्यज्ञेयत्वप्रसक्तेरित्यर्थः । कस्यांचित् अथर्वणशाखायां क्वचिद्यजुःशाखायां क्वचिदृकशाखायां अन्यत्रसामशाखायां नचै कशाखायां ॥ पृथक्त्वदर्शनादिति ॥ कंब्रह्मखंब्रह्मेत्यत्रभेददर्शनादित्यर्थः ॥ धर्मीति ॥ ब्रह्मरूपधर्मिण

SGDF Sri Gargeshwari Digital Foundation

मनूद्यसुखज्ञानादिरूपधर्मविधानादित्यर्थः ॥ तथेति ॥ धर्मात्मादिपदैर्धर्मिणमनूद्यविज्ञानादिधर्मविधानादितिभावः । अंशे धर्म्यंशे ॥ प्रसंगभेदेति ॥ प्रकरणभेदादधिकविधानायानुवादाच्चनपौनरुक्तिरितिपरिहारइत्यर्थः ॥ ॐ स्वाध्यायस्यतथात्वेनहिसमाचारेधिकाराच्च ॐ ॥ ब्रह्मसर्ववेदांतप्रत्ययमेव कुतः स्वाध्यायस्यवेदाध्ययनविधेः सर्वान्प्रत्यविशिष्टत्वेननिमित्तेनतथासर्ववेदोक्तकर्मणःसमाचारे सम्यगनुष्ठानेसर्वेषामधिकाराच्चेत्यर्थः ॥ स्वाध्यायइति ॥ वेदःपठनीयइत्यर्थः । नन्वस्तुसर्वशाखानामेकैकेनाध्येतव्यत्वं तथापिनतदुक्तप्रकारेणब्रह्मज्ञातव्यमितिसिध्यति । अध्ययनविधेरक्षरग्रहणेनैवचरितार्थत्वादाह ॥ अध्ययनंचेति ॥ ज्ञानार्थमथध्यानार्थगुणानांसमुदीरणेतिवक्ष्यामइत्यर्थः ॥ परास्तामिति ॥ स्मृतौकृत्स्नशब्दश्रवणादितिभावः ॥ सुतरामिति ॥ बहुत्वेनपरस्परविरुद्धत्वेनचाशक्यानुष्ठानेषुकर्मसुयदाधिकारस्तदागतिसामान्यादित्युक्तप्रकारेणतादृशेब्रह्मज्ञानेसुतरामधिकारइत्यर्थः । कर्मभेदमितिवक्ष्यमाणानुरोधेनाह ॥ कर्मभेदश्चेति ॥ ज्ञातव्यमिति ॥ एवंसर्वशाखेत्यपि अन्यः अन्यशाखास्थः ॥ एकशाखागतेति ॥ व्रीहिभिर्वायजेतयवैर्वायजेतेत्याद्युक्तेरित्यर्थः ॥ ॐ सलिलवच्चतन्नियमः ॐ ॥ सर्ववेदश्रवणादिना ब्रह्मज्ञातव्यमितिनियमः सलिलवच्च सलिलानांसमुद्रप्राप्तिनियमवदेवेत्यर्थः । भंग्या रीत्या ॥ ॐ दर्शयतिच ॐ ॥ उक्तमर्थंसर्वैर्वेदैरितिश्रुतिर्दर्शयति चशब्दात्स्मृतिश्चेत्यर्थः ॥ १ ॥ सार्वत्रिकेति ॥ सर्वशाखोक्तेत्यर्थः ॥ उपसंहारेति ॥ तत्रतत्रोक्तान्बुध्यायुगपत्संगृह्ययोजनेत्यर्थः । ध्यानविधेः निदध्यासितव्यइत्यस्य ॥ तथाविधेति ॥ सर्ववेदोक्तगुणविषयकस्येत्यर्थः । सर्ववेदोक्तगुणोपसंहारस्याशक्यत्वादितिभावः ॥ ॐ उपसंहारोर्थाभेदाद्विधिशेषवत्समानेच ॐ ॥ अर्थाभेदात् सर्ववेदार्थानांगुणादीनामभेदेनाविभागेनसर्वानविहायेति

*४

SGDF
Sri Gargeshwari Digital Foundation

यावत् उपसंहारःकार्यः कुतः विधिशेषवत् विधिभिःशिष्यंतउपदिश्यंतइतिविधिशेषाणिविध्युक्तकर्माणिसर्ववेदोक्तानियथाविहितत्वात्रियंतेतद्वदुपसंहारोपिकार्यः । सचोपसंहारःसमानेच योग्यगुणविषयएवकार्यइत्यर्थः । तथाऽविभागेन अन्यथाविहितक्रियालोपइत्येतत्कुतइत्यतआह ॥ तथाचश्रुतिरिति ॥ विद्वांस्तेनैवविधिकृत्स्यान्नान्यथेत्यन्वयः । ननुसर्ववेदोक्तगुणानित्यत्रगुणशब्दोधर्ममात्रपरः अन्यथाक्रियाद्यसंग्रहापत्तेः । दोषाभावोपिधर्म एव अतःकथंपृथग्ग्रहणमित्यतआह ॥ अत्रगुणाइतीति ॥ वेदैरित्यस्येति ॥ वेदैरितिबहुवचनस्यात्रित्वोपिसंभवादितिभावः । समानशब्दार्थमुक्त्वातत्तात्पर्यमाह ॥ पूर्णत्वाविरोधिनइति ॥ नत्वयोग्याइति ॥ रोदनादीनांदुःखकार्यत्वेनपूर्णत्वविरोधित्वादयोग्यत्वमितिभावः ॥ अचेतनेति ॥ अचेतनादीनित्रीण्यनुपास्यानिकुतः निष्फलत्वाद्विपरीतफलत्वाच्चेत्यर्थः ॥ ॐ अन्यथात्वंचशब्दादितिचेन्नाविशेषात् ॐ ॥ शब्दात् आत्मेत्येवेत्यवधारणश्रुतेः अन्यथात्वंप्रागुक्तसर्वोपसंहारस्याकर्तव्यत्वमितिचेन्न अविशेषात् एतेगुणानोपास्याइतिविशेषप्रमाणाभावादित्यर्थः ॥ अनुपसंहारस्यापीति ॥ अवधारणस्यान्ययोगव्यवच्छेदकत्वेनसर्वोपसंहारनिषेधकत्वेननिषेधस्यैवसर्वानुपसंहारविधित्वादितिभावः ॥ सावकाशेति ॥ अयोगव्यवछेदकत्वेनसावकाशेत्यर्थः ॥ ॐ नवाप्रकरणभेदात्परोवरीयस्त्वादिवत् ॐ ॥ सर्वोपसंहारोनकार्यः कुतः प्रकरणभेदात् परोवरीयोवैश्वानरादिप्रकरणानांभिन्नत्वाद्भिन्नप्रकरणोक्तगुणानांभिन्नैरेवोपास्यत्वेनैकेनसर्वेषामनुपास्यत्वात् तत्रैकस्मिन्नेवप्रकरणेसर्वोक्तिरस्त्वित्यतआह ॥ परोवरीयस्त्वादिवदिति ॥ यथासएषोनंतइत्यादिप्रकरणेपुसर्वोत्तमत्वादिकमेवोक्तं नगुणानंतरंतथाप्रकरणांतरेपीत्यर्थः ॥ कारणाभावादिति ॥ अधिकारिभेदस्यैवप्रकरणभेदप्रयोजकत्वेनसर्वप्रकर-

णानामेकोपास्यगुणप्रतिपादकत्वे अधिकार्यैक्येनप्रकरणभेदोनस्यादित्यर्थः ॥ इत्यादिप्रकरणेष्विति ॥ यत्स्वेतमेवंप्रादेशमात्रमभिविमानमात्मानंवैश्वानरमुपास्तइतिवैश्वानरप्रकरणमादिशब्देनगृह्यते ॥ ॐ संज्ञातश्चेत्तदुक्तमस्तितुतदपि ॐ ॥ सर्वविद्यानांसंज्ञातः भगवन्नामत्वानाम्नांच तद्गुणवाचित्वात्तस्यचसर्वोपसंहारेणध्यानार्थत्वात् सर्वोपसंहारःकार्यइतिचेत् तदुक्तं तत्सर्वोपसंहारस्यकर्तव्यत्वमुक्तमस्माभिःप्राक् नकेवलंनामत्वंयुक्तमितिसिद्धमेतत् किंतुतदपि नामवाएतान्ब्रह्मणःसर्वविद्याइतिश्रुतिरूपप्रमाणमस्तितु अस्त्येवेत्यर्थः ॥ गुणाभिधानस्येति ॥ ज्ञानार्थमथ ध्यानार्थंगुणानांसमुदीरणेत्युक्तेरितिभावः । भगवइतिसनत्कुमारंप्रतिनारदस्यसंबोधनं ॥ इतिहासइति ॥ इतिहासश्चपुराणंचेतिद्वंद्वैकवद्भावः वेदानांपंचमं पंचत्वसंख्यापूरकं । इतिहासपुराणाख्यंवेदंग्रंथमध्येमीत्यर्थः । ननुसोहंमंत्रविदेवास्मीतिछंदोगपाठात्कथंनामविदेवेत्युक्तमित्यतआह ॥ यद्वैकिंचिदिति ॥ अध्यगीष्ट अधीतवानसि इदंसनत्कुमारोक्तंवाक्यं ॥ मंत्रविदित्यस्यापीति ॥ मंत्रविदितिपाठउपनिषदोपीत्यर्थः ॥ तथाचभाष्यमुपनिषदार्थानुवादपरमितिभावः ॥ २ ॥ उक्तबाधेति ॥ पूर्वाधिकरणोक्तस्योभयोरपिकर्तव्यत्वस्यबाधेत्यर्थः । प्रतिपादनं उक्तरीत्याविरोधः ॥ अन्योन्यनियमेनेति ॥ नियामकेत्यर्थः ॥ ॐ प्राप्तेश्चसमंजसं ॐ ॥ नकेवलमुक्तरीत्योपसंहारानुपसंहारयोःकर्तव्यत्वमपितुतद्वयंसमंजसंचयुक्तं कुतः प्राप्तेः योग्यतायाव्यवस्थितत्वादित्यर्थः ॥ यस्येति ॥ यस्योपासकस्योपासनासमयेस्वभुजवद्भगवतोगुणाःस्पष्टंयुगपत्प्रतिभासंतिसतावंतएवगुणान्ध्यायेदितिसंबंधः ॥ एतदेवेति ॥ योग्यताविशेषादित्यनेनोक्तमेवेत्यर्थः । कैश्चिदित्यस्यनिर्दिष्टयत्किंचिद्गुणपरत्वप्रतीतिनिरासायाह ॥ आनंदादीति ॥ यस्यावद्गुणाःस्पष्टमित्युक्तयुगपत्प्रतीतियोग्यताविशेषोनात्रचतुर्मुखसंबंधित्वेनोच्यतइत्यतआह ॥ युगपदिति ॥ युग-

PDF Digitized by Sri Ramanuja Vani Foundation

पद्ब्रह्मणःसर्वेभासंतेहिगुणाहरेः । तदन्येषांयथायोग्यमितिश्रुतेरितिभावः ॥ ३ ॥ **प्रकृतेति** ॥ प्राप्तेरितिपूर्वसूत्रप्रकृतेत्यर्थः ॥ ॐ **सर्वाभेदादन्यत्रेमे** ॐ ॥ इमेब्रह्मादयोनुपसंहर्तृफलापेक्षयाऽन्यत्र विलक्षणेफले भवंति कुतःसर्वाभेदात् सर्वेषांगुणानामभेदात् अविभागेनोपसंहारात् तेषांसर्वगुणोपसंहर्तृत्वादितिभावः । असम्यङ्मुक्तयभावेनसम्यगित्यस्यमुक्तिविशेषणत्वायोगादाह ॥ **सम्यग्भवंतीति** ॥ ४ ॥ ज्ञानसाधनेत्युपासनाविशेषणं ॥ **उपासनामात्रोच्छेदेति** ॥ सामान्यनिर्णयएवविशेषनिर्णयादितिभावः ॥ **प्रकृतेति** ॥ प्राप्तेश्चसमंजसमित्यत्रयुगपत्प्रतीतिविषयत्वेनप्रकृतेत्यर्थः । **निर्देशः एतादृशाइतिनिरूपणं** ॥ **पूर्वोक्तिरिति** ॥ भगवद्गुणान्मुमुक्षूपास्यत्वोक्तिरित्यर्थः । संख्यानिर्देशाभ्यामक्लृप्तत्वेउपास्यत्वायोगादितिभावः । चतुष्पंचषाइतिसंख्याक्लृप्तिः आनंदादयइतिनिर्देशक्लृप्तिरिति ज्ञातव्यं ॥ **केषांचिदिति** ॥ यद्यानंदादीनांचतुष्पंचषाणामुपास्यत्वंतर्हिसर्वेषांसर्वोपास्यत्वंस्यात् अविशेषादित्यर्थः ॥ **नैतइति** ॥ आनंदादयोन किंतु प्रकाशवीर्यादयएवेति वक्तुंशक्यत्वादित्यर्थः ॥ ॐ **आनंदादयःप्रधानस्य** ॐ ॥ प्रधानस्यमोक्षस्यार्थे आनंदज्ञाननिर्दोषात्मत्वाख्याश्चत्वारोगुणाउपास्याइत्यर्थः । ननुसच्चिदानंदोपासनाफलस्यनिर्दोषत्वज्ञानानंदादिरूपस्यसर्वापेक्षतत्वेनास्तुतदुपासनस्यावश्यकत्वं आत्मत्वोपासनफलस्यस्वामित्वस्यसर्वमुमुक्षवपेक्षितत्वाभावेनकथंतदुपासनस्यावश्यकत्वमित्यतआह ॥ **आत्मपदेति** ॥ **तच्चेति** ॥ तदात्मत्वोपासनस्यभगवत्प्रीतिसाधनत्वं चतुर्थेध्याये । आत्मेतितूपगच्छंतिग्राहयतिचेत्यत्रवक्ष्यतइत्यर्थः ॥ ५ ॥ **प्रियशिरस्त्वादीति** ॥ उपकारजंसुखंप्रियं तदेवशिरोयस्यतस्यभावःप्रियशिरस्त्वं तदादीत्यर्थः ॥ **उक्तबाधेति** ॥ आनंदादयश्चत्वारएवेत्युक्तबाधेत्यर्थः । सामान्यस्यैवसर्वोपास्यत्वंनविशेषस्येत्यतआह ॥ **अन्यथेति** ॥ विशेषोपासनस्यैवसम्यगुपासनात्वादितिभावः ॥ ॐ प्रि-

SGDF Sri Gargeshwari Digital Foundation

यशिरस्त्वाद्यप्राप्तिरुपचयापचयौहि भेदे ॐ ॥ सर्वेषांमुमुक्षूणांप्रियशिरस्त्वाद्यप्राप्तिः प्रियशिरस्त्वादिगुणोपासनाप्राप्तिर्नास्ति कुतः हियस्माद्भेदफलतारतम्यार्थमुपचयापचयौ उपासनायाःवृत्तिह्रासावपेक्षितौ तस्मादित्यर्थः ॥ आनंदादिश्रुतीति ॥ तेयेशतंमानुषाआनंदाःसएकोमनुष्यगंधर्वाणामानंदइत्याद्यानंदतारतम्यप्रतिपादकश्रुतीत्यर्थः ॥ यथायोग्यानिति ॥ स्वयोग्यान्गुणसमुदायानुपास्यस्थितस्यैव मुक्तिगमकमपरोक्षज्ञानरूपंफलंभवेत् अन्यत्साधनंनैवास्ति कुतः भगवतोनित्यैकाश्रयव्यंग्यताहेतुतः नित्यंचित्तस्यस्वविषयत्वाख्यज्ञानाख्योपासनैवापरोक्षविषयत्वान्निमित्तात् तद्विशेषैर्गुणविशेषैः प्रियशिरस्त्वादिभिरयोग्यैःस्मृतैर्ध्यातैरपिसाक्षाद्दृशिरपरोक्षज्ञानंनोभवेदित्यर्थः । यद्वामुक्तिगंफलं आनंदादिकंकुतइत्यतस्तस्यापरोक्षज्ञानसाध्यत्वात्तस्यचोपासनासाध्यत्वादित्याशयेननित्येत्याद्युक्तमितिध्येयं ॥६॥ ॥ उपसंहारोक्त्यनुपपत्तीति ॥ एकस्मिन्प्रकरणेपिगुणचतुष्टयोक्तिसंभवेनतदुपासनायतत्रोक्तगुणानांयुगपद्ध्यारोहरूपोपसंहारानपेक्षणादितिभावः ॥ मध्यमेति ॥ चतुष्टयमध्यवर्तीत्यर्थः । प्राक् उपासनाभ्यासात् ॥ ॐ इतरेत्वर्थसामान्यात् ॐ ॥ तुरेव इतरेमध्यमगुणाःदेवादिभिरुपास्याएव कुतः अर्थसामान्यात् अर्थेस्वस्वप्राप्यफलेसामान्यात् साम्यमपेक्षेत्यर्थः ॥ यइति ॥ देवतानांयोयोभावःस्वभावविशेषोभविष्यति ब्रह्मातंतंज्ञात्वातत्तत्प्राप्तौतत्तत्प्राप्त्यर्थमीशतुः सद्गुणानधिकादिभ्यआदिशत्युपदिशति अथतेधीकारिणस्तान्गुणान्विचिंत्यध्यात्वाज्ञानजन्यपरमात्मप्रसादेनतत्तद्भावं प्राप्नुवंतीत्यर्थः ॥ ७ ॥ उक्तमिति ॥ उपसंहारोर्थाभेदात्नवाप्रकरणभेदादितिसूत्राभ्यांक्रमेणोक्तंतयोःकर्तव्यत्वमित्यर्थः ॥ विधिरस्तीति ॥ प्रमाणत्वेनेतिशेषः । उक्तंविधिशेषवदित्यनेन विधिशेषवदित्यत्रविहितत्वेनोक्तोगुणोपसंहारः किंसफलः उतनिष्फलः आद्येपिकिंमोक्षफलकं उतान्यफलकेति विकल्पंमनसिनिधायाद्यंदूषयति ॥ अनुपसंहारेपीति ॥

SGDF
Sri Gargeshwari Digital Foundation

आनंदादयःप्रधानस्येत्यादावित्यर्थः। द्वितीयंनिराकरोति॥ फलांतरस्येति॥फलांतरेविरक्तानामेवोपासनाधिकारित्वादि तिभावः। तृतीयंदूषयति ॥ व्यर्थविधेरिति ॥ अनादरणीयत्वादितिभावः ॥ यदप्युक्तमिति ॥ संज्ञातश्चेत्तदुक्त मित्यत्रेत्यर्थः। अस्तुवागुणोपसंहारस्योपसंहारार्थत्वंतथापिसर्वोपसंहाराभावेपिमोक्षप्राप्तेरानंदादयः प्रधानस्येत्यादावुक्त त्वात्तदन्यफलस्याचानपेक्षितत्वाद्विफलासौनकर्तव्यइत्यभिप्रेत्याह ॥ उक्तंचेति ॥ यदपीति ॥ उक्तमित्यनुवर्तते नवाप्रकरणभेदादित्यत्रेत्यर्थः ॥ ॐ आध्यानायप्रयोजनाभावात् ॐ ॥ सर्वगुणोक्तिराध्यानायासंमतात्सर्वगुणोप संहारेणध्यानार्थमेव कुतः तद्विनाप्रयोजनाभावात् ॥ मुक्तानंदेति ॥ मुक्तावानंदातिशयेत्यर्थः। ननुगुणाभिधानस्योपसं हारार्थत्वेसर्वेष्यत्रैवोच्चेरन्नित्यतआह ॥ अतएवेति ॥ ज्ञानार्थमेवेत्यादौ ज्ञानंपरोक्षज्ञानं ज्ञानात्कर्मकृतेरपीत्युभयानुसा रेणाह ॥ ब्रह्मकर्मविद्याभिरिति ॥ तत् श्रवणादि साक्षात्फलहेतुत्वादितिभावः फलस्यफलवतः ॥ प्रयोजनत्वेने ति ॥ गुणकथनप्रयोजनत्वसंभवइत्यर्थः। तथाचसाक्षात्फलहेतुत्वान्मुख्यप्रयोजनत्वमितिभावः। विहितस्यश्रवणादेःतत् जनोलोकादि ॥ ॐआत्मशब्दाच्चॐ ॥ अनुपसंहारोप्यस्ति कुतः आत्मेत्येवोपासीतेत्यात्मत्वमात्रोपासनाविधायका त्मशब्दोपेतश्रुतेरित्यर्थः ॥ उक्तत्वादिति ॥ आत्मेत्येवेत्यवधारणमनात्मत्वनिवृत्यर्थमितिभाष्येणेत्यर्थः । ॥ प्राप्तेश्चसमंजसामितिन्यायेनेति ॥ आत्मत्वमनात्मत्वहानेनावश्यमुपास्यमेवेत्ययोगव्यवच्छेदकस्यावधारणस्य यस्ययावद्गुणाःस्पष्टंप्रतिभासंत्युपासने। युगपत्स्वभूजायद्वध्यायेत्तावतएवसइत्युक्तरीत्या आत्मशब्देनयस्ययावंतोगुणाः युगपत्प्रतीयंतेतेनतावंतएवोपास्याइत्यन्ययोगव्यवच्छेदकत्वमपिनतयोर्विरोधइतिभावः ॥ ८ ॥ उक्तेति ॥ आनंदाद यइत्युक्तेत्यर्थः ॥ उभयथोक्तिरिति ॥ आनंदादयःप्रधानस्येत्यात्मशब्दाच्चेत्युभयोक्तिरित्यर्थः ॥ ॐ आत्मगृही

तिरितरवदुत्तरात् ॐ ॥ आत्मशब्देनेतरगुणानांगृहीतिर्ग्रहणमस्ति कथमितरवत् यथासत्यंज्ञानमितिवाक्यगतसत्या दिपदानांसत्यत्वाद्यभिधायित्वं तथास्यापिसच्चिदानंदाद्यात्मकत्वं कुतः उत्तरात् तथाभिधायकादत्रत्वेतइत्युत्तरवाक्यादि त्यर्थः ॥ ९ ॥ प्रमाणलोक्तिः आत्मशब्दस्यातदुक्तानंगीकारेतस्यैवाप्रामाण्यप्राप्तेरितिभावः ॥ ॐ अन्वयादितिचे त्स्यादवधारणात् ॐ ॥ आत्मशब्देसर्वगुणानामन्वयात् तस्यसर्वगुणवाचित्वादितियावत् तस्यानुपसंहारित्वंयुक्तमिति चेत् स्यादात्मशब्दस्यसर्वगुणवाचित्वं किंतु ब्रह्मादीन्प्रत्येव नान्यान्प्रति कुतः अवधारणात् अन्ययोगव्यवच्छेदपरात्मे त्येवेत्यवधारणात् ॥ आप्तव्याप्तेति ॥ आप्तव्यानांगुणानामाप्तेःप्राप्तत्वादित्यर्थः ॥ अयमिति ॥ श्रुतआत्मेत्ये वेत्यन्ययोगव्यवच्छेदकपदावधारणयुक्तात्मशब्दयुक्तइत्यर्थः ॥ श्रुतचतुर्गुणेति ॥ सत्योज्ञानःपरमानंदरूपआत्मेत्ये वंनित्यदोपासननंस्यादितिचतर्गुणोपासनंश्रुतवतइत्यर्थः। विभ्रमकरः संशयजनकः ॥ अवधारणविरोधादिति ॥ आत्मशब्दोक्तसर्वगुणानुपासने आत्मशब्दोक्तमुपास्यमेवेत्ययोगव्यवच्छेदपरावधारणविरोधादित्यर्थः । नन्वेवंतर्हिसर्वे षांसर्वगुणोपास्तिःस्यादित्यतआह ॥ इयांस्त्विति ॥ अधिकरोतीति ॥ स्वविहितकारितयासंग्रण्हातीत्यर्थः ॥१०॥ ॥ उक्तेति ॥ परमतःसेतून्मानसंबंधभेदव्यपदेशेभ्यइत्यनेनोक्तेत्यर्थः ॥ लोकदृष्टिरिति ॥ लोकेलौकिकस्यैवपु त्रादेर्ध्यानदर्शनादितिभावः । नध्यानाभावप्रसंगोलौऽकिकानांध्यानसंभवादित्यतआह ॥ अलौकिकानामिति ॥ विपर्ययेपर्यवसानमाह ॥ कर्तव्यंचेति॥ निदिध्यासितव्यइतिश्रुतिविहितत्वादितिभावः। नन्वस्तुलौकिकानामेवध्या नंतथापिनभगवद्गुणानामलौकिकत्वहानिः। योषितमग्निंध्यायीतेतिवदविद्यमानध्यानस्यापिसंभवादित्यतआह ॥ नचा विद्यमानएवेति ॥ लौकिकाएवेति ॥ तथाचपरमतइत्युक्तमलौकिकत्वमयुक्तमितिभावः ॥ ॐ कार्याख्या-

Sri Gargeshwari Digital Foundation

नादपूर्वं ॐ ॥ भगवद्गुणजातमपूर्वमलौकिकंध्येयं कुतः कार्यस्यध्यानकार्यस्य मोक्षस्याख्यानात् अलौकिकत्वा भिधानादित्यर्थः ॥ **इंद्रादाविवेति** ॥ यःसहस्राक्षःसइंद्रइतिवद्भगवद्गुणानांयत्सर्वविषयंतदीश्वरज्ञानमित्याद्याद्युप देशेनतदविदुषामपिप्रतीतेरितिभावः ॥ ११ ॥ इत्युक्तोपासनेतितदुक्तफलोपासनेत्यर्थः ॥ **समविषमंचेति** ॥ समविषमयोरन्यतरादित्यर्थः । तादृशमुभयान्यतरत् ॥ **स्थानैक्यस्येति** ॥ उभयोरपिसायुज्यभाक्त्वादितिभावः । ॥ **गुणतारतम्यस्येति** ॥ आनंदादितारतम्यस्यश्रुतिसिद्धत्वादितिभावः ॥ **तादृशमिति** ॥ फलवत्समविषमोभ यरूपमित्यर्थः ॥ **विरुद्धत्वेनेति** ॥ उभयोपासनस्यसर्वगुणक्रियावतारादौसाम्येवैषम्यायोगात् वैषम्येसाम्यायोगा दितिभावः ॥ ॐ **समानएवंचाभेदात्** ॐ ॥ एवंच एवमपित्रिविक्रमादिक्रियाविशेषाणामपूर्वत्वेपिसमानेनित्यवि क्रांत्यादिसामान्यक्रियायां अभेदादंतर्भावेनैवतत्ध्यानंब्रह्माण्याकार्यंनपृथगित्यर्थः ॥ **उक्तलिंगेनेति** ॥ स्थानैक्यगुण- तारतम्यरूपेणेत्यर्थः । त्रैविक्रमाद्यास्तुनित्यविक्रांतिपूर्वकं कदाचिल्लोपयेदेवीत्युक्तत्वादाह ॥ **सदेति** ॥ पृथक्त्वेनेति ॥ त्रिविक्रमत्वादिविशेषांगीकारेणेत्यर्थः ॥ ॐ **संबंधादेवमन्यत्रापि** ॐ ॥ अन्यत्रापि त्रिविक्रमत्वादिक्रियाविशेषेपि एवमुपसंहारः कार्योविरिंचेन तासामीशेनसंबंधात् तादात्म्यान्नित्यत्वादित्यर्थः । ननुयदित्रिविक्रमत्वादीनांपरमात्मैक्यं कथंतर्हितत्संबंधस्तेषां संबंधस्यभेदसापेक्षत्वादित्यतआह ॥ **संबंधइति** ॥ १२ ॥ उक्तं अनुपसंहारप्रमाणत्वं ॥ उक्त मत्रेति ॥ अन्वयादित्यत्रेत्यर्थः ॥ **प्रातिस्विकेति** ॥ प्रतिव्यक्तिगतेत्यर्थः । ननुशब्दस्यपुरुषव्युत्पत्यनुसारेणगुणा भिधायकत्वमितिप्रातस्विकनियमोपपत्तिरित्यतआह ॥ **संभवतीति** ॥ कालभेदेनव्युत्पत्तेर्वैशिद्यावैशिद्यसंभवेनबहु गुणध्यानयोग्यानांकदाचिद्बहुगुणान्तद्योग्यानांतुकदाचिदल्पगुणान्बोधयतीत्यतोऽस्यैतावंतएवेत्यादिनियमोनसंभवतीत्य

SGDF Sri Gargeshwari Digital Foundation

र्थः ॥ ॐ नवाविशेषात् ॐ ॥ आत्मशब्देनसर्वगुणगृहीतिर्नवास्तु कुतः विशेषात् योग्यताविशेषादित्यर्थः ॥ अ
योग्येति ॥ अयोग्यप्रतीतिर्व्युत्पत्तिवशेनजातापिगुणप्रतीतिर्नप्रतीतिः ध्यानोपयोगित्वेनविवक्षितप्रतीतिर्नभवतीत्यर्थः
॥ ॐ दर्शयतिच ॐ ॥ इतरेषांसर्वगुणाप्रतिपादनंसर्वान्गुणानितिश्रुतिर्दर्शयतीत्यर्थः ॥ स्वयोग्यानिति ॥
ननिरुपचरितसर्वानितिभावः ॥ युगपदिति ॥ व्युत्पत्तिवशात्तेषामपिक्रमेणयोग्यगुणप्रतीतिसंभवादितिभावः ॥१३॥
उक्षाः भक्ताभिलषितसेचकाः मोक्षमात्रस्य आनंदाद्युपासनेनैवसिद्धेःनमुमुक्षुत्वंतदुभयोपासनंतदुभयप्रयोजकमित्यतआह
॥ मोक्षेचेति ॥ फलंचेति ॥ अतोनोपासनाभावेतदुभयलाभइतिभावः । यादृशः यगुद्गुणविशिष्टः भावितः ध्यातः
असम्यगुपास्तिःप्रसज्यतइतिशेषः ॥ ॐ संभृतिद्युव्याप्त्यपिचातः ॐ ॥ संभृतिः सम्यग्भरणं द्युव्याप्तिः प्रका
शेनव्याप्तत्वं तेनसर्वोपास्ये कुतः अतश्चयोग्यताविशेषादेवेत्यर्थः ॥ भगवद्रूपेति ॥ ध्यानकालेप्रतीयमानंभगवद्रूपंनप्र
काशेनविनाप्रतीयेत् किंतुयत्किंचित्प्रकाशयुतमेव अतस्तदुपासनेनैवतदपेक्षितप्रकाशलाभइत्यर्थः ॥१४॥ प्रकृतइति ॥
उपसंहारोर्थाभेदादित्यत्रेत्यर्थः । ननूपसंहाराभावेकथंतत्रतत्रोक्तगुणोपासनं बुद्धौयुगपदनारोहादित्यतआह ॥ येहीति ॥
॥ ॐपुरुषविद्यायामपिचेतरेषामनाम्नानात्ॐ ॥ अपिसर्वविद्योतमायां पुरुषविद्यायां पुरुषसूक्तोक्तविद्यायां इत
रेषांकेचिद्गुणानां अनाम्नानात् अपठितत्वात्केषांचिदेवपठितत्वाच्चैकत्रसर्वगुणोक्तिरित्यर्थः । ननुपुरुषसूक्तमेवगुणप्रति
पादकविद्यानतुतत्रतादृशविद्यांतरोक्तिः । अदर्शनात् तत्कथंपुरुषसूक्तोक्तविद्यायामित्युक्तमित्यतोव्याचष्टे ॥ पुरुषसूक्त
मित्युक्तेति ॥ पुरुषसूक्तमित्येवंप्रमाणांतरोक्तविद्यायामित्यर्थः । चतुर्मुखस्येत्यनंतरंसर्वविद्याभ्यइतिशेषः ॥ संख्या
साम्येति॥ स्वोपास्यगुणसमसंख्याकगुणांतरप्रतिपादनस्यापिसंभवेनस्वोपास्यानामेवतत्रोक्तनियमाभावादित्यर्थः॥१५॥

NMDF
Sri Gargeshwari Digital Foundation

॥ नियमेति ॥ चतुष्टयनियमेत्यर्थः ॥ अग्नइति ॥ स्वतोनगच्छतीत्यगं विश्वंनयतीत्यग्निनाममहरेयातुधानस्यराक्षसस्यत्वचंशरीरंभिंधिविदारयेत्यर्थः ॥ तंप्रत्यंचमिति ॥ प्रत्यंचंप्रथक्स्थितंतंराक्षसमर्चिषाविष्फुलिंगेमर्मन्मर्मस्थले विध्य वेधयित्वेत्यर्थः ॥ परेति ॥ परापरेणतपसातुष्टस्त्वंयातुधानान्शृणीहिजहीत्यर्थः । ननुफलापेक्षायामप्यविहितत्वात् । अकर्तव्यत्वमित्यतआह ॥ प्राणइति ॥ इतरप्राणाधारत्वेनशालाप्रधानवंशस्थानीयोप्राणःमुख्यप्राणस्त्वात्वां हास्यति त्यजिष्यति । त्वंमरिष्यसीतियावत् इत्येनंब्रूयादित्यर्थः ॥ आततायिनमिति ॥ अग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः क्षेत्रदारापहर्ताचषडैतेह्याततायिनइत्युक्तेःशस्त्रपाणिनमित्यर्थः । हंतुमुद्यतमिति शेषः ॥ ॐ वेदाद्यर्थभेदात् ॐ ॥ वेदभेदनादिगुणजातं नसर्वोपास्यं कुतः अर्थभेदात् अर्थस्यतत्फलस्यभेदात् विलक्षणत्वादित्यर्थः । फलात् अहिंसारूपात् आकांक्षाक्रमेणस्मृतिंव्याचष्टे ॥ भिंधिविद्धीत्यादिना ॥ एकताशब्दार्थःसाम्यमिति । साधारण्यमित्यर्थः तत्तात्पर्यमाह ॥ एतादिति ॥ १६ ॥ अतिशयेनेति ॥ तथात्वेतस्यमोक्षार्थमेवानुष्ठितव्यत्वेनसोपाधिकत्वप्राप्तेरित्यर्थः ॥ क्रियांतरेति ॥ यज्ञादिक्रियाश्रवणमित्यर्थः ॥ कर्तव्यानवेति ॥ विहितावाक्रियते उताविहितावाक्रियतइत्यर्थः ॥ फलप्राप्तिप्रसंगादिति ॥ कृष्यादेस्तद्विधिविषयपुरुषानुष्ठितस्येवतद्विध्यविषयपुरुषानुष्ठितस्यापिधान्यादिफलकत्वदर्शनादितिभावः । इष्टापत्तिंपरिहरति ॥ तथाचेति ॥ ॥ ॐ हानौतूपायनशब्दशेषत्वात्कुशाच्छंदस्तुत्युपगानवत्तदुक्तं ॐ ॥ हानौसंसारहानिरूपमुक्तौ उपासनमस्त्येव कुतः यतस्तदुक्तं तत् मुक्तोपासनं एतत्सामगायन्निति श्रुत्युक्तं तदपिस्वेच्छयागविधितः उपासनाविधीनामुपायनशब्दशेषत्वात् उपायनंमोक्षः तस्यशब्दःब्रह्मविदाप्नोतीतिवाक्यंतच्छेषत्वात् तदर्थोपयुक्तार्थपरत्वात्विध्यभावेस्वेच्छा

मात्रेणकथंतत् कुशाच्छंदस्तुत्युपगानवत् कुशैःकुशग्रहणेनाछंदेनस्वेच्छया स्तुतिमंत्रः उपगानंसाम तदुभयाध्ययनवदित्यर्थः ॥ तत्कुतइति ॥ दृष्टांतमात्रस्यासाधकत्वादितिभावः । शेषोक्तिंव्यनक्ति ॥ ब्रह्मज्ञानेनेति ॥ अप्रयोजकत्वं परिहरति ॥ मोक्षसिध्यर्थंचेति ॥ विधेःफलावसानत्वादितिभावः । एवंमुक्तोपासनस्यविधिनिबंधनत्वाभावमंगीकृत्यस्वेच्छयैवोपासनमित्येतन्नयुक्तमित्युक्तं । इदानींतस्यविधिनिबंधनत्वेपिनदोषइत्यतआह ॥ किंचोपासनेति ॥ उपायनशब्दशेषत्वादित्यनेनमुक्तोपासनस्यमोक्षफलकत्वाभावसिद्धावपिफलांतरार्थत्वाभावासिद्धेरितिभावः ॥ ॐ सांपरायेतर्तव्याभावात्तथाह्यन्ये ॐ ॥ नानिष्टपरिहारार्थमुक्तोपासनं कुतः सांपरायेमोक्षेतर्तव्यस्यनिरसनीयस्यानिष्टस्यैवाभावात् कुतः हियस्मादन्येशाखिनःस्तथापठंतीत्यर्थः । नहिनिष्फलमित्युक्तदोषंनिरस्यति ॥ फलाभावेपीति ॥ हृद्गतस्यतेति ॥ अनेनहृद्ययनात्हृदयमित्युक्तंभवतिषष्ठ्यर्थसंबंधमेवाह ॥ शेषभूतइति ॥ तद्भृत्यादिसंबंधविशेषवानभवतीत्यर्थः ॥ १७ ॥ प्रासंगिकत्वादिति ॥ मुक्तावुपासनस्यनियमेनकर्तव्यत्वसमर्थनेकर्मविषयेतत्स्मरणादितिभावः ॥ ॐ छंदतउभयाविरोधात् ॐ ॥ मोक्षेकर्मकरणंछंदतःस्वेच्छयैव कुतः उभयोर्विधिबंधप्रत्यवायोर्विरोधाभावादितिभावः ॥ ॐ गतेरर्थवत्त्वमुभयथान्यथाहिविरोधः ॐ ॥ नमोक्षेविधिबंधप्रत्यवायौ कुतः हियस्माद्गतेर्मोक्षस्यार्थवत्त्वं पुरुषार्थत्वमुभयथाविधिबंधप्रत्यवायाभावत्वेनैवासितस्मात् अन्यथातत्रापिविधिबंधप्रत्यवायसत्वेमोक्षत्वविरोधइत्यर्थः ॥ मोक्षत्वविरोधादिति ॥ संसाररूपप्रतियोगितन्निवृत्तिरूपमोक्षयोर्वैलक्षण्यस्यावश्यकत्वादितिभावः ॥ वैलक्षण्यांतरेपीति ॥ स्वरूपानंदाविर्भावरूपेणेत्यर्थः ॥ व्याहतत्वादिति ॥ तादृशसंबंधेसतिव्यक्त्ययोगादितिभावः । उपपादनाय साधनाय ॥ ईश्वरकर्मणीति ॥ मुक्तानयज्ञादिकर्मकरणनियमवंतःतत्करणाकरणयोर्विधिबंधप्रत्यवायशून्यत्वादित्यनुमानेयोयत्करणाकर

PDF
Digitized by Arya Samaj Foundation Chennai and eGangotri

णयोर्विधिबंधप्रत्यवायरहितःसनतत्करणनियतिमानितिसामान्यव्याप्तिर्वक्तव्या साचनयुक्ता । सृष्ट्यादिकरणाकरणयोर्विधिबंधप्रत्यवायरहितस्यापीश्वरस्यतत्करणनियमएवास्तीतिव्यभिचारादितिभावः ॥ ॐ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॐ ॥ मुक्ताःस्वेछयाकर्मकुर्वंतीत्ययमर्थः उपपन्नोयुक्तः कुतः तल्लक्षणार्थोपलब्धेः तत्कर्मलक्षणंनिमित्तंयस्य मोक्षस्यतद्रूपार्थस्यप्रयोजनस्योफलब्धेः प्राप्तत्वात्कथंलोकवत् यथालोकेयागविधिपूर्वकंकृतस्यविष्णुक्रमणस्यकर्मणः नतत्पूर्त्यनंतरमपिकरणंतथेत्यर्थः । प्रयोगप्रकारमाह ॥ इदमुक्तमिति ॥ मुक्तैर्नियमेनक्रियमाणायामुपासनायांव्यभिचारवारणायविशेषहेत्वभावेसतीत्युक्तं । तत्रनित्यज्ञानस्वरूपत्वसंस्कारपाटवादिविशेषहेतुरस्तीतिभावः ॥ १८ ॥ अनियमसाधनादिति ॥ केषांचिदस्तिकेषांचिन्नास्तीतिव्यवस्थाभावसाधनादित्यर्थः ॥ फलद्वैविध्येति ॥ स्वर्गादौतत्साधकसर्वप्राप्यत्वस्यज्ञानेचकैश्चिदेवप्राप्यत्वस्यचदर्शनादितिभावः ॥ ॐ अनियमःसर्वेषामविरोधाच्छब्दानुमानाभ्यां ॐ ॥ सर्वेषांज्ञानिनांमोक्षेऽनियमःउक्तव्यवस्थानास्ति कुतः अविरोधात् अनियमांगीकारेविरोधाभावात् प्रत्युतनकश्चिदितिश्रुत्याज्ञानित्वानुमानाभ्यामनियमस्यसित्वत्वदित्यर्थः ॥ उपसंहारानुमानेति ॥ विप्रतिपन्नाःसार्वत्रिकगुणोपसंहारिणोमोक्षाधिकारित्वाद्ब्रह्मवदित्याभासानुमानेनतुल्यमित्यर्थः ॥ बाधकेति ॥ साधकबाधकभावाभाववदित्यर्थः ॥ साधकेति ॥ श्रुत्यादिरूपेत्यर्थः ॥ १९ ॥ अधिकारनियमेति ॥ केषांचिदेवसर्वगुणोपासनंनसर्वेषामितिव्यवस्थेत्यर्थः अदृष्टिः नियतेः ॥ नचात्रेति ॥ प्रमाणंचेत्यन्वयः । अथानंदस्यमीमांसेत्यानंदतारतम्यश्रुतिरेवतत्रप्रमाणमित्यतआह ॥ आनंदश्रुतिरिति ॥ ॐ यावदधिकारमवस्थितिराधिकारिकाणां ॐ ॥ आधिकारिकाःब्रह्मादिजीवविशेषाःतेषांयावदधिकारमधिकारानुसारेणैवमुक्तावस्थितितारतम्येनाव

SGDF Digital Foundation

स्थानं । नतूपासनाप्रयत्नतारतम्येनेत्यर्थः । ननुवसिष्ठसाम्यंसमभीप्समानंप्रच्यावयन्निच्छयाशापमापेत्यादिनामांडव्या
दीनां अधिकाराधिकप्रयत्नदर्शनात्कथमेतदित्यतआह ॥ कथंचिदिति ॥ यमंप्रतिशापप्रदानादिरूपोविघ्नोभवती
त्यर्थः । वचनात् न्यायविवरणे ॥ ॐ अक्षरधियांत्वविरोधःसामान्यतद्भावाभ्यामौपसदवत्तदुक्तं ॐ ॥ अ-
क्षरधियांब्रह्मज्ञानिनांचतुर्मुखादीनांतु असमत्वेप्यविरोधः परस्परंविरोधोनास्ति कुतः ब्रह्मज्ञानित्वादेव किंचसामा
न्यतद्भावाभावाभ्यांसामान्यात् मत्सरादिदोषाभावसाम्यात् तथातद्भावात् तदितितंत्रं तेभ्यः उत्तमेभ्यः तस्यज्ञा
नोपदेशाख्योपकारस्यतेषांनीचानांभावात्सत्वात् कथं औपसदवत्शिष्यवत् कुतः तदुक्तं तत् असमत्वेपिविरोधाभाव-
इत्येतत् नानाविधाइतिश्रुत्युक्तमित्यर्थः ॥ ब्रह्मधीत्वादीति ॥ ब्रह्मज्ञानस्यविषयवैराग्यजन्यत्वेनतेषांविषयलंपटत्वा
संभवइत्यर्थः । अन्यथासमत्वस्यैवप्रयोजकत्वे ॥ अतएवेति ॥ बाधकस्यपरिहृतत्वादेवेत्यर्थः । कथंबाधकाभावमात्रे
णमुक्तपरत्वनिर्णयइत्यतआह ॥ तथाचेति ॥ अध्वर्यूणांश्रुतौनरादिब्रह्मपर्यंतंमुक्तानामानंदोमिथःशतोऽभ्यःपृथक्पृथगि
त्यन्वयः ॥ २० ॥ प्राणावसानत्वइति ॥ प्राणावधिकत्वेत्यर्थः । निरवधिकत्वे प्राणावधिकत्वाभावे ॥ नामा
दीति ॥ नामवाङ्मनःसंकल्पचित्तज्ञानविज्ञानबलान्नाप्तेजआकाशस्मराशाप्राणाःक्रमेणोत्तमत्वेनोक्ताइत्यर्थः ॥ उभय
थासत्वेसत्वेपि ॥ सोत्तरत्वेति ॥ सोत्तमत्वेत्यर्थः ॥ ॐ इयदामननात् ॐ ॥ उपासनाधिकारिणां इयत् प्रा
णावधिकत्वमेव कुतः आमननात् प्राणोवावेतिश्रुतौतथोक्तत्वादित्यर्थः ॥ ॐ अंतराभूतग्रामवदितिचेत्तदुक्तं ॐ ॥
भूतानांनामादीनांग्रामवत्समुदायवत् प्राणोप्यंतरापरमात्मानंविना अन्योत्तमोपेतइतिचेन्न कुतः तदुक्तं तदितितंत्रं
तत्रप्राणाधिकाभावेतत्प्रमाणंप्राणोवावेत्युक्तंयतइत्यर्थः ॥ वाग्वेति ॥ वाक्स्वाहादेवीनाम्नउषा गाःसकाशाद्भूयसीश्चे

SGDF
Sri Gargeshwari Digital Foundation

ष्टेत्यर्थः ॥ ॐ अन्यथाभेदानुपपत्तिरितिचेन्नोपदेशवत् ॐ ॥ अन्यथाप्राणादधिकाभावे तस्यैवसर्वोत्तमत्वइति यावत् भेदानुपपत्तिः सर्वोत्तमेनब्रह्मणाश्रुतिसिद्धभेदोनस्यादितिचेन्न उपदेशवत् अन्येभ्यःप्राणस्येतिश्रुत्युपदिष्टप्रकारेण प्राणोवावसर्वेभ्योभूयानितिसर्वशब्दस्यसंकोचोपपत्तेरित्यर्थः ॥ कतिपयाधिकारीति ॥ तथाचनतस्यनामाद्यागांता धिकार्युत्तमत्वस्यभवदभिलषितस्यासिद्धिरितिभावः । सर्वेभ्यः अधिकारिभ्यः ॥ विष्णुव्यतिरिक्तेति ॥ अत्रसर्वे त्रश्रियोपिब्रह्मकोट्यवेवप्रवेशोद्रष्टव्यः ॥ २१ ॥ वादिविप्रतिपत्तेर्हिरण्यगर्भविषयएवसद्भावादाह ॥ प्राणस्येति ॥ एष तुवेति ॥ योधिकारीसन्निर्दोषश्चासौयोनियामकश्चेतिसत्योविष्णुस्तेनातिवदति तमतिशयितंवक्तीतियावत् सएषःप्रागुक्त प्राणातिवाद्यपेक्षयातुविशेषेणातिवदतीत्यर्थः ॥ अस्तिभगवइति ॥ नामवागादिप्रकरणांतरेस्तिभगवोनाम्नोभूयइति नाम्नोवावभूयोस्तीतितन्मेभगवान्ब्रवीत्वितिनारदप्रश्नवत् वाग्वावनान्मोभूयसीतिसनत्कुमारप्रतिवचनाच्चास्तिभगवःप्रा णाद्भूयइत्यादिप्रश्नस्यसत्यंवावेत्यादिपरिहारस्यचाभावादित्यर्थः । सत्यपदंविष्णुपरमेवनेत्याह ॥ सत्यपदेनेति ॥ ननूक्तभंग्याप्रश्नाद्यध्याहारेणयःसत्येनेत्यादेःप्रकरणांतरत्वात्कथंसत्यपदंप्राणपरमित्यतउक्तं ॥ कारणविशेषमिति ॥ ॥ ॐ व्यतिहारोविशिंषंतिहीतरवत् ॐ ॥ सत्यप्रकरणेप्रश्नप्रतिवचनयोर्व्यतिहारोऽध्याहारःकार्यः कुतः इतर वत् प्रश्नप्रतिवचनाभ्यांनामादितोवागादिकमिवप्राणात्सत्यं तुशब्देनविशिंषंतिव्यावर्तयंति छंदोगाहियस्मात्तस्मादित्यर्थः ॥ सवाइति ॥ सएषोधिकारी एवंविजानानःश्रृण्वन्मन्वानोविचारयन्पश्यन्ध्यायन्नतिवादीप्राणाख्योत्तमवस्तुवादीभव तीत्यर्थः । अयंसत्योऽसौप्राणएकवस्तुज्ञानिनोस्तारतम्यायोगादितिभावः । एतत् तुशब्दाख्यं ॥ प्राणात्सत्यस्येति ॥ प्राणात्सत्यस्योत्तमत्वाभावेतद्वादिनस्तद्वाद्यपेक्षया आधिक्यायोगादितिभावः ॥ २२ ॥ प्रागुक्तंविष्णुंविनाप्राणस्योत्त

मत्वं ॥ निरुपचरितेति ॥ विज्ञानाद्युत्तमत्वादितिभावः ॥ ॐ सैवहिसत्यादयः ॐ ॥ सत्यादयादेशसापरदेव तैवेत्यर्थः ॥ विजिज्ञासेति ॥ विशेषेणज्ञास्यामि ॥ तद्गुणत्वेनेति ॥ विज्ञानात्मकस्वरूपस्याविशेषबलेनसत्यगु णत्वमविरुद्धमितिभावः ॥ तदविनाभूतेति ॥ यदावैविजानात्यथसत्यंवदतिनाविजानन्सत्यंवदतीत्यन्वयव्यतिरे कोक्तिपूर्वकंविज्ञानोक्तेरित्यर्थः ॥ तथोत्तरत्रापीति ॥ विज्ञानंभगवोविजिज्ञासइत्यादिजिज्ञासायांतद्गुणत्वेनयदावैमनु तेथविजानाति नामत्वाविजानातीत्यादिनामत्वाद्यभिधानादित्यर्थः ॥ अभेदानुक्तेरिति ॥ सत्यंभगवोविजिज्ञासे त्यादिनासत्यादिभगवद्गुणविजिज्ञासायांयदाहवैविजानातीत्यादिनाविज्ञानादीनांसत्यादिगुणत्वेनोपदेशवत् भूमानंभगवो जिज्ञासइतिभूमाख्यभगवद्गुणजिज्ञासायांयत्रनान्यत्पश्यतीत्यादिनादृश्यत्वादेरेवोक्तत्वेनतद्गुणत्वेनाहंकारस्योपदेशाभावात्त थात्मनस्तद्गुणत्वेनोपदेशाभावादितिभावः ॥ सवाएषइति ॥ सएषोधिकारी एवंश्रृण्वन्नेवंमन्वानः एवंध्याय न्नेवंपश्यन्मुक्तःसन्नात्मरतिःपरमात्मनारतिरल्पबुद्धिर्यस्यसतथोक्तः परमात्मनाक्रीडतइत्यात्मक्रीडःपरमात्मनास्वयंस्त्रीरू पःसन्मिथुनीभवतीत्यात्ममिथुनः परमात्मनैवाभिव्यक्तःस्वरूपानंदोयस्यासावात्मानंदः स्वातंत्र्यात्स्वोभगवानेवराट् आज्ञापयितात्यक्षोभवतीतिस्वराडित्यर्थः ॥ अंहकारात्मज्ञानादिति ॥ एतद्वाक्यस्यतदुभयांतिमप्रकरणत्वादिति भावः । अहमेवाधस्तादित्यादिप्रतीकद्वयं पूर्णमित्यादीत्यादिशब्देनविज्ञानंपूर्णमित्यादिग्राह्यं ॥ २३ ॥ प्राणावसान त्वासिद्धेरिति ॥ अधिकारित्वेचतस्याप्राणोपर्येववक्तव्यत्वादितिभावः ॥ सन्निधापितेति ॥ तस्यास्तदुभयमध्य स्थत्वादितिभावः । साधुत्वेसतीतितयोयोग्यव्यावृत्तयेविशेषणं मुक्तव्यावृत्तयेविशेष्यं । कृतार्थामुक्ताः ॥ ॐ कामादि तरत्रचायतनादिभ्यः ॐ ॥ श्रीः कामात् ईशेछानुसारिस्वेच्छयैव तत्रेशसमीपेमूलरूपेणस्थिता इतरत्रभूम्यादावतरं

SGDF Foundation

ति कुतः आयतनादिभ्यःसर्वमायतनमाश्रयोयस्याःसातथेतिसर्वगतत्वादिप्रतिपादकशब्देभ्यइत्यर्थः ॥ जननेपीति ॥ जन्मवतांचमनुष्याणांनैवंभावइतिभावः ॥ नापीति ॥ तेषांमूलरूपेणसतामेवार्जुनादिरूपेणजननादितिभावः ॥ कर्मेति ॥ तेषांचजननेकर्मैवनिमित्तमितिभावः । सर्वचेतनेच्छास्वरूपत्वस्यदुःखादिसर्वविषयेच्छावत्त्वस्यवासंभवादाह ॥ सर्वमिति ॥ अविकृतिः विकाररहिता ॥ तदभावेति ॥ प्रकृत्यभावेत्यर्थः । कृतकृत्यत्वेनमुक्तत्वेनयत्कृष्णपदाब्जंसात्वतैःपंचरात्रैः ॥ ॐ आदरादलोपः ॐ ॥ रमायाअलोपः उपासनालोपाभावः आदरात् भक्तेरेवेत्यर्थः । ननुलक्ष्मीवदितरेषाम नाद्यनंतकालेएकप्रकारेणोपासनाभावात्कथमेवमुक्तमित्यतोव्याचष्टे ॥ एवंनिरुपाधिकेति ॥ ॐ उपस्थितेस्तद्वच नात् ॐ ॥ श्रियोनित्यमुक्तत्वं उपस्थितेः उप परमात्मसमीपे स्थितेः सर्वदास्थितत्वादेव कुतः तद्वचनात् तस्यभग वतोनित्यसंबंधस्य द्वावेतावित्यनेनप्रतिपादनादित्यर्थः ॥ २४ ॥ समस्तस्य सर्वस्य व्यस्तं किंचित् विधेःश्रोतव्यइ त्यादेः दृष्टंभवति ॥ नचेति ॥ कृत्यंचेत्यन्वयः ॥ ॐतन्निर्धारणार्थनियमस्तद्दृष्टेःपृथग्व्यप्रतिबंधःफलंॐ ॥ तन्निर्धारणं तस्यपरापरत्वस्यानिर्धारणंनिश्चयः अर्थनियमः अर्थस्य वेदार्थस्य अयमेवेतिनियमःनिश्चयः एतदुभयं तद्दृष्टेःतस्यपरमात्म नोदृष्टेः अपरोक्षज्ञानात्पृथक् अन्यदेव अप्रतिबंधः ज्ञानप्रतिबंधकनिवृत्तिः तदुभयफलमित्यर्थः ॥ पृथगेवेति ॥ अपृथक्त्वेकिलश्रवणमननाभ्यांपूर्तिःस्यादितिभावः ॥ कथमिति ॥ निष्फलत्वादितिभावः ॥ २५ ॥ इति- कर्तव्यतेति ॥ उपसाधनतेत्यर्थः ॥ इत्युक्तमिति ॥ तत्रगुरूपदेशानुसारेणोपासनाकर्तव्यतोक्तेरितिभावः । अभ्युपगमेमोक्षाभावस्य ॥ इत्युक्तेति ॥ तत्रकस्यापिज्ञानिनोमोक्षाभावोनेत्युक्तेरितिभावः ॥ ॐ प्रदानपदे यतदुक्तं ॐ ॥ प्रीतिपूर्वकत्वादिप्रकृष्टंदानं उपदेशःप्रदानं तद्युक्तमेवश्रवणादिकं अपरोक्षज्ञानसाधनं कुतः तदुक्तं

SGDF Sri Gargeshwari Digital Foundation

तत्ज्ञानस्यदानाधीनत्वमाचार्यवानितिश्रुतावुक्तंयतइत्यर्थः । उक्तवचनं आत्मावारइत्यादि ॥ नहीति ॥ दार्ढ्य-
मुष्टिनिपीडनात्पृथक्साधनंनहीत्यर्थः । उक्तंन्यायविवरणे । तथाचतुर्थतात्पर्ये । अत्रज्ञानाद्यभावे ॥ २६ ॥ उक्ते
ति ॥ आवश्यकत्वेत्यर्थः ॥ नहीति ॥ सन्निकर्षापेक्षयेंद्रियस्यैवप्राबल्यदर्शनादितिभावः ॥ पुरुषत्वसाम्यादिति ॥
तथाचतत्क्रिययोरपिसाम्यमितिभावः ॥ ॐ लिंगभूयस्त्वात्तद्बलीयस्तदपि ॐ ॥ तत् गुरुप्रदानं श्रवणाद्यपेक्षयाबली
यःबलिष्ठं कुतः लिंगानांज्ञापकानांभूयस्त्वात् बाहुल्यदर्शनात् नचश्रवणादिवैय्यर्थ्यं हियस्माच्छ्रुत्युक्तं तदपिश्रवणादिकमपि
कार्यंयतइत्यर्थः ॥ ऋषभादिभ्यइति ॥ ऋषभःसर्वदेवोत्तमोवायुःचतुःशतसंख्याकगोगणंप्रदायैतस्यप्रसवेनसहस्रसंख्यापूर्ति
पर्यंतमरण्येस्थित्वातत्पूर्त्यनंतरंमामेहीति गुरुणागौतमेनोक्तेनसत्यकामेनतथाकृत्वागुर्वभिमुखेजातेसतितदीयगुरुसेवाप्रसन्नाः
वाय्वग्निब्रह्मवरुणाःक्रमेणऋषभाग्निहंसजलवायसरूपेणसत्यकामंप्रत्युपदेशंचक्रुस्तैरुपदिष्टःसत्यकामोगुरुमेत्य तस्मैसहस्रसं
ख्याकंगोगणंसमर्प्यतैरुक्तंनिवेद्यभगवानित्यनेनविद्योपदेशायगुरुप्रार्थनंकरोतीत्यर्थः ॥ तथोपकोसलेनेति ॥ गुरुणासत्य
कामेनाग्निपरिचर्यायनियुक्तेउपकोसलेबहुकालंतथाकुर्वतिसतिसत्यकामेकदाचित्प्रवासंगतेऽग्नयउपकोसलायविद्योपदेशंच
क्रुः । ततःसत्यकामेआगतेउपकोसलस्तस्मैतदुक्तंनिवेद्योपदेशायप्रार्थ्यतइत्यर्थः । श्रुतिद्वयंक्रमेणव्याचष्टे ॥ यद्यपीत्यादि
ना ॥ भगवद्दृशेभ्योभगवत्समेभ्योऽत्रेत्यनुवादः ॥ यागीयपशुहिंसायामिति ॥ मंत्रादीतिकर्तव्यताशून्यत्वे
यागस्वरूपानिष्पत्तेस्तस्याअपियागहेतुत्वादितिभावः ॥ २७ ॥ यत्प्रसादः यस्यगुरोःप्रसादः अतोगुरुविचारस्यपादां
तर्भावइतिभावः । शुभंज्ञानादिः मंत्रः उपदेशः ॥ प्रागुक्तमिति ॥ इतरेत्वर्थसामान्यादित्यत्रोक्तभाविफलानुसारेण
सर्वज्ञगुरूपदिष्टस्वयोग्यगुणोपासनमित्यर्थः ॥ ॐ पूर्वविकल्पःप्रकरणात्स्यात्क्रियामानसवत् ॐ ॥ पूर्वविक

SGDF
Sri Gargeshwari Digital Foundation

ल्पःपूर्वपरित्यज्यापरःस्वीकार्योनवेतिविकल्पःस्यात् कथं क्रियामानसवत् मानसीचासाक्रियाचक्रियामानसंध्यानंयथा फलतःसमयोर्ध्यानयोर्विकल्पः ततः कुतः स्वीकार्यः प्रकरणात् प्रकर्षेणसामग्र्येणानुग्रहकरणान्निमित्तादित्यर्थः । अकारप्रश्लेषेणार्थांतरमाह ॥ **समग्रानुग्रहकर्नेति** ॥ दोषवचनस्यगुरुमंत्रेत्यादेः इतिदर्शितइत्यन्वयः ॥ ॐ **अतिदेशाच्च** ॐ ॥ पूर्वगुरूणैवगुर्वंतरस्वीकारस्यातिदेशात् उपदेशाच्चेत्यर्थः । श्रेयसइत्यस्यतानित्यनेनान्वयसंभवेपिनचेतनत्वमात्रेणास्मद्विधाः किंतु उपदेशोपयुक्तज्ञानादिगुणेनश्रेयांसइत्यर्थाधिक्यलाभायविभक्तिव्यत्यासेनव्याख्याति ॥ **श्रेयसःश्रेयांसइति** ॥ २८ ॥ उक्तंपादमारभ्य कुतइत्यतःकोऽप्यंतरसद्भावादित्याह ॥ **यथेति** ॥ **भक्तंचेति** ॥ तत्रमोक्षंप्रतिकर्मणःपरंपरयाहेतुत्वस्यसाक्षादमुख्यामृतहेतुत्वस्यचोक्तत्वादितिभावः ॥ ॐ **विद्यैवतुनिर्धारणात्** ॐ ॥ विद्याब्रह्मविषयापरोक्षज्ञानमेवमोक्षहेतुर्नकर्म कुतः निर्धारणात् नान्यइत्यन्यनिषेधेनतस्यैवमोक्षहेतुत्वस्यनिर्धारितत्वादित्यर्थः ॥ **कर्मवचनादपीति** ॥ तत्रत्येवकारस्यायोगव्यवछेदकत्वेनसावकाशत्वादितिभावः ॥ ॐ **दर्शनाच्च** ॐ ॥ भगवदपरोक्षज्ञानाच्चमोक्षोनपरोक्षज्ञानमात्रादित्यर्थः ॥ २९ ॥ **नचैतावतेति** ॥ तथाचनकर्मपक्षपातोयुक्तइतिभावः ॥ **अपहस्तितमिति** ॥ स्मृतेःस्वतःसर्वज्ञभगवत्प्रत्यक्षमूलत्वेनश्रुत्यनपेक्षणादितिभावः ॥ ॐ **श्रुत्यादिबलीयस्त्वाच्चनबाधः** ॐ ॥ ज्ञानस्यमोक्षहेतुत्वोक्तौनबाधः नोक्तस्मृतिबाधः कुतः श्रुत्याबलीयस्त्वात् तथाप्रतिपादकानांश्रुतिलिंगयुक्तिस्मृतीनांबलवत्वादित्यर्थः ॥ **असंभिन्नेति** ॥ अमिश्रेत्यर्थः कृतशब्दार्थउत्पत्तीत्यादि अकृतइत्यस्य नित्यपुरुषार्थेति ॥ **युक्तिमत्वेनेति** ॥ कर्मणोबंधकत्वरूपयुक्तिमत्वेनेत्यर्थः ॥ **अतिशयार्थेति** ॥ नतुमोक्षार्थः येनज्ञानकर्मसमुच्चयसाध्यत्वंमोक्षस्येतिभावः ॥ ३० ॥ **उक्तेति** ॥ द्वितीयपादोक्तभक्तीत्यर्थः ॥ **नचैवमिति** ।

तत्साध्यज्ञानस्यापिगुरुप्रसादेनैवसित्थेरितिभावः ॥ **तदन्वयव्यतिरेकेति** ॥ प्रमितेःप्रमाणफलत्वादितिभावः । द्वेषेणध्यानमात्रसंभवेपिनतस्यज्ञानहेतुत्वमित्यतआह ॥ **स्मर्यतेखल्विति** ॥ चैद्यःशिशुपालः उक्तंविद्यैवनिर्धारणादित्यत्र तथाचचैद्यादीनांद्वेषपूर्वकध्यानेनज्ञानमुत्पन्नमित्यवश्यमंगीकार्यमितिभावः ॥ ॐ **अनुबंधादिभ्यः** ॐ ॥ ब्रह्मज्ञानमनुबंधादिभ्यः भक्त्यादिभ्योभवतीत्यर्थः । प्रसादस्येत्यस्यपूर्वेणचोत्तरेणचसंबंधः ॥ **तद्विनेति** ॥ भक्तिविनाअदरनैरंतर्याभ्यांचित्तवृत्यनुपपत्तेरित्यर्थः ॥ **स्वभावभक्तेति** ॥ पूतनाकंसनरकशिशुपालादिषुद्विधाजीवाःसंतोऽसंतश्चेति दशमतात्पर्योक्तेरितिभावः । अभिधानंसप्तमतात्पर्योक्तं ॥ **अभिव्यक्तिरिति** ॥ विद्यमानस्यपुनर्भावनायोगादितिभावः । तस्मादित्यादेरावृत्तिमत्वाह ॥ **अभिव्यक्तेरिति** ॥ ३१ ॥ **अविशेषितेति** ॥ दर्शनेतारतम्यानुक्तेरितिभावः ॥ **भक्त्येति** ॥ अहंयावान्यश्चास्मितावंतंमांभक्त्यासम्यग्जानाति तदनंतरंसमृत्धेनज्ञानेन मांप्रपद्यतइत्यर्थः । उक्तं यावदधिकारमित्यत्र ॥ ॐ **प्रज्ञांतरपृथक्त्ववद्दृष्टिश्चतदुक्तं** ॐ ॥ प्रज्ञांतरस्यध्यानस्यपृथक्त्ववत्नानात्ववत्दृष्टिर्ज्ञानंचपृथक्नाना तदुक्तं तत्तानतारतम्यमंतर्दृष्टयइतिश्रुतावुक्तमित्यर्थः । ननुभाष्ये उपासनानामध्यानंविवक्षितंतस्यैवापरोक्षज्ञानसाधनत्वात् ध्यानंनज्ञानंकिंतुमानसीक्रिया तथाचप्रज्ञांतरशब्दस्यज्ञानविशेषपरत्वेकथमुपासनापदेनतद्व्याख्यानमित्यतआह ॥ **अविच्छिन्नेति** ॥ तथाचनध्यानंमानसीक्रिया तथात्वेतींद्रियमनोनिष्ठक्रियायाअप्यतींद्रियत्वेनापरोक्षावभासविरोधात् क्रियायारूपरहितत्वेनध्यानेरूपावभासविरोधाच्चेतिभावः । ननुनध्यानस्यपरोक्षज्ञानरूपत्वंवक्तुंयुक्तं तस्यमानसत्वेनापरोक्षत्वात् नैरंतर्यमनोवृत्तेर्ध्यानमित्युच्यतेबुधैरितिस्मृतेःश्रवणदर्शनादिजनितमानसवासनामयस्यवस्तुनोमनसावलोकनंध्यानमित्यंगीकारादितिसुधोक्तेश्च । तस्यलिंग-

AGDF Sri Gargeshwari Digital Foundation

शब्दाजन्यत्वाच्चेतिचेत् सत्यं ध्यानस्यवासनामयमूर्तिविषयकत्वेनापरोक्षरूपत्वेपिपरमात्मस्वरूपविषये अपरोक्षरूपत्वा-
योगेनज्ञातःपरमाणुरित्यादिवदुपनीतभानाभ्युपगमेनोपनायकागमजन्यज्ञानस्यपरोक्षत्वेनध्यानेपिपरोक्षत्वव्यवहारइत्यदो-
षः । नचतस्यभगवद्विषयकत्वमेवनेतिवाच्यं । तथात्वेनैष्फल्यप्रसंगात् ॥ **कर्षकाणामिति** ॥ विषमसाधनवतामपिकृषीव
लानांसमानफलत्वदर्शनादितिभावः । विशेषबलात् विशेषवाक्यबलात् ॥ **हिरण्यगर्भेति** ॥ तस्यापिश्रुत्युक्तंयावत्वंबोध्यं
॥ ३२ ॥ **उक्तेति** ॥ स्थानतोपीत्युक्तसर्वरूपाविशेषेत्यर्थः ॥ ॐ **नसामान्यादप्युपलब्धेर्मृत्युवन्नहिलोकापत्तिः** ॐ ॥
उपलब्धेःसर्वरूपविषयज्ञानस्यसामान्यात् समानत्वात् यत्किंचिज्ज्ञानरूपेणमुक्तिरितिन किंतुरूपविशेषदर्शनेनैव कथंमृत्युवत्
यथामृतित्वसाम्येपिमृतिविशेषादेवमोक्षस्तथारूपांतरज्ञानस्यवैफल्यायोगात् तेनयत्फलंभवतिसैवमुक्तिरित्यतउक्तं ॥ न-
हीति ॥ तत्फलंमहरादिलोकानामापत्तिःप्राप्तिः नहिसामुक्तिरित्यर्थः ॥ **दर्शनेविकल्पादिति** ॥ किंचिन्मूर्तिदर्शनंमुक्ति-
हेतुःकिंचिन्नेतियथाविकल्पः तथाबिंबदर्शनेपिकस्यचिन्मोक्षःकस्यचिन्नेतिविकल्पःस्यादित्यर्थः । अत्रोक्तोबिंबदर्शननि
यमोनसर्वेषां किंतु येबिंबदर्शनयोग्याऋष्यादयस्तेषामेव सर्वेषांबिंबदर्शनायोग्यत्वात् यथोक्तमुपासात्रैविध्यादाश्रि-
तत्वादिति ऋषयोंतःप्रकाशाइतिश्रुतेश्च अन्यथादृष्ट्यैवह्यवताराणामितिप्रागुक्तविरोधात् यत्तुयेषांबहिरुपासनेनमोक्षस्ते-
षामपिहृद्युपसानंकिंचित्कार्यमेवेतिबृहदारण्यकभाष्यं तदप्यवतारादिदृष्टिविशेषार्थमेवांतरूपास्त्यावश्यकत्वपरं अतएव-
दृष्ट्यैवह्यवताराणामित्यत्रांजसेत्युक्तं तथोक्तंकाठकभाष्ये प्रादुर्भावानृतेविष्णुमिंद्रियैर्नैवपश्यति प्रादुर्भावानपियदाज्ञान
दृष्ट्यैवपश्यति तदैवमुच्यतेयोगीति ॥ ३३ ॥ **स्वातंत्र्यनिरासादिति** ॥ भगवत्प्रसादाद्वारकत्वनिरासादित्यर्थः ॥ २८ ॥
॥ **अव्यक्तत्वाभावेति** ॥ भक्तिसामर्थ्येनैवदृष्टत्वादितिभावः ॥ ॐ **परेणचशब्दस्यताद्विध्यंभूयस्त्वात्वनुबं**

SGDF
Sri Gargeshwari Digital Foundation

धः ॐ ॥ ज्ञानंपरेणचपरमात्मनैवभवति नभक्त्या तर्हिभक्तिरेवैतच्छ्रुतेःकागतिरित्यतउक्तं ॥ शब्दस्वताद्विध्यमि-
ति ॥ शब्दस्योक्तश्रुतेस्ताद्विध्यंतुभक्तिहेतुत्वप्रतिपादकत्वं भक्तेःकरणत्वादुपपन्नं । साधनांतरत्यागेनभक्तेरेवोक्तिःकु
तइत्यतउक्तं ॥ भूयस्त्वादनुबंधइति ॥ अनुबंधस्तुभक्तिस्तुकरणेषुभूयस्त्वात्प्रधानत्वादुक्तइत्यर्थः ॥ सैवेत्य
स्यापीति ॥ साधनांतराण्यनुक्त्वाकिंविशिष्यभक्तिरेवकरणत्वेनोच्यतइत्यतः सैवेत्युक्तमितिपूर्वसंगतिरित्यर्थः । त-
थाचसैवमुख्यंनत्वन्यदित्यर्थः ॥ ३४ ॥ अंशिवर्त्मनेति ॥ अंशिमार्गेणगंतृत्वादित्यर्थः । अन्यथा अभेदे
॥ ॐ एकआत्मनःशरीरेभावात् ॐ ॥ अंशोर्जुनः अंशिनेंद्रेणैकः अभिन्नएव कुतः आत्मनोंशिनःकर्मनिर्मितेशरीरे आ
त्मनोंशस्यभावात्सत्वादित्यर्थः ॥ अकृतेति ॥ अंशस्याकृतकर्मभोगापत्तिरंशनःकृतकर्मनाशादित्यर्थः । ननुनांशि
कर्मनिर्मितेशरीरेंशोस्ति किंतु स्वकर्मनिर्मितएवेत्यतआह ॥ नचांशस्येति ॥ एतच्छरीरसंबधात्पूर्वमर्जुनस्येंद्रशरीरं
विनाकर्मापादकशरीरांतराभावादितिभावः । तर्हिमास्तुकर्मेत्याह ॥ नचेति ॥ अपवर्गेति ॥ शरीरसंसर्गस्यक-
र्मनिर्मितत्वेयावत्कर्मनाशेनसर्वथाबंधध्वंसरूपोमोक्षउपपद्यते कर्मानियतत्वेचतस्यानागंतुकत्वेनकदाप्यनपायादुक्तमोक्षा-
भावप्रसंगइत्यर्थः ॥ ॐ व्यतिरेकस्तद्भावभावित्वान्नतूपलब्धिवत् ॐ ॥ उपलब्धिवत् ज्ञानभेदवत् अंशा
शिनोरपिव्यतिरेकोभेदोनतुनैव कुतः तद्भावभावित्वात् तस्यांशिनोभावेनोपासनेनांशस्यभावित्वात्तत्फलभोक्तृत्वा
दित्यर्थः । इतश्चनभेदइत्यतआह ॥ अंशगतज्ञानादेरिति ॥ सर्वस्येत्यर्थः अभेदेंशस्यांशिगतसर्वाननुसंधानंकथमि
त्यतआह ॥ अंशिगतस्येति ॥ ३५ ॥ उक्तेतियावदधिकारमित्यत्रेत्यर्थः ॥ ॐ अंगावबत्धास्तुनशाखासु
हिप्रतिवेदं ॐ ॥ अंगावबत्धाअंगैरप्रधानैर्ब्रह्मादिभिरवबत्धाःसंबधास्तद्विषयाइतियावत् । उपास्त्यादयःकार्याएव उ

CC-0. SGDF
Sri Gargeshwari Digital Foundation

पसंहारेचतुविशेषोस्ति सकः प्रतिवेदंयाःशाखाःतासूक्तमुत्तमगुणजातंनीचेनोपासनंकर्तव्यमित्यर्थः । वेदसिद्धांतेवेदादिशास्त्रे ॥ ॐ मंत्रादिवद्वाविरोधःॐ ॥ नीचगुणानामुत्तमैरूपसंहारेऽविरोधः कथंमंत्रादिवत् । यथामंत्रादेःसूक्तादेरधमपरस्योत्तमविषयत्वेऽध्ययनंतथेत्यर्थः ॥ तेषुतद्गुणत्वादिति ॥ उत्तमानांनीचगुणत्वादित्यर्थः । उत्तमानांतत्प्रतिपाद्यत्वादित्यत्रऋग्भाष्यसम्मतिमाह ॥ उक्तंचेति ॥ स्वयंसाक्षाद्देवता तत्रनारायणे अत्रश्रियांविशेषेणैवलिंगेनदेवताज्ञेयाइत्यर्थः । ननूपसंहृतिस्तुफलातिशयार्थंसर्वैःकार्याभवेत् अन्यथानत्वितियोजनायामुपासकानांमध्येयेफलार्थिनस्तएवपुरुषविशेषालब्धाःपुनःकिमुच्यतेपुरुषाणांविशेषादितितत्राह ॥ पुरुषविशेषइति ॥ नन्वेवंसत्युत्तमाधिकारिभिःकर्तव्यान्यैर्नकर्तव्येतिविकल्पार्थप्राप्त्यान्येषांसर्वात्मनोपसंहारानिषेधःस्यात् तथाचफलातिशयार्थंसर्वैरुपास्तिःकर्तव्येति प्रागुक्तविरोधःस्यादित्यतआह ॥ फलविशेषस्तेषामेवेति ॥ तथाचोपसंहृतिरित्युत्तरार्धेसर्वैःकार्येत्यस्यानुवृत्तिर्नास्तीतिभावः । ननूपसंहृतिःफलातिशयार्थंकर्तव्या अन्यथाफलाभावेनकर्तव्येतिपुरुषविशेषैरुत्तमाधिकारिभिःकर्तव्या अन्यैर्नकर्तव्याइतिचपक्षद्वयाभावात्कथंपुरुषाणांविशेषाद्वेत्युक्तविकल्पइत्यतआह ॥ उपासकप्रतिपत्ताविति ॥ पुरुषविशेषादित्यनेनोत्तमाधिकारिरूपोपासकप्रतिपत्तौ तैरुत्तमाधिकारिभिःफलातिशयापेक्षयाकर्तव्या अन्यथानकर्तव्येत्युपसंहृतिरूपसाधनएवायंविकल्पोनतुपुरुषविशेषैकर्तव्योन्यैर्नकर्तव्यइत्युपासकेषुविकल्पउच्यतइत्यर्थः ॥ ३६ ॥ अन्यथेति ॥ पूर्णत्वस्यानुपास्यत्वे आनंदादीनामपूर्णत्वेनोपासनाप्राप्तौलौकिकतयोपासनप्रसंगादित्यर्थः । तथाचकार्याख्यानादपूर्वमित्युक्तालौकिकत्वानुपपत्तिरितिभावः । ततःकिमित्यतआह ॥ सर्वोपास्योनेति ॥ संभृत्याद्यविशेषेपिकुतोनसर्वोपास्यत्वमतआह ॥ वैय्यर्थ्यादिति ॥ तदेवव्यनक्ति ॥ आनंदादिकंहीति ॥ ननुभूमत्व

स्यापीष्टत्वेनतदुपासनमपिसार्थकमेवेत्यतआह ॥ नहीति ॥ ॐ भूम्न.क्रतुवज्जायस्त्वंतथाचदर्शयतिॐ ॥ भूम्नःभूमगुणस्य सर्वगुणेषुजायस्त्वं प्राधान्यं कथंक्रतुवत् यथादीक्षाद्यंगकलापस्यविश्वजिदादिसर्वयागेष्वनुवृत्तावेवतद्योग्यानुष्ठानफलहेतुत्वेनप्राधान्यं तथा तद्वद्भूमगुणस्यसर्वगुणानुवृत्तत्वेनफलहेतुत्वं कुतइत्यतउक्तं ॥ तथाचदर्शयतीति ॥ चयस्माद्भूमैवदेवइतिश्रुतिःतथा उक्तार्थंदर्शयत्यतइत्यर्थः । यद्यपिक्रतुशब्दोदीक्षाद्यंगविशिष्टयागवाचकत्वेनमीमांसकप्रकरणसिद्धः तथाप्यत्रतदंगकलापमात्रपरोग्राह्यः सहभावेन तद्विशेषणत्वेन ॥ ३७ ॥ उक्तेति यावदधिकारमित्युक्तफलतारम्यामित्यर्थः ॥ भूमत्वइति ॥ नहिविभूनांदेशतःपूर्णत्वेविशेषोस्तीतिभावः सत्यपिविशेषेऽनुपपत्तिमाह ॥ नहीति ॥ ॥ मिथ्येति ॥ भगवदानंदेकिंचित्पूर्णत्वाभावादितिभावः ॥ ॐ नानाशब्दादिभेदात् ॐ ॥ भूमत्वंनाना तारतम्येनैवप्रतीयते कुतः शब्दादिप्रमाणानांभेदात् तारतम्येनज्ञानजनकत्वस्वाभाव्यादित्यर्थः । ननुप्रत्यक्षस्यसर्वप्रमाणोपजीव्यत्वेनप्राधान्यात्सूत्रेप्रत्यक्षादीतिवक्तव्यं । यदितन्मुख्यंज्ञानशब्दयोरित्युक्तरीत्याकरणेषुशब्दस्यप्राधान्याच्चदादित्वेनग्रहणं तर्हिस्मृतौशब्दानंतरंप्रत्यक्षमनुक्त्वानुमानग्रहणंकिंनिमित्तमित्यतआह ॥ तत्वनिर्णयइति ॥ ननुप्रमाणान्यप्यविद्यमानार्थंकथंदर्शयेयुरित्याशंक्यपरिहरति ॥ नचेति ॥ अतीतेति ॥ वर्षापेक्षयावासराणांबहुत्वादितिभावः ॥ अत्रापीति ॥ घटकूपादीनांजलपूर्णत्वेविशेषदर्शनादितिभावः । ननूक्तमत्रमिथ्योपासनप्रसंगइतितत्राह ॥ अन्यनिषेधादिति ॥ एतावदेवनाधिकमित्यनिषेधादितिभावः ॥ ३८ ॥ अबिंबोपासनस्येति ॥ बिंबातिरिक्तरूपोपासनस्येत्यर्थः ॥ तापनीयेति ॥ तस्यान्यरूपोपास्तिप्रतिपादकत्वादितिभावः ॥ अन्यथेति ॥ अबिंबोपासनस्यमोक्षहेतुत्वे नसामान्यादप्युपलब्धेर्मृत्युरित्यत्रोक्तबिंबातिरिक्तदर्शनस्यमोक्षसाधनत्वंनास्तीत्येतद्व्याहन्येत्ये

SGDF Sri Gargeshwari Digital Foundation

त्यर्थः ॥ मुमुक्षुत्वादिति ॥ तथाचमोक्षेतरफलेविरक्तस्यफलांतरापेक्षयातत्करणमितिभावः ॥ विघ्नायेति ॥ अविंबोपासनंभवतीतिशेषः ॥ ॐ विकल्पोविशिष्टफलत्वात् ॐ ॥ अविंबोपासनस्यविकल्पोविविधकल्पोऽनियमइतियावत् कुतःविशिष्टफलत्वात् विलक्षणफलकत्वादित्यर्थः ॥ उक्तदोषद्वयेति ॥ उक्तहेतुद्वयेनक्रमेणविघ्नकारित्वमुमुक्षुत्वनपेक्षितत्वयोर्निरासादितिभावः । नृसिंहादितोन्यदितिभ्रमंनिवारयति ॥ नृसिंहादिकमिति ॥ तथाचयोग्योपासनादन्यनृसिंहादिकमित्यन्वयइतिभावः ॥ ३९ ॥ अनुपपत्तीति ॥ रागविरागयोर्विरोधादितिभावः ॥ तेनचेति ॥ आचार्यायदत्तधनेनेत्यर्थः ॥ ॐ काम्यास्तुयथाकामंसमुच्चियेरन्नवापूर्वहेत्वभावात् ॐ ॥ काम्याधनादिसाधनेशगुणास्तुयथाकामंवित्तादीछानुसारेणसमुच्चियेरन्नुपसंहार्याः मुमुक्षुभिर्नवा कुतः पूर्वहेत्वभावात् मोक्षेछातःपूर्वंविद्यमानोयोहेतुःवित्तादिकामाख्यःतेषांतदभावादित्यर्थः । ननुकाम्याख्यहेत्वभावेपिनृसिंहाद्युपासनस्यफलांतरार्थंक्रियमाणत्वेनव्यभिचारइत्यतआह ॥ प्रबलेति ॥ दुरितादिप्रतिबंधकविलक्षणप्रबलहेत्वभावादित्यर्थः । नन्वर्थादेर्ज्ञानहेतुत्वस्यैवकाम्योपासनेप्रबलहेतुत्वात्कथंप्रबलहेत्वभावइत्यतआह ॥ नहीति ॥ तथाचान्वयव्यतिरेकव्यभिचाराभ्यतस्यज्ञानहेतुत्वमितिभावः। स्मृतौयस्ययस्यतस्यतस्येतियत्तच्छब्दसंबंधप्रतीतिं निवारयन् तांयथावद्व्याचष्टे ॥ यस्ययस्येत्यादिना ॥ मुमुक्षूणांनवेत्युत्तरवाक्यानुरोधेनामुमुक्षुभिरित्यध्याहारः ॥४०॥ तद्विद्याचक्षोःसूर्योऽजायतेत्यादिका ॥ उक्तव्याघातादिति ॥ आनंदादयःप्रधानस्येतिसर्वैश्चतुर्गुणमात्रस्योपास्यत्वोक्त्यातद्विरोधादित्यर्थः ॥ चोदनाद्याविशेषादिति ॥ तत्रस्वाध्यायोध्येतव्यइत्यत्राधिकारिविशेषकल्पकाभावेनैवविशेषाधिकारिकत्वाभावस्योक्तत्वादितिभावः ॥ ॐ अंगेषुयथाश्रयभावः ॐ ॥ अंगेषु भगवदवयवेषु सूर्यादीनामाश्र

SGDF Sri Gargeshwari Digital Foundation

यभावः आश्रयत्वंयथोक्तं तथोपासनेकार्यमित्यर्थः । ननुचक्षोःसूर्योअजायतेतिश्रुतौ सूर्यादीनांभगवच्चक्षुरादिजन्यत्वमेवोच्यते नतुचक्षुराद्याश्रयत्वं अतः कथंचक्षोःसूर्योअजायतेत्यादिनापरमेश्वरांगाश्रयत्वमुक्तमित्यतआह ॥ यत्रेति ॥ ॐ शिष्टेश्च ॐ ॥ यस्मिन्निति श्रुतावंगदेवतोपासनाकर्तव्यस्यसिष्टेः विधानाच्च तत्कार्यमित्यर्थः ॥ ॐ समाहाराच्च ॐ ॥ अंगैःपराद्येहीतिश्रुतौतादृशगुणानांसमाहारात् उपसंहारफलवचनाद्देवाधिकारिकत्वनिश्चयइत्यर्थः ॥ मधुविद्यायामेवेति ॥ असौवा आदित्योदेवमधित्यादिमधुविद्यायां वसूनामेवैकोभूत्वेत्याद्युक्तफलपर्यालोचनया वस्वादिपदयोग्यानां तदर्थिनामेव अधिकारित्वकल्पनवदित्यर्थः ॥ ध्यायेदिति ॥ परस्यांगेष्वंगदेवताध्यायेत्थियस्मात्तेनमुक्तौदेवानांविशिष्टतदंगाश्रितत्वादयोऽसाधारणगुणाभवंतीत्यर्थः । नन्वत्रफलविशेषस्यैवाधिकारिविशेषकल्पकत्वेनाविवक्षितत्वात्फलश्रुतेरित्येवसूत्रभाष्ययोर्वक्तव्यं । तत्कथंसमाहारग्रहणमित्यतआह ॥ अत्रेति ॥ अस्यैवचोपपत्तेरूष्मेतिसूत्रेयथोष्मेत्यस्योष्मपदोपेतश्रुतिसूचकत्वंतथेत्यर्थः ॥ ॐ गुणसाधारण्यश्रुतेश्च ॐ ॥ भगवद्गुणानांसाधारण्यस्योपास्यत्वेनसाम्यस्यसर्वगुणानामुपास्यत्वस्येतियावत् श्रुतेःसाधारण्यादित्यत्रश्रवणादित्यर्थः ॥ ४१ ॥ ननूपासनंनकर्तव्यमितिपूर्वपक्षिते कथंनवेत्यकर्तव्यताप्रतिपादकसूत्रेणसिद्धांतइत्यतउक्तं॥गूढाभिसंधिनेति॥उत्तमाधिकारिव्यतिरिक्तैरित्यधिकारिविशेषनिर्देशाभावादभिसंधेर्गूढत्वमितिज्ञातव्यं॥ॐनचातत्सहभावश्रुतेःॐ॥ अंगाश्रितदेवोपासनं नवाकार्यं कुतः अतत्सहभावश्रुतेः तेनसर्वशाखागतोपासनेन सहभावस्य सहत्वस्य श्रुतेरश्रवणादित्यर्थः । आशयमुत्थापयति ॥अयमभिसंधिरिति॥ॐदर्शनाच्चॐ॥सत्योज्ञानइतिश्रुतौदेवैस्तथोपासनंकार्यनान्यैरित्यस्यदर्शनाच्चैवमित्यर्थः ॥४२॥

इतिश्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यांशर्कराश्रीनिवासविरचितायांतृतीयाध्यायस्यतृतीयःपादः॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीवेदव्यासायनमः ॥ उक्तमिति ॥ विद्यैवतुनिर्धारणादित्यत्रेत्यर्थः ॥ सामर्थ्यमिति ॥ स्वर्गापवर्गाद्यशेषपुरुषार्थसाधनत्वादिरूपमित्यर्थः । तथाचकारणनिरूपणानंतरंकार्यनिरूपणादनंतरसंगतिरितिभावः ॥ निरवधारणेति ॥ विद्यैवतुनिर्धारणादित्यत्रज्ञानस्यैवमुक्तिसाधनत्वोक्तावपिमुक्तिमात्रसाधनत्वस्यानुक्तत्वादितिभावः ॥ नस्यादिति ॥ पुरुषैरर्थ्यस्यैवपुरुषार्थत्वादितिभावः ॥ ॐ पुरुषार्थोतःशब्दादितिबादरायणः ॐ ॥ पुरुषार्थः पुरुषैरर्थ्यः अपेक्ष्यः सर्वोपि अतः ज्ञानादेवभवति कुतः शब्दात् यंयंलोकमितिश्रुतेरितिबादरायणाचार्योमन्यतइत्यर्थः ॥ सौभरीति ॥ तेनयुगपत्पंचाशद्देहग्रहणेनतावत्संख्याकस्त्रीभिःक्रीडनादितिभावः ॥ कर्दमेति ॥ ॐ शेषत्वात्पुरुषार्थवादोयथान्येष्वितिजैमिनिः ॐ ॥ पुरुषार्थवादःज्ञानादेवाशेषपुरुषार्थोभवतीत्युक्तिः शेषत्वात् ज्ञानस्यकर्मोपकारकत्वात् कथं यथान्येषुधनादिषुकर्मोपकारकत्वेनपुरुषार्थवादस्तथेति जैमिनिराचार्योमन्यतइत्यर्थः ॥ प्राधान्यदर्शनादिति ॥ ज्ञानादेवस्वर्गइतिनिर्देशबलादितिभावः । ननुधनादेर्यज्ञादिकर्मजनकत्वेनभवतुतच्छेषत्वंनज्ञानस्याज्ञानिनामपियज्ञादिदर्शनेनकर्मणस्तदजन्यत्वादित्यतआह ॥ अत्रज्ञानस्येति ॥ स्वरूपोपकारकस्येवफलोपकारकस्यापिप्रयाजादेःशेषत्वदर्शनादितिभावः ॥ ॐ आचारदर्शनाच्च ॐ ॥ यज्ञेनेतिश्रुतौदेवानामाचारस्यकर्मानुष्ठानदर्शनाच्च ज्ञानस्यकर्मशेषत्वमित्यर्थः ॥ ॐ तच्छ्रुतेः ॐ ॥ तस्यकर्मप्रतिज्ञानशेषत्वस्यश्रुतेर्यदेवेतिश्रवणात्तस्यतच्छेषत्वमेवेत्यर्थः ॥ ॐ सन्वारंभणात् ॐ ॥ कर्मैवदेहमितिश्रुतौदेहादेः सर्वस्यकर्मणैवसं प्राधान्येन अन्वारंभणादुत्पादनोक्तेः कर्मणएवप्राधान्यमित्यर्थः ॥ सिद्धमिति ॥ तेनकर्मणोज्ञानशेषतयापुरुषार्थहेतुत्वांगीकारादितिभावः ॥ फलाभावादिति ॥ तथाचनतत्रातिशयाधायकत्वमितिभावः ॥ ॐ तद्वतोविधानात् ॐ ॥ ज्ञानीचेतिश्रुतौ तद्वतः ज्ञानवतः कर्मविधाना-

नलीलात्वमित्यर्थः ॥ ॐ नियमाच्च ॐ ॥ कुर्वन्नेवेतिश्रुतौज्ञानिनोपिकर्मणोनियमात् नियमकथनात् अकरणेप्रत्यवायप्राप्तेरितियावत् नलीलामात्रत्वमित्यर्थः ॥ नलिप्यतइतिनास्तीति ॥ लिप्यतएवेत्यर्थः । इदंनचिकेतसंप्रतियमवाक्यं नचैवंतदधिगमउत्तरपूर्वार्धयोरश्लेषविनाशौइतिज्ञानिनःकर्माश्लेषस्यवक्ष्यमाणत्वात्तद्विरोधइतिवाच्यं । भिन्नविषयत्वात् अत्रनरइतिमनुष्याद्युक्तेः वक्ष्यतिचैतत्स्पष्टंचतुर्थाधिकरणे ॥ ॐ अधिकोपदेशात्तुबादरायणस्यैवंतद्दर्शनात् ॐ ॥ बादरायणस्यमतमेवंप्राधान्येनज्ञानस्यपुरुषार्थहेतुत्वं नचैवमाचारादिवैय्यर्थ्यं कुतः अधिकोपदेशात् ज्ञानार्जितेफलेऽधिकस्यकर्माधीनातिशयस्ययथायथेतिश्रुत्युक्तत्वात् युधिष्ठिरादेर्दर्शनात् तादृशातिशयोपलंभाच्चेत्यर्थः ॥ किंनस्यादिति ॥ फलोपकारापेक्षयास्वरूपोपकारस्यजायस्त्वादितिभावः ॥ ॐ तुल्यंतुदर्शनं ॐ ॥ कर्मकृतावकृतौचज्ञानिनांदर्शनंज्ञानंतुल्यंसमंवेत्यर्थः ॥ ज्ञानेविशेषःस्यादिति ॥ नचास्तिज्ञानेविशेषइतिभावः । कुतोनास्तीत्यतआह ॥ एत्तच्चेति ॥ कामकारेणचैकइत्यत्रेत्यर्थः ॥ प्रामाण्येति ॥ मुनिमतस्यतद्विरोधादितिभावः ॥ अनेनेति ॥ भगवन्मतमुनिमतयोरविरोधप्रतिपादकस्मृतिविरोधेनेत्यर्थः । मोक्षहेतुत्वेवैचित्र्याभावादाह ॥ विषयांतरइति ॥ ॥ अतःकथमिति ॥ आकाशेनागप्रवेशवन्मुनिमतानांविलक्षणेव्यासमतेप्रवेशायोगादितिभावः ॥ निखिलमिति ॥ तथाचनोक्तमतविशेषेऽन्यमतप्रवेशउच्यते । किंतुबुद्धिस्थेसामान्यमतएवेतिभावः । नन्वाकाशस्यदर्शनाभावात्कथमनंताकाशवत्पश्यन्नित्युक्तमित्यतआह ॥ आनंताकाशवदिति ॥ व्यत्यासः व्यतिरेकः प्रसिद्धोन्वयः अभूतोयथागगनं गगनाकारमित्यादि ॥ तदन्यविषयमिति ॥ कर्मसाध्येसर्वत्रदृष्टफलेज्ञानस्यशेषत्वमितिमतं । अदृष्टमेवेत्युक्तमुनिमतेहि दृष्टेर्ज्ञानस्योपयोगोनास्त्येव दृष्टफलमात्रेज्ञानस्यकर्मशेषतयाउपयोगोस्तीत्यभिमतं । स्वर्गादयःकर्मणैवेत्युक्तमुनिमतेतुस्व-

NMDF Foundation

गादौनश्वरफलेज्ञानस्योपयोगोनास्त्येवेत्यभिमतं । अत्राद्यं मनुष्योत्तमविषयं उत्तरद्वयंतु मध्यमाधममनुष्यविषयं । यथोक्तंसुधायां । मानुषाअप्युत्तममध्यमाधमभेदभिन्नायथायोग्यंविचित्रमतविषयाभवंत्येवेति अतएवभिन्नविषयत्वादे वगतिरुक्तेति अधिकोपदेशादित्यनेनेत्यर्थः ॥ प्रतिबंधकेति ॥ तैरपिकर्मकृत्वैवप्रतिबंधकस्यनिरसनीयत्वादिति भावः ॥ १ ॥ सर्वेषुविशेषत्रयंक्रमेणोपपादयति ॥ तत्रेत्यादिना ॥ पुरुषार्थत्वात्पुरुषैरर्थ्यत्वात् एवंचएवमपि ननुभाष्येलाघवायाधिकारइतिवक्तव्ये अधिकारितेतिकिमर्थमुक्तमित्यतआह ॥ वक्ष्यमाणेति ॥ ॐ असार्वत्रिकीॐ ॥ ज्ञानाधिकारिता असार्वत्रिकीनसर्वजननिष्ठेत्यर्थः ॥ ॐ विभागःशतवत् ॐ ॥ ज्ञानाधिकारःकेषांचिदस्तिकेषांचि न्नास्तीतिविभागः व्यवस्थाशतवत् यथाद्व्यधिकशतदेवानांसोमपानाधिकारोनान्येषामितिव्यवस्थातथेत्यर्थः ॥ ॐ अध्य यनमात्रवतः ॐ ॥ मात्रशब्दःकार्त्स्न्ये कार्त्स्न्याध्ययनवतोधिकारितेत्यर्थः ॥ अर्धसिद्धमिति ॥ तत्रसतांमतइत्ये वोक्तं नतुवेदोक्तब्रह्मज्ञानार्थमध्ययनंकर्तव्यमितिविधिरस्तीतिभावः ॥ २ ॥ संपूर्णस्य उत्तमस्य अवचस्यनीचस्येत्यर्थः ॥ ॐ नाविशेषात् ॐ ॥ अविशेषाद्विशेषतारतम्यंविनाज्ञानाधिकारितान कुतः अविशेषात् ज्ञानस्याप्यविशेषप्रसंगा दित्यर्थः ॥ ३ ॥ तुल्यंत्विति ॥ तत्रकर्मकरणाकरणयोर्ज्ञानस्यतुल्यत्वोक्तिरित्यर्थः । आद्यब्राह्मणशब्दार्थोब्रह्मप्राप्ति योग्यइति पांडित्यमित्यस्यागमजन्यज्ञानमिति निर्विद्येत्यस्यलब्धेति विदृलृलाभइतिधातोः बाल्यमित्यस्ययुक्ति जज्ञानमिति तिष्ठासेदित्यापादयेदिति मुनिरित्यस्य ध्यानीभवतीति अमौनशब्दार्थः अपरोक्षज्ञानमिति ब्राह्मण शब्दार्थोजीवन्मुक्तइति ईदृशः विशिष्टः तदेवव्यनक्ति ॥ नहीत्यादिना ॥ मोक्षश्चज्ञानिनांनिश्चितएवेतिभावः । ननुनमोक्षातिरिक्तातिशायितफलार्थंसत्प्रवृत्तिःकिंतुमोक्षार्थमेव सत्यवृत्यभावेज्ञानेनमोक्षस्यैवाजननादित्यतआह ॥ म-

SGDF Sri Gargeshwari Digital Foundation

चसमुच्चयेति ॥ विद्यैवतुनिर्धारणादित्यत्रसमुच्चयवादस्यदूषितत्वादितिभावः ॥ नापीति ॥ तथात्वेऽनियमःसर्वेषा
मित्युक्तज्ञानिनांमोक्षानियमविरोधइतिभावः ॥ आद्याधिकरणोक्तमिति ॥ ज्ञानस्यसर्वपुरुषार्थसाधनत्वरूपमाहा-
त्म्यमित्यर्थः ॥ ॐ स्तुतयेनुमतिर्वा ॐ ॥ सब्राह्मणइतिश्रुत्युक्तंयथेष्टाचरणंस्तुतयेज्ञानिस्तुत्यर्थं अनुमतिरनुज्ञामात्रं
वा नविधिरित्यर्थः उत्तरमाह ॥ यथेति ॥ ॐ कामकारेणचैके ॐ ॥ ज्ञानिनःकामकारेणयथेष्टाचारेणापिमोक्षमेके
शाखिनःकामकाराइतिपठंतीत्यर्थः ॥ ॐ उपमर्दंच ॐ ॥ ज्ञानेनकिंचिद्भुक्तस्यप्रारब्धकर्मणउपमर्दंफलह्रासंचैकेपठं-
तीत्यर्थः ॥ नवैजनइति ॥ हेअंग मुकुंदसेव्यपरोक्षज्ञानीजनोऽन्यवदज्ञानिवत् संसृतिंप्रारब्धकर्मफलरूपांजातुकदाचि
त्कथंचनकेनापिप्रकारेणनाव्रजेदित्यर्थः । ननुश्रवणादेरेवापरोक्षज्ञानसाधनत्वेनकथमुच्चार्याभिप्रस्येदित्युक्तमत्राह ॥ श्रव-
णाद्युपलक्षणमिति ॥ ननुव्यासिदर्शिदेवादिसर्वाषरोक्षज्ञानिनांप्रारब्धस्योपमर्दोस्त्येवतत्कथमंतरिममित्येवोक्तिरित्यत
आह ॥ अंतरिति ॥ हृदयस्येतिशेषोक्तिः ॥ ॐ ऊर्ध्वरेतःसुचशब्देहि ॐ ॥ शब्देयइममितिश्रुतौ ऊर्ध्वरेतस्सुवै
रांग्यादिगुणवत्स्वेवज्ञानोपदेशोहियस्माद्विहितस्तस्मात्कामचारेणनज्ञानप्राप्तिरित्यर्थः । ननुयइममितिश्रुतावर्थात्कामचा
राणांश्रवणादिपरोक्षज्ञानाधिकाराभावोलभ्यते । तत्कथमपरोक्षज्ञाने तेषामधिकाराभावप्रतिपादनायेयंश्रुतिरुक्तेत्यत-
आह ॥ अपरोक्षज्ञानस्येति ॥ श्रवणादिरूपपरोक्षज्ञानेतेषामधिकाराभावेसुतरांतज्जन्यापरोक्षज्ञानेधिकारो-
नास्तीतिभावः ॥ ॐ परामर्शंजैमिनिरचोदनाचापवदितिहि ॐ ॥ केनस्यादितिश्रुतिः प्रातरुत्थायेत्यादिश्रुत्यु-
क्तसदाचारस्यपरामर्शंकृत्वातत्रस्वेच्छयावर्तनंप्रतिपादयति नत्वसदाचारविषया कुतःहियस्मादचोदनानिषिद्धंकार्यमितिवि
धिर्नास्ति प्रत्युतब्राह्मणोनहंतव्यश्रुतिरपवदतिनिषेधतीत्यर्थः । पूर्वपक्ष्युक्तमर्थंनिराकरोति ॥ नायमिति ॥ स्तुतयइत्ये

PDF
Sri Gargeshwari Digital Foundation

नोक्तिनिराकरोति ॥ **नाप्ययमिति** ॥ ॐ **अनुष्ठेयंबादरायणःसाम्यश्रुते.** ॐ ॥ बादरायणोनुष्ठेयमवश्यंकर्तव्यमे वनियमेनकर्तव्यमित्यनुज्ञानंकामचारश्रुत्यर्थमन्यते कुतःसाम्यश्रुतेः केनापिप्रकारेणवृत्तावपीदृशएवेतिसामान्योक्तिरित्यर्थः । अत्रकेनस्यादितिश्रुतावयोगइति विहितस्यैवनियमेनकर्तव्यत्वादितिभावः । ब्राह्मणोनहंतव्यइत्येतदज्ञानमात्रविषयंकिं-नस्यादित्यतआह ॥ **अयंचेति** ॥ यथेष्टाचारविधिर्नभवतीतिपूर्वपक्ष्युक्तनिषेधः नापिसर्वस्येति जैमिनि-मतनिषेधइतिज्ञेयं ॥ **प्राप्तिसद्भावादिति** ॥ केनस्यादितिवाक्यस्यानुष्ठेयानांमध्येकेषांचित्करणंकेषांचिदकरणमित्यर्थत्वेन विहितेषुकिंचिदकरणनिमित्तकसाम्यसंभवस्यप्राप्तिसद्भावात्तेनेदृशएवेतिसाम्योक्तिः प्राप्तासंभवनिवर्तकत्वेनसम्यक्संबध्य तइत्यर्थः ॥ **सर्वाचरणेति** ॥ केनस्यादितिवाक्यस्यकामतःश्रुत्युक्तसर्वाचरणार्थत्वेतुसर्वकरणस्यचसाम्यसंभावकत्वेनतेनेद शएवेतिवाक्येनयदिसर्वंकुर्यात्तर्हिसमइतिसाम्यसंभवमात्रज्ञापनंकृतंस्यादित्यर्थः । पक्षद्वयेपिसाम्योक्तेःसप्रयोजनत्वात्को विशेषउक्तपक्षपरिग्रहइत्यतआह ॥ **संभवेति** ॥ **अर्थद्वयमिति** ॥ सर्वसदाचारस्येछयाकर्तव्यत्वविधिरूपंसदसदाचारानु-ज्ञामात्ररूपंचेत्यर्थद्वयमित्यर्थः ॥ ॐ **विधिर्वाधारणवत्** ॐ ॥ केनस्यादितिज्ञानिनःकामचारविधिर्वास्तुतर्ह्यज्ञस्याप्ये वंस्यादित्यतउक्तं ॥ **धारणवदिति** ॥ यथावेदधारणंत्रैवर्णिकानामेवविहितंतथाकामचारोज्ञानिनामेवविहितइत्यर्थः ॥ **यथे ष्टाचारविधिरिति** ॥ तेनसदाचारविधिमज्जैमिनिमतभेदइतिभावः । इत्यन्वयः इतिवक्ष्यमाणेनान्वयः भाष्येविधिर्वाना न्येषामितिवेतिपक्षद्वयउक्तरितिप्रतीतिनिरासायाह ॥ **उक्तस्यैवेति** ॥ विधिर्वेत्यंतेनोक्तस्यैवयथादेवेत्यादिनाविवृत्त त्वादित्यर्थः । स्मृतौब्रह्मणइत्येवोक्तत्वात्कथंभाष्येज्ञानिनामित्युक्तिरित्यतआह ॥ **अत्रेति** ॥ कुतइत्यतआह ॥ **वि षयभागस्येति** ॥ यद्येतत्स्मृत्यनुसारेणैतत्सूत्रंचतुर्मुखविषयमितिनिर्णीयते । तर्हिपारिप्लवार्थाइतिशंकायाःएतद्विषय-

त्वासंभवेनविशेषितत्वादितितत्सिद्धांतसूत्रांशेनब्रह्मैवस्वेछानियतइतिविषयविभागकथनंव्यर्थस्यादितिभावः । चोदनाय तइतिशेषइति यथेष्टंकुर्वितिविष्णुविहितकर्मकरणस्याधर्मत्वशंकाविषयत्वादितिभावः ॥ ॐ **स्तुतिमात्रमुपादाना-दितिचेन्नापूर्वत्वात्** ॐ ॥ केनस्यादितिस्तुतिमात्रंनविधिः कुतःज्ञानिभिरपिसंध्यामुपासीतेत्यादिसामान्यविधे-रुपादानात्स्वीकारइतिचेन्न तथात्वेतेषांसर्वविध्यतिदूरत्वेन प्रकारेणस्तुत्यत्वप्रसंगात् नचैतद्युक्तं तेषामपूर्वत्वात् अः विष्णुःपूर्वःप्रेरकोयेषांतेअपूर्वाःतेषांभावस्तत्वंतस्माद्भगवदधीनत्वादित्यर्थः ॥ ॐ **भावशब्दाच्च** ॐ ॥ विधिर्भावेप्र जापतेरितिश्रुतौइच्छापरपर्यायभावशब्दप्रयोगाच्च केनस्यादितिस्वेछाचारविधिरित्यर्थः ॥ **अर्थसिद्धत्वादिति** ॥ सामान्यविध्यविषयस्यापूर्वत्वादित्यनेनार्थसिद्धत्वादित्यर्थः ॥ ॐ **पारिप्लवार्थाइतिचेन्नविशेषितत्वात्** ॐ ॥ उ क्तरीत्यार्थत्रयवत्त्वेकेनस्यादित्यादिश्रुतयःपारिप्लवार्थाः अव्यवस्थितार्थाःस्युरितिचेन्न विशेषितत्वात् ज्ञानिनामनेकप्रकारा दित्यर्थः ॥ **वस्तुनीति** ॥ केनस्यादितिवाक्यार्थेनानारूपत्वासंभवादित्यर्थः ॥ ॐ **तथाचैकवाक्योपबंधात्** ॐ ॥ तथाचज्ञानिनांत्रैविध्येसतिविधिवाक्यानांस्वेछावृत्तिवाक्यानांचैकवाक्यतयाविरुद्धार्थप्रतिपादकत्वोपबंधात्केनस्यादित्य स्याप्यविरुद्धार्थत्रयवत्वमित्यर्थः ॥ **उक्तमिति** ॥ अपूर्वत्वादित्यनेनभगवदधीनत्वेनसर्वविध्यतिदूरत्वाभावकथनमित्यर्थः ॥ **प्रायस्तेषामिति** ॥ तथाचनतेषांविध्यभावप्राप्तिरितिभावः ॥ **अनुज्ञामात्रत्वाच्चेति** ॥ तथाचविधिविषयत्वा-भावेपिस्तुतिमात्रविषयत्वाभावेनपरब्रह्मसाम्याभावादपूर्वत्वादित्युक्तंयुक्तमितिभावः ॥ **श्रुतिबलेनेति** ॥ केनस्यादिति श्रुतिबलेनयःसदसत्प्रवृत्योरविशेषःशंकितःसपरिहृतइत्यर्थः । परिहृतंकामकारेत्यादिसूत्रत्रयेण ॥ ॐ **अतएवचाग्नीं-धनाद्यनपेक्षा** ॐ ॥ ज्ञानस्यमोक्षजनने अग्नेरिंधनंदीपनंयस्मिन्नग्नींधनमग्निहोत्रंतदाद्याश्रमपेक्षानास्तीतिकुतः अतए

Sri Gargeshwari Digital Foundation

व कामचाराइतिश्रुतौ कामचारेपिमोक्षस्यनैर्य्यत्यस्योक्तत्वादेवेत्यर्थः ॥ **कामचारणामिति** ॥ सत्कुर्वतामसत्कुर्वतां चेत्यर्थः ॥ **असत्प्रवृत्तेरिति** ॥ तथाचासच्चरणमेवकामचरणंनतुसदकरणमपीतिभावः ॥ ॐ **सर्वोपेताचयज्ञादिश्रुतेरश्ववत्** ॐ ॥ सर्वापेक्षासर्वसत्कर्मापेक्षाचज्ञानोत्पत्यर्थमेवनमोक्षे कुतःयज्ञादिश्रुतेः यज्ञेनेत्यादिनायज्ञादेर्ज्ञानसाधनत्वश्रवणात् तर्ह्युभयसाधनत्वमस्त्वित्यतउक्तं अश्ववदिति यथागमनसाधनाश्वस्यगमनहेतुत्वमित्यर्थः । विविदिषंति जानंति ॥ ॐ **शमदमाद्युपेतःस्यात्तथापितुतद्विधेस्तदंगतयातेषामवस्यानुष्ठेयत्वात्** ॐ ॥ तथापिज्ञानस्यैवमोक्षहेतुत्वेपिज्ञानीशमादिसद्वृत्युपेतःस्यात्कुतः तद्विधेः तस्य शमदमाद्युपेतत्वस्य आचार्यादितिश्रुतौविधेर्विहितत्वात् किमर्थंविधिरित्यतउक्तं । तदित्यादि तदंगतयाज्ञानांगतया तेषांशमादीनामवस्यानुष्ठेयत्वादित्यर्थः ॥ ॐ **सर्वान्नानुमितिश्चप्राणात्ययेतद्दर्शनात्** ॐ ॥ यदिहवेतिश्रुत्युक्तसर्वान्नानुमितिर्निषिद्धान्नभोजनानुज्ञा प्राणात्ययेप्राणापगमकालविषयैव कुतः तद्दर्शनात् तस्योक्तार्थस्यनवा अजीविष्यमित्युत्तरवाक्येदर्शनादित्यर्थः । तदेवव्यनक्ति ॥ यदीति ॥ किंतल्लिंगदर्शनमित्यतःउषस्तिर्हिचाक्रायणइभ्यग्रामेप्रद्रावणकउवाससेहभ्यंकुल्माषानखादंतंबिभिक्षेतंहोवाचनैतोन्येविद्यंते यच्चयेमइमउपनिहिताःतदइतिएतेषांमेदेहीतिचोवाच तानस्मैप्रददौहंतानुपानमुच्छिष्टंवैमेपीतंस्यादितिहोवाच नस्विदेतेप्युच्छिष्टाइतीतिपूर्वभागेनसंगत्यर्थंहंतेत्याद्यर्थंतावदनुवदन्नवाजीविष्यमितिश्रुतिंव्याचष्टे । चाक्रायणेनेत्यादिना चक्रायणस्यापत्यंपुमान्चाक्रायणः उषस्तिर्नामतः इभ्योगजपालकः कुल्माषाःकुत्सितमाषाः॥ ॐ **अबाधाच्च** ॐ ॥ निषिद्धाकरणेबाधकाभावाच्चनतत्कार्यमित्यर्थः । असिद्धत्वात्प्रमाणसद्भावस्य ॥ ॐ **अपिस्मर्यते** ॐ ॥ सद्धर्मात्यागोऽतीतानागतज्ञानीतिस्मर्यतेपीतिभावः ॥ ॐ **शब्दश्चातोकामचारे** ॐ ॥ अकामचारे कामतश्चरणाकरणेशब्दः नकामचरतिचरे

SGDF
Sri Gargeshwari Digital Foundation

दितिश्रुतिश्चास्तीत्यर्थः । चरतिर्गतिरिति भक्षणस्यपृथगुक्तेरितिभावः । पूर्णफलार्थकर्तव्यमित्यतआह ॥ ह्रासकारणे ति ॥ ॐ विहितत्वाच्चाश्रमकर्मापि ॐ ॥ नकेवलंनिषिद्धंनकार्यंकिंतु आश्रमाद्युचितकर्मचकार्यं कुतः कुर्यात्क र्मेतिश्रुतौविहितत्वादित्यर्थः ॥ समुच्चयवादेति ॥ मोक्षस्यज्ञानकर्मोभयसाध्यत्ववादेत्यर्थः ॥ ॐ सहकारित्वेन च ॐ ॥ मोक्षहेतुज्ञानस्यसहकारित्वेनविहितंकर्मतुकार्यमित्यर्थः । श्रुतिंव्याचष्टे ॥ यद्यपीति ॥ ४ ॥ ॐ सर्वथा पितुतएवोभयलिंगात् ॐ ॥ सर्वथाप्यनेकप्रयत्नकरणेपितएवयोग्याएवज्ञानमाप्नुवंतिनत्वयोग्याः कुतः उभय लिंगात् योग्यायोग्ययोरिंद्रविरोचनयोर्ज्ञानप्राप्त्यप्राप्तिरूपोभयलिंगदर्शनादित्यर्थः । श्रुतेरेवोपदेशत्वेनकथंश्रुत्योपदेश साम्येपीत्युक्तमित्यतआह ॥ श्रुतिरूपेणेति ॥ तुशब्दार्थमाह ॥ प्रत्युतेति ॥ उभयंक्रमेणोपपादयति ॥ आत्मे त्यादिना ॥ पीडाभावइति ॥ नेछाभावमात्रमितिभावः । अन्वेष्टितव्यजिज्ञासितव्यइत्यनयोःपौनरुक्त्यवारणायाह ॥ नहीति ॥ ॐ अनभिभवंचदर्शयति ॐ ॥ स्वभावस्यानभिभवं तिरस्काराभावं दैवीमेवेतिश्रुतिर्दर्शयतीत्यर्थः अतिदार्ढ्येनतदुभयस्वभावस्य ॥ कर्तुंशक्यत्वादिति ॥ अमिश्रत्वेनादृढत्वादितिभावः ॥ ॐ अंतराचापितुतद्दृ ष्टेः ॐ ॥ मध्यममानुषाणांसम्यगसम्यक्ज्ञानयोरंतरामध्येमिश्रज्ञानएवावस्थितिः । नतुतत्स्वभावस्याभिभवः कुतः तद्दृष्टेः तादितितंत्रं तेषांतत्रमिश्रज्ञानेतस्यदार्ढ्यस्यतुविशेषेणदृष्टत्वादित्यर्थः ॥ तत्स्वभावत्वइति ॥ ज्ञानादि स्वभावत्वइत्यर्थः ॥ ॐ अपिस्मर्यते ॐ ॥ असुराइतिस्मृत्यातादृक्स्वभावत्वतदनुगुणफलमितिद्वयंस्मर्यतइत्यर्थः । स्वभावस्यपृथक्कारणत्वप्रतीतिनिरासायाह ॥ स्वभावेनेति ॥ तस्यज्ञानकर्मादिसामग्रीसंपादकत्वेनैवकार्यजनकत्वादि तिभावः ॥ ज्ञानादेर्दैवत्वादिकंचेति ॥ दैवत्वंसात्विकत्वं मिश्रत्वंराजसत्वं आसुरत्वंतामसत्वं तच्चसर्वभुतेषुये

SGDF
Sri Gargeshwari Digital Foundation

नैकंभावमव्ययमीक्षते । अविभक्तंविभक्तेषुतज्ज्ञानंवित्धिसात्विकं । पृथक्त्वेनतुयज्ज्ञानंनानाभावान्पृथग्विधान् । वेत्तिसर्वेषुभूतेषुतज्ज्ञानंवित्धिराजसं । यत्तुकृत्स्नवदेकस्मिन्कार्येसक्तमहैतुकं । अतत्वार्थवदल्पंचतत्तामसमुदाहृतमिति गीतावचनैर्ज्ञातव्यामित्यर्थः ॥ ॐ **विशेषानुग्रहंच** ॐ ॥ देवेष्वीशस्यविशेषानुग्रहंचशृण्वेवीरइतिश्रुतिर्दर्शयतीत्यर्थः । ननुदेवानांसम्यग्ज्ञानतत्फलयोरेवप्रतिपादनीयत्वात् तेषुहरेर्विशेषानुग्रहसमर्थनंकोपयुक्तमित्यतआह ॥ **ज्ञानादीति** ॥ **अध्यवसायेति** ॥ आरब्धेत्यर्थः । अयंवीरशब्दार्थः उग्रमुग्रमितिवीप्सार्थः सर्वानुग्रानिति फलतो क्तिर्दैत्यानिति अतीत्युपसर्गार्थोतिक्रम्येति अतिक्रामइत्वेत्यर्थः । संसारमितियोग्यतयासंबधः स्वपदमिति शेषोक्तिः वेदादिष्वित्यस्ययोग्यतयालाभः ॥ **मानुषप्रजाइति** ॥ मुक्तियोग्यतमोयोग्यवर्गयोःफलस्योक्तत्वाद्विशषइत्यनेनमनुष्याएवविवक्षिताइतिभावः ॥ ॐ **अतस्त्वितरज्यायोलिंगाच्च** ॐ ॥ अतोदेवसमुदायादितरदसुरजातंज्यायः अतिबहुलं कुतःलिंगात् तस्मादितिजनसमुदायप्रवेशनिषेधान्यथानुपपत्तिलिंगात् चशब्दात्कनीया एवेतिश्रुतेश्चेत्यर्थः । जनताजनसमुदायः असुराणांबहुलत्वएवजनसमुदायेतेषामपिसत्वेनतत्संगदोषाभावायतत्प्रवेशनिषेधउपपद्यते नान्यथेतिभावः ॥ **ततस्तयोरिति** ॥ अनेनतयोरितिनिर्धारणार्थकषष्ठीद्विवचनांतात्तात्सिद्धिरित्युक्तंभवति ॥ ॐ **तद्भूतस्यतुतद्भावोजैमिनेरपिनियमात्तद्रूपाभावेभ्यः** ॐ ॥ तद्भूतस्यतुदेवादित्वंप्राप्तस्यैवदेवादिभावोजैमिनेरपिसित्यः कुतः नियमात्तद्रूपाभावेभ्यः नासुरादैवीमितिनियमश्रुतिः नासुराणांदैवंरूपमित्यतद्रूपत्वश्रुतेरभावस्याभूतेः उपलक्षणमेतत् भावस्यभूतेर्भूतिरितिदेवारभूतिरसुराइतिश्रुतेरित्यर्थः ॥ पुरुषार्थाधिकरणेति ॥ तत्रज्ञानस्यैवसर्वपुरुषार्थसाधनत्वमितिव्यासमतंदेवापेक्षया ज्ञानपूर्वकर्मणएवस्वर्गादिहेतुत्व

मितिजैमिनिमतंमनुष्यापेक्षयेतिविकल्पस्तथात्रनेत्यर्थः । भवनस्यसर्वसाधारणत्वादाह ॥ **भूतिमंतइति** ॥ **सुसेघुस्थितइति** ॥ देवानामपिसर्वेषांप्रधानेष्वपिमारुतः । स्थित्वाभूतेषुविष्णुंतद्भूर्भूरित्येवशंसतीतिवचनादितिभावः ॥ **एतावतेति** ॥ शापेनदेवानामसुरादिजन्मप्राप्तिरित्येतावतेत्यर्थः ॥ **हेतुतइति** ॥ जपाकुसुमसन्निधानाद्यथास्फटिकेरक्तत्वमौपाधिकमेवप्रतीयतेतथादैत्यत्वमपितेषुशापनिमित्तंप्रतीयतइत्यर्थः ॥ ५ ॥ **अतीताधिकरणेति** ॥ ज्ञानस्ययोग्यैरेवप्राप्यत्वमित्यत्रसाधकत्वेनोक्तश्रुतिस्मृत्यादीत्यर्थः । ननुनिःस्वभावस्यवस्तुनोभावाद्यत्स्वभावत्वेनायास्यतितदेवदेवत्वादितिब्रूमइत्यतआह ॥ **यत्धीति** ॥ **अतोज्ञानमपीति** ॥ अपरोक्षज्ञानस्यदेवतापदहेतुत्वात्तदप्राप्तौतत्प्राप्तेरेवायोगादितिभावः ॥ ॐ **नचाधिकारिकमपिपतनानुमानात्तदयोगात्** ॐ ॥ आधिकारिकंब्रह्मादिपदमपिज्ञानिभिर्नाकांक्ष्यंकिम्वीश्वरपदं कुतः तदयोगात् तदाकांक्षायाअयोगात् कुतः पतनानुमानात् अयोग्यवृक्षारोहप्रयत्नयुक्तदृष्टांतेनतत्पदारोहप्रयत्नवतामपिपतनानुमानादित्यर्थः । ननुब्रह्मादिपदाकांक्षावतितद्विषयकप्रयत्नाभावादसिद्धिरित्यतआह ॥ **इच्छायाअपीति** ॥ अत्रप्रयत्नशब्देनप्रवृत्तिर्विवक्षिता प्रवृत्तिविशेषत्वांगीकारादित्यर्थः । यथोक्तंसुधायां । तत्रसंधानगोचरेछाप्रयत्नौप्रवृत्तिरित्युच्यतइति देवतापदमपिसायुज्यादिमोक्षविशेषसाधनमितिनक्षुद्रोपद्रवः । तथाचयोग्यारोहप्रवृत्तिमत्वादितिहेत्वर्थोध्येयः । स्वधर्मनिष्ठइत्यादिवाक्यगतिमाह ॥ **प्रयत्नस्येति** ॥ उत्थितःपुरुषधर्मत्वादाह ॥ **यत्रपतितस्येति** ॥ **इच्छामात्ररूपस्येति** ॥ उक्तप्रवृत्तिद्वयेइच्छारूपप्रवृत्तिरित्यर्थः । मायाभिरित्यस्यार्थः कुविद्याभिरिति उच्छब्दार्थःउत्तमत्वमिति सिसृप्सतइत्यस्यार्थःप्रात्पुमिच्छतइति सृगताविति धातोरितिभावः अवेत्यस्यार्थोधेतमसीति ॥ ॐ **उपपूर्वमपीत्येकेभावशमनवत्तदुक्तं** ॐ ॥ देवानामुपसमीपेवर्त

SGDF Sri Gargeshwari Digital Foundation

मानानांगंधर्वादीनांपदमुपशब्दोक्तंतत्पूर्वंतत्प्रभृत्यपिनाकांक्ष्यंकिमुदेवपदं कथंभावशमनवत् भावेचित्तेचेष्टायांचशमनात् भावशमनाऋषयःतत्पदवन्नाकांक्ष्यंकिमुदेवपदमित्येकेप्राहुः कुतः तद्वयंनाकांक्ष्यमित्येतद्यथार्षीनित्येतच्छ्रुतावुक्तंयतइत्यर्थः। आर्षान्ऋषिसंबंधभूतान्तत्पदाकांक्षानिषेधस्यैवप्रकृतत्वादितिभावः। ननुगंधर्वादिपदस्यानाकांक्ष्यत्वेतत्समऋषिपदंकथं दृष्टांतः तत्रनाकांक्ष्यत्वनिश्चयेमुनिपदेपितदनिश्चयादित्यतआह ॥ **मुनिपदस्येति** ॥ **एकस्मिन्नेवेति** ॥ गंधर्वादिपद इत्यर्थः ॥ **अन्यतरस्येति** ॥ गंधर्वादिपदस्याकांक्ष्यत्वानाकांक्ष्यत्वयोरन्यतरस्येत्यर्थः ॥ **वस्तुविकल्पेति** ॥ एकस्मिन्नेवगंधर्वपदे आकांक्ष्यानाकांक्ष्यत्वरूपविरुद्धधर्मासंभवादित्यर्थः ॥ ॐ **बहिस्तूभयथापिस्मृतेराचाराच्च** ॐ ॥ देवादिपदेभ्योबहिर्बहिर्भूतेज्ञानादौतुविशेषोस्ति सकः उभयथापिआकांक्षायामनाकांक्षायांचनपतनं कुतः देवऋषीति स्मृतेः आचारात् नानात्वमेवकामानामित्यविरुद्धकामेनाचारप्रतिपादकवाक्याच्चेत्यर्थः। ननुविज्ञानभक्त्यादिकम प्यतीतवत्साधनंकामबहिष्कृतंचेन्नसाधनंस्यादित्यादिनाज्ञानभक्त्यादेरवश्यमाकांक्ष्यत्व विधानात्कथमनाकांक्षायांनपतन-मित्यतआह ॥ **आकांक्षायामिति** ॥ **अनियमेति** ॥ अनाकांक्ष्यमेवेतिनियमाभावसूचनमित्यर्थः। विहायका मान्यःसर्वान्पुमांश्चरतीतिगीताबचनं। तादृशस्यसर्वथाकामरहितस्य ॥ ६ ॥ अस्वामिनःप्रेर्यजनस्यप्रयोजकत्वंप्रेरकत्वं ॥ ॐ **स्वामिनःफलश्रुतेरित्यात्रेयः** ॐ ॥ स्वामिनांदेवानामेवज्ञानफलं नप्रजानां कुतः स्वामीहिफलमश्नुतइति स्वामिनःप्रेरकस्यैवफलश्रवणादित्यात्रेयाचार्योमन्यतइत्यर्थः ॥ **वेतनादीति** ॥ अस्वामिनोभृत्यादेर्दृश्यतइत्यर्थः। दीयमानत्वात् देवैःप्रजानां देवाएवतदाचरंतिदेवाएवतद्विजानतइत्यनेनदेवानांह्येतद्भवतीत्यस्यपौनरुक्त्यपरिहाराय-व्याचष्टे ॥ **कुतोदेवतानामिति** ॥ ॐ **आर्त्विज्यमित्यौडुलौमिःतस्मैहिपरिक्रियते** ॐ ॥ आर्त्विज्यंऋ

Sri Gargeshwari Digital Foundation

त्विजांफलमिवप्रजानामपिफलंभवति कुतः हियस्मात्तस्मैप्रजार्थंदेवैर्ज्ञानादिपरिक्रियते संपाद्यते तस्मादित्यौडुलोमिराचा
र्योमन्यतइत्यर्थः । ननुकथंश्रुत्यादेःप्रजानामल्पफलसद्भावाभिप्रायकत्वंस्यात् नास्वामीकर्मकुर्वाणइतिनिषेधसद्भावादित्य
तआह ॥ अल्पस्वइति ॥ अल्पधनवतीत्यर्थः । तथालोकइतियदर्थंयद्येनक्रियतेतत्फलंतस्येतिलोकेदर्शनादित्यर्थः ।
उक्तंचन्यायविवरणे । मनुष्याणांत्वरयैवसिद्धिर्देवानामत्वरयैवसिद्धिस्तेषांमहाफलभाक्तत्वात् तेषांदेवानांप्रसादेनैव
सतांनृणांमुक्तिरित्यर्थः ॥ ॐ सहकार्यंतरविधिःपक्षेणतृतीयंतद्वतोविध्यादिवत् ॐ ॥ प्रजानांदेवान्प्रतिसह
कार्यंतरविधिराचार्यरूपसहकारिलक्षणसहकार्यंतरत्वेनविधानं पक्षेणपक्षत्वेन तृतीयं तृतीयःपक्षः कथंतद्वतोविध्यादिवत्
तद्वतोप्रजावतोराज्ञःसहकारित्वेनप्रजाविधानफलवदित्यर्थः । नन्वत्रप्रजानामपिफलमस्तीत्युच्यते । तच्चौडुलौमिनाप्यंगी
कृतमेवतत्कथमस्यतृतीयत्वमित्यतआह ॥ एतद्वक्ष्यमाणमिति ॥ देवानांज्ञानदानंकर्तव्यमित्यादिवक्ष्यमाणमित्यर्थः ।
औडुलौमिनाज्ञातंपक्षंवक्तुंतावच्छंकांप्रतिषेधति ॥ प्रजार्थमिति ॥ श्रुतमित्यनुवादः ॥ ७ ॥ सर्वाश्रमिणांसकाशात्
॥ आचार्यकुलादिति ॥ मुमुक्षुराचार्यकुलाद्वेदमधीत्ययथाविधानमित्येतत्पूर्वोत्तराभ्यांसंबध्यते कार्मसेवारूपंदा
णारूपंवा अतिशेषेणअशेषेणकृत्वाकुटुंबीग्रहस्थाश्रमवान् क्वचित्कुटुंबइतिपाठः तदावर्तमानइतिशेषः । धार्मिकान् व्या
पारान्विदधत्कुर्वाणः आत्मनिपरमात्मनिसर्वेंद्रियाणिप्रतिष्ठाप्यनियम्यतीर्थेभ्योयज्ञेभ्योन्यत्रविनासर्वाणिभूतान्यहिंसन्
वर्तमानस्तंपरमात्मानंदृष्ट्वाब्रह्मलोकमभिसंपद्यते प्राप्नोति प्राप्तश्चपुनर्नैवावर्ततइत्यर्थः ॥ उपसंहारत्वाच्चेति ॥
उपनिषत्परिसमापनाच्चेत्यर्थः ॥ ॐ कृत्स्नभावात्तुगृहिणोपसंहारः ॐ ॥ गृहिणोग्रहस्थस्यमोक्षमुक्त्वोपसंहार
स्तुदेवविषयः कुतःदेवानांकृत्स्नभावात् कार्त्स्न्येनगार्हस्थ्यवत्वादित्यर्थः ॥ आधिक्यनियमादिति ॥ तथाचयतेर

Sri Gargeshwari Digital Foundation

प्याधिक्यमितिभावः । यतेःसकाशाद्गृहिभ्योमनुष्येभ्यः एकत्वंसामानाधिकरण्यं ॥ ॐ **मौनवदितरेषामप्युपदेशात्** ॐ ॥ मुनेर्भावोमौनं यतित्वं तद्वदितरेषामाश्रमधर्माणांदेवाएवेतिश्रुतावुपदेशादित्यर्थः । सर्ववर्णाइत्यस्यदार्ष्टांतिकत्वभ्रमंवारयति ॥ **सर्वाश्रमाइति** ॥ सर्वेहीतिहिशब्दार्थमाह ॥ **अयंतत्रेति** ॥ तत्रसर्वाश्रमत्वेसर्ववर्णवत्वेचेत्यर्थः ॥ ८ ॥ अधिकःअधिकफलवान् ॥ ॐ **अनाविष्कुर्वन्नन्वयात्** ॐ ॥ अनाविष्कुर्वन् आविष्कारंप्राकट्यमकुर्वन्नेवोपदिशेत् कुतःअन्वयात् अन्यथानर्थप्राप्तिरूपयुक्त्येत्यर्थः । पूर्वभाष्यंव्याकुर्वन्नेवोत्तरभाष्यमवतारयति ॥ **यतइति** ॥ साचेतिवक्तव्येतच्चेतिकथमुक्तमित्यतआह ॥ **अयोग्येभ्यइति** ॥ अंधेतमसीतिविशेष्याध्याहारः स्थातुंयोग्याइतियोग्यतयालाभः निरामिणइत्यस्यतात्पर्यंरामविरुद्धाइति रामस्यरमणरूपस्यहरेर्जीवतादात्म्यरूपेणज्ञानेननीचतांविदइत्यर्थः ॥ **आकांक्षावंतइति** ॥ गृधुआकांक्षायामितिधातोरितिभावः ॥ **स्तेनेभ्यइति** ॥ ब्रह्मस्तेनेभ्यइत्यर्थः । त्रयइत्यस्यार्थोवरत्वेसतिनियामकइति वरत्वावकारस्थाकारलोपोयातेःकप्रत्ययेयंनियामकंत्रंचतद्यंचेतिविग्रहः । लिंगव्यत्ययछांदसइतिभावः । ओहतइत्यस्यार्थोवहंतीति साम्नइत्यस्यततइति विष्णोरित्यर्थः । तितिक्षवःद्वंद्वसहिष्णवःकारुणिकाःदयालवः ॥ ९ ॥ **अन्यथेति** ॥ प्रतिबंधकाभावसहकृतसाधनसंपत्तावप्यनुदयइत्यर्थः ॥ **स्वर्गादिवदिति** ॥ यागादिरूपसाधनसंपूर्तावपितस्यैतज्जन्मन्यलाभवदत्रापितथेत्यर्थः ॥ **तदभावादिति** ॥ साधनसंपत्तावपिइहजन्मनिज्ञानोदयाभावादित्यर्थः ॥ ॐ **ऐहिकमप्रस्तुतप्रतिबंधेतद्दर्शनात्** ॐ ॥ अप्रस्तुतप्रतिबंधेप्रस्तुतेनप्रारब्धकर्मणाप्रतिबंधाभावेज्ञानमैहिकंइहजन्मन्येवभवति नचेज्जन्मांतरेभवति कुतःतद्दर्शनात् तस्योक्तार्थस्यश्रुत्वात्मानमितिश्रुतौदर्शनादित्यर्थः । उक्तदोषःकारणाभावरूपः ॥ १० ॥ तद्देहानंतरं तद्देहपातानंतरं ॥ ॐ एवंमु

क्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॐ ॥ एवंज्ञानइवमुक्तिफलेमोक्षरूपेफलेप्यनियमः ज्ञानोत्पत्तिजन्मांतरमेवभवतीतिनियमोनास्ति किंतुप्रारब्धप्रतिबंधकसद्भावेदेहांतरावसानेपिभवति कुतस्तदवस्थावधृतेः तस्मिन्ब्रह्मणिअवस्थावस्थितिर्निष्ठायस्यतस्यावधृतेर्ब्रह्मसंस्थइतिश्रुतौमुक्तिफलावधारणादित्यर्थः ॥ **कुतोत्रेति** ॥ व्यभिचाराज्ज्ञानमोक्षयोःकार्यकारणभावएवनास्तीतिनस्यादितिभावः ॥ **तदनुपपत्तेरिति** ॥ श्रुतौकार्यकारणभावानुपपत्तेरित्यर्थः । श्रुतेरर्थांतरंवक्तुंपूर्वोक्तमर्थमनुवदति । अनियमेकदापीत्यादिना ॥ **युक्त्येति** ॥ प्रतिबंधकसद्भावरूपयुक्त्येत्यर्थः । तत्रचैषाश्रुतिःप्रमाणमिति तत्रप्रतिबंधकसद्भावरूपयुक्तौप्रमाणंश्रुतार्थापत्तिरूपतयेत्यर्थः ॥ **मोक्षनियमेवेति** ॥ शब्दविधयेत्यर्थः । तदेवोपपादयति ॥ **ज्ञानिनइति** ॥ एकजन्मप्राप्त्यनंतरमपिजायमानमुक्तिसंग्रहार्थमाह ॥ **बहूनीति** ॥ जन्मांतरइत्यर्थः ॥ ११ ॥ **इतिश्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यांशर्कराश्रीनिवासविरचितायांतृतीयाध्यायस्यतुरीयश्चरणःपर्यवसितः** ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ इति श्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यां त्रितीयाध्यायःसमाप्तः ॥

GDF
Sri Gargeshwari Digital Foundation

॥ इति श्रीमत्तत्वप्रकाशिका वाक्यार्थमंजर्यां ॥

॥ तृतीयाध्यायः समाप्तः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ श्रीमत्तत्वप्रकाशिका वाक्यार्थमंजर्यां ॥

॥ चतुर्थाध्यायः प्रारंभः ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीगुरुभ्योनमः ॥ विनाश्यकर्मनिचयमुत्क्रम्यार्चिमुखात्पथः । प्राप्तेभ्योह्यात्मनिकटंनमःस्वानंदमूर्तये ॥ १ ॥ फल निरूपणस्येदानींकासंगतिरित्यतआह ॥ **विरक्त्यादीति** ॥ **असाधारण्येति** ॥ तेषांकर्मादिनापिसाध्यत्वेनज्ञा नंविनानसंभवतीत्येवंरूपासाधारण्यंनास्ति तादृशासाधारणफलंमोक्षरूपंनिगद्यतइत्यर्थः ॥ **उक्तमिति** ॥ विद्यैवतु निर्धारणादित्यत्रेत्यर्थः । कर्मनाशस्यकथंज्ञानासाधारणफलत्वं एवंतत्कथनमस्मिन्नध्यायेसंगतंस्यात् तथात्वेवाप्राथम्यं कुतइत्यतआह ॥ **ज्ञानफलमिति** ॥ एतत्कर्मनाशाख्यंफलमितिभाष्यं उत्तरमाह ॥ **उक्तमेवेति** ॥ सर्ववेदांतप्रत्य यमित्यत्रश्रवणाद्यावृत्तेःकर्तव्यत्वं आनंदादयःप्रधानस्येत्यत्रात्मत्वोपासनस्यकर्तव्यत्वं । तत्रैवसर्वस्वामित्वेनोपासनोक्त्या विष्णुप्रतीकैक्योपासनस्यदेवैःकर्तव्यत्वमित्यत्रब्रह्मत्वोपासनस्यकर्तव्यत्वं अंगेषुयथाश्रयभावइत्यत्र आदित्यादीनांभगवच्च क्षुराश्रितत्वेनोपासनस्यदेवैःकर्तव्यत्वं । अनुबंधादिभ्यइत्यत्रासनादेरावश्यकत्वं अन्यैर्गुणैर्देवगणाउपासतइतिश्रुतिग्रा हकेदर्शनाच्चेत्यत्रोत्पन्नापरोक्षज्ञानिनांगम्योपासनोक्त्योपासनस्यमोक्षांतत्वंचोक्तमेवेत्यर्थः । ननुतर्हितैरेवाधिकरणैरेतेषां सप्तानामधिकरणानांगतार्थत्वमितिशंकते ॥ **पुनःकिमिति** ॥ परिहरति ॥ **तस्यैवेति** ॥ उपलक्षणमेतत् परमाद रेणेत्यपिद्रष्टव्यं । प्रयोजनंचपृच्छति ॥ **किमितीति** ॥ सर्वथाभाव्यमित्युक्तस्यपरिहारमाह ॥ **तद्विनेति** ॥ आदरनैरंतर्या भ्यांश्रवणाद्यावृत्तिकरणादिनाविनापरोक्षज्ञानाभावेनचतुर्विधमोक्षमध्येकस्यापिभागस्याभावादितिभावः । अत्रसत्पाधि करण्यां ॥ **व्यवस्थाभावविरोधइति** ॥ व्यवस्थाभावलक्षणोविरोधइत्यर्थः ॥ **प्रायेणेति** ॥ प्राधान्येनेत्यर्थः । साधनेनविचारप्रासंगिकइतिभावः ॥ **अतएवेति** ॥ प्रासंगिकत्वादेवेत्यर्थः । आवृत्तिःकिंफलायवोतपूरणाय आ द्येआह ॥ **सकृदनुष्ठितेति** ॥ द्वितीयेआह ॥ **श्रवणादीति** ॥ **साधनेति** ॥ अवहननादीत्यर्थः । अना-

वृत्यैवेतिपदच्छेदः ॥ **नचेति** ॥ अननुभवादितिभावः ॥ ॐ **आवृत्तिरसकृदुपदेशात्** ॐ ॥ अपरोक्षज्ञानार्थं श्रवणादीनामावृत्तिःकार्या कुतः सआत्मातत्वमसीत्युद्दालकेनश्वेतकेतुंप्रत्यसकृदनेकवारंतत्वोपदेशादित्यर्थः । नव कृत्वः नववारं ॥ **अदृष्टेति** ॥ अप्रत्यक्षेत्यर्थः । व्रीह्यवघातविधिर्व्रीहीनवहंतीत्यादिरूपः ॥ ॐ **लिंगाच्च** ॐ ॥ सतपोतप्यतेत्यादिनाश्रुताद्भृगोःश्रवणादेरावर्तनलिंगाच्चश्रवणाद्यावृत्तिःकार्येत्यर्थः ॥ **एतस्माइति** ॥ वरुणस्तस्मैभृग वेएतद्वक्ष्यमाणंभगवद्रूपंप्रोवाच किंतत् अन्नंसर्वान्नत्वादन्नशब्दवाच्यं प्रकृष्टचेष्टावत्वात्प्राणंचष्टेसर्वंपश्यतीतिचक्षुः सर्वश्रवणाच्छ्रोत्रं मननात्सर्वावबोधनान्मनः सर्वस्यवचनाद्वाचंब्रह्मेतिप्रोवाचेत्यर्थः । प्रश्नोऽधीहिभगवइत्याद्युक्तिः तस्माइत्याकारिका सतपोतप्यतइत्याद्यंशलब्धमाह ॥ **श्रुतस्येति** ॥ **अलोचनेनेति** ॥ मननानिदध्यासनेनेत्यर्थः ॥ १ ॥ ॥ **स्वस्वामिभावसंबंधस्येति** ॥ आत्मशब्दोक्तस्येत्यर्थः ॥ **अयुक्तमिति** ॥ विष्णोःसर्वस्वामित्वस्योपास्यत्वएव एतदर्थंसर्वोत्कर्षेदेवदेवस्यविष्णोर्महातात्पर्यमित्यादिनातत्रतात्पर्योक्तिःसार्थिकास्यादन्यथाव्यर्थेतिभावः ॥ ॐ **आत्मे तितूपगच्छंतिग्राहयंतिच** ॐ ॥ आत्मशब्दस्यावृतिः आद्योरूढोविष्णूपरः अंत्यआदत्तेभृत्यानितियोगेनस्वामिवा चीतुएव तथाचात्माविष्णुरात्माममस्वामीत्येवोपगच्छंत्युपासतेग्राहयंतिशिष्येभ्यउपदिशंतिचसज्जनाइत्यर्थः ॥ **आ त्माहीति** ॥ यस्मादेषममात्मास्वामीभवत्यतोनाविद्यमानोपासनमेतदित्यर्थः ॥ **अहंग्रहमिति** ॥ अहमितिगृह्यमाणत्वे नोपासनमित्यर्थः ॥ **अयुक्तंस्यादिति** ॥ प्रतीकभूतनामादौतस्यस्वामित्वासंभवेनसर्वस्वामित्वायोगादितिभावः ॥ **नामब्रह्मेत्युपास्तइति** ॥ योनामब्रह्मेत्युपास्तेतस्याधिकारिणोनाम्नोयावद्गतंगमनमस्तितत्रलोकेयथायोग्यतानतिक्र मेणकामतःसंचारोभवतीत्यर्थः॥२॥ॐ **नप्रतीकेनहिसः** ॐ॥प्रतीकेनामादिप्रतिमाविषयेब्रह्मत्वेनोपासनानकार्या कुतः

SGDF
Sri Gargeshwari Digital Foundation

हियस्मात्कारणात्सविष्णुःप्रतीकंनभवतीत्यर्थः । प्रथमादित्यादिपदेननामोपास्येत्यादिद्वितीयाग्राह्या ॥ **सप्तास्वेति** ॥ प्रथमाविभक्तिःसप्तसुप्रथमाविभक्त्यादिसप्तविभक्त्यर्थेषुवाचकतयाप्रवर्ततइत्यर्थः ॥ **षट्स्विति** ॥ द्वितीयाविभक्तिः द्वितीयादिषड्विभक्त्यर्थेषुवर्ततइत्यर्थः । ननुनवयंब्रह्मणिप्रतीकोपासनंब्रमः येनब्रह्मकुपितमनर्थंप्रयच्छेत् किंतुप्रतीकेब्रह्मत्वोपासनंततःपुरुषार्थप्राप्तिदर्शनादित्याशंक्यनिषेधति ॥ **नचवाच्यमिति** ॥ कुतोनवाच्यमितिचेत् क्षत्तरिराजदृष्टेरभावात् ननुदृष्ट्यभावेतथाव्यवहारःकथमित्यतआह ॥ **क्षत्तैवराजेत्यस्येति** ॥ क्षत्तरिराजदृष्टिःकुतोनेत्यतआह ॥ **ज्ञानेनेति** ॥ ३ ॥ **ब्रह्मत्वइति** ॥ पूर्णत्वइत्यर्थः । भूम्नःपूर्णत्वस्य ॥ **विशेषहेतुरिति** ॥ मोक्षस्यतदन्वयव्यतिरेकाविधायित्वरूपइत्यर्थः ॥ **ॐ ब्रह्मदृष्टिरुत्कर्षात् ॐ** ॥ ब्रह्मत्वस्यपूर्णत्वस्यदृष्टिरुपासनाकार्यैव कुतः उत्कर्षात् उत्कर्षस्यभगवदुत्कर्षस्य ब्रह्मपदप्रवृत्तिनिमित्तत्वादित्यर्थः । ब्रह्मत्वं ब्रह्मपदप्रवृत्तिनिमित्तत्वं तत्कथमित्यतउक्तं । अत्रसर्वगुणांतर्भावेनेति आविर्भावितसर्वगुणत्वमेवसर्वोत्कृष्टत्वमितिभावः । ननुभगवदुत्कृष्टत्वस्यब्रह्मशब्दप्रवृत्तिनिमित्तत्वंपरमेश्वरेब्रह्मदृष्टिःकार्येत्यत्रकथंहेतुरित्यतआह ॥ **तथाचेति** ॥ सर्वतःसर्वेभ्यः ॥ ४ ॥ **तन्न्यायेनेति** ॥ अंगाश्रितत्वस्यापिस्वस्वामिभावविशेषरूपत्वादितिभावः । उक्तमंगावबद्धास्त्वित्यनेन ॥ **ॐ आदित्यादिमतयश्चांगउपपत्तेः ॐ** ॥ अंगेभगवदंगे आदित्यादिमतयः आदित्यादेरुपासनाश्चकार्याः कुतः उपपत्तेः मुक्तौतत्प्रविशेरूपफलस्यापेक्षितत्वेनतासामुपपन्नत्वादिभावः । स्मृतावित्थंभावाप्रतीतेराह ॥ **स्वाश्रयत्वेनेति** ॥ ५ ॥ **नदुपदेशेनेति** ॥ आसनप्रतिपादकागमवैयर्थ्यप्रसंगादित्यर्थः ॥ **उपविश्येति** ॥ आसनेउपविश्यात्मविशुद्धयेयोगंयुंज्यादित्यन्वयः ॥ **अनुपपत्तेरिति** ॥ सर्वदा आसनस्थत्वासंभवेनमनसोभगवतिनिवेशनासंभवादितिभावः ॥ **ॐ आसीनःसंभवात् ॐ** ॥ आसीनः आसने

SGDF Sri Gargeshwari Digital Foundation

उपविष्टएवोपासनंकुर्यात् कुतः संभवात् तस्यैवोपासनासंभवादित्यर्थः ॥ चित्तविक्षेपासंभवादिति ॥ ध्यानावि
रोधिचित्तविक्षेपाभावादित्यर्थः । शंकते ॥ आसीनस्येति ॥ तर्ह्यासनमेवकुतइत्यतआह ॥ ॐ ध्यानाच्च ॐ ॥
आसीनेनक्रियमाणस्यध्यानत्वादविरोधइत्यर्थः ॥ एतदिति ॥ उपासनंहिद्विविधाभवतीत्यादिनोक्तमित्यर्थः । भाष्ये
उपासनंस्मरणंध्यानात्मकंचेतिद्विविधैवेत्यर्थः ॥ प्रत्याहारेति ॥ इंद्रियाणांविषयेभ्यआहरणेत्यर्थः ॥ ॐ अचल
त्वंचापेक्ष्य ॐ ॥ नकेवलंप्रत्याहारादिनाकिंतुशरीरस्याचलत्वंचापेक्ष्यचित्तविक्षेपाभावोभवतीत्यर्थः ॥ ॐ स्मरं-
तिच ॐ ॥ कृष्णादयउक्तमर्थमुपविश्यासनेत्यादिनास्मरंतिचेत्यर्थः । कायशिरोग्रीवमचलंसमंधारयन्नित्यनेनैवश
रीरस्थैर्यलाभात्स्यादिति पुनरुक्तमित्यतआह ॥ स्थिरःस्थिरमनाइति ॥ नन्वत्रस्मृतावासनस्यावश्यत्वानुक्तेकथमुदाह
रणमित्यतआह ॥ अस्येति ॥ दिशश्चानवलोकयन्नुपविश्यासनेयुंज्यादितिसंधानादित्यर्थः ॥ ॐ यत्रैकाग्रतात-
त्रादिशेषात् ॐ ॥ यत्रदेशकालादौध्यानस्यैकाग्रतान्यपरित्यागेनभगवन्मात्रविषयतास्यात् तद्देशादौध्यानंकार्यं
कुतः अविशेषात् नियतदेशादिनाध्यानेविशेषाभावादित्यर्थः । उपलक्षणंभोगादेः अवस्थादिष्वित्यादिपदेनारोग्यादेर्ग्र
हणमितिभावः । पूर्ववत् देशकालादीनांकिमित्यादिरीत्या ॥ प्रथमस्यदूषणमिति ॥ तत्रदेशादेःप्रसादहेतुत्वोक्त्या
ध्यानोपयोगितानिषेधादितिभावः । तत्र ध्यानोपयोगित्वाभावे अवस्थितिरासनमितिदेशकालयोःपृथगुक्तिरितिभावः ।
नन्वेवंसत्यासनस्यापिदेशकालादिवदनियमेप्रागुक्तविरोधादित्यतआह ॥ तच्चेति ॥ आसनसामान्यस्यावश्यकत्वेपिन
तद्विशेषनियमइतिभावः ॥ ६ ॥ ध्यानफलाभावप्रसंगेनेति ॥ अपरोक्षज्ञानानंतरंकृतध्यानस्यानंदाभिवृद्धिलक्षणफला
भावप्रसंगेनेत्यर्थः । ननुश्रवणादित्रयस्यज्ञानसाधनत्वेपिध्यानमेवप्रबलंसाधनमेवमत्रापिसाधनस्यप्राबल्यंकिंनस्यादित्यत

SGDF
Sri Gargeshwari Digital Foundation

माह । ज्ञानएवेति ॥ ॐ **आप्रायणात्तत्रापिहिदृष्टं** ॐ ॥ आङ्मर्यादायांप्रकर्षेणायनंप्रायणं मोक्षः ध्यानं आप्रायणंमोक्षपर्यंतंकार्यं कुतः हियस्मात्सयोहेतिदृष्टंश्रुतिरस्ति किंचतत्रापिमुक्तावपिध्यानमकुर्वतोकिमुतततःप्राक् तदेवकुतः हियस्मान्मुक्तावपीतिदृष्टमित्यर्थः ॥ **ॐकारोहरिरिति** ॥ ओमित्याक्रियमाणत्वादितिभावः । भाष्योदाहृतश्रुतिद्वये उपासनामात्रस्यश्रुतत्वात्किमर्थतत्पूर्वभाष्ये उपासनादीत्यादिपदप्रयोगइत्यतआह ॥ **ज्ञानात्पूर्वमिति** ॥ ज्ञानानंतरं श्रवणादीत्यत्रगीताभाष्योदाहृतप्रमाणमाह ॥ **उक्तंहीति** ॥ वर्तयंति वर्तंते कालंनयंतीत्यर्थः ॥ **मोक्षविरोधादिति** ॥ ज्ञानोत्तरंनिरवधिकध्यानस्यविहितत्वेनकरणेमोक्षेपितथाकरणापत्याविधिबंधवर्जितत्वरूपमोक्षत्वविरोधादित्यर्थः ॥ **कारणानुपपत्तेरिति** ॥ मोक्षात्पूर्वमित्यर्थः । कारणं आनंदवृद्धेः ॥ **ध्यानस्यैवेति** ॥ शमशब्देनतत्रध्यानस्यैवविवक्षितत्वादितिभावः ॥ ७ ॥ **उक्तव्याहतेरिति** ॥ अनियमःसर्वेषामित्युक्तव्याहतेरित्यर्थः ॥ **अनियतदेशेति** ॥ कर्मणांव्यवस्थितदेशकालयोःफलोन्मुखत्वायपरिपाकशून्यत्वादित्यर्थः । तथाचयौगपद्यमितिभावः ॥ **भोगस्यापीति** ॥ योगसामर्थ्येननिवारणोपपत्तेरितिभावः । जातु कदाचित् विप्रतिपत्तेः दृष्टांते प्रायश्चित्तेनकर्मक्षयाभावेतद्विधायकश्रुतिवैयर्थ्यमितिभावेनाह ॥ **ब्रह्महेति** ॥ ब्राह्मणहंतेत्यर्थः ॥ **दग्धगेहेष्टिविधिवदिति** ॥ यथागेहेदग्धेसतिगृहस्थेनइष्टिविशेषोगृहदाहनिमित्तत्वेनैवक्रियतेनतुदाहपरिहारार्थं कृतायामपीष्टौदग्धगेहस्यपुनरावृत्यभावात्तथाप्रायश्चित्तस्यापिब्रह्महननादिनिमित्तत्वमेवनतुतज्जातपापपरिहारार्थमित्यर्थः ॥ **अस्तुवेति** ॥ स्मृतेश्चाकृतप्रायश्चित्तविषयत्वमितिभावः ॥ **निष्कारणेति** ॥ संसारावस्थानेकर्मविनाकारणांतराभावादितिभावः । विरम्यक्रमिकतया येनैकस्मिन्काले लब्धात्मनःकालांतरेकर्मविनाशत्वंस्यादितिभावः ॥ ॐ**तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशात्** ॐ ॥

तस्यब्रह्मणअधिगमेदर्शनेसत्युत्तरपूर्वाघयोरश्लेषविनाशौ उत्तरपापस्याश्लेषः पूर्वपापस्यचविनाशोभविष्यति कुतः तद्व्यपदेशात् तयोरश्लेषविनाशयोःक्रमेण तद्यथा पुष्करपलाशे तद्यथैषीकातूलमग्नाविति श्रुतिद्वयउक्तत्वादितिभावः । परत्रचनरकाद्यहेतुत्वं ॥ **तदिति** ॥ प्रायश्चित्तविधीत्यर्थः ॥ **अग्निनाशेति** ॥ आहिताग्निनाशेत्यर्थः । तथाचप्रत्यवायफलहेतुत्वेननवैय्यर्थ्यमितिभावः ॥ ॐ **इतरस्याप्येवमसंश्लेषःपातेतु** ॐ ॥ भगवद्द्वेषिणोमिथ्याज्ञानेन पातेतु अनुत्थानतमःपातेसमीपकालवर्तिनि इतरस्य तत्कृतपुण्यस्याप्येवंज्ञानिकृतपापस्यैवाश्लेषविनाशौभवतइत्यर्थः ॥ **पातार्थमिति** ॥ अन्यथापुण्येनप्रतिबंधात्पातएवनस्यादितिभावः ॥ ॐ **अनारब्धकार्येएवतुपूर्वेतदवधेः** ॐ ॥ अनारब्धेभोक्तुमनुपक्रांतेसुखदुःखरूपेकार्ये ययोः तादृशएवपूर्वे पूर्वोक्ते पुण्यपापे नश्यतः नतुप्रारब्धकार्ये कुतः मोक्षस्यतदवधेः प्रारब्धकर्मावधिश्रवणादित्यर्थः ॥ **कर्मसद्भावइति** ॥ कर्मणाविनाप्रतिबंधकांतराभावादितिभावः ॥ **आद्यशब्देति** ॥ तथात्वेउभयसंग्राहकर्मपदप्रयोगप्रसंगइतिभावः ॥ ॐ **अग्निहोत्रादितुतत्कार्यायैवतद्दर्शनात्** ॐ ॥ ज्ञानिनःपूर्वकृतमग्निहोत्राद्यकाम्यकर्म तत्कार्याय ज्ञानाख्यकार्यायैव पश्चात्कृतंतत्कार्याय मोक्षातिशयायैव कुतः तद्दर्शनात् तस्योक्तार्थस्यात्मानमेवेत्यादिश्रुतौदर्शनादित्यर्थः । उक्तरीत्यापूर्वकृतेत्यादिना एतच्छ्रुत्युक्तं ॥ **स्वल्पफलेति** ॥ अपेक्षितपुत्रादिहेतुत्वेनज्ञानाद्यहेतुत्वादितिभावः ॥ ॐ **अतोन्यदपीत्येकेषामुभयोः** ॐ ॥ अतोकाम्यकर्मणोऽन्यदकाम्यमपिनाश्लेषविनाशावाप्नोति कुतः इत्येकेषामुभयोःपूर्वोत्तरपुण्ययोरिति एवंत्यागेनतस्यपुत्राइत्येकेषांशाखिनांपाठोस्तियतइत्यर्थः ॥ **अत्रापीति** ॥ सूत्रइवश्रुतावपीत्यर्थः अत्रक्रमेणहेतूनाह ॥ **अकाम्यस्येत्यादिना** ॥ विनियुक्तत्वाज्ज्ञानादौ ॥ ॐ **यदेवविद्ययेतिहि** ॐ ॥ हिशब्दवशाद्यदेवविद्ययाकरोतीतिश्रुतिरस्ति तस्माज्ज्ञानिकृतका

म्यकर्मणोमोक्षानुप्रवेशोयुक्तइत्यर्थः। ननश्यतीत्यादि पूर्वतनमिष्टंचेन् श्लिष्यतइत्यर्थः। कियतश्चित्कस्यचित् साक्षाद्दुःखाति शयहेतुत्वेन ॥ ॐ भोगेनत्वितरेक्षपयित्वाथसंपत्स्यते ॐ ॥ इतरेप्रारब्ध्युण्यपापेभोगेनक्षपयित्वाथतदनंतरमेव संपत्स्यतेब्रह्मतमोवाप्नोति। कोयंविशेषइत्यतआह ॥ यदुक्तमिति ॥ अत्रभगवदनुग्रहेणज्ञानिकृतपापस्ययावत्स्वफलप्रदा- तृत्वाभावस्योक्तत्वादितिभावः। प्रजहातीत्यादिज्ञानिस्वरूपप्रतिपादकवाक्यतस्तस्यस्वसंबंधिककर्मत्यागश्रवणादितिभावः ॥ इतिश्रीमत्तत्वप्रकाशिकावाक्यार्थमजर्यांशर्करायांचतुर्थाध्यायस्यप्रथमपादः ॥ श्रीकृष्णार्पणमस्तु ॥

॥ श्रीगुरुभ्योनमः ॥ तत्रोत्तमेषु ॥ उपासनावदिति ॥ चतुर्मुखाद्यधिकारिभेदेनसकलगुणोपासनंचतुर्गुणोपास नमित्याद्यवांतरवैचित्र्येविद्यमानेष्युपासनात्वेनैकीकृततत्तत्प्रतिपादकत्वेनपादैक्यंसंभवतीतिभावः ॥ उक्तेति ॥ अनि यमइत्युक्तेत्यर्थः ॥ वागिति ॥ वाङ्नामाभगवान् विष्णुनाग्निपूर्वरूपेपूर्ववर्णदेवतामनःमनोनामाउत्तरपूर्ववर्णदेवता तथावाक्वागिंद्रियंपूर्वरूपंपूर्वभाविव्यापारत्वेनप्रधानंमनःमनोरूपेंद्रियंउत्तररूपंपश्चाद्भाविव्यापारत्वेनअप्रधानमित्यर्थः। ए वमुत्तरत्रवाक्यमपिद्वेधाव्याख्येया ॥ व्याप्तिश्रेति ॥ विरुद्धेत्यर्थः ॥ ॐ वाङ्मनसिदर्शनाच्छब्दाच्च ॐ ॥ वागभिमानीवाणीसौपर्णीच मनसि मनोभिमानिनिशेषेगरुडेच विलीयते कुतः दर्शनात् वाचोमनोवशत्वस्यप्रत्यक्षतएव दर्शनात्तस्यनयावदितिश्रुतिश्चेत्यर्थः ॥ मुनिमतविवादइति ॥ अथाध्यात्मंवाक्पूर्वरूपंमनउत्तररूपंप्राणःसंहितेतिशू रवीरोमांडूकेयोथाहास्यपुत्रआह जेष्ठोमनःपूर्वरूपंवागुत्तररूपंइतिशूरवीरेमांडूकेयतज्येष्ठपुत्राख्यःमुनिमतविवादउच्यतइ त्यर्थः ॥ अन्यतरेति ॥ मतद्वयेपिविष्णुरूपयोरेवपूर्वोत्तरवर्णदेवतात्वमितिभावः ॥ उभयोरपि ॥ वाङ्मनसनाम

SDF Sri Dayananda Legal Foundation

कयोरुभयोरपिविष्णुरूपयोः प्रत्येकंपूर्वोत्तरवर्णप्रतिपाद्यत्वेनपूर्वोत्तरवर्णदेवतात्वमितिभावः ॥ युक्तेति ॥ मनसासं-
कल्पितस्यैववाचाव्यवहरणरूपयुक्त्येत्यर्थः । युक्तिमात्रेणकथंश्रुतेरर्थांतरविषयत्वमित्यतआह ॥ प्रत्यक्षेति ॥ वाचो-
मनोधीनत्वेपीति ॥ संकल्पव्यवहारेणप्रत्यययोरेवकारणत्वमितिभावः ॥ अनेकत्वेनेति ॥ ब्रह्मादेरपितन्नि-
यामकत्वादितिभावः । ननूमायास्तस्मिन्जन्मनिमोक्षाभावाद्रुद्रस्यमोक्षमार्गत्वाभावात्कथंतस्यास्तत्रमोक्षार्थंदेहलयइत्यत
आह ॥ अत्रोमापादेनेति ॥ ॐ अतएवचसर्वाण्यनु ॐ ॥ सर्वाणिचदेवतानि अनुस्वनियम्यनियामकभावानुसा-
रेणलीयंते कुतः अतएव अग्नौदेवाइतिश्रुतेरेवेत्यर्थः ॥ १ ॥ उक्तेति ॥ अनियमइत्युक्तेत्यर्थः ॥ ऊनत्वमुक्तमिति ॥
संकल्पाद्दासोत्तमप्राणादूनत्वंसंकल्पाद्यवरमनसःकैमुत्यसिद्धमित्यर्थः ॥ तत्रेति ॥ मनोवावाचोभूयइत्यत्रमनः
शब्दस्यपर्जन्यपरत्वादित्यर्थः । पर्जन्यःसर्वतोवरःमनोभिमानिनीसप्रोक्तइतिस्मरणादितिभावः ॥ स्मरशब्देनत-
द्ग्रहणमिति ॥ स्मरोवावाकाशाद्भूयानित्यत्रतस्याश्चैवसदाशिवः स्थिरस्मृत्यभिमानीससमवेतरतेःस्मरइतिस्मरणा
त्स्मरशब्देनरुद्रग्रहणमित्यर्थः । तथाचतदुत्तरमाशोत्तमप्राणोनत्वंरुद्रस्यसिध्यतीतिभावः ॥ ॐ तन्मनःप्राणउत्तरा-
त् ॐ ॥ तद्वाङ्नियामकत्वेनमनःमनोभिमानीशेषः सुपर्णश्च प्राणेचतुर्मुखे वाणीद्वाराविलीयते कुतः उत्तरात् वाङ्म
नसीतिपूर्वोदात्तवाक्यापेक्षयोत्तरान्मनःप्राणइतिवाक्यादित्यर्थः ॥ चतुर्मुखइति ॥ वायोरेतज्जन्मनिमुक्त्यभावेन
तत्रमनसोमुक्त्यर्थंदेहलयासंभवादितिभावः ॥ मनउदक्रामदिति ॥ सर्वदेवनिर्गमानंतरंमनोरुद्रउदक्रामत् ब्रह्मदेहा-
दूर्ध्वमगमत् तदासौदेहोनिमीलितनयनइवाश्नन्पिबन्नास्तैवनपपातेत्यर्थः । अथप्राणउदत्क्रामत्तस्मिन्प्राणउत्क्रांतेसत्यप-
द्यतएव ततःपुनःसर्वदेवप्रवेशानंतरंमनोपिप्राविशत् तदाऽशयदेवनोत्थितः प्राणःप्राविशत् तस्मिन्प्राणेप्राप्तेसत्युदतिष्ठत्-

*८

SGDF
Sri Gargeshwari Digital Foundation

उत्थित इत्यर्थः ॥२॥ **कस्यापीति** ॥ सर्वेषांप्राणद्वारामोक्षनियमादितिभावः ॥ **पूर्वोक्तमेवेति** ॥ प्राणस्यभगवदुत्पन्नत्वंविशेषप्रमाणादर्शनंचेत्यर्थः ॥ **श्रुतिसद्भावादिति** ॥ नप्राणःकिंचिदाश्रितइत्यादिश्रुतिसद्भावादित्यर्थः ॥ **उक्तमिति** ॥ अनन्येश्वरताप्राणेतदन्येश्वरवर्जनमितीश्वरेतरानधीनत्वंतच्छ्रुत्यर्थइतिचक्षुरादिवदित्यत्रोक्तमित्यर्थः ॥ **महांतमिति** ॥ अस्यप्राणस्यमहिमानंमहांतमाहुः कुतः यद्यस्मात्स्वयमन्यैरनद्यमानः अभक्ष्यमाणएवान्नमत्तीत्यर्थः ॥ ॐ **सोध्यक्षेतदुपगमादिभ्यः** ॐ ॥ सप्राणोऽध्यक्षेपरमात्मनिविलीयते कुतः तदुपगमादिभ्यः तस्य परमात्मनउपगमःप्राप्तिः आदिपदेनतदनुप्राणनतत्प्रवेशादितत्प्रतिपादकश्रुतिसद्भावादित्यर्थः ॥ **इतिन्यायेनेति** ॥ इत्युक्तन्यायेनेत्यर्थः । रुद्रादिसकलजीवप्राप्यत्ववत्तच्चेष्टकत्वादिनाश्रुत्युक्तस्वातंत्र्योपपत्तिरितिभावः । अन्यैःईशात् ॥ **प्राणत्वइति** ॥ वायुत्वावस्थायामित्यर्थः । तस्यचतुर्मुखत्वेनपुनर्जननात् विलीनोहिप्रकृतौसंसारमेतीतिश्रुतिरितिभावः॥३॥ **प्रागुक्तेति** ॥ अतएवचसर्वाण्यनुइत्युक्तस्याधमानामुत्तमेषुलयस्यबाधइत्यर्थः ॥ **अन्याधीनत्वमिति** ॥ इंद्राश्विन्यादीनांवायुवरुणरूपभूतांतराधीनत्वमित्यर्थः । विपर्ययइति भूतांतरलयइत्यर्थः । नियामकबाहुल्येनेति अश्विनीप्रभृतिनियामकानांवायुवरुणादिभूतानांबाहुल्येनेत्यर्थः ॥ ॐ भूतेषुतच्छ्रुतेः ॐ ॥ प्रागुक्तेभ्योन्येदेवाभूतेषुपंचसुदेहाभिमानिषुलीयंते नत्वेकस्मिन्नग्नौ कुतः तच्छ्रुतेः तस्यभूतेषुदेवलयस्यभूतेषुदेवाइति श्रवणादित्यर्थः॥अत्रविशेष्योक्तेभ्यइति॥ वाङ्मनसीत्याद्यधिकरणत्रयेशेषसुपर्णचतुर्मुखपरमात्मसुक्रमेणलीयमानत्वेनोक्तेभ्योवारुणीसौपर्णीशेषसुपर्णचतुर्मुखेभ्यइत्यर्थः । तेषांविशिष्यलयोक्तेरुक्तसंदेहाविषयत्वादितिभावः ॥४॥ तदेवोपपादयति ॥ **अस्तीत्यादिना** ॥ ननुप्रलयकालीनभूतलयस्योत्पत्तिक्रमविपरीतक्रमवत्त्वेपिमुक्तिकालीनदेवतालयप्रतिपादकश्रुतिगतस्यभूतेषुदेवाइतिवचन -

स्योपपत्तिःकथमित्यतआह ॥ **मुक्तिश्चेति** ॥ **मुख्यार्थइति** ॥ भूतेष्वितिश्रुतेर्देवानांसाक्षादेवभूतेषुलयइत्येवंरूपंमुख्यार्थइत्यर्थः । अत्रउक्तमुख्यार्थे ॥ ॐ **नैकस्मिन्दर्शयतोहि** ॐ ॥ एकस्मिन्नग्नावेवसर्वदेवानांलयःकुतोहियस्मात्पृथिव्यामृभवइतिऋभवःपृथिव्यामितिश्रुतीप्रत्येकंभूतेषुदर्शयतोतइत्यर्थः । युक्तिंचाह ॥ **येषामिति** ॥ ननुयदितदनुत्पन्नत्वेपिस्वसमानदेवतालयस्थानत्वेनतत्रदेवानांलयस्तर्हिसौपर्ण्यादीनांस्वसमानवारुण्यादिलयस्थानेशेषादौलयःस्यादित्यतउक्तं॥ **विशेषवचनाभावेचेति** ॥ सौपर्ण्यादीनांतुविशिष्यगरुडादौलयस्योक्तत्वादितिभावः ॥ **अन्यथाव्याख्यानमिति** ॥ भूतेषुदेवाइतिश्रुतेरग्नेर्वायावित्यादिनाकृतमित्यर्थः ॥ **उक्तक्रमेणेति** ॥ इंद्रउमायांमितिश्रुत्युक्तक्रमेणेत्यर्थः । युक्त्यंतरेणान्यथाव्याख्यानंनिराकरोति ॥ **भूताभिमानिनामिति** ॥ तेजोवाय्वभिमानिनामग्निप्रवाहादीनांवाय्वभिमानिनितेजःप्रवाहविनायकयोर्लयाभावादित्यर्थः । लयाभावाच्चेतिसंबंधः ॥ **उत्पत्तिश्रुतिविरोधइति** ॥ आकाशाद्वायुर्वायोराग्निरितिश्रुतिविरोधइत्यर्थः । विपर्ययेणतुक्रमोतउपपद्यतेचेत्यत्रसर्वदेवानामुत्पत्तिक्रमवैपरीत्येनलयस्यनिर्णीतत्वादितिभावः । ननुभूतंभूताभिमानीचतद्देहोंतर्नियामकः हरिश्चाकाशशब्दोक्तइत्यनुव्याख्याने आकाशादिशब्दैर्देवानामपिगृहीतत्वात्कथंजडमात्रग्रहणमित्यतआह ॥ **देवानांत्विति** ॥ आदिसर्गांतरभावी अनुसर्गः आदिसर्गवैपरित्येनैवदेवानांलयइतिभावः ॥ ५ ॥ **उक्तेति** ॥ इयदामननादित्यत्रोक्तस्याधिकारिणांप्राणावसानत्वस्यबाधइत्यर्थः ॥ **तेजइति** ॥ तेजोभिमानिनीरमापरस्यांदेवतायांपरमात्मनिसंपद्यतइत्यर्थः ॥ **अन्यथेति** ॥ एतच्छ्रुतियुक्तिभ्यामेववागादीनांमनआदौलयस्यबाधितत्वादितिभावः ॥ **उक्तत्वादिति** ॥ कामादितरत्रेत्यर्थः ॥ **गुणांतरेति** ॥ स्वातंत्र्यादीत्यर्थः ॥ **सर्वगुणेति** ॥ संसाराभावे ईशनियम्यत्वाभावेनस्वातंत्र्यादेरपि

PDF
Foundation

संभवादितिभावः॥ॐ समनाचासृत्युपक्रमादमृतत्वंचानुपोष्य ॐ॥समादेशकालाभ्यांव्याप्त्यासमोनापरमपु-
रुषोयस्याःसमनाहरौलीयतेकुतःयतोस्याअनुपोष्यचानुपास्यैवामृतत्वंमुक्तत्वं तदेवकुतः असृत्युपक्रमात् सृतिःसंसारःक-
दापिसंसारोपक्रमणाभावात्तदपिकुतइत्यतःसमनेतिहेतुगर्भविशेषणं उपक्रमणंसंबंधः प्रत्युक्तमितिउक्तयुक्तेःप्राबल्येनतथा-
र्थानत्वयुक्तेर्बाधितत्वादितिभावः।वचनादेकादशतात्पर्ये अत्ररमायाअत्यंतसामीप्यंनामजगद्व्यापारत्यागेनवटजलाभरणरूपे
णकेवलहरिसेवारतत्वंबोध्यं॥ॐ तदपीतेः संसारव्यपदेशात् ॐ॥तदपीतेःतस्यांरमायामपीतेर्लयस्यसंसारव्यपदेशात्
विलीनोहीतिश्रुतौसंसारकारणत्वेनोक्तेरित्यर्थः॥ॐ सूक्ष्मंप्रमाणतश्चतथोपलब्धेः ॐ॥ब्रह्मरमापेक्षयातिसूक्ष्मं प्रमाण
तोगुणपरिमाणतश्च ततोधिकं कुतः ततोपलब्धेः सर्वतःप्रकृतिरितिश्रुतौतथादर्शनादित्यर्थः॥ॐनोपमर्देनातःॐ॥अतःसा
म्यतदभावयोरेवंसाधितत्वात् नोपमर्देनासाधारणगुणानुपमर्देनैवसाम्यमित्यर्थः॥ॐ अस्यैवचोपपत्तेरूष्मा ॐ॥ऊष्मा
ऊष्मपदोपेतश्रुतिरस्यैव किंचित्साम्यस्यैवोपपत्तेः उपपत्यर्थभवतीत्यर्थः।ऊष्मावरत्वंनामपरेंद्रियशक्तितिरोधायकत्वमूष्म-
सूर्यमंडलादिसाधारणंविवक्षितं अतएवेश्वरस्यसर्वेंद्रियागोचरत्वोक्त्यातदुपपाद्यतइतिबोध्यं ॥ उपपत्तेरितिषष्ठा
पेक्षितंपूरयित्वार्थमाह ॥ उपपादकेति ॥ ॐ प्रतिषेधादितिचेन्नशारीरात् ॐ॥ सर्वेत्वेतइतिश्रुतावीशान्येषुदे-
शकालव्याप्त्यादिनापिसाम्यस्यप्रतिषेधान्नरमायाःकिंचित्साम्यमपीतिचेन्न । तत्रशरीरिणोजीवादेवेशस्यदेशादिव्या-
प्तिसाम्यप्रतिषेधादित्यर्थः ॥ तदभावमुक्ताप्रतिषिद्धत्वादिति ॥ सर्वेह्यवराइत्यादिनातदभावमुक्ताऽस-
मोवेतिप्रतिषिद्धत्वादित्यर्थः ॥ शारीरत्वेनेति ॥ अनित्यदेहपरिच्छिन्नत्वेनेत्यर्थः ॥ ॐ स्पष्टोह्येकेषां ॐ॥
ऐकेषांमाध्यंदिनानामथासमाइतिश्रुतौ जीवानामसमत्वादिवादःस्पष्टोस्तिहियस्मात्तच्छरीरादेवसमत्वोक्तिरित्यर्थः ॥ ॥ ६ ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ ॐस्मर्यतेच ॐ ॥ जीवानामेवासमत्वादिकंब्रह्माद्याइतिस्मर्यतेचेत्यर्थः ॥ ६ ॥ ज्ञानिनामिति ॥ देवानामित्यर्थः । तथाचानियमइत्युक्तव्याघातइतिभावः ॥ अन्याःरुद्रादिदेवताः कलाः प्रतिबिंबांशाः क्रमात्प्राणस्यरुद्रस्येंद्रइत्यादिक्रमात् ॥ ॐतानिपरेतथाह्याइ ॐ ॥ तानीतरदैवतानिपरेपरमात्मनिविरिंचिद्वारालीयंते कुतः यस्मात्सर्वेदेवाइतिश्रुतिस्तथाहेत्यर्थः।पूर्वंभूतेषुतच्छ्रुतेरित्यत्रतदभावएवेति परमात्मनिलयाभावएवास्त्वित्यर्थः साधकाभावादितिभावः ॥ भगवत्प्रतिबिंबत्वादिति ॥ तथाचसाधकाभावोसित्यइतिभावः । विरिंचेलयांगीकारात्कथंभगवतिलयइत्यतआह ॥ विरिंचप्रविष्टानामिति ॥७॥ ॐ अविभागोवचनात् ॐ ॥ मुक्तानांसत्यकामत्वादेरीशेछातोऽविभागोऽपृथक्तदनुसारित्वमितियावत् कुतःकामेनमेकामआगादितिवचनादित्यर्थः ॥ अतएवेति ॥ सत्यसंकल्पादेरीश्वरसंकल्पानुसारित्वनियमादेवेत्यर्थः । तदेवविवृणोतियदेति ॥ सत्यानित्याइति ॥ सदातनंसत्यमितिनित्यमेवोच्यतेबुधैरित्युक्तेरित्यर्थः । स्वकामितागमनमीश्वरेछयाकथमित्यतआह ॥ तदिच्छानंतरमिति ॥ स्वकामितागमनेस्वेछायाएवकारणत्वादीश्वरेछायाःकथंकारणत्वमित्याक्षिपति ॥ कथमिति ॥ तदुत्तरत्वेनहृदयात्धृदयंमृत्योरित्येतद्व्याख्याति ॥ ईश्वरेछायाइति ॥ तात्पर्यमाह ॥ भगवदिच्छेति ॥ ८ ॥ ॥ पृथग्जनेति ॥ अज्ञजनेत्यर्थः ॥ ॐतदोकोग्रज्वलनंतत्प्रकाशितद्वारोविद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्चहार्दानुगृहीतःशताधिकया ॐ ॥ उत्क्रांतिकालेतदोकसः भगवद्देहरूपस्यत्हृदयस्याग्नेज्वलनं प्रादुर्भवति ततोधिकारीतत्प्रकाशितद्वारस्तेनप्रकाशेनप्रकाशितनाडीद्वारवान्हार्देनहृद्गतेनपरमात्मनानुगृहीतोनुगृहवानेवविद्यासामर्थ्यादपरोक्षज्ञानशक्त्या तच्छेषगत्यनुस्मृतियोगात्तस्याःविद्यायाःशेषोंगभूतायाहृदयमारभ्यब्रह्मप्राप्तिपर्यंतानुस्मरणं तद्यो

SGDF
Sri Gargeshwari Digital Foundation

गात्तत्साहित्यात् शताधिकयाशतनाडीतोअधिकयासुषुम्नाख्यनाड्यादेहान्निर्यातीत्यर्थः॥स्वोदयमारभ्यैवेति॥नसुलिंगदेहभंगमारभ्यैवेत्यर्थः । कर्मप्रारब्धं आदेहमारवेर्वा फलदमितिसंबंधः॥ज्ञानफलंनभवतीति॥गत्यनुस्मरणफलत्वादितिभावः । इतिस्मृतेः गीताभाष्योदाहृतायाः ॥ **नाविशेषप्रमाणामिति** ॥ उदाहृतस्मृतौगतिवाचकशब्दाभावादितिभावः ॥ ॐ **रश्म्यनुसारी** ॐ ॥ ज्ञानीनाड्यंतर्गतव्याप्तरश्म्यनुसारीनिर्यातीत्यर्थः ॥ ॐ **निशिनेतिचेन्नसंबंधात्** ॐ ॥ रात्रावादित्यरश्मिसंयोगोनास्तीतिचेन्न संबंधात् अंतस्थादित्यरश्मीनांतदापिसंबंधादित्यर्थः ॥ **पर्यवसितेति** ॥ समाप्तेत्यर्थः ॥ **सदेति** ॥ नाडीनांदेहसापेक्षत्वेनदेहस्यचसदाभावादितिभावः ॥ **कदाचिदिति** ॥ पूर्वंसतोप्युक्रांतिकालेऽभावोपपत्तेरितिभावः ॥ ॐ **यावद्देहभावित्वाद्दर्शयतिच** ॐ ॥ नोक्तदूषणावकाशः कुतः यावद्देहभावित्वात् नाडीरश्मिसंबंधस्यदेहसमानकालीनत्वात् कुतःयस्मात्संस्मृष्टावाइतिश्रुतिस्तथादर्शयतीत्यर्थः ॥ **इतिवचनादिति** ॥ तथातत्रस्मृतौदाक्षिणायनोत्क्रांतेःस्वर्गसाधनत्वोक्यातत्रोत्क्रांत्यभावोंगीक्रियतेतथारात्रौबाह्यादित्यरश्मिसंबंधाभावात्तदोत्क्रांतिरेवनेत्यंगीकारोपपत्तेरित्यर्थः ॥ ॐ **अतश्चायनेपिहिदक्षिणे** ॐ ॥ दक्षिणायनेपिज्ञानिनः उक्रांतिर्युक्ता कुतः अत्रायनपदस्यरश्मिपरत्वेनतत्संबंधस्यनाडीषुसर्वदासत्वादित्यर्थः ॥ **साक्षान्मोक्षशरीरस्येति** ॥ लिंगशरीरभंगस्येत्यर्थः ॥ आजनान्नजनिर्भुवीत्यादिनाजनोलोकादीनामप्यपुनरावर्तिस्थानत्वमित्यतआह ॥ **महर्लोकादीत्यतद्गुणसंविज्ञानइति** ॥ तस्यगुणस्यान्यपदार्थस्यपरपदार्थप्रत्युपसर्जनीभुतस्यान्यपदार्थेसंविज्ञानंविशेषत्वेनोपादानंयास्मिन्बहुव्रीहौनास्तिसअतद्गुणसंविज्ञानः । यथा चचित्रगुमानयेत्यादौ तथाचमहर्लोकएवआदिर्येषांजनोलोकादीनांतद्गंतारइत्यर्थः ॥ **कालविशेषस्यवस्तुतःसत्वात्तानिषे**

धायोगादित्यतआह ॥ **भवतीति** ॥ स्मृत्युक्तदक्षिणायनोत्तरायणपदप्रतिपाद्यइतिशेषः ॥ ९ ॥ **अन्यथेति** ॥ सहकार्यभावादितिभावः ॥ पूर्वोक्तिः गत्यनुस्मृतियोगादित्युक्तिः ॥ **स्मृतिविरोधइति** यंयंवापीतिस्मृतिविरोध इत्यर्थः ॥ **लिंगस्येति** ॥ आचार्यस्तुतेगतिंवक्तेतियदाचार्योपदेशरूपलिंगमुक्तंतस्यापीत्यर्थः ॥ **गतेःकालकृतत्वादिति** ॥ गत्यनुस्मरणस्यज्ञानशेषत्वइवकालज्ञानशेषत्वेमानाभावादितिभावः ॥ **संपूर्णेति** ॥ चतुर्विधइत्यर्थः । गत्यतिरिक्तहेतुत्वादित्यर्थः ॥ ॐ **योगिनःप्रतिस्मर्येतेस्मार्तेचैते** ॐ ॥ एतेब्रह्मचंद्रगती योगिनःप्रतिस्मर्येते अग्निर्ज्योतिरितिधूमोरात्रिरितिचस्मृतावुच्येतेज्ञानादिसाध्यतयास्मर्येतइतियावत् । नकेवलंज्ञानसाध्यं किंतुस्मार्तेचस्मृतेरिमेस्मार्तेगत्यनुस्मृतिसाध्येस्मर्येतेत्यर्थः । योगिनइतिद्वितीया नन्वग्निर्ज्योतिरित्यत्रयोगिपदाभावात्कथंयोगीतिविशेषणादित्युक्तमित्यतआह ॥ **उपलक्षणमिति** ॥ अत्रस्मृतौ अत्रेतिगीतातात्पर्यश्लोकव्याख्यानावसरेएवोक्तत्वादित्यर्थः ॥ लौकिकसाधनेक्रियानुवृत्तिःअलौकिकसाधनेमनोवृत्तिरितिविवेकः॥१०॥**इतीश्रीमतत्वप्रकाशिकावाक्यार्थमंजर्यांशर्करा श्रीनिवासविरचितायांचतुर्थाध्यायस्याद्वितीयपादः समाप्तः** ॥ ॥ ॥ ॥ ॥

श्रीगुरुभ्योनमः ॥ ॐ **अर्चिरादिनातत्प्रथितेः** ॐ ॥ अर्चिरेवादिर्यस्यतेनमार्गेणगच्छति कुतःतत्प्रथितेःतस्योक्तमार्गस्य तेर्चिषमितिश्रुतौप्रसिद्धेरित्यर्थः ॥ **अयोगेति** ॥ स्वगंतव्यमार्गनिर्णयादितिभावः ॥ **सोमादिनंतरमिति** ॥ सोमंवैश्वानरंचंद्रमित्युक्तेरितिभावः ॥ **प्रबलश्रुत्यनुसारेणेति** ॥ उदाहृतश्रुतिस्मृतिसाहित्येनतेर्चिषमभिसंविशतीति प्रबलश्रुत्यनुसारेणेत्यर्थः॥ १ ॥ सवायुमागच्छतीत्यस्याःश्रुतेःप्रागुक्तरीत्यावायोर्द्वितीयप्राप्यत्वप्रतिपादकत्वमितिभावः ।

CC-BF Foundation

व्यवस्था वायोरंतरमुहुःप्राप्यत्वरूपा ॥ ॐ वायुशब्दादविशेषाविशेषाभ्यां ॐ ॥ वायुर्द्वितीयप्राप्यः कुतः अविशेषविशेषाभ्यां सामान्यतोविशेषतश्चवायुशब्दाद्वायोर्द्वितीयप्राप्यत्वप्रतिपादकश्रुतेरित्यर्थः ॥ यावदर्थे यावत्यर्थे सामान्यप्रसिद्धिविरोधेनेति ॥ तत्प्रथितेत्युक्तार्चिषःप्रथमप्राप्यत्वप्रसिद्धिविरोधेनेत्यर्थः ॥ अथाविशेषविशेषाभ्यांसामान्य विशेषाभ्यांवायुशब्दाद्वायुशब्दोपेतसामान्यश्रुतेः द्वितीयप्राप्यत्वप्रतिपादकतयावायुशब्दोपेतविशेषश्रुत्याबाधेनवायोर्द्वितीयप्राप्यत्वप्रतिपादकत्वंतदर्थइतिसूत्रस्यार्थांतरपरतयाभाष्यंव्याचष्टे ॥ वायुश्रुतेरिति ॥ २ ॥ ॐ तटितोधिवरुणः संबंधात् ॐ ॥ तटितःतटिल्लोकादधि उपरि वरुणःप्राप्यः कुतःसंबंधात् तटितश्रुतौवरुणलोकस्यतदुपरिसंबंधोक्तेरित्यर्थः ॥ निर्णीतइति ॥ विवादविषयस्यनिर्णीतत्वादित्यत्रविवादाऽभावादितिभावः ॥ ३ ॥ अन्यथावायोरिति ॥ प्रधानवायोरित्यर्थः । नीचानामेवप्रथमप्राप्यत्वादितिभावः ॥ ॐ आतिवाहिकस्तल्लिंगात् ॐ ॥ अर्चिषोनंतरं प्राप्योवायुरिति आतिवाहिकःतन्नामकोमुख्यवायुपुत्रएवकुतः तल्लिंगात् पूर्वप्राप्यत्वस्यामुख्यवायुलिंगादितिभावः । उक्तलिंगेनसंशयनिवृत्तिःस्यादित्यतआह ॥ मुख्यस्यापीति ॥ ॐ उभयव्यामोहात्तत्सिद्धेः ॐ ॥ सप्तम्यर्थेपंचमी उभयस्मिन्व्यामोहात्संशये सत्यपितत्सिद्धेः तस्यपूर्वोक्तः आतिवाहिकः पश्चादुक्तोमुख्यइत्युक्तस्यार्थस्यसिद्धेरित्यर्थः ॥ दिवस्पतित्वेति ॥ भारतीपतित्वेत्यर्थः ॥ वरुणावरायाइति । तटिद्विद्युच्छब्दयोरेकार्थत्वादितिभावः ॥४॥ ॐ वैद्युतेनैवततस्तच्छ्रुतेः ॐ ॥ वैद्युतेनैवविद्युत्पतिनावायुनैवब्रह्मप्राप्तेर्यतस्ततःसएवांतिमप्राप्यः तदेवकुतः तच्छ्रुतेस्तेनैवब्रह्मप्राप्तेः सएवेतिश्रुतिसिद्धत्वादितिभावः ॥ राजादाविति ॥ कृप्तस्यातिप्रियस्यांतिमप्राप्यस्यमंत्रिणएवराजादिप्रापयितृत्वदर्शनादितिभावः ॥ तत्पुरुषइति॥तस्याःविद्युतःपुरुषोभर्तामन

SGDF
Sri Gargeshwari Digital Foundation

नान्मनुः भगवान्तत्पुत्रत्वान्मानवोवायुरनानधिकारिणोब्रह्मगमयतीत्यर्थः ॥ ५ ॥ अनुस्मृत्यनुपपत्तेरिति ॥ मार्गवद्गम्यस्याप्यनुस्मर्तव्यत्वादितिभावः ॥ विनैवेत्यस्येति ॥ संहारइतिवक्ष्यमाणेनान्वयः संदेहबीजंसंदेहद्वयबिजं ॥ॐकार्यंबादरिरस्यगत्युपपत्तेःॐ॥ सएनानित्यत्रोक्तंब्रह्मकार्यमुत्पत्तिमच्चतुर्मुखमेवकुतोज्ञानिनांबद्धत्वेनास्यगत्युपपत्तेः। चतुर्मुखप्राप्तेरवोपपत्तेरितिबादरिराचार्योमन्यतइत्यर्थः । संततत्वात् अनुस्यूतत्वात् ॥ चतुर्मुखस्यैवेति ॥ अवत्धत्वेनैवभगवतःप्राप्यत्वादितिभावः ॥ ॐ विशेषितत्वाच्चॐ ॥ प्राप्नोतिब्रह्माणंचतुर्मुखइतिश्रुतेश्चतुर्मुखत्वेनब्रह्मणाविशेषितत्वान्नैवकार्यब्रह्मशब्दार्थः ॥ ॐसामीप्यात्तुतद्व्यपदेशःॐ ॥ ज्ञानिनस्तद्व्यपदेशः परब्रह्मप्राप्यत्वव्यपदेशः सामीप्यात्तुतत्प्राप्तेःकालतःसामीप्यादेवेत्यर्थः ॥ बत्धत्वसाम्यादिति ॥ प्रथमप्राप्यत्वे बाधकत्वेनोक्तस्यबत्धत्वस्य प्रलयादर्वाग्द्वितीयप्राप्यत्वेपिबाधकत्वादेवमपिद्वितीयप्राप्यत्वेप्रथममेवप्राप्तिसंभवादितिभावः ॥ ॐकार्यात्ययेतदध्यक्षेणसहातःपरमभिधानात्ॐ ॥ कार्यात्ययेमहदादिकार्याणामत्ययेनाशलक्षणेप्रलये तदध्यक्षेणचतुर्मुखेनसहातःचतुर्मुखात्परंज्ञानीगच्छति कुतस्तेहीतिश्रुतौतथाविधानादित्यर्थः ॥ ॐस्मृतेश्चॐ ॥ ब्रह्मणासहेतिस्मृतेःकार्यात्ययेइत्युक्तार्थोज्ञाप्यतइत्यर्थः । परस्यांतइत्यत्रपरशब्दार्थमाह ॥ परब्रह्ममुक्तिरिति ॥ ॐपरंजैमिनिर्मुख्यत्वात् ॐ ॥ सएनानित्यत्रब्रह्मपरंपरमाख्यमेव कुतःतत्रब्रह्मशब्दस्यमुख्यत्वादितिजैमिनिराचार्योमन्यतइत्यर्थः ॥ ॐदर्शनाच्चॐ ॥ परस्यब्रह्मणएवापरोक्षतयादर्शनात्तदेवात्रोक्तंब्रह्मेत्यर्थः ॥ ॐनचकार्येप्रतिपत्यभिसंधिःॐ ॥ कार्येब्रह्मणिप्रतिपत्तिरुपास्तिःप्राप्नुवानीत्यभिसंधिरिच्छातदुभयंनास्तीत्यतोपिनकार्यप्राप्यमित्यर्थः ॥ साधकेति ॥ इच्छारूपेत्यर्थः । ननुपक्षद्वयस्याप्यपरिहार्यत्वात्क्रमंविनैवोभयप्राप्तिरस्त्वित्यतआ-

SGDF
Sri Gargeshwari Digital Foundation

॥ ॥ महाफलमिति ॥ अक्रमस्यक्रमाभावस्यक्रमांतरेणान्यथासिद्धिंपरिहरति ॥ क्रमांतरेति ॥ ॐअप्रतीकालंबनान्नयतीतिबादरायणउभयथाचदोषात्तत्क्रतुश्चॐ ॥ प्रतीकेदेहेब्रह्मपश्यंतःप्रतीकालंबनाः व्याप्तब्रह्मपश्यंतोऽप्रतीकालंबनास्तत्रवायुः अप्रतीकालंबनात्परंब्रह्मनयतीति प्रतीकालंबनान्चतुर्मुखं कुतः उभयथाचदोषात् सर्वान्कार्यमेवनयतिपरमेवनयतीत्यंगिकारेचोक्तदोषप्राप्तेः किंमिच्छानुसारेणोभयप्राप्तिरित्यतउक्तंतत्कुतश्चेति श्रुतिग्रहणमेतत् सयथाकामइतिश्रुतेर्यतोतोनेछानुसारेणप्राप्तिरित्यर्थः ॥ कार्यमेवनयतीति ॥ अन्यव्यावृत्तोरिति परप्राप्तग्रहणेकार्यप्राप्तौ उक्तहेत्वनुपपत्तिलक्षणदोषस्तदास्यात् यदिकार्यप्राप्तावुक्तहेतोःपरप्राप्तिबाधकरूपत्वेनकार्यमात्रप्राप्तौ विशेषहेतुत्वंस्यान्नैवमित्यर्थः । ननुबाधकत्वेनगत्यनुपपत्तेरुक्तत्वात्कथंविशेषहेत्वभावइत्यतआह ॥ एषांपरप्राप्तिरिति ॥ प्रमाणबलेनेति ॥ ब्रह्मशब्देनमुख्यार्थदर्शनात्यास्याभिसंधिरूपयुक्तिरूपप्रमाणबलेनत्यर्थः ॥ अन्यानिषेधकत्वाभावइति ॥ प्राप्नोतिब्रह्माणंचतुर्मुखमित्यादाववधारणाद्यभावादितिभावः ॥ ननुगमयतीत्यत्रब्रह्मशब्दस्यविष्णौमुख्यत्वेविशेषहेत्वभावात्कथंतदभावइत्यतआह ॥ केषांचिदिति ॥ प्राप्नोतिब्रह्माणंचतुर्मुखमितिप्रमाणबलेनेत्यर्थः । दर्शनोपास्त्यभिसंधीनामपिविशेषहेतुत्वंपराचष्टे । कार्यप्राप्तिमतांचेति । ननुपक्षद्वयोक्तदोषाभावेपिपक्षद्वयांगीकारेजैमिनिमतविरोधःस्यादित्यतआह ॥ मुनिमतयोश्चेति ॥ ॐविशेषंचदर्शयतिॐ ॥ देवांइतिश्रुतिरप्रतीकालंबनादिविशेषंचदर्शयतीत्यर्थः ॥ ६ ॥ इतिश्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यांशर्करा-श्रीनिवासीवरीचितायांचतुर्थाध्यायस्यतृतीयःपादः समाप्तः ॥ ॥ ॥

॥ ९ ॥

॥ श्रीरस्तु॥ गम्यत्वाभावेपितस्यार्चिरादिवन्मार्गत्वप्राप्तेरितिभावः। मुक्तभोगस्यैवप्रसक्तौमुक्तोब्रह्मातिक्रम्यानतिक्रम्यवा भोगान्भुंक्तइतिसंदेहप्रकारकथनमशक्यमित्यतआह ॥ तस्येति ॥ अन्यथामुक्तेःपुरुषार्थत्वंनस्यादितिभावः ॥ अर्चिराद्यतिक्रमोक्तिरिति ॥ अर्चिरादावतिक्रमसहदृष्टप्राप्यस्यग्रामादावतिक्रमसहदृष्टगम्यत्वस्यचब्रह्मणिदर्शनादितिभावः । सेतुरिवसेतुराश्रयोभगवान् अंधःस्वरूपाविर्भावरहितः ॥ ॐसंपद्यविहायस्वेनशब्दात्ॐ ॥ ज्ञानीपरंब्रह्मसंपद्यप्राप्य अविहायतदनतिक्रम्यस्वरूपेणावस्थितोभोगानभुंक्तेकुतःशब्दादिमांधोरामितिश्रुतेरितिभावः ॥स्वरूपेणावस्थानस्यसंसारेपिसत्वादन्यथारूपंपरित्यज्येत्युक्तं ॥ १ ॥ भोगासिद्धेरिति ॥ मुक्तस्येतिशेषः । कृतकृत्यस्याक्रियायाःफलितार्थत्वादितिभावः ॥ ॐमुक्तःप्रतिज्ञानात्ॐ ॥ सतत्रपर्येतीत्यत्रभोगभोक्तृत्वेनोक्तोमुक्तएवकृतःप्रतिज्ञानात् अथेतिश्रुत्यंतरेमुक्तस्यैतादृशभोगप्रतिभानादित्यर्थः । अहरहःप्रतिदिनं भोगाभावएतावंतंकालंसुखमहमस्वाप्समितिपरामर्शविरोधइत्यतउक्तं ॥ दिव्येति ॥ तत्प्राप्त्या ब्रह्मप्राप्त्या ॥ तद्भावेति ॥ दिव्यभोगसद्भावेत्यर्थः । अकृतिमत्वं क्रियारहित्वं । अतएवेत्युक्तंविवृणोति ॥ श्रुतिविरोधादिति ॥ अथयथैनमुक्तोनुप्रविशतीतिश्रुतौमुक्तस्यप्रवेशलक्षणक्रियाप्रतीतेरितिभावः । क्रियायाःफलरूपत्वेनकृतकृत्यत्वमुपपाद्यतइतिहृदयं ॥ प्रकरणभेदइति ॥ निर्गुणसगुणपरत्वेनेत्यर्थः ॥ २ ॥ ज्योतिषइति ॥ पूर्वाधिकरणंयज्योतिःप्राप्यभोगभोक्तुर्मुक्तत्वमुक्तंतस्यज्योतिषइत्यर्थः ॥ ब्रह्मप्राप्त्यनुपपत्तेरिति ॥ परंज्योतिरुपसंपद्येत्युक्तब्रह्मप्राप्त्यनुपपत्तेरित्यर्थः ॥ सूर्यमिति ॥ ज्योतिःप्रकाशरूपंसूर्यंप्राप्नुमइत्यर्थः । सद्भावाज्योतिश्चरणेत्युक्तरीत्या ॥ सतेजसीति ॥ यथापादोदरःसूर्यःत्वचाजीर्णदेहेनविमुच्यते । एवंतेजसिसूर्येसंपन्नःप्राप्तःसोधिकारीपाप्मनाकर्मणाविः

PDF
Sri Gargeshwari Digital Foundation

मुक्तोभवतीत्यर्थः ॥ **एकवाक्यत्वेपि** ॥ एकार्थत्वेपीत्यर्थः । तदेवदर्शयति ॥ **तथाचेति** ॥ अत्रपरंज्योतिरित्यत्रच ॥ ॐ **आत्माप्रकरणात्** ॐ ॥ परंज्योतिरित्युक्तंज्योतिरात्मापरमात्मैवकुतः आत्मेतितत्प्रकरणादित्यर्थः ॥ ३ ॥ ॥ **असित्धेरिति** ॥ सायुज्यभाग्भोगाभोक्तृत्वादितिभावः सायुज्यस्यैवाप्रसक्तत्वात्सायुज्यभाग्भिर्भुज्यंतेतिसंशयानुपपत्तिरित्यतआह ॥ **प्राप्तिश्चेति** ॥ ॐ **अविभागेनदृष्टत्वात्** ॐ ॥ मुक्ताविभागेनपरमात्मभोगापरित्यागेनतद्भुक्तानेवेतियावत् ॥ भोगान्भुङ्क्तेकुतःयानेवेतिश्रुतौतथादृष्टत्वादित्यर्थः ॥ ४ ॥ पारं अंतं ॥ **अयोगादिति** ॥ सर्वदेहत्यागस्यैवमुक्तिशब्दार्थत्वादितिभावः ॥ ॥ ॐ **ब्राह्मेणजैमिनिरुपन्यासादिभ्यः** ॐ ॥ मुक्तोब्राह्मेणब्रह्मसंबंधिनादेहेनभोगान्भुङ्क्तेतिजैमिनिराचार्योमन्यतइत्यर्थः ॥ कुतःब्रह्मणेतिश्रुतौतथोपन्यासात् उक्तत्वात् आदिशब्दोक्तश्रुतियुक्तिभ्यांचेतिमन्यतइत्यर्थः । ग्रहवत् पिशाचवत् तदानींसर्वेषांब्रह्मप्रवेशादित्यर्थः ॥ ॐ **चितिमात्रेणतदात्मकत्वादित्यौडुलोमिः** ॐ ॥ मुक्तःचितिमात्रेणज्ञानमात्मकेनदेहेनभोगान्भुङ्क्तेनचैवंसंसारिसमानत्वं कुतः तदात्मकत्वात् तस्यदेहस्यमुक्तस्वरूपत्वात् इत्यौडुलोमिराचार्योमन्यतइत्यर्थः । जीवस्य मुक्तस्य वस्तुविकल्पेति वस्तुनिमुक्तेदेहवत्वतद्राहित्यरूपद्वैविध्यायोगात् ॥ ॐ **एवमप्युपन्यासात्पूर्वभावादविरोधंबादरायणः** ॐ॥ एवमपिचिन्मात्रदेहत्वेनभोगान्भुङ्क्तेइत्येवंप्रकारेणाप्युपन्यासात् सवाएषइतिश्रुत्युक्तत्वात्पूर्वभावात्पूर्वस्यजैमिन्युक्तस्यदेहांतरत्यागेनब्राह्मेणदेहेनसत्वस्यभावात् ब्रह्मणीतिश्रुतिसिद्धत्वेनसत्वादविरोधंजैमिन्यौडुलोमिमतयोर्मर्त्यामर्त्यदेहभावाभावाभ्युपगमेनविरोधाभावंबादरायणोमन्यतइतिभावः ॥ ५ ॥ **तत्तदुपायेति** ॥ तत्रसाधनसंपादनोपायसाध्यानिसाधनान्यन्नपानादीनितत्साध्यइत्यर्थः । ओकसि ग्रहे ॥ ॐ **संक-**

SGDF Sri Gargeshwari Digital Foundation

ल्पादेवचतच्छ्रुतेःॐ॥ मुक्तस्येदंभूयादितिसंकल्पादेवभोगोभवति नतुप्रयत्नेन कुतः तच्छ्रुतेः संकल्पादेवेतिश्रुतौतस्यार्थ-
स्यश्रवणादित्यर्थः ॥ विपक्षेति ॥ पूर्वपक्षेत्यर्थः । व्याख्यातोनकेषामित्यादिना ॥ ६ ॥ प्रतिहारेति ॥ द्वारपालका
इत्यर्थः॥ अतएवचानन्याधिपतिः ।मुक्तोऽनन्याधिपतिःस्वोत्तमेभ्योऽन्याधिपतिरहितः कुतः अतएवसंकल्पादेवेत्यर्थः ॥७॥
देहिनः देहाभिमानवतः ॥ नहवैशरीरेति ॥शरीराभिमानवंतंप्रियाप्रिययोःसुखदुःखयोः अपहतिरसंबंधोनास्तीत्यर्थः ।
सायुज्यभाजामपिकदाचिद्भोगांगीकारेणतदानींब्रह्मदेहेनोत्पत्त्यभावात् कथंचिदित्युक्तं॥ॐअभावंबादरिराहह्येवंॐ॥
मुक्तस्यचिन्मात्रदेहादन्यदेहाभावंबादारिर्मन्यते कुतः हियस्मादशरीरोवेतिश्रुतिरेवमाहेत्यर्थः ॥ ॐ भावंजैमि
निर्विकल्पाम्नानात् ॐ ॥ कदाचिद्भोगार्थंमुक्तस्यचिन्मात्रदेहादन्यप्राकृतदेहस्यभावंसत्वंजैमिनिर्मन्यते कुतः चिता
वाअचितावेतिश्रुतौविकल्पाम्नानात् विकल्पेनोभयशरीरेणभोगाभिधानादित्यर्थः ॥ ॐ द्वादशाहवदुभयविधंबाद-
रायणोऽतः ॐ॥उभयविधंदेहभावाभावाख्यप्रागुक्तमुभयप्रकारंबादरायणःस्वमतंमन्यतेकुतः अतः उभयोरपिप्रमाणक-
त्वात् विरुत्धंकथंस्वमतमित्यतउक्तं ॥ द्वादशेति । यथाद्वादशाहाख्ययागस्यक्रतुत्वंसत्रत्वंचाविरुत्धंतथेत्यर्थः
॥ अनुपपत्तेरिति ॥ सदेहत्वेदुःखादेरदेहत्वेभोगासंभवस्यचोक्तत्वादित्यर्थः ॥ ॐतन्वभावेसंध्यवदुपपत्तेः ॐ ॥
संध्यवत्स्वप्नावस्थायामभिमानाभावेनदेहाभावेपियथायोगस्तथामुक्तौतन्वभावेबाह्यदेहाभावेपिभोगोपपत्तेरित्यर्थः ॥ स्व-
प्नावस्थायां देहसत्वेन कथं संध्यवदितिदृष्टांतोक्तिरित्यतआह ॥ अनभिमानस्येति ॥ तदभिमानाविषय
स्यतत्कार्यकारित्वेनतंप्रत्यविद्यमानकल्पत्वादित्यर्थः ॥ ननुस्वप्नदृष्टपदार्थानांमिथ्यात्वेनतद्विषयकभोगएवासंप्रतिपन्न-
इत्यतआह ॥ स्वाप्नार्थानामिति ॥ ॐ भावेजाग्रद्वत् ॐ ॥ भावेमुक्तौशरीरसत्वेजाग्रदवस्था-

SGDF
Sri Gargeshwari Digital Foundation

वत्सुतरांभोगोपपत्तिरित्यर्थः ॥ ननुदेहसत्वांगीकारेदुःखमेवापादितंतेनभोगानुपपत्तिरुक्ता अतस्तदुपपत्तिकथनायभावेजाग्रद्वदितिसूत्रंव्यर्थमित्यतआह ॥ **वक्ष्यमाणेति** ॥ प्रदीपवदावेशइत्यत्रवक्ष्यमाणंयदुःखादिप्राप्तिरूपदूषणनिराकरणंतत्प्रस्तावायेत्यर्थः।देहसद्भावपक्षमप्रस्तुत्यतत्करणेतस्यैवतद्विषयत्वंनज्ञायेतअतस्तत्प्रस्तावार्थमिदंसूत्रमितिभावः। ॥ **ॐ प्रदीपवदावेशस्तथाहिदर्शयति ॐ** ॥ मुक्तानामावेशःवाव्यदेहप्रवेशःप्रदीपवत्प्रदीपस्यदीपिकाप्रवेशइवकृतःहियस्मात्प्राणोहीतिश्रुतिस्तथामुक्तौदुःखाभावंदर्शयतीत्यर्थः । दीपिकातैलवर्तिकाश्रयदीपपात्रंननुभाष्येतत्प्रकाशयंतइत्येतदनुपयुक्तंकिमर्थमित्यतआह ॥ **तत्प्रकाशयंतइति** ॥ यथाप्रदीपोदीपिकांप्रकाशयंस्तैलाद्येवभुङ्क्तेतथामुक्तास्तज्जडशरीरंप्रकाशयंतःसाधूनेवभोगाननुभवंतीतिप्रदीपवदितिवक्तुःसूत्रकारस्यविवक्षातेनभाष्येणोच्यतइत्यर्थः । ननुतीर्णोहीतिश्रुतिर्नदेहवतोदुःखाभावंप्रतिपादयति किंतुमुक्तस्यदुःखाभावंतदापादनानुकूलमेवेत्यतआह ॥ **देहसद्भावस्त्वित्यादिना** ॥ **यतश्चेति** ॥ कुतश्चेत्यर्थः ॥ **ॐ स्वाप्ययसंपत्योरन्यतरापेक्षमाविष्कृतंहि ॐ** ॥ स्वाप्ययःसुप्तिःसंपत्तिर्मुक्तिःअन्यतरशब्दःउभयपरःतथाचतीर्णोहीतिवाक्यंस्वाप्ययसंपत्योरन्यतरापेक्षंसुप्तिमुक्तिरूपोभयपरंकृतःहियस्मादस्यवाक्यस्यतदुभयविषयत्वमाविष्कृतंस्पष्टीकृतमित्यर्थः ॥ **श्राद्धाधिभोक्तुरिति** ॥ पुत्रकृतश्राद्धेनसुखभोक्तुरित्यर्थः ॥ अपितृत्वेअसंगित्वेचपितृहेश्येनकृतगयाश्राद्धभोगायोगादितिभावः । पुण्यपापवर्जिताःसर्वदोषनिवृत्ताइति ॥ **अनुवादइति** ॥ भुंजतेचसुखान्येवनदुःखदीनकदाचनेत्यत्रगुणमात्रस्वरूपिणः तीर्णाहिसर्वशोकांस्तइतिअस्यहेतुत्वेनोपयोगाभावादितिभावः ॥ ८ ॥ इयतामर्यादा कामान्काम्यान् ॥ **अन्यथेति** ॥ काम्यस्यापिसृष्ट्यादिव्यापारस्यलाभइत्यर्थः॥ **ॐ जगद्व्यापारवर्जं ॐ**॥मुक्तःजगत्सृष्ट्यादिव्यापारवर्जंतदतिरिक्तानेव

कामानान्योतीत्यर्थः ॥ **ॐ प्रकरणादसन्निहितत्वाच्च ॐ** ॥ अस्यजीवप्रकरणात्वाज्जीवानांचजगद्व्यापारेअसन्निहितत्वात्सामर्थ्यरहितत्वाच्चेत्यर्थः । सर्वश्रुतेः सर्वशब्दस्य अस्यजीवप्रकरणत्वंकुतोज्ञायतइत्यतआह ॥ **शरीरभेदादिति** ॥ शिरोमध्यविदारणादेहादुत्क्रम्येत्यर्थः ॥ **ॐ प्रत्यक्षोपदेशादितिचेन्नाधिकारिकमंडलस्थोक्तेःॐ** ॥ तायोवेदेतिश्रुतौप्रत्यक्षंस्पष्टंमुक्तस्यसर्वदेवपूज्यत्वोपदेशात्तस्यजगदैश्वर्यमस्तीतिचेन्न । आधिकारिकाणांस्वयोग्याधिकारनियुक्तानांदेवानांमंडलेसमुदायेनियामकतयास्थितस्यचतुर्मुखस्यतत्रोक्तेर्नाशेषमुक्तानांजगदैश्वर्यमित्यर्थः ॥ **ताबाइति** ॥ ताएताश्चतस्रःभूर्भुवस्वर्महरितिचतस्रोव्याहृतयोव्याहृतिशब्दवाच्याआनिरुध्यादिभगवद्रूपाविशेषाश्चतुर्धाप्रत्येकमनिरुध्यादिभेदेनचतुर्धाभवंति एवंचतस्रश्चवस्रःषोडशरूपविशेषाःव्याहृतिशब्दवाच्याभवंति ताःव्याहृतयोऽधिकारीवेदास्मैज्ञानिनेसर्वेदेवाबलिंपूजांकुर्वंतीत्यर्थः ॥ **महाचमस्यइति** ॥ महाचमस्यश्चतुर्मुखःप्रवेदयतेजानातीत्यर्थः । महाचमसनामासौयस्मादतिचमत्कृतिः । महाचमस्यस्तद्ज्ञानीब्रह्मासंपरिकीर्तितइतिप्रमाणबलादित्यर्थः । सूत्रेवेदेत्यनुत्कृताधिकारिकेतिपदप्रयोगेकिंबीजमित्यतआह ॥ **अन्यदेवतानामिति** ॥ मुक्तेषुचतुर्मुखान्यदेवेषुनियामकत्वार्थकाधिकारिपदप्रयोगेतेषांस्वावरनियामकत्वंसूचितमितिभावः ॥ **नचानेनेति** ॥ **आत्मेत्येवंपरंदेवमिति** ॥ आत्मत्वमात्रोपासनप्रतिपादकेनेत्यर्थः ॥ **संपूर्णमोक्षाभावेति** ॥ चतुर्विधमोक्षमध्ये उत्क्रांत्यभावोक्तेरित्यर्थः । एतद्विवरणंतुकेचित्तुमानुषामुक्तिमनुक्रम्यैवदेहतः देहपातेतुदेहस्यदोषान्भुंक्त्वैवसर्वशः । मरणेच्छून्नतादींस्तुस्वकीयारब्धकर्मजान् । देहेजीर्णेतुगच्छंतिदृष्ट्वाविष्णुमनुज्ञया पुनरत्रैवतिष्ठंतिनित्यानंदैकभागिनइतिब्रह्मवाष्योक्तदिशाज्ञेयं।महाज्ञानागच्छंतिक्षीरसागरमित्युक्त्यातदतिरिक्तानांक्षीरसागरस्थस्येतद्वीपगमनंनास्तीतिप्राप्तंतत्रविरोधमाशंक्यपरिहरति ॥ **नचे-**

PDF Sri Gargeshwari Digital Foundation

ति ॥ बहुनात्रकिमुक्तेनयावच्छ्वेतंनगच्छंति योगीतावन्नमुक्तःस्यादित्यनेनेत्यर्थः । ननुयोग्यत्वंचात्रविवक्षितामितिगीताभाष्येश्वेतद्वीपगमनेयोग्यताविशेषस्यप्रयोजकत्वोक्त्यासर्वेषांश्वेतद्वीपगमननिषेधात् कथंसर्वेषांसकृच्छ्वेतद्वीपगमनांगीकारइत्यतआह ॥ योग्यत्वंचात्रेति ॥ नात्रश्वेतद्वीपगमनेयोग्यताविशेषापेक्षोच्यतेकिंतुतद्वासएवं । अत्रैवचस्थितिस्तेषामित्यवस्थानस्यैवप्रकृतत्वादितिभावः ॥ सालोक्यादिति ॥ भगवतासमानलोकस्थितत्वंसालोक्यंचतुर्भुजादिसमानरूपवत्वंसारूप्यंसमीपस्थत्वंसामीप्यं भगवद्देहेनभोगःसायुज्यमेतदनंतर्भावादित्यर्थः ॥ उक्तक्रमेणेति ॥ अत्रैवचस्थितिस्तेषामंतरिक्षेचकेचनेत्युक्तक्रमेणेत्यर्थः। ईश्वरस्यसर्वत्रावस्थितेरिति । तथाचतल्लोकस्थरूपाविशेषेणसालोक्यादिकमक्षतमितिभावः ॥ ॐ विकारावर्तिचतथाहिदर्शयति ॐ ॥ विकारंसंसारमावर्तयतीतिविकारावर्ति संसारविषयव्यापरणंमुक्तानांनास्ति कुतःहियस्मादितिप्रमितश्रुतिस्तथाहेत्यर्थः । व्यापरणं व्यापारः ॥ ९ ॥ ॥ वृत्धिन्हासेति ॥ आनंदवृत्धिह्रासेत्यर्थः ॥ अन्यथेति ॥ उपासनादिना आनंदादिवृध्यनंगीकारइत्यर्थः ॥ भोगानांतादृशत्वेप्यानंदादेस्तादृशत्वंकृतइत्यतआह ॥ करणेति ॥ ॐ स्थितिमाहदर्शयतश्चैवंप्रत्यक्षानुमानेॐ॥ ब्रह्मणीतिश्रुतिर्मुक्तानांस्थितिमेकप्रकारेणावस्थानमाहमहतांप्रत्यक्षं ॥ मुक्तोनवृत्धिमान्तत्धेतुशून्यत्वादित्यनुमानमेवंप्रकारेणावस्थानंचदर्शयतइत्यर्थः ॥ उपासनसद्भावमिति ॥ उपासनासद्भावेनानंदादिवृत्धिसद्भावमाशंक्येत्यर्थः । श्रुतौदर्शनमेवोच्यते नतूपासनमित्यतआह ॥ उपासनइति ॥ ॐ भोगमात्रसाम्यलिंगाच्च ॐ ॥ भोगमात्रस्यसाम्येमुक्तभोगस्यानंदवृध्याद्यकारणात्वेलिंगाच्चलिंगसद्भावाच्चेत्यर्थः ॥ विशेषंचाहेति ॥ अयंचविशेषोमुक्तविरिंचेतरेषांमुक्तानामितिबोध्यं ॥ स्मृतिगतमुक्तानामित्यस्यापितदितरमुक्तपरत्वात् यथोक्तमनुव्याख्याने

SGDF Sri Gargeshwari Digital Foundation

मुक्तानांतुतदन्येषांसमुद्रतरलोपमेति व्याख्यातंचैतत्सुधायांब्रह्मणइतिविशिष्याभिधानेकोहेतुरित्यतआह ॥ मुक्तानां-
त्विति ॥ विशेषबलेनवृद्धिह्रासवतीत्यर्थः ॥ यथोक्तमवृद्धिह्रासरूपत्वमित्यादीति ॥ एतदेवेति ॥ अवृद्धि-
ह्रासरूपत्वमित्येतदेवेत्यर्थः ॥ १० ॥ ॐ अनावृत्तिःशब्दादनावृत्तिःशब्दात् ॐ ॥ मुक्तानामनावृत्तिःनतु-
स्वर्गिवत्पुनरावृत्तिःकुतःनचपुनरावर्ततइतिशब्दाच्छ्रुतेरित्यर्थः ॥ सर्वान्कामानित्यस्याःश्रुतेरपुनरावृत्तिप्रतिपादकत्वाभा
वात्तदुदाहरणमसंगतमित्यतस्तात्पर्यमाह ॥ किंचेति ॥ व्याहतत्वादिति ॥ समस्तकालसमाप्तेःक्वचित्काल-
एववक्तव्यत्वेनव्याहतत्वादित्यर्थः ॥ सूत्रस्यैवेति ॥ नत्वध्यायमात्रावधारणायैतेनसर्वेव्याख्याताइत्यादिवत्सूत्रा-
वयवस्येत्यर्थः ॥ ११ ॥ शास्त्रार्थमुपसंहरति ॥ तदेवमिति ॥ अत्रसाक्षात्कारांतेनतृतीयस्यासिद्धिरित्यंतेनचतु
र्थाध्यायस्यगुणपूर्णतयेतिप्रथमस्यानिर्दोषतयेतिद्वितीयस्यचार्थउपसंहृतःतत्रविरक्तीत्यथशब्दस्यसिद्धेरित्यंतेनातःशब्दस्याशे
षगुणेतिनारायणइतिचब्रह्मशब्दस्यचार्थोपसंहारइतिविवेकःअशेषमितिस्वरवर्णपदाद्यात्मकंसर्वमपिशास्त्रंभक्तयापठतामत्यं-
तमंगलंमोक्षादिसाधनंभवतीत्यर्थः । विशेषणत्रयतात्पर्यंवदन्नवाह ॥ अथेति ॥ गुरवइत्यस्यतात्पर्यंतच्छिष्यतये-
त्यादिज्ञानदातुरेवगुरुत्वंसुप्रसिद्धमितिभावः । सर्वथातीत्यस्यतात्पर्यंनिरुपाधिकेति ॥ परमाप्तत्वंदर्शयन्निति ॥
दर्शितमित्यनेनवाक्यार्थतात्पर्यज्ञानस्यविप्रलंभकत्वेज्ञानोपदेशायप्रेरणायोगोनिहितमित्यनेनविप्रलंभकत्वस्यकृतमिदंभाष्य
मित्यनेनविवक्षाकर्णपाटवयोरुक्तत्वादितिभावः । व्यवहितत्वादन्वयप्रदर्शनपूर्वकंव्याचष्टे ॥ यस्येत्यादिना ॥
दिव्यानीत्यस्यार्थः क्रीडादिगुणयुक्तानीति हराविति सप्तमीत्याशयेनोक्तं हरिविषयतयेति तच्छब्दार्थोमूलरूप
मिति बडित्यस्यार्थोबलात्मकमिति ॥ इत्थंभूतमेवबलाद्यात्मकमेवरूपत्रयावतारप्रेरितमित्यनेनावतारणामपिबला-

Sri Gargeshwari Digital Foundation

द्यात्मकत्वमभिप्रेति रामवचइत्यत्रकर्तरिषष्ठीमभिप्रेत्याह ॥ रामस्यवचांसीति ॥ कर्मणिषष्ठीमभिप्रेत्याह ॥ रामविषयकवचांसीति ॥ पक्षद्वये वचांसिनयतीति वचोनयमितिव्युत्पत्तिर्दर्शिता रामवचांसियोनयतिअनेनरामवचांसिनयोयस्यतदितिबहुव्रीहिरित्युक्तं । साधकोरामावाक्यानामित्यर्थत्रयानुगुणप्रमाणसद्भावात् रामस्यामृतस्वरूपस्यवचस्तेनानयंतहीत्याद्यद्वितीययोर्विशेषप्रमाणप्रमितत्वाच्चेतिभावः । पृक्षशब्दार्थमाह ॥ कुरुपृतनेति ॥ कुरुसैन्येत्यर्थः ॥ पृतनाक्षयकारित्वात्पृक्षइत्युच्यतेबुधैरितिप्रमाणादितिभावः । मध्वत्यानंदउद्दिष्टोवेतिज्ञानमुदाहृतमितिप्रमाणानुसारेणमध्वशब्दार्थमाह ॥ आनंदरूपस्येति ॥ मधुवइतिवक्तव्येडकारलोपान्मध्वइतिसाधु यथा ॐ सुवरितिवक्तव्येस्वरितिऋग्वेदिनांपाठः अथायंसमापितव्याख्यानोजयतीर्थमुनिर्मंगलादीनिमंगलपध्यानिमंगलानिशास्त्राण्यायुष्मत्पुरुषकाणिभवंतीत्युक्त्या अंतेपिमंगलमाचरन्स्वीकृतमुख्यफलत्वेनभागवत्प्रीतिमाशास्ते ॥ उत्पत्तीति ॥ यस्यगुणगणाकरस्यकरुणाख्यपीयूषेणवारांनिधेःसमुद्रस्याज्ञयारमाब्रह्मादिसर्वजगतउत्पत्तिस्थितिसंहृतिमुखाःअष्टभवाधर्माःक्वचिद्व्यस्ताःविस्तृताःक्वचित्समस्ताःनिरस्ताशेषदोषनिकरोयेनासौनारायणः अनेनभाष्यव्याख्यानेन प्रीतःसंतुष्टोस्वित्यर्थः ॥ नन्वानंदतीर्थभगवद्वचसांविशिष्टव्याख्यानकर्मणिसुराद्यधिकारिणोत्रेतितत्वनिर्णयांतेस्वेनोक्तत्वात्कथमिदंभाष्यव्याख्यानमित्याशंकांपरिहरन्व्याख्यानप्रसक्तिंस्वाहंकारंप्रशमयति ॥अगाधबोधैरिति ॥ देवादिभिर्विवृतोऽत्यंतभावोयस्यतस्यभाष्यानुवादेनानुसृत्यवादनेव्याख्यानेनेतियावत् अत्रदृष्टांतमाह ॥ नाहिति ॥ मंदधनैःदरिद्रैः स्वकृतग्रंथस्यतत्वप्रकाशिकानामकरणेप्राप्तकौमुदीसाम्यमुपपादयन्नवांतरप्रयोजनंचाह ॥ मध्वेति ॥ विष्ण्वाद्यखिलतत्वप्रकाशकरीमध्वाख्यदुग्धाब्धिव्याख्येदूदिताग्रंथाक्यकौमुदीसज्जनाख्यकुमुदानामानंददायिनीभूयादित्य

शेषप्रतिमंगलं ॥ संपूर्णगुणनिर्दोषरूपिणेमुक्तिदायिने वेदगम्यायरामायनमःश्रीपतयेसदा ॥ १ ॥ तत्वप्रकाशिकासंस्थवाक्यार्थमणिमंजरी प्रियतांहृदयेधृत्वासदयेमध्ववल्लभः ॥ २ ॥ तत्वप्रकाशिकाव्याख्यालब्धपुण्यमनुत्तमं प्राप्यास्मद्गुरवःप्रीताःक्रियासुःकरुणांमयि ॥ ३ ॥ इतिश्रीमत्तत्वप्रकाशिकावाक्यार्थमंजर्यांशर्कराश्रीनिवासविरचितायांचतुर्थाध्यायस्यचतुर्थःपादः समाप्तः ॥ ॥ ॥ ॥

एतत्पुस्तकं आनंदसागराख्य मुद्रणालये वेणुग्रामे मुद्रयित्वा
सप्तषष्ट्युत्तराष्टदशशततमाब्दिकराजनियमानुसारतः पुनर्मुद्रणाधिकारे प्रकाशयित्रा
स्वायत्तीकृतमस्ति.

SGDF
Sri Gargeshwari Digital Foundation

॥ इति श्रीमतत्वप्रकाशिका वाक्यार्थमंजर्यां ॥

॥ चतुर्थाध्यायः समाप्तः ॥

SGDF
Sri Gargeshwari Digital Foundation

जाहिरात.

वैष्णवमान्य संस्कृत पुस्तकगळु.

	रु.	आ.
श्रीमन्महाभारत सटीक	३०	
मध्वाचार्य सर्वमूल विषय	५३.	१२
विजयध्वजी भागवत सटीक	९	
वाल्मिकीरामायण सटीक	८	
गीताभाष्य सटीक	८	
हरिवंश सटीक	६	
श्रीमन्महाभारत तात्पर्य निर्णय (जनार्दनी टीकासमेत.)	४	८
श्रीमद्भागवत तात्पर्यदीपिका सटीक	४	८
तत्वप्रकाशिका ब्रह्मसूत्र भाष्य	४	
मध्वविजय सटीक	४	
रुग्मिणीशविजय सटीक	३	
श्रीसंग्रह रामायण सटीक ७ कांड	३	
विष्णुपुराण सटीक	३	
श्रीमद्ब्रह्मसूत्रभाष्य भावप्रदीप	३	
गीता सव्याख्यान वैष्णवी टीका	२	८
तंत्रसार छलारी सटीक	२	
नारायणभट्टी समंत्रक	२	
स्मृत्यर्थ सागर (छलारी)	१	१२
ब्रह्मसूत्र भाष्य (स्थूलाक्षर)	१	४
तीर्थप्रबंध सटीक	१	८
भागवत चंपू	१	८
गरुडपुराण ब्रह्मकांड मूल	१	८
" प्रेतकांड	१	
श्रीऋग्यजुर्वेदी वैष्णवान्हिक १०५ विषयगळु	१	८
कृष्णयजुर्वेदी ब्रह्मकर्म १०० विषय	१	८
श्रीविष्णुरहस्य	१	४
सुंदरकांड रामायण मूल	१	
मणिमंजरी सटीक (छलारी)		१०
मध्वविजय मूल (स्थूलाक्षर)		८
भविष्योत्तरपुराण वेंकटेश म०		१२
सारोद्धार कार्तीकमाहात्म्य		८

श्रीनिवास वासुदेव हूइलगोळ, बुकसेलर, बेळगांव—इलाखा मुंबई.

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

॥ इति तत्वप्रकाशिकाव्याख्या शर्करा संपूर्णा ॥

Sri Gargeshwari Digital Foundation